University of Mysore

Oriental Research Institute Publications

SANSKRIT SERIES No. 100

GENERAL EDITOR:

SRI H. DEVEERAPPA, M.A.,

Director, Oriental Research Institute, Mysore

श्री नीलकण्ठशिवाचार्यविरचितः

क्रियासारः

(पञ्चदशादिएकात्रिंशदुपदेशान्तः तृतीयो भागः)

THE KRIYĀSĀRA

OF

SRI NĪLAKANTHA SIVĀCĀRYA

Vol. III

(*15 to 31 Upadeśas*)

EDITED BY:

VIDWAN S NARAYANASWAMY SASTRI

Senior Pandit, Oriental Research Institute, Mysore

MYSORE:

PRINTED BY THE DEPUTY DIRECTOR AT THE GOVT. BRANCH PRESS

1958

PREFACE

"KRIYĀSĀRA" is a well-known work in thirty-one Upadeśās or discourses on Vīraśaiva Philosophy in particular and Śaiva religion in general by Nīlakaṇṭha Śivācārya.

The author mentions Vidyāraṇya (1340 A.D.), the author of vedabhāṣya and is quoted by Mallaṇārya (1530 A D.) in "Vīraśaiva Mahāpurāṇa." Hence it may be presumed that he might have lived during the latter half of the fourteenth century or in the beginning of the fifteenth century. From the introduction of the work it is learnt that he was the son of Mallayadeva and Channamāmbā. As these names themselves indicate, the author hails from Karṇāṭaka or from Andhra. There is no doubt that he has been greatly influenced by the historical Vīraśaiva movement headed by Sri Basaveśwara and supported by Sri Prabhudeva during the latter half of the twelfth century. The Vīraśaiva religion is described by the author as the highest of the seven schools of Śaivism. ("Pārameśwara Tantra", 1 ; 14-15.)

In the first volume of Kriyāsāra, the aphorisms of Bādarāyaṇa (Brahmasūtrās) are interpreted appropriately in accordance with the tenets of Vīraśaivism. The author has based this portion of the work on Nīlakaṇṭha Bhāṣya of Nīlakaṇṭha which is not extant now. The second volume deals with the manner of performing Śivapūja, emphasising

the importance of Vibhūti, Rudrākshi and so on. This volume as also the third one (Up. 5-31) is based mainly on the 28 Śaivāgamas and eleven Śivapurāṇas.

The present volume being the third in the series consists of seventeen discourses (15-31) relating to "Aṣṭāvaraṇa"—Guru, Linga, Jangama, Prasāda, Pādōdaka, Vibhūti, Rudrākṣhi and Mahāmantra—which are the eight aids in the Vīraśaiva way of worship and ṣaṭsthalas (Bhakta, Maheśa, Prasādi, Prāṇalingi Śaraṇa and Aikya), the six progressive stages of the Vīraṣaiva devotee to become one with Śiva. The mode of worship according to other Śaiva schools also has been given proper place in the work.

Sri Nīlakaṇṭha has made a signal contribution to the field of the philosophy of Śivādwaita (Vīraśaivism) in interpreting the Brahmasūtras of Bādarāyaṇa on the authority of both the Āgamas and Vēdas, as he himself has stated **निगमागमवर्त्मनां अविशेषेण प्रामाण्यं** in the beginning of the work itself. According to the Śivādwaita of the Vīraśaivās the world is not an illusion; the Vēdas are not the sole authority in interpreting the relation of Śiva, Jīva and Jagat. In these two respects and many other minor ones, the Śivādwaita philosophy differs from that of Sri Śankarācārya.

Though some of the views held by this author may not be acceptable to all the Vīraśaiva philosophers, he is no doubt considered as one of the authorities on Vīraśaivism. To quote only one instance, temple worship is denounced by the great Vīraśaiva vacana writers of Kalyāṇa.

The press copy of this volume was originally based on the work printed in Āndhra characters with variants marked in the margin by Sri Sirasi Guruśānta Śāstri, Professor of Śaktiviśiṣṭādwaita Philosophy, Sanskrit College, Bangalore. After the publication of the first volume, two more paper manuscripts were secured, and the variant readings relating to the first volume are given in the appendix of the present volume.

The editing of this work was originally entrusted to Sri R. Rāma Śāstri, Pandit of the Institute. And he prepared the press-copy on the basis of a single printed book mentioned above. This work was subsequently entrusted to Sri S. Nārāyaṇaswāmy Śāstri, senior Pandit of the Institute, who has ably and critically edited the work.

My thanks are due to His Holiness Sri Cannabasava Swamīji of the Virakta Mutt of Byādgi and to the authorities of the Vīraśaiva Śivayoga Mandira of Bijapur District for lending their manuscripts and to Panditaratnam Mahāvidwān Sri Sirasi Guruśānta Śāstri for having lent his printed copy of the work with his personal comments on the text.

My thanks are also due to the Deputy Director of Printing and Stationery, Government Branch Press, Mysore, for getting the work printed in time and in an efficient manner.

H. DEVEERAPPA,
Director,
Oriental Research Institute,
Mysore.

श्रीः

श्रीदक्षिणामूर्तये नमः

भू मि का

अरुणकनकवर्णं पद्मसंस्थं च गौरी-
हरनियमितचिह्नं सौम्यतानूनपातम् ।
भवतु भवदभीष्टप्राप्तये पाशटङ्का-
भयवरदविचित्रं रूपमर्धाम्बिकेशम् ॥

श्रीमन्त्रमूर्तये तुभ्यं शिवाय शिवदायिने ।
नमः श्रीगुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥

*वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिनी ।
तस्यां रमन्ते ये शैवा वीरशैवाः प्रकीर्तिताः ॥ क्रियासारे १-१

वीशब्दो वा विकल्पार्थो रशब्दो रहितार्थकः ।
विकल्परहितं शैवं वीरशैवं प्रचक्षते ॥ क्रियासारे १-२

विरोधार्थो वीशब्दः स्यात् रशब्दो रहितार्थकः ।
विरोधरहितं शैवं वीरशैवं विदुर्बुधाः ॥ क्रियासारे १-३

इत्युक्तप्रकारेण शिवजीवैक्य (लिङ्गाङ्गसामरस्य) बोधकविद्या-निरतत्वं वीरशैवत्वम् । अत्र वस्तुतो जीवस्य परशिवाभिन्नत्वेऽपि यावदपरोक्षज्ञानमनादिवासनया अनुवर्तमानं रूपभेदज्ञानमस्त्येवेति शिवश्च जीवश्चेति भेदघटितद्वन्द्वसमासस्य नानुपपत्तिः, न वा शिवजीवयोः परस्परं भेदाभेद इति सिद्धान्तविरोधः ॥

अथवा—निश्चयरूपाङ्गावबद्धबुद्धिनिरतत्वं वीरशैवत्वम् । उत्कृष्टे निकृष्टबुद्धिर्निकृष्टे चोत्कृष्टबुद्धिरङ्गावबद्धबुद्धिः । प्रकृते चासर्वज्ञत्वादिना अपकृष्टे जीवे उत्कृष्टशिवबुद्धिः । तथा च

---

* वी गतिप्रजनव्याप्तिकान्त्यसनखादनेष्विति धातोर्निष्पनो वीशब्दः ।

स्वस्मिन् निर्विचिकित्सस्वावधिकोत्कृष्टत्वाश्रयशिवज्ञानवत्त्वं वीरशैवत्वमित्यर्थः ॥

यद्वा - अविरुद्धजीवशिवैक्यज्ञानवत्त्वं वीरशैवत्वम् । यथा लोके राजपुरुषे राजबुद्धिर्विरुद्धा, राज्ञि च राजबुद्धिरविरुद्धा, एवं वस्तुतः शिवाभिन्ने यावत्प्रत्यक्ष(यावदपरोक्ष)ज्ञानमनुवर्तमानभेदवति जीवे यत् शिवैक्यज्ञानं तदविरुद्धमित्यर्थः ॥

अत्र ज्ञानशब्देन समाधिरूपा विद्योच्यते । सा च हार्ददृश्यानुविद्धसमाधिः, हार्दशब्दानुविद्धसमाधिः, बाह्यदृश्यानुविद्धसमाधिः, बाह्यशब्दानुविद्धसमाधिः, हार्दनिर्विकल्पकसमाधिः, बाह्यनिर्विकल्पकसमाधिरिति षड्विधा ॥

हार्दकामसंकल्पादौ तत्साक्षित्वेन अत एव तद्भेदेन तद्विरुद्धत्वेन च यदात्मज्ञानं जायते सः हार्ददृश्यानुविद्धसमाधिः । आत्मा सच्चिदानन्दरूप इति शाब्दज्ञानानन्तरं शब्दार्थस्वरूपस्यात्मनः शब्दाद्भिन्नत्वेन यदनुसन्धानं स हार्दशब्दानुविद्धसमाधिः ॥

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

इत्युक्तप्रकारेण बाह्यभौतिकधर्मतया प्रतीयमानेषु पञ्चसु धर्मेषु नामरूपात्मकधर्मद्वयाद्भौतिकाद्भेदेन अस्ति भाति प्रियमिति प्रतीतिगोचराणां त्रयाणां ब्रह्मांशानां यदनुसन्धानं स बाह्यदृश्यानुविद्धसमाधिः । अखण्डसच्चिदानन्दस्वरूप आत्मेति शब्दविशेषेण विशिष्टान्तःकरणधर्मरूपं यज्ज्ञानं स बाह्यशब्दानुविद्धसमाधिः ॥

"अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्" (श्वेता. ६–१९) इति श्वेताश्वतरश्रुत्युक्तप्रकारेण पूर्वोक्तसमाधिचतुष्टयस्य परिपाकरूपा याऽवस्था जीवन्मुक्तिरूपा सा हार्दबाह्योभयनिर्विकल्पकसमाधिः । अस्यां चावस्थायां आत्मनस्तनुत्रयावच्छिन्नत्वेऽपि अखण्डैकरससच्चिदानन्दस्वरूपपरमशिवैक्यानुसन्धानमहिम्ना दग्धपटवत् भर्जितबीजवत् गजभुक्तकपित्थवत् यथावदनुवर्तमानानां स्थूलसूक्ष्मकारणशरीराणां धर्मैरश्लेष एव । अत्र निर्विकल्पकसमाध्यवस्थायां जीवशिवयोरभेदः ततः पूर्वावस्थायां परस्परं भेदश्चेति भेदाभेदरूपसिद्धान्तोपपत्तिः ॥

एवंलक्षणलक्षितानां,

वीरशैवं तथानादिशैवमादिपदं ततः ।
अनुशैवं महाशैवं योगशैवं तु षष्ठकम् ॥
सप्तमं वीरशैवाख्यं तत्र सर्वोत्तमोत्तमम् ।
वीरशैवमितीशानि तदङ्गानीतराणि तु ॥

(पारमेश्वरतन्त्रे १, १४-१५)

इत्येवंप्रकारेण सप्तधा भिन्नेषु शैवेषु सर्वोत्तमत्वेन परिगणितानां सामान्यविशेषनिराभाररूपभेदभिन्नानां वीरशैवानामितरेषां च शैवानां तत्तन्मतसिद्धदीक्षादितत्त्वानां सम्यक्प्रतिपादकत्वेनात्यन्तमुपकारकोऽयं क्रियासाराख्यो ग्रन्थः । तत्र चतुर्दशोपदेशान्तो ग्रन्थः भागद्वयात्मना पूर्वं प्रकटितः । इदानीमवशिष्ट एकत्रिंशोपदेशान्तस्तृतीयो भागः प्रकटीक्रियते । अस्मिन्ग्रन्थे प्रतिपाद्यमानेषु मुख्यतया भक्तिज्ञानवैराग्यलिङ्गाङ्गसामरस्यषट्स्थलप्रणवगुरुलिङ्गजङ्गमाष्टावरणपञ्चाचारादिविषयेषु यथामति किंचिदत्र लिख्यते ॥

तत्र भक्तिर्नाम सच्चिदानन्दरूपे शिवे शिवभक्तेषु च निरतिशयः प्रेमविशेषः । एवं रूपा भक्तिः शैवमतसाधारणी । वीरशैवमतासाधारणी भक्तिस्तु अनुभवसूत्रे एवं प्रतिपादिता—(द्वितीयाधिकरणे श्लोकाः—१९-३२)

यथा स्थलं द्विधाभूतं तथा शक्तिर्द्विधा भवेत् ॥
शक्तिरप्रतिमा साक्षाच्छिवेन सहधर्मिणी ।
साक्षिणी सत्यसम्पूर्णा निर्विकल्पा महेश्वरी ॥
सा शक्तिर्द्विविधा भूता स्वस्वातन्त्र्यबलेन तु ।
समानधर्मिणीत्वेन विभक्ता भक्तवत्सला ॥
लिङ्गस्थलाश्रया काचित्काचिदङ्गस्थलाश्रया ।
लिङ्गस्थलाश्रया शक्तिः कलारूपा प्रकीर्तिता ॥
अङ्गस्थलाश्रया शक्तिर्भक्तिरूपा भयापहा ।
यथा महानलज्वाला विभक्ता दीपिकाकृतिः ॥
तथा माहेश्वरी शक्तिर्विभक्ता भक्तिरूपिणी ।
ज्वाला तमस्विनी यस्माद्दीपिका सुप्रकाशिनी ॥

तस्मात्सवासना शक्तिर्भक्तिर्निर्वासना मता।
भक्तिर्महत्तरा शुद्धा सुसूक्ष्मा शोभना परा॥

सच्चिदानन्दरूपा स्याद्भक्तिर्मुक्तिफलप्रदा।
शक्तिरेव स्मृता भक्तिर्भक्तिरेव हि सा सदा॥

शक्तिभक्त्योर्न भेदोऽस्ति परमार्थनिरूपणे।
शक्तिः प्रवृत्तिराख्याता निवृत्तिर्भक्तिरीरिता॥

शक्तया प्रपञ्चसृष्टिः स्याद्भक्तया तद्विलयो मतः।
शक्तिवैचित्र्यतो रूपं नीरूपमपि याति हि॥

भक्तिवैचित्र्यतो रूपमपि नीरूपतामियात्।
प्रपञ्चवृद्ध्यपेक्षा हि शक्तेः स्वाभाविको गुणः॥

प्रपञ्चसंक्षयापेक्षा भक्तेः स्वाभाविको गुणः।
अधोमुखी भवेच्छक्तिर्भक्तिरूर्ध्वमुखी भवेत्॥

समाया शक्तिराख्याता निर्माया भक्तिरीरिता।
अपि तर्कप्रमाणाभ्यां शक्तेर्भक्तिर्गुणाधिका॥

उपास्यत्वं भवेच्छक्तया भक्तयोपासकता भवेत्।
तस्माल्लिङ्गस्थले शक्तिर्भक्तिरङ्गस्थले स्थिता॥ इति॥

एवंविधा भक्तिः सामान्यतो बाह्याभ्यन्तरभेदेन द्विविधा। तत्र वीरशैवेतरशैवप्रभेदेषु रत्नसिंहासनादौ लिङ्गं प्रतिष्ठाप्य तस्मिन्नेव ध्यानावाहनादिषोडशोपचारपूजा सुप्रसिद्धा। वीरशैवमते तु 'पाणिमन्त्रं पवित्रम्' 'सर्वाननशिरोग्रीवः' 'यो हस्तपीठे निजलिङ्गमिष्टम्' इत्यादिश्रुतिस्मृतिभ्यः करपीठ एवेष्टलिङ्गं विन्यस्य पूजनं बाह्या भक्तिरित्युच्यते। हृत्कमलकर्णिकामध्ये प्राणलिङ्गं संचिन्त्य मानसिकपूजासामग्रीभिरर्चनमाभ्यन्तरा भक्तिरित्युच्यते। अयमंशः सिद्धान्तशिखामण्यादौ बहुधा प्रपञ्चितो दृश्यते॥

एवंविधभक्तिसिद्ध्यर्थं संसारदावानलदन्दह्यमानः संसारनाशकरं महालिङ्गं जिज्ञासुः शिष्यः 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इत्यादिश्रुत्युक्तप्रकारेण श्रीगुरुमुपेयात्। तदुक्तं सिद्धान्तशिखामणौ श्रीरेणुकभगवत्पादोक्ते—

ततो विवेकसम्पन्नो विरागी शुद्धमानसः ।
जिज्ञासुः सर्वसंसारदोषध्वंसकरं शिवम् ॥
उपैति लोकविख्यातं लोभमोहविवर्जितम् ।
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ॥
शिवसिद्धान्ततत्त्वज्ञं च्छिन्नसन्देहविभ्रमम् ।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ॥
कुलक्रमागताचारं कुमार्गाचारवर्जितम् ।
शिवध्यानपरं शान्तं शिवतत्त्वविवेकिनम् ॥
भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम् ।
त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकम् ॥
लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम् ।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम् ॥
लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम् ।
सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः ॥ इति ॥
भो कल्याण महाभाग शिवज्ञानमहोदधे ।
आचार्यवर्य सम्प्राप्तं रक्ष मां भवरोगिणम् ॥ इति च ॥

अथ करुणासागरः श्रीगुरुः स्वसन्निधिमागतं सर्वशिष्यलक्षणलक्षितं शिष्यं "शक्तिपातं समालोक्य दीक्षया योजयेदमुम्" इत्युक्तप्रकारेण शक्तिपातमवलोक्य दीक्षाङ्गकुण्डमण्टपपञ्चकलशादिकं यथाविधानं संविधाप्य मलत्रयविनाशपूर्वकशिवकलासमावेशरूपक्रियादीक्षया, त्यागाङ्गापरनामकस्थूलाङ्गावच्छिन्ने जीवे इष्टलिङ्गं संयोज्य जीवात्मनि भुवनाध्वादिषडध्वशोधनपूर्वकपञ्चाक्षरीमहामन्त्रोपदेशरूपया मन्त्रदीक्षया, भोगाङ्गापरनामकसूक्ष्माङ्गावच्छिन्ने जीवे प्राणलिङ्गं संयोज्य हस्तमस्तकसंयोगरूपवेधादीक्षया, योगाङ्गापरनामककारणाङ्गावच्छिन्ने जीवे भावलिङ्गं संयोज्य तत्त्वमस्यादिमहावाक्यप्रतिपादितषट्स्थलात्मकब्रह्मसाक्षात्कारकारणीभूतां शिवाद्वैतविद्यामुपदिशति । अयं च प्रकारः क्रियासारे त्रयोदशोपदेशे—

शाम्भवी चैव शाक्ती च मान्त्रिकी च शिवागमे ।
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ॥

इत्यादिना सुस्पष्टं प्रत्यपादि ॥

एवं शिवदीक्षामापन्नः शिष्यः स्वगुरूपदिष्टमार्गेण लिङ्गार्चनं कुर्वन्, शास्त्रतो गुरुसहायेन च लिङ्गाङ्गसामरस्यज्ञानं सम्पाद्य शिवोऽहं भावनया अवतिष्ठेत्।

लीनार्थगमकं लिङ्गमन्यदङ्गमुदीरितम्।
लिङ्गाङ्गयोः सामरस्यं जीवब्रह्मैक्यलक्षणम्॥ क्रियासारे १९-२

इत्युक्तप्रकारेण लीनस्यार्थस्य गमकं, सर्वव्याप्तस्यापि सच्चिदानन्दलक्षणस्य परमशिवस्य विशेषतोऽभिव्यक्तिस्थानं, लिङ्गरूपोपाध्यवच्छिन्नः परमात्मा शिव इत्यर्थः, अं परमात्मानं गच्छतीत्यङ्गं जीवः, तयोः सामरस्यं सम्बन्धः समरसभावः ऐक्यम्। इदमेव लिङ्गाङ्गसामरस्यं "तत्त्वमसि" (छान्दोग्ये-६-८-७) "तत्त्वमेव त्वमेव तत्" (कैवल्ये) इत्यादिश्रुत्योपदिश्यते। तदुक्तं वीरमाहेश्वरप्रशंसायाम्—(पुटसंख्या १२)—

लिङ्गरूपो महादेवः सच्चिदानन्दलक्षणः।
अङ्गरूपो हि जीवात्मा भवभारनियन्त्रितः॥

तत्पदेनोच्यते सद्भिर्लिङ्गरूपः सदाशिवः।
त्वंपदेनाङ्गरूपो हि जीवः संसारलक्षणः॥

त्वमर्थोऽङ्गस्वरूपो यः सोऽहं शब्दार्थ एव हि।
त्वमहंपदलक्ष्यार्थश्चिद्रूपः परमेश्वरः॥

त्वमहं पदवाच्यार्थस्यैव देहादिवस्तुनः।
न तच्छब्दार्थतास्त्येव विरुद्धत्वात्सदैव हि॥

त्वमहंपदलक्ष्यार्थो जीवात्मा चाङ्गरूपकः।
अशिवश्चेत्सदानन्दस्ततो नैव शिवो भवेत्॥

जगच्चराचरं यत्तत्सत्यं पूर्णं चिदात्मकम्।
शुद्धं तदङ्गरूपो हि तत्त्वमर्थो न संशयः॥

तत्त्वंपदार्थौ लिङ्गाङ्गरूपेऽन्योन्यविरुद्धकम्।
उपाधिकृतवाच्यार्थं त्यक्त्वा, सच्चित्सुखात्मकम्॥

लक्ष्यार्थमविरुद्धं यच्छिवं तदिति या मतिः।
सा संबन्ध इति प्रोक्तो वेदान्तागमवेदिभिः॥

इत्यादिना॥

क्रियासारेऽपि १५०-१५१ तमपुटयोः—

वीरत्वमेकतानत्वं श्रौतत्वं नातिरिच्यते ।
एकमेवाद्वितीयं चेत्यादिनैवं निवेदितम् ॥ इति ॥

एकं ब्रह्मेति निर्णीय जीवब्रह्मैक्यमुच्यते ।
तदेव सामरस्यं च मयापि प्रतिपादितम् ॥ इति च ॥

इदमेव सामरस्यं चतुर्विधासु मुक्तिषु चरमा सायुज्यमुक्तिरिति गीयते । इतरासां सालोक्यादीनां तिसृणां मुक्तीनां देवतान्तरभजनसाध्यत्वसंभवेऽपि सायुज्यरूपा मुक्तिः शिवभक्त्येकसाध्येति वीरशैवानां सिद्धान्तः । अत्र वस्तुतः परमशिवाद्भिन्नस्यापि जीवस्य—

[1]वह्निदग्धपदार्थानां पूर्वावस्था न दृश्यते ।
शिवध्यानात्तथा जीवो न पुनर्भावमश्नुते ॥

शुक्तिलग्धजलं लोके मौक्तिकं भवति ध्रुवम् ।
भक्तिसंयुक्तजीवो हि शिवो भवति नान्यथा ॥

रसवेधाद्यथा ताम्रं काञ्चनं भवति ध्रुवम् ।
गुरोः कटाक्षवेधेन जीवो भवति शङ्करः ॥

इत्याद्युक्तप्रकारेण तदभेदो न विरुध्यते । अयमेव "लिङ्गाङ्गसंबन्धी, जीवन्मुक्तः, योगी, सर्वज्ञः" इत्यादिशब्दैर्व्यवह्रियते । एवंभूतेन लोकसङ्ग्रहार्थं क्रियमाणं कर्म पुण्यपापादिकं लिङ्गधारणवैभवात् एनं न स्पृशति स्वप्नकालकृतमिव पापम् ।

एवं लिङ्गैक्यज्ञानं प्रति मुख्यसाधनभूता भक्तिः, तद्युक्तो भक्तः षट्स्थलेषु प्रथमः ।

स्थाणौ सर्वाश्रयेऽनन्ते सच्चिदानन्दलक्षणे ।
यस्मिन्ब्रह्मणि लीयेत प्रपञ्चस्तत्स्थलं स्मृतम् ॥
(क्रियासारे तृतीये भागे ११९ तमे पुटे)

इत्युक्तप्रकारेण सर्वेषां भूतानां स्थानभूतत्वात् लयाधारभूतत्वाच्च स्थीयते लीयते यस्मिन्परे ब्रह्मणि सच्चिदानन्दरूपे शिवे

---

[1] अयमंशः क्रियासारे १३२ तमे पुटे स्पष्टं निरूपितः.

सर्वाणि भूतानीति व्युत्पत्त्या स्थलं ब्रह्म। वस्तुत एकमेव तत्स्थलं स्वशक्तया भक्तो महेश्वरः प्रसादी प्राणलिङ्गी शरणः ऐक्यमिति षोढा व्यवह्रियते।

१. श्रुतिस्मृत्यागमोक्तेषु सदाचारेषु लिङ्गे जङ्गमे विभूति-रुद्राक्षधारणे च दृढा भक्तिर्यस्य स श्रद्धाभक्तियुतः भक्तस्थलम्।

२, चित्तशुद्धियुतः परधनादिकं वर्जयित्वा सर्वदा स्वेष्ट-लिङ्गविषयकमानसः निष्ठाभक्तियुतः माहेश्वरस्थलम्।

३. लिङ्गार्पितपदार्थमात्रस्वीकर्ता तदनर्पितविवर्जी साव-धानभक्तियुतश्च प्रसादिस्थलम्।

४. लिङ्गे प्राणं प्राणे लिङ्गं च समाधाय सुखदुःखादिरहितः सन् यो वर्तते अनुभावभक्तियुतः स प्राणलिङ्गिस्थलम्।

५. लिङ्गे पतित्वबुद्धिं आत्मनि सतीत्वबुद्धिं च कल्पयित्वा उभयोर्निरन्तरयोगे सत्यपि प्रापञ्चिकसुखानभिलाषः आनन्दभक्ति-युतश्च शरणस्थलम्।

६. कामाद्यरिषड्वर्गरहितः निर्भावत्वात् मृडो भव इत्याद्यष्ट-विधभावपुष्पार्चनमकुर्वाणः शिखिकर्पूरयोग इव अखण्डसच्चिदा-नन्दपरिपूर्णाविरलपरंज्योतिनिजलिङ्गैक्यमापन्नश्च ऐक्यस्थलम्।

एवमुक्तेषु षट्सु स्थलेषु पूर्वं पूर्वमुत्तरोत्तरं प्रति साधनम्। उत्तरोत्तरस्थलमापन्नः पूर्वं पूर्वं प्रविलापयेत्। एतादृशं षट्स्थलं क्रमशोऽभ्यस्यतो वीरमाहेश्वरस्य सच्चिदानन्दरूपपरमशिवसायुज्य-लक्षणा चरमा कैवल्यमुक्तिः करगतैव। सगुणोपासकानां शैवानां तु सोमलोकं गत्वा तत्रत्यसगुणमूर्त्या स्वस्यामेदं भाव-यित्वा (चतुरश्रादिपात्रस्थितशुद्धजलप्रक्षिप्तक्षीरवत्) अनन्तरं पात्रस्थजलेनैकीभूतस्य क्षीरस्य क्षीरसमुद्रस्थितक्षीरे प्रक्षेपवत् सोमलोकविशेषस्थितेन परशिवेनैकीभावः। तत्रापि क्षीरयोरेवा-मेदः, न तु पात्रसमुद्ररूपस्थानविशेषयोः। इति निर्गुणो-पासकानां साक्षान्मुक्तिः, सगुणोपासकानां परम्परया, केवलं श्रौतस्मार्तादिकर्मरतानां शैवानां चित्तशुद्धि भक्ति लिङ्गाङ्गसामरस्य-ज्ञान षड्स्थलज्ञान परम्परया विलम्बिता मुक्तिः।

आचारादिलिङ्गानां भक्तादिस्थलानां च संबन्धः क्रियासारे चतुर्विंशोपदेशे—

आचारलिङ्गं प्राणाख्यं भक्तस्थलसमाश्रयम् ॥
निवृत्तिकलयोपेतं गन्धग्रहणसाधनम् ।
गुरुलिङ्गं तु जिह्वाख्यं महेशस्थलसंश्रयम् ॥

प्रतिष्ठाकलयोपेतं रसग्रहणसाधनम् ।
शिवलिङ्गं तु नेत्राख्यं प्रसादिस्थलसंश्रयम् ॥

तद्विद्याकलयोपेतं रूपग्रहणसाधनम् ।
त्वगाख्यं जङ्गमं लिङ्गं प्राणलिङ्गस्थलाश्रयम् ॥

शान्त्याख्यकलयोपेतं स्पर्शग्रहणसाधनम् ।
प्रसादलिङ्गं श्रोत्राख्यं शरणस्थलसंश्रयम् ॥

शान्त्यतीतकलोपेतं शब्दग्रहणसाधनम् ।
मानसं तु महालिङ्गमैक्यस्थलसमाश्रयम् ॥ इति।

सा च भक्तिः जन्मसहस्रार्जितपुण्यपरिपाकवशात्,

यो हस्तपीठे निजलिङ्गमिष्टं
विन्यस्य तल्लीनमनःप्रचारः।
बाह्यक्रियासंकुलनिस्पृहात्मा
संपूजयत्यङ्ग स वीरशैवः ॥

(शंकरसंहितायामुपरिभागे ८४-३६)

सा वीरमाहेश्वरसेवया विना
शिवस्य भक्तिर्मनुजैर्न लभ्यते ।
विनास्ति भक्त्या शिववेदनं न हि
प्रधानमेतच्छिवभक्तपूजनम् ॥ ,, ३७

यस्यैवं षट्स्थलज्ञानसामग्रीकलना दृढा।
भाति धीदर्पणे स्वच्छे स वै माहेश्वरो जनः॥ ,, ६२

संसारसागरेऽगाधे दुःखावर्तशताकुले ।
मज्जतां मनुजानां वै पूजा माहेश्वरस्य नौः ॥ ,, ६६

धृतलिङ्गं सदाचारनिरतं द्विजपुङ्गवम् ।
वीरमाहेश्वरं सम्यक् पूजयेद्भक्तिमान्नरः ॥

(शं. सं. उपरिभागे ६७)

विद्यायां रमते यस्तु मायामेतां श्ववद्रहेत् ।
अनेनैव निरुक्तेन वीरमाहेश्वरः स्मृतः ॥ ,, १०३

तस्मात्सर्वप्रयत्नेन वीरमाहेश्वरं जनम् ।
आराधयत विप्रेन्द्रा यूयं भक्तिपुरस्सरम् ॥ ,, १०४

इत्याद्युक्तप्रकारेण यस्य हृदयाम्बुजे परमशिवः प्रीत्या स्वयं सर्वदा निवसति तादृशवीरशैवस्य पूजया, निरन्तरं तत्संयोगाच्च भवति ।

वीरशैवानामितरशैवानां च सतारपञ्चाक्षरमन्त्रजपः सर्वदा अनुष्ठेयतया आगमेषु पुराणेषु च चोद्यते । तत्स्वरूपं चैवं दृश्यते (अनुभवसूत्रे-अधिकरणम् ६)

ततः पञ्चाक्षरीविद्यासाहित्यमधुनोच्यते ॥

पञ्चाक्षरी परा विद्या सतारा तु षडक्षरी ।
स्थूलसूक्ष्मादिभेदेन स्वयमेवाष्टधा स्थिता ॥

शिवमन्त्राभिधा मन्त्रमातृका लिङ्गरूपिणी ।
शिवप्रदायिनी नित्यं सर्वाङ्गेषु प्रतिष्ठिता ॥

अङ्गं नमः पदमसौ शिव एव लिङ्गं
संबन्ध एष यदयेतिपदं तदुक्तम् ।
लिङ्गाङ्गसङ्गमपदत्रयबोधनार्थं
मन्त्रोऽयमेवमभिधास्यति मन्त्रराजः ॥

नमःपदं तत्खलु जीववाचि
शिव(ः) पदं तत्परमात्मवाचि ।
अयेति तादात्म्यपदं तदेतत्
नमःशिवायेति जगाद मन्त्रः ॥

मूलाधारे नकाराख्या संस्थिता परमेश्वरी ।
अनाहते वकाराख्या सदा शैवी व्यवस्थिना ॥

विशुद्धौ तु यकाराख्या साक्षाद्विश्वेश्वरी स्थिता ।
आज्ञाचक्रे महादेवी ताराख्या समुपस्थिता ॥

आचाराख्यं नकारः स्यात् मकारो गुरुलिङ्गकम् ।
शिकारः शिवलिङ्गं स्याद्वाकारश्चरलिङ्गकम् ॥

यकारः स्यात्प्रसादाख्यमोंकारो महदुच्यते ।
षष्ठं ब्रह्म भवेत्तारं यकारः पञ्चमं भवेत् ॥

चतुर्थं तु वकारः स्यात् शिकारस्तु तृतीयकम् ।
द्वितीयं तु वकारः स्यान्नकारः प्रथमं भवेत् ॥

एवं षडक्षराण्येव ब्रह्मणि क्रमशो विदुः ।
ओंकारः परिपूर्णत्वात्त्वचि सर्वत्र तिष्ठति ॥

नकारो रुधिरे *स्थाति मकारो मांससंचये ।
शिकारो मेदसि स्थाति वकारोऽस्थिषु तिष्ठति ॥

यकारः स्थाति मज्जायां शुक्रे स्थाति षडात्मकः ।
एवं षडक्षरमयं शिववन्मूर्ति सुस्थितम् ॥

देहं ममेति यो ध्यायेत्सोऽहमेव न संशयः ।
सर्वाङ्गलिङ्गसाहित्यमेवमेव मयोदितम् ॥ इति ॥

एवंरूपस्य सतारस्य पञ्चाक्षरमन्त्रस्य जपेन भक्तः साक्षाच्छिव एव भवति । तदुक्तं क्रियासारे (८७ तमे पुटे) -

शिवस्य शिवभक्तस्य भेदो नास्ति शिवो हि सः ।
शिवस्वरूपमन्त्रस्य धारणाच्छिव एव हि ॥ इति ॥

इत्थं—

पञ्चब्रह्मात्मवदनं पञ्चसादाख्यवक्त्रकम् ।
श्रीमत्पञ्चाक्षरमयं प्रणवाकारशालिनम् ॥ क्रियासारे (१३७ तमे पुटे) इति श्लोकोक्तं शिवस्य पञ्चाक्षरमयत्वं प्रणवाकारशालित्वं चोक्तम् । सद्योजात— वामदेव— अघोर— तत्पुरुष— ईशरूपाणां पञ्चानां ब्रह्मणां क्रमेण दक्षिण— वाम— पूर्व— पश्चिम— ऊर्ध्व वक्त्रात्मकत्वं— वातुलतन्त्रे उक्तम् । पञ्चसादाख्यवक्त्रत्वं तु—

तत्त्वं मूर्तिः प्रभावश्च त्रिविधो विद्यते क्रमात् ।
शिवश्च तत्त्वमित्युक्तं मूर्तिश्चैव सदाशिवः ॥

---

* तिष्ठतीत्यर्थः.

तयोर्योगेन यद्रूपं तद्रूपं भावसंज्ञितम्। वातुले ३१-३६
सन्ततं शिवभावत्वात्सादाख्यमिति कीर्तितम्॥ वातुले १-३७

निष्कलस्य शिवस्य सदाशिवेन योगाद्यद्रूपं भवति तच्छिव-सादाख्यमित्युच्यते। तच्च—

प्रथमं शिवसादाख्यममूर्तं तु द्वितीयकम्। वातुले १-३०
तृतीयं मूर्तसादाख्यं चतुर्थं कर्तृनामकम्॥
पञ्चमं कर्मसादाख्यमुक्तं सादाख्यपञ्चकम्। ,, १-३१

इत्येवं प्रकारेण पञ्चधा भवति। तत्प्रकारश्च—शुद्धचैतन्य-रूपात् शिवात् तत्सहस्रांशतः परा शक्तिः। तत्सहस्रांशात् आदिशक्तिः। तत्सहस्रांशात् इच्छाशक्तिः। तत्सहस्रांशात् ज्ञानशक्तिः। तत्सहस्रांशात् क्रियाशक्तिः। एताश्च पञ्च शक्तयः क्रमात् शान्यतीता शान्तिः विद्या प्रतिष्ठा निवृत्तिः इत्येतासां पञ्चानां शक्तीनां पर्यायाः। पराशक्तेर्दशांशात् शिवसादाख्यं प्रथमम्, आदिशक्तेर्दशांशात् अमूर्तसादाख्यं द्वितीयम्, इच्छाशक्तेर्दशांशात् मूर्तसादाख्यं तृतीयम्, ज्ञानशक्तेर्दशांशात् कर्तृसादाख्यं चतुर्थम्, क्रियाशक्तेर्दशांशात् कर्मसादाख्यं पञ्चममिति। तत्र शुद्धं शिवसा-दाख्यं ऊर्ध्वमाननम्। अमूर्तसादाख्यं उत्तरमाननम्, मूर्तसादाख्यं पश्चिममाननम्। कर्तृसादाख्यं दक्षिणमाननम्। कर्मसादाख्यं पूर्व-माननम्।

इत्थमनेकेषां विषयाणां स्पष्टं प्रतिपादकत्वेनायं क्रियासा-राख्यो महान् ग्रन्थः वीरशैवानामत्यन्तमुपकारकः, अत एव सर्वैस्तत्तदर्थपरिशीलनपुरस्सरमत्यन्तमादरणीयः।

उपलभ्यमानेषु लिखितकोशेषु मुद्रितपुस्तके चैकत्रिंशदुपदेशा एवोपलभ्यन्ते; द्वात्रिंशोपदेशस्तु नोपलब्धः। ग्रन्थकृता तु ग्रन्थादौ "द्वात्रिंश उपदेशके। शिवमाहात्म्यकथने श्रवणे भक्ति-पूर्वकम्। श्रेयः परंपरावाप्तिः" इति द्वात्रिंशोऽप्युपदेशः प्रतिज्ञातो दृश्यते। अत्रास्मदभिप्रायः—चतुर्दशोपदेशे ३८३ तमे पुटे 'वसद्धिर-स्मिञ्शिरभूधरे यः' इत्यादिः ३८५ तमे पुटे 'ज्ञानी परं गच्छति' इत्यन्तः, तथा४७० तमे पुटे 'व्रतानि चीर्णानि' इत्यादिः ४८४ तमे

पुटे मुक्तोऽनवद्ये भवेत्' इत्यन्तश्च ग्रन्थभागः ग्रन्थकृत्प्रतिज्ञातार्थकत्वात्, चतुर्दशोपदेशमध्ये एतदंशस्य नात्यावश्यकत्वात्, प्राचीनलिखितपुस्तकानां विशकलितपत्राणां कदाचिदनवधानादिना पौर्वापर्यव्यतिक्रमस्य संभावितत्वाच्चोपरि निर्दिष्टो भागः द्वात्रिंशोपदेशः स्यादिति ॥

एतद्ग्रन्थशोधनार्थं आदर्शपुस्तकसमर्पणेन अतीवोपकृतवतां ब्याडगि श्रीविरक्तमठाधिपतीनां श्रीचन्नबसवस्वामिनाम्, बीजापुर श्रीमद्वीरशैवशिवयोगमन्दिराधिपतीनाम्, कल्याणपुरीस्थसंस्कृतमहापाठशालायां श्रीशक्तिविशिष्टाद्वैतवेदान्तप्रधानाध्यापकपदमलंकुर्वाणानां पण्डितरत्नं आस्थानमहाविद्वान् ब्रह्मश्री शिरसि गुरुशान्तशास्त्रिणां च अनन्तान् धन्यवादान् समर्पयामि ॥

एतद्भूमिकायां वीरशैवमतसिद्धान्तविषये तत्र तत्र साहाय्यमाचरितवतां विदुषां श्रीमतां श्रीमन्महाराजसंस्कृतमहापाठशालावीरशैवागमप्रधानाध्यापकानां एम्. जि. नञ्जुण्डाराध्यमहाशयानां, सद्धर्मदीपिकापत्रिकासंपादकानां श्रीमतां चन्नमल्लिकार्जुनमहाशयानां च विषये अतीव कृतज्ञतां स्मरामि ॥

एवं राजकीयकार्येषु बहुषु सत्स्वपि अस्मत्संस्थीयग्रन्थमुद्रणविषये अत्यन्तं बद्धादराणां महीशूरपुरविद्योतमानशाखामुद्रणालयाध्यक्षाणां एम्. ए. श्रीरामम्महाशयानां विषये अतीव कृतज्ञतां वहामि ॥

भक्तियुक्तजनचित्तपङ्कजे
भुक्तिमुक्तिफलदः पुरातनः।
शक्तियुक्तपरविग्रहः शिवः
सत्यमेव सततं प्रकाशते ॥

सु. नारायणस्वामि शास्त्री.

अस्मिन् ग्रन्थे उद्धृतानां ग्रन्थान्तरनाम्नामकारादिक्रमेण सूचिनी

ग्रन्थनाम		पृष्ठसंख्या	ग्रन्थनाम		पृष्ठसंख्या
अधिकरणरत्नमाला	....	177	महानारायणोपनिषत्	....	176
आदित्यपुराणम्	....	189	मुण्डकोपनिषत्	....	170
उपदेशपञ्चकम्	....	193	यजुरारण्यकम्	....	42
कठवल्ली	....	156	योगयाज्ञवल्क्यम्	....	157
कामिकागमः	....	100	रत्नमालिका	....	194
कामिकोत्तरागमः	...	49	वातुलोत्तरागमः	....	20
कालिकाखण्डः	....	43	वायवीयसंहिता	...	11
कूर्मपुराणम्	...	167	वासिष्ठलैङ्गम्	....	169
कैवल्योपनिषत्	....	171	विद्येश्वरसंहिता	....	57
कौषीतक्युपनिषत्	....	182	वेदभाष्यम्	....	190
छान्दोग्योपनिषत्	....	171	वेदान्तसारोपनिषत्	....	42
तात्पर्यसंग्रहः	....	90	शंकरसंहिता	....	24
तैत्तिरीयसंहिता	....	44	शंकरभाष्यम्	....	174
तैत्तिरीयोपनिषत्	....	119	शिवधर्मपुराणम्	....	212
दिव्यागमः	....	1	शिवधर्मोत्तरम्	....	210
देवीभुजङ्गस्तोत्रम्	....	193	शिवभुजङ्गस्तोत्रम्	....	193
पराशरोपपुराणम्	....	164	शिवरहस्यम्	....	51
बृहदारण्यकोपनिषत्	....	172	श्वेताश्वतरोपनिषत्	....	188
ब्रह्मसूत्राणि	....	174	सूतसंहिता	...	157
ब्रह्माण्डपुराणम्	....	189	सौन्दर्यलहरी	....	192
भगवद्गीता	....	170	सौरसंहिता	....	165
भामती	....	171	स्कान्दपुराणम्	....	50
भारतम्	....	181	हंसोपनिषत्	....	43

विषयानुक्रमणिका

	विषयाः	पुटसंख्या
1	अंशुमदागमोक्तरीत्या पूजोपयुक्तपुष्पपात्रादीनां लक्षणं तत्सङ्ग्रह-प्रकारश्च	1
2	अर्घ्यभेदकथनम्	4
3	स्नानाद्युपचारवर्णनपूर्वकं पूजाक्रमनिरूपणम्	5
4	गुरुपूजाविधिः	11
5	वायवीयसंहितोक्तरीत्या दीक्षादिसंस्कारकथनम्	11
6	शिष्यलक्षणम्	18
7	नैमित्तिकपूजा	19
8	नैमित्तिकपूजायां वातुलोक्तरीत्या क्रमनिरूपणम् ...	20
9	भक्तप्रशंसा भक्तलक्षणनिरूपणम्	23
10	तत्र शंकरसंहितासंमतिः	24
11	शिवभक्तोद्देश्यकदाननिरूपणम्	27
12	अस्मिन्विषये स्वराडाख्यराजदृष्टान्तप्रदर्शनम्	29
13	लिङ्गाङ्गसामरस्यवर्णनम्	33
14	षट्त्रिंशत्तत्त्वनिरूपणम्	37
15	धारणार्हलिङ्गलक्षणं तद्धारणं च	40
16	लिङ्गधारणस्य वैदिकत्वसमर्थनम्	42
17	अपूर्वनियमपरिसंख्याविधीनां स्वरूपं विविच्य लिङ्गधारणे को विधिरिति विचारः	47
18	कामिकागमोक्तरीत्या लिङ्गधारणवैभवकथनम्	49
19	स्कान्दपुराणनिदर्शनम्	50
20	अजामिलोपाख्यानरूपशिवरहस्यनिदर्शनम्	51
21	वीरशैवमते सर्वविद्यैक्यनिरूपणम्	56
22	विद्येश्वरसंहितोक्तरीत्या वेदान्तसारसर्वस्वनिरूपणम् (विद्ये-३)....	57
23	साध्यसाधनसाधकानां स्वरूपवर्णनम् (विद्ये-३)	59
24	मननश्रवणकीर्तनानां स्वरूपकथनम् (विद्ये-४)	60
25	श्रवणादित्रये अशक्तानां लिङ्गवेरपूजया मोक्षलाभकथनम् (विद्ये-४)	62

	विषयाः	पुटसंख्या
26	संयुक्तिकं देवतान्तराणां बेरमात्रे पूजा, शिवस्य लिङ्गे बेरे च पूजेति विभज्य प्रतिपादनम् (विद्ये-४)	63
27	लिङ्गबेरसंभवप्रतिपादनम् (विद्ये-४)	64
28	ब्रह्मविष्ण्वोरहङ्कारनिरासाय मध्ये ज्योतिर्लिङ्गस्याविर्भावः तेन च ब्रह्मविष्ण्वोर्मानापाकरणम् (विद्ये–६-९)	65
29	सर्गादिपञ्चकृत्यस्वरूपकीर्तनम् (विद्ये–१०)	76
30	ईशमुखात्प्रणवोत्पत्तिप्रकारकथनम्, ब्रह्मविष्णू प्रति तदुपदेशश्च (विद्ये–१०)	78
31	ब्रह्मविष्णुकृतशिवस्तुतिः शिवेन तौ प्रति जपपूजाहोमानां करणीयत्वोपदेशः, तत्फलकथनं च	79
32	आक्षेपसमाधानाभ्यां सगुणनिर्गुणोपासनयोरभेदप्रतिपादनम्	89
33	पौराणिकमतानुसारेण शिवस्य शक्तिवैशिष्ट्यम्, शक्तिभेदश्च	90
34	तत्रैवाक्षेपसमाधानाभ्यां श्रौतपक्षवर्णनम्	92
35	गोलकादिस्खलनतत्प्रायश्चित्तवर्णनमुखेन लिङ्गपीठयोः शिवशक्तिरूपत्वादिवर्णनम्	95
36	षट्स्थलशब्दघटकस्थलशब्दार्थनिर्वचनम्	103
37	षट्स्थलज्ञानं मोक्षसाधनमित्यत्र दिव्यागमप्रमाणप्रदर्शनम्	103
38	तत्रैव वातुलोत्तरागमप्रमाणप्रदर्शनम्	104
39	वीरशैवप्रशंसा	105
40	षट्स्थलनिरूपणम्	106
41	षण्णां स्थलानां स्वरूपलक्षणकथनम्	107
42	अङ्गस्थलनिरूपणम्	122
43	भक्तत्रैविध्यषाड्विध्यनिरूपणम्	122
44	आक्षेपसमाधानाभ्यां दीक्षाशब्दार्थनिर्वचनम्, तद्भेदवर्णनं च	128
45	सगुणोपासनाक्रमनिरूपणम्	134
46	निष्कलध्याने आवाहनाद्युपचारसमर्थनम्	146
47	लिङ्गाङ्गसामरस्यस्वरूपसमर्थनम्	147
48	साधनानुष्ठानरूपमार्गस्य भेदेऽपि साध्यस्य एकमेवाद्वितीयमित्यादिनोक्तस्यैकत्वात् वीरशैववैदिकमतयोरैकरूप्यस्य युक्तत्वकथनम्	150

	विषया:	पुटसंख्या
49	छान्दोग्ये हृदयाकाशस्य गुणयोगः बृहदारण्यके आकाशाश्रयस्य ब्रह्मणो गुणयोग इति भेदाद्गुणोपसंहारो न संभवतीत्याशंक्य छान्दोग्यगताकाशशब्दितस्य ब्रह्मत्वसमर्थनम्	175
50	सगुणनिर्गुणविद्यात्वेन भेदेऽपि गुणोपसंहारसमर्थनम्	176
51	कैवल्यतैत्तिरीयोपनिषदुक्तधर्माणां सामान्यन्यायसाम्येपि विशेषन्यायाभावादुपसंहारो न संभवतीत्याशंक्य तत्समर्थनम्	177
52	श्रुतिषु नारायणस्याप्युपास्यत्वश्रवणात् शिवस्यैवोपास्यत्वमित्यसङ्गतमित्याशंक्य पुराणेषु नारायणस्योपासकत्वेनैव श्रवणात् शिवस्यैवोपास्यत्वमिति समर्थनम्	178
53	नारायणस्योपास्यत्वप्रतिपादकस्य नारायणानुवाकस्य तात्पर्यवर्णनम्	180
54	छान्दोग्यबृहदारण्यककैवल्यतैत्तिरीयरूपोपनिषच्चतुष्टयेऽप्युपास्यब्रह्मणो गुणनिर्धारणम्	181
55	नारायणाभिन्नस्य परमेश्वरस्योपास्यत्वमाशंक्य श्रुतिषु ब्रह्मविष्णुरुद्ररूपलीलामूर्तित्रयात्मकपरमेश्वरस्योपास्यत्वसमर्थनम्	187
56	शिवाच्युतयोस्तात्त्विकांशेऽभेदेऽपि लीलाविग्रहांशे भेदकथनम्	188
57	शिवस्य सर्वात्मकत्वं भाष्ये नोक्तमित्याशंक्य, किं भाष्ये शिवस्य ध्येयत्वमेव न प्रदर्शितम्[1], उत दहरविद्याविषयत्वम्[2], अथ लीलाविग्रहरूपम्[3], उमासहायादिरूपम्[4], ब्रह्मविष्ण्वाद्युपास्यत्वं[5]वेति विकल्प्य आद्यपक्षनिरसनम्	190
58	द्वितीयपक्षनिराकरणम्	190
59	तृतीयपक्षनिराकरणम्	191
60	तुरीयपञ्चमपक्षनिराकरणम्	192
61	पूर्वोक्तस्थलेषु शक्तिभूताया देव्या एव विष्ण्वाद्युपास्यत्वमाशंक्य शिवस्योपास्यत्वसमर्थनम्	193
62	उत्तमाधिकारिणो निर्गुणब्रह्मविद्यायां सन्न्यासः साधनम्, मध्यमाधिकारिणः कर्मसमुच्चितं ज्ञानमिति व्यवस्थापनम्	193
63	छान्दोग्याद्युपनिषच्चतुष्टयप्रतिपाद्यफलस्य तारतम्यमाशंक्य ऐकरूप्यसमर्थनम्	197
64	उपासकेषु अधिकारिभेदेन मार्गादिक्रमनिरूपणम्	200

	विषयाः	पृष्ठसंख्या
65	ऐश्वर्यस्य सातिशयत्वेनान्तवत्त्वमाशंक्य तन्निरसनम्	203
66	मन्त्रार्थवादेतिहासपुराणेषु ऐश्वर्यतारतम्यप्रदर्शनम्	204
67	कुटुम्बे शुचौ देश इति श्रुतेर्ब्रह्मलोकप्राप्तिरूपार्थपरत्वप्रदर्शनम्	208
68	उक्तव्याख्यानस्य स्वानभिमतत्वकथनम्	208
69	सगुणब्रह्मोपासकस्य निर्गुणब्रह्मावाप्तिर्नेति प्रतिपादनम्	210
70	निष्कलेऽपि परमशिवे ध्यानसंभावनम्	217
71	प्रसादग्रहणपादोदकाभिषेकवर्णनम्	218
72	आगमस्य स्वतः प्रामाण्यसमर्थनम्	227
73	शङ्करसंहिताया उपदेशकाण्डे ३९ तमाध्यायोक्तशिवपुण्यवर्णनम्	235
74	शिवपुण्यकर्तुः कोसलदेशाधिपतेरजस्य चरितम् (शं.सं.उप. ४०)	239
75	कीचकपुराधिपतेः साधारणस्य चरितम् (शं. सं. उप. ४०)	242
76	काश्यपशिष्यस्य मुद्गलस्य शिवापराधान्महिषत्वप्राप्तिः तत्सेवया तन्निवृत्तिश्च (शं. सं. उप. ४०)	244
77	यवनदेशीयमहदादित्यसंज्ञकपुरवासिनो विश्वावसुनाम्नो वणिजः कथा (शं. सं. उप. ४०)	247
78	शम्भुदेशीयमायापुराधिपतेः सुबुद्धेश्चरितम् (शं. सं. उप. ४१)	248
79	पाञ्चालदेशीये शोभनाख्ये पुरे विद्यमानस्य माधवस्य चरितम् (शं-सं-उप-४१)	249
80	वङ्गदेशाधिपतेर्महाशुद्धाह्वयस्य द्विजस्य चरितम् (शं.सं.उप. ४२)	251
81	गुञ्जापुरवासिनश्चित्ररथ्याह्वयस्य द्विजस्य चरितम् (,, ४२)	253
82	शिवद्रोहकथनम् .... (,, ४९)	256
83	वङ्गदेशाधिपतेः कीलकाख्यस्य चरितम् .... (,, ४९)	257
84	तत्पुत्रस्य वीरजितश्चरितम् .... (,, ४९)	259
85	तत्पुत्रस्य घोरजितश्चरितम् .... (,, ४९)	259
86	तत्पुत्रस्य शूरजितश्चरितम् .... (,, ४९)	260
87	तत्पुत्रस्य पापजितश्चरितम् .... (,, ४९)	260
88	अङ्गदेशाधिपतेर्विधातुश्चरितम् .... (,, ५०)	263
89	तत्पुत्रस्य तत्पुरोहितस्य च चरितम् .... (,, ५०)	270
90	शृङ्गलदेशीयभूचक्राख्यपुरवासिनः सवितुश्चरितम् (,, ५१)	270

	विषया:	पुटसंख्या
91	युधिष्ठिरयमसंवादरूपेण कुञ्जरदेशान्तर्गतवसुधापुरवासिनो विप्रमणेश्चरितम् (शं. सं. उप. ५२)	275
92	सौराष्ट्रदेशान्तर्गतसौराख्यनगरवासिनः सुवृत्ताख्यवैश्यचरितम् (शं. सं. उप. ५३)	259
93	विदर्भदेशाधिपतेर्विश्वसेनस्य चरितम् (शं. सं. उप. ५४)	282
94	कलिङ्गदेशवासिनो यज्ञेश्वराख्यस्य ब्राह्मणस्य चरितम् (शं. सं. उप. ५५)	286
95	गौडदेशवर्तिगौडपुरवासिनो वज्रपालाभिधस्य वणिजश्चरितम् (शं. सं. उप. ५६)	289
96	सिन्धुदेशाधिपतेः करनाम्नो राज्ञश्चरितम् (शं. सं. उप. ५७)....	293
97	ज्योनकदेशाधिपतेः कलाधरनाम्नो राज्ञश्चरितम् (शं.सं.उप.५८)	297
98	कलिङ्गदेशान्तर्गतकटकपुराधिपपुत्रस्य विरागस्य मन्त्रिपुत्रपुरोहितपुत्रद्वारपालपुत्राणां च चरितम् (शं. सं. उप. ५९)	303
99	अज्ञानकृतशिवापचारफलभोक्तॄणां सोमशर्मशिवशर्मणोश्चरितम् (शं. सं. उप. ६०)	306
100	पुण्यशर्मणश्चरितम् (,,)	307
101	ग्रन्थोपसंहारः	308
102	अनुबन्धः (प्रथमसम्पुटीयः)	315

(विद्ये)—विद्येश्वरसंहिता, शिवपुराणान्तर्गता.

(शं. सं. उप.)—शंकरसंहितायामुपदेशकाण्डः (स्कान्दपुराणान्तर्गतः) अयं ग्रन्थः पञ्चनदक्षेत्रे (तिरुवादि) गीर्वाणवाणीविलासमुद्रणशालायां ग्रन्थाक्षरैर्मुद्रितः ।

अस्मिन् ग्रन्थे बहुत्र अध्यायसंख्यानिर्देशादिकं एतद्ग्रन्थसंशोधनसमये यथोपलब्धं उभयतः कोष्ठचिह्नितं वाचकानामुपकाराय शोधकेन स्वयं निर्दिष्टं वेदितव्यम्.

———

शुद्धपत्रिका

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
4	20	र्धाद्यर्धमेव	र्धाध्यर्धमेव
6	26	पूचयेत्	पूजयेत्
14	8	र्विरुद्धं	विरुद्धं
14	26	कृतो	कुतो
68	15	ब्रह्माच्युतो	ब्रह्माच्युतौ
68	28	चित्रमत्र	चित्रमस्र
69	5	मेयिवान्	मीयिवान्
69	25	गृह्णन्तु	गृह्णातु
70	23	भवता	भविता
72	4	शठमीशित्वमा	शठेशत्वं समा
74	13	मङ्गलाय नः	मङ्गलायनः
74	15	सकाले	सकालो
75	5	जनवासं	जनावासं
76	7	तथैवात्मानमर्थतः	ब्रह्माहं ब्रह्मकेशवौ
76	27	नः	नौ
85	25	पञ्चाक्षर	पञ्चोत्तर
87	22	भक्तः स्त्रि	भक्तस्त्रि
88	2	शार्क्ति लिङ्ग	शक्तिलिङ्ग
94	13	पत्नीपुत्र।	त्पत्नीपुत्र-
121	18	लिङ्गमकाशं	लिङ्गमाकाशं
160	1	भवाशुद्धिं	भावशुद्धिं

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
184	23	माहाशुचिः	महाशुचिः
207	21	ङ्गमन्त्रोऽपि	ङ्गमन्त्रेऽपि
210	18	च्छूत्यु	च्छ्रुत्यु
214	19	नीवरा	नीवार
246	22	स्यराज्यके	स्वराज्यके
246	25	द्वाज	द्राज
248	10	सबुद्धि	सुबुद्धि
252	20	गोरं	घोरं
254	1	संताडय	संताड्य
254	6	स्थापयच्च	ऽस्थापयच्च
255	19	चूतप वस	चूतपल्लवस
256	11	शीव	शिव
257	1	एषामप	[1]एषामप
296	3	इत्युक्ता	इत्युक्त्वा

———

॥ श्रीः ॥

श्रीमन्महेश्वराय नमः

क्रियासारः

श्रीनीलकण्ठशिवाचार्यरचितः

तृतीयं संपुटम्

पञ्चदशोपदेशः

उपदेशे पञ्चदशे पुष्पपात्रादिलक्षणम् ।
तत्सङ्ग्रहप्रकारश्च क्रमशः प्रतिपाद्यते ॥

दिव्यागमे—

[1] पुष्कलाद्योपकरणान्मनोनैर्मल्यसंभवः ।
निर्मलेनैव मनसा पूजकः फलभाग्भवेत् ॥
सामग्रीसान्निधानेन पूजा सा पुष्कला भवेत् ।
पुष्कले पूजने भक्तः पुष्कलां श्रियमश्नुते ॥
[2] पूजोपयुक्तसामग्रीं [3] संविधाय सुखासने ।
समासीनः पूजयेत्तमुमापतिमनामयम् ॥
असन्निधाय सामग्रीं संकल्प्योपविशन् जनः ।
पुनर्यतेत मूढात्मा न पूजाफलभाग्भवेत् ॥
अज्ञो वाप्यथ वा प्राज्ञः [4] सामग्रीं नाह्वयेत्स्वयम् ।
मध्ये मध्ये समाहूतश्चञ्चलो न फली भवेत् ॥

---

[1] पुष्कलाद्युपो-पा. [2] पूजाप्रयुक्त-पा. [3] संविधाप्य-पा. [4] सामग्र्यै ना-पा.

भक्तः संकल्प्य पूजायै न क्रुध्येत्परिचारकान्।
पूजकः क्रोधसंयुक्तः सन्निधिं नाभिगच्छति॥

आलस्यं जृम्भणं निद्रां पूजाकाले विवर्जयेत्।
वर्जयेद्विषयासक्तिं मनः कुर्याच्छिवार्पितम्॥

शिवार्पितमना यद्यदलब्धं कुसुमं दलम्।
संविधायाथ (यत्नेन) मनसैवार्पयेच्छिवे॥

यस्तु संकल्प्य पूजायै कार्यान्तरनियोजितः।
तत्कार्यं मनसि स्मृत्वा न पूजाफलमश्नुते॥

देव्युवाच—

स्वामिन् सर्वहिताशंसिन् येन पूजाफलीभवेत्।
यादृशाच्चोपकरणाद्रहस्यमपि मे वद॥

शङ्करः—

देवि गोप्यतरं चैतद्वाच्यं नादृढबुद्धिषु।
दृढचित्तेषु वक्तव्यं गोप्याद्गोप्यतरं महत्॥

पूजायां यानि चिह्नानि बन्धकानि फलार्थिनाम्।
मोक्षार्थी विरतो भक्तः शिवैकन्यस्तचेतनः॥

सावधानो यदेतेषु लभते वाञ्छितं फलम्।
पूजामध्ये यदेकेन प्रेषितो महतापि वा॥

त्वरयेन्मम पूजायां नैति मां पूजनं कृतम्।
गुरुणा यदि वाहूतः पूजां तस्य निवेदयेत्॥

निवेदितेऽपि चाहूतस्तदाज्ञां परिपालयेत्।
गुरुर्यतोऽहं देवेशि नावयोर्विद्यते भिदा॥

[1] अभिदाभावनां ज्ञात्वा तदाज्ञां परिपालयेत्।
आख्याति पूजावेलायां वैदिकं यद्विचक्षणः॥

तच्छिवेनोदितमिति निर्वहेत्स्वप्रयत्नतः।
अवैदिकस्याख्यातारं निकटे नोपवेशयेत्॥

---

[1] अभेदभावनां कृत्वेति स्यात्.

प्रत्याख्यानं न कुर्वीत पिदध्याच्छ्रवणद्वयम् ।
तत्सान्निध्यं प्रयत्नेन वर्जयेन्मम तुष्टये ॥

नेक्षेत पूजावेलायां नरं देवि बहिष्कृतम् ।
पूजाकाले यदाख्यातं शैवकार्यमनुत्तमम् ॥

कुर्यात्सर्वप्रयत्नेन तदशक्तौ तु कारयेत् ।
पूजकः संस्मरन्कर्म लौकिकं त्वरयेद्यदि ॥

शिवद्रोहेन निर्याति कालभैरवयातनाम् ।
संस्मरन्नपि कर्माणि यः शिवाहितमानसः ॥

स याति मामकं रूपं कैलासे मद्गणैः सह ।
मोदते तस्य नावृत्तिस्तेन सर्वं वशीकृतम् ॥

पुष्पं पत्रं फलं तोयं श्रमसाध्यं यथा यथा ।
फलं तथा तथा तेषां दाताहं हि सदाशिवः ॥

पुष्पलोभः पत्रलोभः पात्रलोभो भयावहः ।
तस्मात्सर्वप्रयत्नेन पात्रं पत्रं सुमं तथा ॥

संपाद्य पूजयेल्लिङ्गं यथाविभवविस्तरम् ।
सुवर्णपात्रं यत्नेन कुसुमादिदलानि च ॥

सौवर्णान्येव संपाद्य पूजनीयः शिवः स्वयम् ।
राजतं वा दरिद्रश्चेत्ताम्रपात्रं हि कल्पयेत् ॥

विरक्तो नारिकेलेन पात्रेणैव यजेत्स्वयम् ।
सौवर्णपात्रपूजापि न तस्याः सदृशी भवेत् ॥

बैल्वनिर्मितपात्रं तु सर्वेषामुत्तमोत्तमम् ।
बैल्वनिर्मितपात्रस्य [1] निष्कृतिः शिवरूपतः ॥

तत्पात्रसदृशं लोके नास्ति नास्ति महीतले ।
सौवर्णपात्रमथवा बिल्वपत्रसमन्वितम् ॥

पात्रेषु बैल्वं श्लाघ्यं स्याद्बैल्वं पत्रेषु चोत्तमम् ।
नीलोत्पलं च पुष्पेषु प्राहुस्तं चोत्तमोत्तमम् ॥

---

[1] स्यान्निष्कृतिः—पा.

सर्वमप्राकृतैर्मन्त्रैः कृत्वा देवाय चार्चयेत् ।
शुद्धभावः समभ्यर्च्य यथोक्तफलभाग्भवेत् ॥

स्वनन्दनोद्भवं पत्रं पुष्पं फलमनुत्तमम् ।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः ॥

आरण्यकानि पुष्पाणि पत्राणि स्वयमर्चयेत् ।
अर्कद्रोणोत्पलाद्यैश्च बिल्वारग्वधपत्रकैः ॥

तिलाक्षतैरर्चयेन्मां भक्तियुक्तेन चेतसा ।

अर्घ्यभेदः

सामान्यार्घ्यविशेषार्घ्यतिरोधानार्घ्यलक्षणम् ॥

अङ्गदैवत्यमर्घ्यं यत्सामान्यार्घ्यमुदीरितम् ।
विशेषार्घ्यमिति प्रोक्तं शिवाय विनिवेदितम् ॥

तिरोधानार्घ्यमुदितं विसर्जनविधानकम् ।
पराङ्मुखार्घ्यमित्येतच्चतुष्टयमुदीरितम् ॥

पात्रं दशपलैर्वापि तथा पञ्चपलैरपि ।
सार्धद्विपलमानेन कुर्यादर्घ्याय पात्रकम् ॥

सौवर्णं श्लाघ्यमुदितं राजतं ताम्रमेव वा ।
[1](पञ्चपर्वोन्नतान्येव तावद्विस्तारवन्ति च ॥

वृत्तं च चतुरश्रं वा बहिरष्टदलानि च ।
अथैकाङ्गुलमानेन वस्वङ्गुलयुतं तु वा ॥

चतुर्थांशघनं वापि तथार्धार्धमेव वा ।
सौवर्णादेरलाभे तु किंशुकैः खड्गशृङ्गतः ॥

अथ यज्ञियवृक्षेण मृत्पात्रं वापि कारयेत् ।
पलाशकदलीपत्रकृतपत्रपुटं तु वा ॥)

पाद्यपात्रं तथैव स्यात्तथाचमनपात्रकम् ।
पञ्चगव्यार्थपात्रं च पात्रं पञ्चामृताय च ॥

---

[1] अयं पाठः क्वाचित्कः.

गन्धपात्रं धूपपात्रं दीपपात्रं तथैव हि।
घण्टादीन्यपि संपाद्य यजेत्साम्बं त्रिलोचनम् ॥

षडङ्गुलं तु विस्तारमुत्सेधं चतुरङ्गुलम्।
तद्वदुत्सेधविस्तारपादं [1] नवाङ्गुलाब्धिकम् ॥

[2] एकाङ्गुलोष्ठनिस्तारं तदर्धार्धेन वा युतम्।
द्व्यङ्गुलत्र्यङ्गुलोत्सेधं षोडशाङ्गुलविस्तृतिः[3] ॥

वेदाङ्गुलोत्सेधयुक्तमष्टाङ्गुलपदायुतम्।
एकाङ्गुलोष्ठमुक्तार्धप्रमाणं पादमेव वा ॥

वृत्तकङ्कणसंयुक्तपार्श्वद्वयसुशोभनम्।
पात्रमाचमनाधारं द्वादशाङ्गुलविस्तृतम् ॥

उत्सेधकुक्षिकं तद्वत्पादं चापि षडङ्गुलम्।
तद्वदुत्सेधसहितं द्व्यङ्गुलोत्सेधमेव वा ॥

द्व्यङ्गुलत्र्यङ्गुलोत्सेधकण्ठमेकाङ्गुलोष्ठकम्।
मुखं त्र्यङ्गुलविस्तारमिच्छामानयुतं तु वा ॥

पिधानं मुकुलाकारं रन्ध्रं द्व्यङ्गुलमानतः।
ताम्रपेटकया पुष्पं संविधाय प्रपूजयेत् ॥

सौवर्णकलशे नद्यां तटाके वा जलाशये।
वाद्यघोषेण संयुक्तं समाहृत्य यजेच्छिवम्।
नदीतीरे तटाके वा स्वयं व्यक्तशिवस्थले ॥

विजने सुखमासीनो यजेदेकाग्रमानसः।
पञ्च पात्राणि कुर्वीत पलपञ्चकमानतः ॥

तदुक्तमार्गतः स्नानं कुर्याच्छंभुरिति स्थितिः।
पद्मपात्रेण पुष्पाणि कुर्यात्पूजार्थमुत्तमम् ॥

सौवर्णकमले वापि दलषोडशशोभिते।
करार्हकमले वापि यजेत्साम्बं त्रिलोचनम् ॥

---

[1] पादं नानू . . . लाब्धिकम्–पा. [2] एकाङ्गुलोऽष्टाङ्गुलो वा तद–पा.
[3] विस्तृतम्–पा.

नैवेद्यपात्रं सौवर्णं प्रयत्नेनापि कारयेत् ।
बिल्वाष्टोत्तरपूजां वा सहस्राष्टोत्तरं तु वा ॥

द्रोणपुष्पसहस्रैर्वा पुष्पैर्वार्थार्कसंभवैः ।
आरग्वधसहस्रैर्वा नियमेन यजेच्छिवम् ॥

शतमष्टोत्तरं वाथ तथाष्टाविंशसङ्ख्यया ।
पूजाकाले बहुवचो यस्य तेन न संवसेत् ॥

भक्तशैवपुराणानि श्रावयेच्छृणुयादपि ।
लौकिकान्यकथालापं वर्जयेच्छिवपूजकः ॥

स्वारामोद्भवपुष्पाणि प्रशस्तानि शिवार्चने ।
([1]देवस्वं देवतोद्यानपुष्पाणि परिवर्जयेत् ॥

अन्यपूजार्हपुष्पाणि शिवाय न समर्पयेत् ।
समर्पणीयान्यन्येन न च पुष्पाणि याचयेत् ॥

याचनालब्धपुष्पाणि [2]प्रशस्तानि शिवार्चने ।)[1]
असन्निधाय नैवेद्यं धूपदीपौ न चाचरेत् ॥

धूपदीपौ समर्प्याथ न विलम्बेन्निवेदने ।
न याचेतापि नैवेद्यं सर्वं वै सन्निधापयेत् ॥

अभिषेकाय दिव्यानि द्रव्याणि कलशे क्षिपेत् ।
एलोशीरलवङ्गानि कस्तूरीचन्द्रसंज्ञकम् ॥

पञ्चद्रव्याणि कलशे चूर्णयित्वा विनिक्षिपेत् ।
सिताभ्रजातिकस्तूरीलवङ्गोशीररोचनाः ॥

जातीपत्रं च कुसुमं पाद्यपात्रे विनिक्षिपेत् ।
अर्घ्यपात्रे तु पूर्वोक्तद्रव्याष्टकसमन्वितम् ॥

सिद्धार्थं चाक्षतान् पुष्पं विशेषेण विनिक्षिपेत् ।
निमीलयन् स्वस्य नेत्रे ध्यानं सम्यक् समाचरेत् ॥

दिवा न पूजयेल्लिङ्गं रात्रौ नैव च पूजयेत् ।
पूजयेन्न दिवारात्रौ दिवारात्रौ च पूजयेत् ॥

---

[1] मातृकयोर्नास्ति. [2] अप्रशस्तानि इति स्यात्.

ध्यानकाले पुराणादिश्रवणं नैव कारयेत् ।
एकान्ते मीलिताक्षेण ध्यानं कार्यं विपश्चिता ॥

अभिषेके पुराणादिश्रवणं नेतरत्र तु ।
मनोदार्ढ्येन संपन्नः पूजयेत्परमेश्वरम् ॥

अलङ्कारप्रियो विष्णुरभिषेकप्रियः शिवः ।
नमस्कारप्रियो भानुः शिवस्तोत्रप्रिया गणाः ॥

स्तोत्रपाठो विशेषेण शिवस्य प्रीतिवर्धनः ।
स्तोत्रमात्रेण संतुष्टः स्वयं शंभुः फलप्रदः ॥

पाद्येन पादौ धौतौ[1] स्यादासने संनिवेशनम् ।
अर्घ्यं शिरसि च प्रोक्ष्य वासनावासितो भवेत् ॥

आचामेदाचमनतः शंभुः संतुष्टतामियात् ।
ध्यानेन सकलं पापं नश्येद्भक्त्यार्जितं तु यत् ॥

ध्यानानुगुणमेवान्यन्मुख्यं ध्यानं विदुर्बुधाः ।
सौवर्णौ च कटाहौ द्वौ शुद्धतोयेन पूरितौ ॥

गन्धद्रव्येण मिश्रौ च कृत्वा तं शिवमर्चयेत् ।
एलालवङ्गजातीयफल[2]पुष्पाण्युशीरकम् ॥

लवङ्गत्वग्जटामांसीतक्कोलं कोष्ठमेव च ।
कदम्बकन्दं गन्धत्वङ्नागकेसरचम्पकम् ॥

देवदारुं गुग्गुलं च कौङ्कुमं पुष्पमेव च ।
गोरोचनां च कर्पूरं तथा [3]सर्पमणीन् समम् ॥

चूर्णयित्वा विशेषेण कस्तूरीं च विनिक्षिपेत् ।
सर्वद्रव्येषु निक्षिप्य पूजयेल्लिङ्गमैश्वरम् ॥

सर्वद्रव्येष्वलब्धेषु कस्तूरीकुङ्कुमान्वितम् ।
कर्पूरं [4]देवपूजार्थं संपाद्य परिपूजयेत् ॥

एलोशीरैर्दरिद्रश्चेन्न केवलजलैर्यजेत् ।
यथा यथा च सामग्री विशिष्येत शिवार्चने ॥

---

[1] कृत्वेति स्यात्. [2] पत्राण्युशीरकम्–पा. [3] सर्वमणिः–पा. [4] देवदारु-मिति स्यात्.

तथा तथा फलं प्रोक्तं भक्तानां किल्बिषं नहि ।
सर्वसौभाग्यसंपत्तिपुत्रपौत्राभिवृद्धिदाः ॥

अलङ्कारार्थदीपानामावलिं परिकल्पयेत् ।
नैवेद्यात्पूर्वदीपस्य [1]कल्पनाक्षण एव हि ॥

शमयेन्निक्षिपे[2]द्वार्षु नैवेद्योर्ध्वं स्थिरार्चिषा ।
दीपारार्तिं प्रकुर्वीत सौवर्णे राजतेस्थता ॥

सपुष्पमर्पयेद्भक्तः स्वस्य विज्ञानसिद्धये ।
ज्ञानसिद्धिर्भवेत्तृणां शिवे दीपसमर्पणात् ॥

वैशेष्यात्सोमवारे च दीपदर्शनमाचरेत् ।
कार्तिके सोमवारे तु दीपावलिसर्पणात् ॥

न पुनर्जायते भक्तः शिवसायुज्यमेति सः ।
प्रदोषे सोमवारे तु लक्षदीपसमर्पणात् ॥

फलं वक्तुं न शक्येत स्वयं शंभुरिति स्फुटम् ।
तस्मादज्ञाननाशाय दीपार्चनमथाचरेत् ॥

नागदीपं समर्प्याशु शिवभूषणतां व्रजेत् ।
पञ्चास्यदीपपूजातः पञ्चास्यो भवति स्वयम् ॥

स्कन्दत्वं षण्मुखाद्दीपादन्यस्माच्छिवभावनात् ।
तस्मादाज्येन पूतेन वर्तिकां च समक्षयन् ॥

शिवार्पितं प्रकुर्वीत स्वज्ञानपरिवृद्धये ।
नमस्काराष्टकं कुर्यादष्टोत्तरशतं तु वा ॥

सहस्रं वा प्रकुर्वीत नमस्कारप्रियः शिवः ।
रुद्रसूक्तमतः शंभोर्नमस्कारद्वयान्वितम् ॥

प्रतिमन्त्रं प्रतिपदं नमस्कारद्वयान्वितम् ।
नमो विष्णव इत्यादावेवकैव हि नमस्कृतिः ।
[3] देवतान्तरमेवं च शिवस्य द्विनमस्क्रियाम् ॥

देवः स्वयं करोत्येषस्तस्माच्छंभोः पदे पदे ।
नमस्कारद्वयं कृत्वा प्रदक्षिणमथाचरेत् ॥

---

[1] कल्पनार्हण–पा. [2] द्वार्ष्यनैवे–पा. [3] इत्थमेव सर्वत्र विद्यते.

शिवभक्तः स्वयं शंभोः कुर्यान्नैकनमस्क्रियाम् ।
नमस्कारयुगं कुर्यान्महेशस्य पदे पदे ॥

यस्मै नमश्श्रुतिः शंभोर्नमश्शेषित्वमन्वशात् ।
तस्मान्नागविभूषाय नमस्कारान् समर्पयेत् ॥

अनमस्कारपूजा हि व्यर्था भवति पूजके ।
करपीठे समभ्यर्च्य शिवं साम्बं त्रिलोचनम् ॥

अथ भक्तो नमस्कारं कण्ठोर्ध्वं तु विभावयेत् ।
मुक्ताङ्कुष्ठेन मुष्टथा च प्रदक्षिणविधानवान् ॥

प्रार्थयेद्देवमीशानं यथाकामतन्द्रितः ।
अर्घ्यं दद्यान्मृगीमुद्रासमञ्चितकराम्बुजः ॥

चिन्मुद्रया च पुष्पाणि शिवायाथ समर्पयेत् ।
घण्टारवं कारयेच्च करपीठे [1]समर्चयन् ॥

सौवर्णं वा विधायाशु रथं[2] नानाविचित्रकम् ।
पुष्पमालापरिवृतं विचित्रस्तम्भसंयुतम् ॥

ऊर्णासूत्रत्रयेणाशु वेष्टयित्वा स्वयं कटौ ।
पवित्रेणापि रत्नेन मन्त्रयेन्मन्त्रवित्तमः ॥

[3] पूजागाराणि सर्वाणि श्वेतानि श्वेतचूर्णतः ।
गोमयेनोपलिप्तेषु रङ्गवल्याद्यलङ्कृतम् ॥

पुष्पैः पर्णैरलङ्कृत्य मल्लीझर्झरीं प्रसारयेत् ।
उशीर[4]झर्झरीं द्वारस्य पार्श्वयोर्लम्बयेद्बहून् ।

सुगन्धद्रव्यचूर्णैश्च धूपयेद्देवतागृहम् ।
नीडानि भित्तौ कुर्वीत नानावर्णैलसन्ति च ॥

विन्यसेद्विग्रहानाशु तेषु शाङ्करकिङ्करान् ।
सायुधान्वाहनैर्युक्तान् सालङ्कारविभूषणान् ॥

भस्मत्रिपुण्ड्ररुद्राक्षभास्वद्देहान् कपर्दिनः ।
अथवा भूतिरुद्राक्षान् तेषु नीडेषु निक्षिपेत् ॥

---

[1] समर्पयेत्–पा. [2] नानाविचित्रितम्. [3] एवमेव सर्वत्र दृश्यते. [4] झल्लिद्वारस्य–पा.

शिवपूजार्थसामग्रीमथवा विन्यसेद्बुधः ।
तेषु तेषु च नीडेषु दीपमालां च कल्पयेत् ॥
चित्रार्पितप्रतिमया युक्तां भित्तिं च कल्पयेत् ।
द्वारं दक्षिणपार्श्वे च पूजागारस्य कल्पयेत् ॥
यथा प्रविशतां पुंसामुत्तराभिमुखं भवेत् ।
देवं पञ्चास्यसंयुक्तं [1] दक्षिणास्ये ह्युदङ्मुखः ॥
विदधीत शिवस्यार्चां भक्तियुक्तेन चेतसा ।
पूजकैकादशपदविस्तारायाममन्दिरम् ॥
तत्प्रादेशस्य दशकं चतुरश्रं च पीठकम् ।
लताभिश्च विचित्राभिश्चित्रितं पुष्पमालया ॥
[2] तस्योपरि च सौवर्णतन्तुशोभनराङ्कवैः ।
शुभशय्यां वितन्वानस्तत्र सिंहासनं क्षिपेत् ॥
तस्मिन् सिंहासनवरे करपीठं विधाय च ।
षोडशैरुपचारैश्च तथा राजोपचारकैः ॥
ऋग्यजुस्सामवेदैश्च तथाथर्वणमन्त्रतः ।
पञ्चाक्षरोपनिषदा पुराणश्रवणादिना ॥
शास्त्राणां पठनेनापि गद्यपद्यस्तुतिव्रजैः ।
गायेत्स्वयं गापयेच्च शिवमाहात्म्यसूचकैः ॥
वाद्यैश्च विविधैर्गीतैः नृत्यैः शंभुं सुतोषयेत् ।
एकादिक्रमशः शंभोर्द्यादारार्तिकान् बुधः ॥
जाघण्टाशङ्खवाद्यैश्च कोलाहलरवैः स्वयम् ।
शब्दब्रह्मानन्दमयः शिवानन्दामृतप्लुतः ॥
निमज्जन्निव सन्तुष्टो निस्संज्ञ इव तत्परः ।
यः सकृद्वासकृद्वापि शिवमर्चयति स्वयम् ॥
स धन्यः सर्वलोकानां वन्द्यो भक्तोत्तमोत्तमः ।
तं दृष्ट्वा मोदते यस्तु तस्मादप्यधिको भवेत् ॥

---

[1] दक्षिणस्थो इति स्यात् [2] अस्योपरि–पा.

यः स्वकीयगृहे नित्यं शिवभक्तिमतां बहु ।
पूजोपकरणं दत्वा कारयित्वा च तन्मुखात् ॥
स याति शिवसायुज्यं ज्ञानिनामपि दुर्लभम् ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठ-
शिवाचार्यकृते क्रियासारे पुष्पपात्रादिनिरूपणं नाम
पञ्चदशोपदेशः समाप्तः

अथ षोडशोपदेशः

गुरुपूजाविधिरथ निगमागमदर्शितः ।
षोडशे[1]ऽथोपदेशेऽस्मिन् क्रमशः प्रतिपाद्यते ॥ १

गुरुर्लिङ्गं जङ्गमं च त्रयमेकमुदीरितम् ।
इष्टलिङ्गस्य पूजा तु [2]सम्यगेवोदितं मया ॥ २

गुरुपूजनमेतस्मादधिकं च तथापि तत् ।
अङ्ग[3]शेषिणि पूजायां तस्माज्जङ्गमपूजनम् ॥ ३

गुरुजङ्गमपूजा[4]या ऐकरूप्यं तथोच्यते ।
किरति छात्रकर्णे तु मन्त्ररत्नमसौ गुरुः ॥ ४

तस्य पूजा च कर्तव्या पादयोस्त्वभिषेचनम् ।
यद्यदुक्तं पूर्णमेतद्गुरौ तत्तच्च पूजनम् ॥ ५

विशेषस्तत्र पदयोरभिषेचनमीरितम् ।
अन्यत्सर्वं यथायोग्यं कार्यं शैवेन नित्यशः ॥ ६

गुरुरेव परं ब्रह्म शिष्यशिक्षात्वयोगतः ।
गुरुकार्याणि सर्वाणि दीक्षादीनि यतस्ततः ॥ ७

वायव्ये कथितं सर्वं कृष्णेनाक्लिष्टकर्मणा ।
[5]भगवन्मन्त्रमाहात्म्यं भवता कथितं [6]श्रुतम् ॥ ८

---

[1] चोपदेशे–**पा.** [2] सम्यगामोदितं–**पा.** [3] शेषेण–**पा.** [4] थामैकरूप्यादथो-च्यते–**पा.** [5] याय उत्तर–१५. [6] प्रभो.

तत्प्रयोगविधानं च साक्षाच्छ्रुतिसमं मया।
इदानीं श्रोतुमिच्छामि शिवसंस्कारमुत्तमम् ॥ ९
मन्त्रसंग्रहणे किंचित्सूचितं न तु विस्तृतम्।

उपमन्युः--

हन्त ते कथयिष्यामि सर्वपापविशोधनम् ॥ १०
संस्कारं परमं पुण्यं शिवेन परिभाषितम्।
सम्यक्कृताधिकारः स्यात्पूजादिषु नरो यतः ॥ ११
संस्कारः कथ्यते तेन षडध्वपरिशोधनम्।
दीयते येन वै ज्ञानं क्षीयते पाशबन्धनम् ॥ १२
तस्मात्संस्कार एवेयं दीक्षेत्यपि च कथ्यते।
शांभवी चैव शाक्ती च मान्त्री चेति शिवागमे ॥ १३
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना।
गुरोरालोकमात्रेण स्पर्शात्संभाषणादपि ॥ १४
सद्यः संजायते प्रज्ञा पापोपक्षयकारिणी।
सा दीक्षा शांभवी प्रोक्ता सा पुनर्भिद्यते द्विधा ॥ १५
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः।
ययास्य निर्वृतिः सद्यः सैव तीव्रतरा मता ॥ १६
तीव्रा तु जीवतोऽत्यन्तं पुंसां पापविशोधिका।
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु ॥ १७
गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा।
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्विका ॥ १८
मन्दमन्दतरोद्देशात्कर्तव्या गुरुणा बहिः।
शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति ॥ १९
शिवधर्माधिकारस्य तन्मूलत्वात्समासतः।
यत्र शक्तिर्न पतिता तत्र शुद्धिर्न जायते ॥ २०
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः।
तस्माल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूरिशः ॥ २१

ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ।
योऽन्यथा कुरुते मोहात्स विनश्यति दुर्मतिः ॥ २२

तस्मात्सर्वप्रयत्नेन गुरुः शिष्यान् परीक्षयेत् ।
लक्षणं शक्तिपातस्य प्रबोधानन्दसंभवः ॥ २३

सा यस्मात्परमा शक्तिः प्रबोधानन्दरूपिणी ।
आनन्दबोधयोर्लिङ्गमन्तः करणविक्रियाः ॥ २४

यया स्यात्कम्परोमाञ्चस्वरनेत्राङ्गविक्रियाः ।
शिष्योऽपि लक्षणैरेभिः कुर्याद्गुरुपरीक्षणम् ॥ २५

तत्संपर्के शिवार्चादौ स्वगतैर्वाथ तद्गतैः ।
शिष्यस्तु शिक्षणीयत्वाद्गुरुर्गौरवकारणम् ॥ २६

तस्मात्सर्वप्रयत्नेन गुरोर्गौरवमाचरेत्।
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ॥ २७

गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ।
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ॥ २८

शिवविद्यागुरूणां च पूजया सदृशं फलम् ।
सर्वदेवात्मकश्चासौ सर्वमन्त्रमयो गुरुः ॥ २९

तस्मात्सर्वप्रयत्नेन तस्याज्ञां शिरसा वहेत् ।
श्रेयोऽर्थी यदि गुर्वाज्ञां मनसापि न लङ्घयेत् ॥ ३०

गुर्वाज्ञापलको यस्माज्ज्ञानसंपत्तिमश्नुते ।
गच्छंस्तिष्ठन् स्वपन् भुञ्जन्नान्यत्कर्म समाचरेत् ॥ ३१

समक्षं यदि कुर्वीत तत्सर्वं गुर्वनुज्ञया ।
गुरोर्गेहे समक्षे वा न यथेष्टासनो भवेत् ॥ ३२

गुरुर्देवो यतः साक्षात्तद्गृहं देवमन्दिरम् ।
पापिनां च यथा सङ्गात्तत्पापफलभाग्भवेत् ॥ ३३

तद्वदाचार्यसङ्गेन तद्धर्मफलभाग्भवेत् ।
यथेह वह्निसंपर्कान्मलं त्यजति काञ्चनम् ॥ ३४

तथैव गुरुसंपर्कात्पापं त्यजति मानवः ।
यथा वह्निसमीपस्थः शातकुम्भो विलीयते ॥ ३५

तथा पापं विलीयेत आचार्यस्य समीपतः ।
यथा प्रज्वलितो वह्निर्निष्ठां काष्ठस्य निर्दहेत् ॥ ३६

तथायमपि संतुष्टो गुरुः पापं क्षणाद्दहेत् ।
मनसा कर्मणा वाचा गुरोः क्रोधं न कारयेत् ॥ ३७

तस्य क्रोधेन दह्यन्ते ह्यायुश्श्रीज्ञानसत्क्रियाः ।
तत्क्रोधकारिणो ये स्युस्तेषां यज्ञाश्च निष्फलाः ॥ ३८

यमाश्च नियमाश्चैव नात्र कार्या विचारणा ।
गुरोर्विरुद्धं यद्वाक्यं न वदेज्जातुचिन्नरः ॥ ३९

वदेद्यदि महाघोरे रौरवे पतति ध्रुवम् ।
मनसा कर्मणा वाचा गुरुमुद्दिश्य यत्नतः ॥ ४०

श्रेयोऽर्थी चेन्नरो धीमान्न मिथ्याचारमाचरेत् ।
नैर्गुण्ये ख्यापिते तस्य नैर्गुण्यशतभाग्भवेत् ॥ ४१

गुणे तु ख्यापिते तद्वत्सर्वपुण्यफलं भवेत् ।
गुरोर्हितं प्रियं कुर्यादादिष्टो वा नरः सदा ॥ ४२

असमक्षं समक्षं वा तस्य कार्यं समाचरेत् ।
इत्थमाचारवान् भक्त्या नित्यमुद्युक्तमानसः ॥ ४३

गुरुप्रियकरः शिष्यः [1]शैवान् धर्मांस्तथार्हति ।
गुरुश्च गुणवान् प्राज्ञः परमानन्दभासकः ॥ ४४

तत्त्वविच्छिवसंसक्तो मुक्तिदो नतु चापरः ।
संवित्तिजननं सत्वं परानन्दसमुद्भवम् ॥ ४५

तत्तत्त्वं विदितं येन स एवानन्ददर्शकः ।
न पुनर्नाममात्रेण संवित्तिरहितस्तु यः ॥ ४६

[2] अन्यं न तारयेदज्ञः किं शिला तारयेच्छिलाम् ।
एषां तन्नाममात्रेण मुक्तिर्वै नाममात्रिका ॥ ४७

यैः पुनर्विदितं तत्त्वं ते मुक्ता मोचयन्त्यपि ।
तत्त्वहीने कुतो बोधः कुतो ह्यात्मपरिग्रहः ॥ ४८

---

[1] सर्वान्-पा. [2] अन्योऽन्यं तारयेन्नावं-पा.

परिग्रहविनिर्मुक्तः पशुरित्यभिधीयते ।
पशुभिः प्रेरितश्चापि पशुत्वं नातिवर्तते ॥ ४९

तस्मात्तत्त्वं विदित्वेह मुक्तो मोचक इष्यते ।
सर्वलक्षणयुक्तोऽपि सर्वशास्त्रविदप्ययम् ॥ ५०

सर्वोपायविधिज्ञोऽपि तत्त्वहीनस्तु निष्फलः ।
यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रतिष्ठिता ॥ ५१

तस्यावलोकनाद्यैश्च परानन्दोऽपि जायते ।
तस्माद्यस्यैव संपर्कात्प्रबोधानन्दसंभवः ॥ ५२

गुरुं तमेव वृणुयान्नापरं मतिमान्नरः ।
स्वशिष्यैर्विनयाचारचतुरैरुचितो गुरुः ॥ ५३

यावद्विज्ञायते तावत्सेवनीयो मुमुक्षुभिः ।
ज्ञाते तस्मिन् परा भक्तिर्यदि स्यात्तं समाश्रयेत् ॥ ५४

न ततस्तं त्यजेज्जातु नोपेक्षेत कथंचन ।
यत्रानन्दः प्रबोधो वा नाल्पमप्युपलभ्यते ॥ ५५

वत्सरादपि शिष्येण ज्ञोऽन्यं गुरुमुपाश्रयेत् ।
गुरुमन्यं प्रपन्नोऽपि नावमन्येत पौर्विकम् ॥ ५६

गुरोर्भ्रातॄंस्तथा पुत्रान् बोधकान् प्रेरकानपि ।
तत्रादावुपसङ्गम्य ब्राह्मणं वेदपारगम् ॥ ५७

गुरुमाराधयेत्प्राज्ञं सुभगं प्रियदर्शनम् ।
सर्वाभयप्रदातारं करुणाक्रान्तमानसम् ॥ ५८

तोषयेत्तं प्रयत्नेन मनसा कर्मणा गिरा ।
तावदाराधयेच्छिष्यः प्रसन्नोऽसौ भवेद्यथा ॥ ५९

तस्मिन्प्रसन्ने शिष्यस्य सद्यः पाशक्षयो भवेत् ।
तस्माद्धनानि रत्नानि क्षेत्राणि च गृहाणि च ॥ ६०

भूषणानि च वासांसि यानशय्यासनानि च ।
एतानि गुरवे दद्याद्भक्त्या वित्तानुसारतः ॥ ६१

वित्तशाठ्यं न कुर्वीत यदीच्छेत्परमां गतिम् ।
स एव जनको माता भ्राता बन्धुजनः स्वयम् ॥ ६२

सखा मित्रं च यत्तस्मात्सर्वं तस्मै निवेदयेत्।
निवेद्य पश्चात्स्वात्मानं सान्वयं सपरिग्रहम् ॥ ६३

समर्प्य सोदकं तस्मै नित्यं तद्भृशगो भवेत्।
यदा शिवाय स्वात्मानं दत्तवान् देशिकात्मने ॥ ६४

तदा शैवो भवेद्देही न ततोऽस्ति पुनर्भवः।
देशिकाकृतिमास्थाय पशोः पाशानशेषतः ॥ ६५

छित्त्वा परं पदं देवो नयत्येतमिति श्रुतिः।
गुरुश्च स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् ॥ ६६

ब्राह्मणं क्षत्रियं वैश्यं द्वित्रिवर्षकमेव वा।
प्राणद्रव्यप्रदानाद्यैरादेशैश्च समासमैः ॥ ६७

उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्मसु।
आक्रुष्टास्ताडिता वा ये विषादं नैव यान्त्यपि ॥ ६८

ते योग्याः [1]सततं शुद्धाः शिवसंस्कारकर्मणि।
अहिंसका दयावन्तो नित्यमुद्युक्तचेतसः ॥ ६९

अमानिनो बुद्धिमन्तस्त्यक्तस्पर्धाः प्रियंवदाः।
ऋजवो मृदवः स्वच्छाः विनीताः स्थिरचेतसः ॥ ७०

शौचाचार[2]समायुक्ताः शिवभक्ता द्विजातयः।
एवं वृत्तसमायुक्ता वाङ्मनःकायकर्मभिः ॥ ७१

शोध्या बोध्या यथान्यायमिति शास्त्रविनिश्चयः।
नाधिकारः स्वतो नार्याः शिवसंस्कारकर्मणि ॥ ७२

नियोगाद्भर्तुरस्त्येव यदि भक्ता महेश्वरे।
तथैव भर्तृहीनायाः पुत्रादेरभ्यनुज्ञया ॥ ७३

अधिकारो भवत्येव कन्यायाः पितुराज्ञया।
[3]शूद्राणामन्यजातीनां पतितानां विशेषतः ॥ ७४

तथा संकरजातीनां नाप्यशुद्धिर्विधीयते।
तेऽप्यकृत्रिमभावाश्चेच्छिवे परमकारणे ॥ ७५

---

[1] संयताः शुद्धाः–पा. [2] समोपेताः–पा. [3] शूद्राणां मर्त्यजा–पा.

पादोदकप्रदानाद्यैः कुर्यात्पाशविमोचनम् ।
अत्रानुलोमजाता ये युक्ता एव द्विजातिषु ॥ ७६

तेषामध्वविशुध्यादि कुर्यान्मातृकुलोचितम् ।
या तु कन्या स्वपित्राद्यैः शिवधर्मे नियोजिता ॥ ७७

सा भक्ताय प्रदातव्या नापराय विरोधिने ।
दत्ता चेत्प्रतिकूलाय प्रमादाद्बोधयेत्पतिम् ॥ ७८

अशक्ता तं परित्यज्य मनसा धर्ममाचरेत् ।
यथा मुनिवरं त्यक्त्वा पतिमत्रिं पतिव्रता ॥ ७९

कृतकृत्याभवत्पूर्वं तपसाराध्य शङ्करम् ।
यथा नालायनी देवं तपसाराध्य पाण्डवान् ॥ ८०

पतीन् लब्धवती धर्मे [1]गुरुभिर्विनियोजिता ।
अस्वातन्त्र्यकृतो दोषो नेहास्ति परमार्थतः ॥ ८१

शिवधर्मनियुक्तायाः शिवशासनगौरवात् ।
किमत्र बहुनोक्तेन योऽपि कोऽपि शिवाश्रितः ॥ ८२

संस्कार्यो गुर्वधीनश्चेत्संस्क्रिया न प्रभिद्यते ।
गुरोरालोकनादेव स्पर्शात्संभाषणादपि ॥ ८३

यस्य संजायते [2]ह्याज्ञा तस्य नास्त्यपरा क्रिया ।
मनसा यस्तु संस्कारः क्रियते योगवर्त्मना ॥ ८४

स नेह कथ्यते गुह्यो गुरुवक्त्रैकगोचरः ।
क्रियावान् यस्तु संस्कारः कुण्डमण्डपपूर्वकः ॥ ८५

स वक्ष्यते समासेन तस्य शक्यो न विस्तरः ।
इत्यादिवायवीयाच्च यो गुरुर्गौरवाश्रयः ॥ ८६

स पूज्यो लिङ्गवद्भक्त्या विशेषस्तत्र भीतिदः ।
अविशेषेण कर्तव्यो गुरौ लिङ्गे च जङ्गमे ॥ ८७

पञ्चाक्षरप्रशंसायामेतावच्च निरूपितम् ।
पुनर्निरूपणं चात्र प्रकृतार्थद्वयेरणात् ॥ ८८

---

[1] गुरुभिर्न नियो. [2] प्रज्ञा तस्य नास्ति पराजयः

पञ्चाक्षरप्रशंसात्प्राक्तत्रैव लिखितं पुनः।
गुरुकृत्यविधानं च प्रकृते प्रतिपादितम् ॥ ८९

अथवान्यत्प्रवक्ष्यामि परमेश्वरभाषितम्।
देवीं प्रति बहुप्रीत्या पृष्टश्चाम्बिकया स्वयम् ॥ ९०

वातुलोत्तरतन्त्रेऽपि काम्बिकोत्तरतन्त्रके।
योऽर्थः प्रोक्तः शिवेनैव साक्षाद्देवेन शंभुना ॥ ९१

अकल्मषमसन्देहमुपवर्णितमादरात्।
मण्डले मण्डपे कुण्डे प्रसादे प्रतिमासु च ॥ ९२

लिङ्गे पीठे शिलायां च परीक्षानिपुणोऽग्रणीः।
निग्रहानुग्रहे दक्षः सर्वदोषविवर्जितः ॥ ९३

मण्डलस्थलहीनं स्याद्गुरुपट्टं न चेश्वरि।
न भवेत्पतिपत्न्योश्च गुरुरन्यो वरानने ॥ ९४

गुरुद्वयं च लिङ्गस्य द्वयमेव भवेत्तदा।
तथा दीक्षा द्विधा चैव प्रसादश्च द्विधा भवेत् ॥ ९५

पतिपत्नीभ्रातृपुत्रदासीदासानुवर्तिनाम्।
एकदीक्षा भवेद्देवि विशेषाद्भक्तिवर्धना ॥ ९६

गुरुलक्षणमित्युक्तं शिष्यलक्षणमुच्यते।

शिष्यलक्षणम्

द्विजातिर्वान्यजातिर्वा स्वस्वोक्ताचारवाञ्छुचिः ॥ ९७

सत्यवाग्गुरुभक्तश्च दम्भाहङ्कारवर्जितः।
रागद्वेषविनिर्मुक्तः शान्तः सर्वजनप्रियः ॥ ९८

अहिंसको दयाशीलो नित्यमुद्युक्तमानसः।
गुरुशुश्रूषणरतो मनोवाक्कायकर्मभिः ॥ ९९

बहिरन्तश्चरैः प्राणैर्गुरुभक्तियुतो नरः।
गुरुणापि स्वयं शिष्यो वर्षमेकं विचारितः ॥ १००

---

[1] हीनस्य गुरु–पा.

गुर्वाज्ञापालकः सौम्यः शिष्य इत्यभिधीयते ।
परीक्ष्य परितः शिष्यमुत्तमं नीचकार्यतः ॥ १०१
नीचं चोत्तमकार्येण ततो दीक्षां समाचरेत् ।
एवं सङ्ग्रहतः प्रोक्तं लक्षणं गुरुशिष्ययोः ॥ १०२
ससम्बन्धिपदार्थत्वाच्छिष्यलक्षणमीरितम् ।
एतादृशस्य विदुषो गुरोः पूजां समाचरेत् ॥ १०३

नैमित्तिकपूजा

ततो नैमित्तिकीं पूजां कथयामि समासतः ।
न गुरोः सदृशी माता न गुरोः सदृशः पिता ॥ १०४
जिह्वालिङ्गान्मन्त्रशुक्रं कर्णयोर्नौ निषिच्य वै ।
जातः पुत्रो मन्त्रपुत्रस्ततोऽसौ गुरुरुत्तमः ॥ १०५
तस्मात्सर्वप्रयत्नेन गुरुमेव ह्यनुव्रजेत् ।
पूजयेद्विविधैनैनं वचनेन च सेवया । १०६
तावन्मात्रेण देहान्ते मोक्षमेत्यज्ञमानवः ।
इह जन्मनि वान्यस्मिन्विज्ञानं प्राप्य दुस्तरम् ॥ १०७
तरन्ति संसृतेः पारं मोक्षमेति न संशयः ।
शिवोऽपि कृत्वा मनसि गुरोर्गौरवमव्ययः ॥ १०८
दक्षिणामूर्तिरूपेण प्रादुरासीन्महात्मनाम् ।
इच्छामात्रेण सर्वेषां ज्ञानदातृत्वसंभवे ॥ १०९
साक्षाद्गौरवमासाद्य बोधयत्यखिलं जगत् ।
प्रत्यक्षेण प्रमाणेन गुरोर्गौरवबोधतः[1] ॥ ११०
आनुमानिकमप्यत्र प्रमाणं बहु विद्यते ।
बोध्यते केनचिर्किंचित्क्रमाज्जानाति मानवः ॥ १११
नाबोधयत्किंचिदपि जानाति किल मानवः ।
तस्माद्बोधक एवासौ सर्वस्मादुत्तरोत्तरः ॥ ११२
शिवे रुष्टे गुरुस्त्राता न रुष्टे निजसद्गुरौ ।
त्राता शिवस्तदेतस्माद्गुरुपूजारतो भवेत् ॥ ११३

[1] बोधकः—पा.

संसारे मज्जयन्पुत्रं पिता तु जनकः परः ।
प्रपञ्चजनकः शंभुर्जगदुद्धरति स्वयम् ॥ ११४

तस्मिन् वैषम्यनैर्घृण्ये नहि लोकहितावहे ।
जानाति पितरं यस्तु तस्य त्राता महेश्वरः ॥ ११५

अजानन् पितरं यस्तु न तस्य परिपालकः ।
करस्थं पायसं त्यक्त्वा कूर्परं लेढि चात्मनः ॥ ११६

यः स्वस्य गुरुपूजां तु त्यक्त्वा शिवपदं यजेत् ।
पराङ्मुखः शिवस्तस्य नरकं संप्रयच्छति ॥ ११७

एतत्सर्वं परिज्ञाय पूजां कुर्याद्गुरोः स्वयम् ।
गुरुः पूजाभिसंतुष्टः स्वसायुज्यं प्रयच्छति ॥ ११८

कार्तिके सोमवारे च पुष्पैः पत्रैः फलैर्यजेत् ।
शक्तश्चेत्तस्य पूजायां मासमेकमतन्द्रितः ॥ ११९

त्रिकालं वाथ षट्कालं प्रदोषे वा समर्चयेत् ।

तस्यायं क्रमः—वातुलोत्तरे—

प्रातरुत्थाय देवेशि दृष्ट्वा करतलद्वयम् । १२०

स्मरन् गुरुपदद्वन्द्वं पठेत्तत्पादुकास्तुतिम् ।
गत्वाभ्याशं गुरोः शीघ्रं दण्डवत्प्रणमेद्भुवि ॥ १२१

ततः स्वस्य कराभ्यां तत्पदौ व्यत्यस्तपाणिना ।
संस्पृश्य तद्धतान् पांसून्नेत्रयोरर्पयेत्स्वयम् ॥ १२२

गृहीत्वा तत्पदद्वन्द्वं निक्षिप्य शिरसि स्वतः ।
तत्र लीनमनाः सम्यङ्निस्संज्ञत्वं व्रजेत्स्वयम् ॥ १२३

न पूर्वमुच्चरेद्वाणीं गुरोराकर्ण्य भाषितम् ।
मृदुवादी च परया भक्त्या किंचिद्वदेत्स्वयम् ॥ १२४

ततस्तत्करुणासारपरिप्लुतशरीरवान् ।
सुधामयत्वमापन्नः कृतार्थोऽस्मीति भावयेत् ॥ १२५

गुरुतत्त्वस्वरूपं च भावयेदान्तरे पुनः ।
तद्दक्षिणाङ्गुष्ठदेशाज्जातां संभावयेत्तनुम् ॥ १२६

दीपादीपोत्पत्तिरिव तत्तेजोरूपतां व्रजन् ।
स्वगृहं स्वसुतं पत्नीं स्वधनं गौरवं स्मरन् ॥ १२७

स्वीयतां संपरित्यज्य गुरुं भाषेत भक्तितः ।
अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ १२८

अद्य मे सफलं ज्ञानं गुरो त्वत्पाददर्शनात् ।
स्वीकुरुष्वाद्य मद्भक्तिं दयया मयि वत्सल ॥ १२९

पूजां ते [1] तात्विकीं कुर्वे मनस्तत्र प्रसारय ।
इति मन्त्रेण देवेशि विज्ञाप्य गुरवे स्वयम् ॥ १३०

यावच्छक्ति गुरोः पादसेवां कृत्वा ततः परम् ।
दन्तधावनमुख्येभ्यः कर्मभ्यः प्रयतः स्वयम् ॥ १३१

भूतिरुद्राक्षभूषाढ्यः पञ्चाक्षरमनुं जपेत् ।
नित्यपूजां च निर्वर्त्य स्वेष्टलिङ्गस्य भक्तितः ॥ १३२

त्वरया गुरुसामीप्यं गतः पूर्ववदेव हि ।
नमस्कृत्वाथ गमयेत्स्वगृहं प्रति तं गुरुम् ॥ १३३

आन्दोलिकायामारोप्य गजे वापि तुरङ्गमे ।
अनुगच्छेत्स्वयं भक्त्या वाद्यघोषसमन्वितः ॥ १३४

गृहं नीत्वा गुरुं पश्चात्क्षालयंस्तत्पदद्वयम् ।
तेनोदकेन शिरसि संप्रोक्ष्य स्वजनैः सह ॥ १३५

दत्वा हस्तावलम्बं च ततो नीत्वा गृहान्तरम् ।
प्रकल्प्य चासनं श्रेष्ठं निवेश्य प्रीतिपूर्वकम् ॥ १३६

पूर्वोक्तेनैव विधिना पूजयेद्गुरुमव्ययम् ।
गुणातीतः परशिवो गुरुरूपमुपाश्रितः ॥ १३७

गुणान् रुन्ध इति प्रोक्तो गुरुशब्दस्य विग्रहः ।
सविकारान् राजसादीन् गुणान् रुन्धे व्यपोहति ॥ १३८

गुणत्रयान् व्यपोह्याग्रे शिवं बोधयतीति सः ।
विश्वस्तानां तु शिष्याणां गुरुरित्यभिधीयते ॥ १३९

---

[1] कार्तिकीं—पा.

तस्माद्गुरुशरीरं तु गुरुलिङ्गं भवेद्बुधाः ।
गुरुलिङ्गस्य पूजा तु गुरुशुश्रूषणं भवेत् ॥ १४०

श्रुतं करोति शुश्रूषां कायेन मनसा गिरा ।
उक्तं यद्गुरुणा पूर्वं शक्यं वाशक्यमेव वा ॥ १४१

करोत्येव हि पूतात्मा प्राणैरपि धनैरपि ।
तस्माद्वै शासितुं योग्यः शिष्य इत्यभिधीयते ॥ १४२

शरीराद्यर्थकं सर्वं गुरोर्दत्वा स शिष्यकः ।
अग्रपाकं निवेद्याग्रे भुञ्जीयाद्गुर्वनुज्ञया ॥ १४३

शिष्यः पुत्र इति प्रोक्तः शिष्यः शिष्यत्वयोगतः ।
जिह्वालिङ्गान्मन्त्रशुक्रं कर्णयोर्नौ निषिच्य वै ॥ १४४

जातः पुत्रो मन्त्रपुत्रः पितरं पूजयेद्गुरुम् ।
निमज्जयति पुत्रं वै संसारे जनकः पिता ॥ १४५

संतारयति संसारात् गुरुर्वै साधकः पिता ।
उभयोरन्तरं ज्ञात्वा पितरं संप्रपूजयेत् ॥ १४६

अङ्गशुश्रूषया वापि धनाद्यैः स्वार्जितैर्गुरुम् ।
पादादिकेशपर्यन्तं लिङ्गान्यङ्गानि सद्गुरोः ॥ १४७

धनरूपैः पादुकाद्यैः पादसङ्ग्रहणादिभिः ।
स्नानाभिषेकनैवेद्यैर्भोजनैश्चापि पूजयेत् ॥ १४८

गुरुपूजैव पूजा स्याच्छिवस्य परमात्मनः ।
गुरुशेषं तु तत्सर्वमात्मशुद्धिकरं भवेत् ॥ १४९

गुरुशेषं शिवोच्छिष्टं जलमन्नादिनिर्मलम् ।
शिष्याणां शिवभक्तानां ग्राह्यं भोज्यं [1] भवेद्द्विजाः ॥ १५०

गुर्वनुज्ञाविरहितं चोरवत्सकलं बुधाः ।
गुरोरपि विशेषज्ञं गुरुं गृह्णीत वै द्विजाः ॥ १५१

अज्ञानमोचनं साध्यं विशेषज्ञो हि मोचकः ।
तस्माद्गुरुमुखात्कर्म ज्ञानं चापि विशेषतः ॥ १५२

ज्ञात्वा कर्तव्यमखिलं भोगमोक्षविवृद्धये ।

---

[1] भवेद्द्विधा–पा.

गुर्वनुज्ञासमालब्धं कर्म मोक्षाय केवलम् ॥ १५३
रथोत्सवादि सकलं गुरवे कारयेद्बुधः ।
जपो होमस्तपश्चैव तदङ्गं यद्यदीरितम् ॥ १५४
[1] वीरशैवान्वयगुणं कुर्यादन्यज्जपेन हि ।
निर्वहेज्जीवरत्नेन वीरशैवः स्वयं बुधः ॥ १५५
वीरशैवलहर्यां च स्फुटमेतदुदीरितम् ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठशिवाचार्यकृते क्रियासारे गुरुपूजाविधिर्नाम षोडशोपदेशः समाप्तः

सप्तदशोपदेशः

उपदेशे सप्तदशे वक्ष्ये भक्तप्रशंसनम् ।
जङ्गमं स्थावरं चेति शंभो रूपद्वयं शुभम् ॥ १
स्थावरं च स्वयं व्यक्तं काश्यां विश्वेश्वरादिकम् ।
जङ्गमं द्विविधं प्रोक्तं मान्त्रिकं सहजं त्विति ॥ २
मान्त्रिकं मन्त्रसामर्थ्यादावाहनमुदीरितम् ।
सहजं जङ्गमं वीरशैवशब्देन शब्दितम् ॥ ३

भिन्दन्ति शैलानुदधीन् पिबन्ति
व्यत्यासयन्ति क्षितिमन्तरिक्षम् ।
तृणीकृतब्रह्मपुरन्दराणां
किं दुष्करं शङ्करकिंकराणाम् ॥ ४

अगस्त्यः कुम्भजन्मासौ शिवभक्तयैव केवलम् ।
पपौ समुद्रमतुलं [2]शिवशक्त्युपबृंहितः ॥ ५
पितृहत्यादिमोक्षाय [3] येषां वै पर्यवस्यति ।
घटिताघटनाः सर्वे प्रसिद्धा उत्तमोत्तमाः ॥ ६
अणुर्महत्वं संयाति महच्चाणुत्वमाव्रजेत् ।
भक्तिचिह्नानि सर्वाणि प्रीती रुद्राक्षधारणे ॥ ७

[1] वीरशैवाननुगुणं चा—पा. [2] शिवभक्त्युपबृं—पा. [3] एषा वै इति स्यात.

भस्मत्रिपुण्ड्रविश्वासः श्रद्धा पञ्चाक्षरे शुभे ।
तावन्मात्रफलं दानाद्यस्मिन् कस्मिंश्च पात्रके ॥ ८

अनन्तं शिवभक्ते स्यात्तस्माद्भक्तो विशिष्यते ।
भक्तस्य कृत्यमेतावच्छिवशब्दे समादरः ॥ ९

भक्तान्तरे परा प्रीतिः शिवकार्ये मनोजयः ।
शैवशास्त्रे परा श्रद्धा तदध्यापनमन्वहम् ॥ १०

स्वयमध्ययनं चापि पुराणेषु समीरितम् ।
इत्थं निशम्य वचनं सूतस्य मुनिसत्तमाः ॥ ११

अपृच्छन् संशयाविष्टा भक्तानां लक्षणं मुदा ।
शिवस्य लक्षणं पूर्वं गुरोरपि च लक्षणम् ॥ १२

त्वन्मुखादेव विज्ञातं पुराणार्थविशारद ।
इदानीं शिवभक्तानामस्मभ्यं ब्रूहि लक्षणम् ॥ १३

त्वत्तो नैव समर्थोऽस्ति त्रिषु लोकेषु सर्ववित् ।
अतस्त्वं दययास्मभ्यं वद भक्तस्य लक्षणम् ॥ १४

इति तेषां वचः श्रुत्वा सूतः पौराणिकोत्तमः ।
प्रोवाच लक्षणं भूयो भक्तानां परमेशितुः ॥ १५

सूतः—(शं. सं. उप. ३९-२६)

शिवभक्ता महात्मानः सन्ति देवेषु केचन ।
दैत्येषु यातुधानेषु यक्षगन्धर्वयोगिषु ॥ १६

मुनीश्वरेषु मर्त्येषु ब्राह्मणेषु नृपेष्वपि ।
ऊरुजेषु च शूद्रेषु संकरेष्वपि सर्वशः ॥ १७

वर्णाश्रमव्यवस्थाश्च नैषां सन्ति मुनीश्वराः ।
केवलं [1]शिवरूपास्ते सर्वे माहेश्वराः स्मृताः ॥ १८

अतिवर्णाश्रमाः प्रोक्ताः सर्ववेदेषु [2]सत्तमाः ।
तेषां बाह्यानि चिह्नानि दश सन्ति मुनीश्वराः ॥ १९

---

[1] शिवभक्तास्ते—पा. [2] संमताः

त्रीण्यान्तराणि चोक्तानि दश सन्ति महात्मनाम् ।
प्रथमं भस्मरुद्राक्षधारणं समुदीरितम् ॥ २०

द्वितीयं गुरुसेवा च शिवस्तोत्रं तृतीयकम् ।
नामोच्चारणमीशस्य चतुर्थं परिपठ्यते ॥ २१

पञ्चमं देवदेवस्य पूजनं [1] समुदीरितम् ।
शिवालयस्य पुण्यस्य दर्शनं षष्ठमीरितम् ॥ २२

तथा शिवपुराणानां श्रवणं सप्तमं द्विजाः ।
नमस्कारं तु भक्तानामष्टमं कथितं खलु ॥ २३

नवमं शिवभक्तानां गृहे भोजनमीरितम् ।
[2]दानं च दशमं ज्ञेयं शिवभक्ते गुरावपि ॥ २४

एवं बाह्यानि चिह्नानि कथितानि दश द्विजाः ।
आन्तराण्यपि चिह्नानि मानसः प्रथमो जपः ॥ २५

पूजा च मानसी ज्ञेया द्वितीया परमेशितुः ।
साक्षात्कारस्तृतीयस्तु ब्रह्मणो ऋषिसत्तमाः ॥ २६

इमानि त्रीणि चिह्नानि पुराविद्भिर्मुनीश्वराः ।
आन्तराण्यपि बाह्यानि येषां सन्ति यदा द्विजाः ॥ २७

तदा भाक्तानि चिह्नानि संभवन्ति महात्मनाम् ।
कण्ठे विकारः प्रथमो गद्गदाख्यो [3]द्वितीयकम् ॥ २८

जिह्वा[4]स्पन्दस्तृतीयस्तु स्फुरणं त्वोष्ठयोरपि ।
कम्पनं च शरीरस्य चतुर्थं भक्तिलक्षणम् ॥ २९

रोमाञ्चः पञ्चमो ज्ञेयः षष्ठः स्वेदोऽपि कीर्तितः ।
स्खलनं सप्तमं ज्ञेयमष्टमं बाष्पनिर्गमः ॥ ३०

रोदनं नवमं चिह्नं दशमं पारवश्यकम् ।
एतानि दश चिह्नानि भाक्तान्युक्तानि शूलिना ॥ ३१

त्रिविधान्यपि चिह्नानि येषां सन्ति महात्मनाम् ।
ते भक्ताः शाङ्करा ज्ञेयाः सर्वलोकैकपावनाः ॥ ३२

---

[1] ब्रह्मणोत्तमाः. [2] ध्यानं–पा. [3] शरीरजः–चा. [4] स्पन्दो द्वितीयस्तु–पा.

अथवा शिवभक्ता ये भस्मरुद्राक्षधारिणः ।
तेषु पूर्वोक्तचिह्नानि न ज्ञायन्ते यदा तदा ॥ ३३

तान् दृष्ट्वा प्रणमेद्भक्त्या शिवभक्तान् शिवप्रियः ।
ये वै शिवं गुरुं भक्तान् प्रणमन्ति स्तुवन्त्यपि ॥ ३४

काङ्क्षितान्यपि सर्वाणि लब्ध्वा ते परया मुदा ।
भुक्त्वा भोगान् सुविलान् पुत्रैः पौत्रैः समन्विताः ॥ ३५

अरोगदृढगात्राश्च स्थित्वात्र बहुकालतः ।
अन्ते विमानमारुह्य नानारत्नविचित्रितम् ॥ ३६

सौरलोकस्थितैर्देवैश्चन्द्रलोकस्थितैरपि ।
तथान्यैर्देवलोकस्थैर्दिक्पालैर्जगदीश्वरैः ॥ ३७

ब्रह्मणा विष्णुना वापि तथैव ऋषिसत्तमैः ।
एतैरन्यैश्च सकलैरग्रतोयायिभिर्मुदा ॥ ३८

देवदुन्दुभिनिर्घोषैः पुष्पवर्षैरितस्ततः ।
नृत्यद्भिरप्सरोवृन्दैर्गायद्भिः किन्नरैर्वृतः ॥ ३९

दिव्यं शरीरं संप्राप्य शिवलोकं शिवप्रियम् ।
गत्वात्र सन्निधौ शंभोः [1]स्थित्वा प्राप्य सरूपताम् ॥ ४०

अन्ते च शिवसायुज्यं लभन्ते [2] नात्र संशयः ।
तस्मान्न शिवपुण्यानां माहात्म्यं वर्णितुं मया ॥ ४१

शक्यं यथा वै माहात्म्यं शङ्करस्य महात्मनः ।
एवमेव पुरा देवी शिवपुण्यमनुत्तमम् ॥ ४२

श्रुत्वा महेश्वराद्भक्त्या प्रीत्या परमया युता ।
अत्याश्चर्येण संयुक्ता सहसोत्थाय चासनात् ॥ ४३

प्रदक्षिणत्रयं कृत्वा प्रणम्य च महेश्वरम् ।
अब्रवीत्सुस्मिता वाक्यं प्रसन्नं वीक्ष्य शङ्करम् ॥ ४४

अनेन शिवपुण्येन प्राणिनः परमेश्वर ।
विदित्वा त्वां गतिं यान्तु तव सायुज्यरूपिणीम् ॥ ४५

---

[1] प्राप्य सारूप्यमुत्तमम्. [2] ब्राह्मणोत्तमाः.

इत्युक्तः शिवया देवः करुणारूपया पुरा ।
ज्ञातुं न सुलभं लोकैर्मम पुण्यमनुत्तमम् ॥ ४६

पशुपुण्यानि सर्वाणि कृत्वा शुद्धान्तरात्मभिः ।
पकैर्हि पतिपुण्यानि ज्ञातुं शक्यानि लेशतः ॥ ४७

अन्येषां केवलानां तु शिवपुण्यं कुतो भवेत् ।
तस्मात्सर्वप्रयत्नेन पशुपुण्यमनेकधा ॥ ४८

चरित्वा पतिपुण्येषु मनो भवति नान्यथा ।
इत्युक्तं देवदेवेन [1]देव्या पृष्टेन शंभुना ॥ ४९

तस्मात्सर्वोत्तमा भक्ताः शिवेनैवोदितं पुरा ।
यद्यदिच्छन्ति मे भक्तास्त्रैलोक्येऽपि च दुर्लभम् ॥ ५०

[2]तत्सद्यः साधयिष्यन्ति व्रतमेतत्सदा मम ।
ऐहिकामुष्मिका भोगा मोक्षस्तत्सङ्गतो भवेत् ॥ ५१

भक्तसङ्गस्तु सर्वेषां सर्वकामफलप्रदः ।
जङ्गमा इति विख्याताः शंभोस्ते चरमूर्तयः ॥ ५२

चरदर्शनमात्रेण सर्वं तस्य च सिध्यति ।
तत्पादपांसुभिः पूतं भवनं चेतरद्धनम् ॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ
श्रीनीलकण्ठशिवाचार्यकृते क्रियासारे
सप्तदशोपदेशः

अष्टादशोपदेशः

अष्टादशोपदेशोऽस्मिन् दानं भक्तेषु वर्ण्यते ।
दातुर्भक्त्या विशेषेण शिवभक्ते महत्यसौ ॥ १

नयति स्वेष्टसङ्गतं दानमित्युपवर्णितम् ।
दातारं नयति स्थेम दानमित्यथ वा भवेत् ॥ २

---

[1] देव्यै पूर्वं द्विजोत्तमाः. [2] तत्तत्सद्यः साधयिष्ये.

भक्तस्थलोक्ताचारो यः शमदान्त्यादिलक्षणः।
शिवकार्येषु निरतः तत्पात्रमिति गीयते॥ ३

सामान्ये च निराभारे विशेषे भक्तिपूर्वकम्।
यथायोग्यं प्रदातव्यं तत्तद्भाञ्छितमुत्तमम्॥ ४

भूतिदानं च दानानामुत्तमोत्तममीरितम्।
स्वयं संपाद्य यत्नेन कल्पं वाकल्पमेव वा॥ ५

उपकल्पं तथा भस्म प्रयत्नेनार्जयेत्स्वयम्।
श्वेतं सूक्ष्मं च कस्तूरीकर्पूरादिसुवासितम्॥ ६

वटकीकृत्य भक्तेभ्यः प्रयच्छेद्भक्तिपूर्वकम्।
देव देव जगन्नाथ भूतिभूषितविग्रह॥ ७

सत्त्वसंपत्तिमुद्दिश्य ददामि तव तुष्टये।
भूयादनेन मे ज्ञानं दिव्यं सायुज्यकारणम्॥ ८

भूतिर्भस्म तथा क्षारं रक्षा भसितमित्यथ।
संस्मरन् पञ्च नामानि दद्याद्भक्ताय भूरिशः॥ ९

न प्रयच्छेत्स्वयं तिष्ठंस्तिष्ठतो नाददीत च।
न दापयेत्स्वयं दद्यादज्ञानोन्मूलनाय तु॥ १०

भस्मत्रिपुण्ड्रयुक्ताय भक्ताय शिवयोगिने।
भस्मनिष्ठाय शुद्धाय नान्यस्मै तत्कदाचन॥ ११

न दद्यादन्यभक्ताय नापराधविधायिने।
शिवयोगविहीनाय रोगिणे डम्भशालिने॥ १२

दानानामुत्तमं दानं भूतिदानमुदीरितम्।
रक्तेषु च विरक्तेषु दद्याद्भसितमुत्तमम्॥ १३

न केवलं भस्म दद्यात्पात्रे निक्षिप्य यत्नतः।
भक्तो न प्रतिगृह्णीयाद्भसितं केवले करे॥ १४

शुद्धपात्रेण गृह्णीयाद्वसनेनाथवा पुनः।
सुवर्णपात्रे निक्षिप्य दानमेतदनुत्तमम्॥ १५

अथवा राजते पात्रे शुद्धवस्त्रेऽथवा पुनः।
न ताम्रे वान्यपात्रे वा दद्याद्वै शिवलाञ्छनम्॥ १६

स्वोपभुक्तेन वस्त्रेण [1]न दद्याद्भसितं बुधः ।
नूतनेनैव वस्त्रेण बध्वा भसितमुत्तमम् ॥ १७

प्रक्षालितार्द्रकरयोः प्रक्षालितकराम्बुजः ।
पञ्चाक्षरेण मनुना दशवारं सुमन्त्रितम् ॥ १८

प्रतिगृह्य जपेन्मन्त्रं दशवारमतन्द्रितः ।
ततः किंचित्समादाय स्वयं शंभुमनुस्मरन् ॥ १९

द्वादशान्ते ललाटे च चक्षुषोरर्पयेत्ततः ।
प्राशयेत्पणमात्रं तु तत्क्षणे भक्तिसंयुतः ॥ २०

गृहीत्वा स्थापयेद्भूमौ ग्रहीता नारकी भवेत् ।
नन्दिकेशः स्वयं क्रुद्धः शिरस्तस्य छिनत्ति च ॥ २१

नान्यहस्ते प्रदातव्यं स्वयमेव वहेत्सुधीः ।
गृहीत्वा देवतागारे पेटिकायां विनिक्षिपेत् ॥ २२

बैल्वे फले निक्षिपेच्चेत्तस्य ज्ञानं तु पुष्कलम् ।
भस्त्रिकायामलाभे तु पिदध्यात्तत्प्रयत्नतः ॥ २३

एवंक्रमेण यो दद्यात्प्रतिगृह्णीत यः पुमान् ।
अश्वमेधसहस्रस्य फलमाप्नोति नित्यशः ॥ २४

दातुः प्रतिग्रहीतुश्च तुल्यमेव फलं भवेत् ।
अन्यथा प्रतिगृह्णीयान्नरकं तस्य तद्ध्रुवम् ॥ २५

भक्त्यैव प्रतिगृह्णीयाच्छिवलाञ्छनमुत्तमम् ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ २६

पुरा कृतयुगे राजा स्वराडाख्यो नरर्षभः ।
शिवभक्तियुतो नित्यं भस्मरुद्राक्षभूषणः ॥ २७

पञ्चाक्षररतो नित्यं लिङ्गदर्शनतत्परः ।
तस्यासीन्नियमः काश्चिदेकादश शिवालये ॥ २८

दर्शनं स्पर्शनं स्तोत्रपठनं च नमस्क्रिया ।
इत्थं काले व्यतीते तु शिवसायुज्यमाप सः ॥ २९

---

1 [illegible]

तस्य पुत्रो दुष्टशीलो दुर्मतिर्नाम नामतः ।
मन्त्रिभिर्बोधितो दुष्टैरन्यधर्मैकतत्परः ॥ ३०

नित्यं वेश्यारतो भूत्वा मद्यमांसाशनोऽभवत् ।
[1]अश्रद्धा भस्मनि सदा त्रिपुण्ड्रे शिवलाञ्छने ॥ ३१

अन्यलाञ्छनसंयुक्तः क्रूरः सर्वत्र हिंसकः ।
शिवालयेषु ये धर्माः पित्रा नियमिताः पुरा ॥ ३२

तान् सर्वान् प्रतिबध्यासौ शून्यालयमचीकरत् ।
ब्रह्महत्याशतं स्वस्य नियमः स्याद्दिने दिने ॥ ३३

इत्येवंनियमो नित्यं धनुश्शरसमन्वितः ।
मृगयामाचरन् दुष्टः क्षीणराज्योऽभवत्तदा ॥ ३४

अरिभिश्च समाक्रान्तो देशान्तरमशिश्रयत् ।
ततश्चित्रपुरं गत्वा मकराख्यस्य पट्टणम् ॥ ३५

पोषणार्थं स्वोदरस्य वेश्यां कांचिदनुव्रजन् ।
वस्त्रवाही स्वयं नित्यं विटानां परिचारकः ॥ ३६

बहुव्याधियुतो देहे वेश्याचेटीमचीकमत् ।
बध्वा सुविपुलं भस्म क्षालिते शुद्धवस्त्रके ॥ ३७

अर्धरात्रौ समुत्थाय चेटीशयनमास्थितः ।
तामाहूय बलाच्चेटीमन्नमेतत्सुनिर्मलम् ॥ ३८

दधिमिश्रं तवानीतमित्येवं तामभाषत ।
सा चोत्थाय स्वशयनात्प्रक्षाल्य स्वकरद्वयम् ॥ ३९

प्रतिगृह्यादरेणैव भित्तौ नीडे समक्षिपत् ।
राजतेनापि पात्रेण पिधायाखुभयादसौ ॥ ४०

ततस्तु शयनं प्राप्य तेन रेमे विटेन सा ।
ज्वरितस्तद्गमनतः स्वयं रुग्णश्च दुर्मतिः ॥ ४१

प्रातरुत्थाय सा शीघ्रं सिद्धान्नं भोक्तुमाददे ।
ग्रन्थिं विस्रस्य सा दृष्ट्वा भसितं च सुनिर्मलम् ॥ ४२

---

[1] अश्रद्धो भस्मनि–पा.

गृहीत्वा तस्य शिरसि निक्षिप्योरस्यताडयत् ।
हतस्तेन प्रहारेण दुर्मतिः क्रोधसंवृतः ॥ ४३

गृहीत्वा खड्गमतुलमेतस्याः शीर्षमच्छिनत् ।
सा मृता तेन वै छिन्ना दुर्मतिर्मृतिमाप सः ॥ ४४

आगताः किङ्करा याम्याः करालाश्चातिभीषणाः ।
ग्रहीतुं तां च तं चैव बहुपापसमन्वितौ ॥ ४५

तदा कैलासशिखरे देवीं प्रति महेश्वरः ।
बोधयन्भस्ममाहात्म्यं प्रहस्येदमथाब्रवीत् ॥ ४६

द्वारस्थं नन्दिनं स्नेहादरे प्रेषय मद्गणान् ।
द्रुतं मल्लाञ्छनैर्युक्तं दुर्मतिं तां च चेटिकाम् ॥ ४७

गृहीत्वारोप्य निकटं विमानैरानयन्त्विति ।
शिवस्य वचनं श्रुत्वा नन्दिकेशो बहिर्गतः ॥ ४८

प्रेषयामास बहुशो गणान् शंभोः पदे पदे ।
विमाने निर्मले चोभे ततस्ते शिवकिङ्कराः ॥ ४९

मनोवेगेन गत्वा तावारोप्याथ विमानके ।
संताड्य किङ्करान्याम्यान् प्रापयामासुरञ्जसा ॥ ५०

कैलासान्तं ततस्तौ च दिव्यरूपं समास्थितौ ।
गणत्वं प्राप्य तरसा शिवसारूप्यमापतुः ॥ ५१

एतत्सर्वं समालोक्य देवी सा विस्मयान्विता ।
यमः श्रुत्वा च वृत्तान्तं निजकिङ्करभाषितम् ॥ ५२

किङ्करान् शिक्षयामास भीतः शंभुगणान् स्मरन् ।

यमः—

अद्यप्रभृति ये लोके ज्ञानीनोऽज्ञानिनोऽपि वा ॥ ५३

भस्मना लिप्तसर्वाङ्गा [1] भस्मदानैकतत्पराः ।
न गन्तव्यं तदभ्याशं सावधाना भवन्त्विति ॥ ५४

---

[1] भस्मदानादितत्पराः—पा.

तस्माद्दानं किल श्रेष्ठं दानाच्छ्रेयान् प्रतिग्रहः ।
अज्ञो वाप्यथवा प्राज्ञः स्वयं भक्तिसमन्वितः ॥ ५५

दद्याच्च प्रतिगृह्णीयाद्धसितं भक्तिभावितः ।
रुद्राक्षाणां च यद्दानं तस्माच्छ्रेयः समीरितम् ॥ ५६

तद्दानविधिरुक्तश्च पूर्वप्रकरणे मया ।
धनं धान्यं गृहं क्षेत्रं वसनानि च भूरिशः ॥ ५७

दद्याद्भक्ताय धीराय भक्तियुक्तेन चेतसा ।
मठं कृत्वा सुविपुलं विचित्रस्तम्भसंयुतम् ॥ ५८

प्राङ्गणैर्भूरिविस्तारैः शोभितं शिवयोगिनाम् ।
तद्रक्षणाय भृत्यांश्च योगिनां परिचारकान् ॥ ५९

निधाय राजसंस्थानं तत्र धर्माय यः पुमान् ।
केदारं सस्यसंपन्नं विभज्य स्थिरभक्तितः ॥ ६०

दद्यात्स्वयं दापयेद्वा [1] जीवद्वचनवान्नरः ।
अशक्तः स्वगृहे वापि योगिनः सेवया स्वयम् ॥ ६१

तोषयेद्भक्तिभावेन प्रतिनित्यमतन्द्रितः ।
गृहिणे भक्तियुक्ताय स्वाचारपरिवृद्धये ॥ ६२

कुटुम्बिने श्रोत्रियाय [2] गृहाणि क्षेत्रमुत्तमम् ।
आराममुक्तविधिना प्रयच्छेद्भक्तिभावितः ॥ ६३

अभक्तो वाथ भक्तो वा शिवभक्तस्य सेवया ।
भक्तिमेति स्वयं प्राज्ञः प्रयच्छेद्भक्तिपूर्वकम् ॥ ६४

स्वयमुत्तमभक्तोऽपि भक्तिं दृष्ट्वान्यनिर्मिताम् ।
न्यूनामपि च यो दृष्ट्वा हृदये बहुमन्यते ॥ ६५

स एव भक्तो विज्ञेयः शाठ्यवान् हीयते क्षणात् ।
[3] यः स्यात्परकृतां भक्तिमवमन्येत दुष्टधीः ॥ ६६

रुष्टः शिवगणस्तेन कृतां भक्तिं विनाशयेत् ।
बह्वीमपि स्वयं भक्तिं किंचिदित्येव यः पुमान् ॥ ६७

---

[1] जीवद्वचनवांस्ततः–**पा.** [2] ग्रहणे–**पा.** [3] यश्चेश्वरकृतां–**पा.**

मनुते स तु विज्ञेयः शिवभक्तोत्तमोत्तमः ।
शैवशास्त्राणि योऽधीते स एव शिवरूपधृत् ॥ ६८

तस्य देयं धनं धान्यं नान्यविद्यावतो ददेत् ।
शिवशास्त्राध्ययनवानध्यापयति यः पुमान् ॥ ६९

पूजयेत्तं धनैर्धान्यैर्वसनैर्भूषणैरपि ।
यः स्वयं शिवभक्तोऽपि शिवशास्त्रवतो बुधान् ॥ ७०

न तोषयति तान् को वा तोषयेद्भुवि मानवः ।
तस्मात्सर्वप्रयत्नेन शास्त्राध्येत्रे प्रदापयेत् ॥ ७१

वाचि श्रद्धा यस्य पुंसश्चेतस्यन्या[1]र्थचिन्तनम् ।
न तेन सहवासोऽपि कार्यः शैवार्थकोविदैः ॥ ७२

अध्यापयेदधीते यः शिवशास्त्राणि नित्यशः ।
[2]यः स्वयं रक्षिता तेषां श्लाघ्यस्तत्रोत्तरोत्तरः ॥ ७३

एतदेव रहस्यं हि शिवशास्त्रेषु भाषितम् ।

इति श्रीमद्विशिष्टाद्वैतरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठशिवाचार्यकृते क्रियासारे अष्टादशोपदेशः

अथैकोनविंशोपदेशः

वर्ण्यते चोपदेशोऽस्मिन्नेकोने विंशके पुनः ।
लिङ्गाङ्गसामरस्यं च लिङ्गधारणमेव च ॥ १

लीनार्थगमकं लिङ्गमन्यदङ्गमुदीरितम् ।
लिङ्गाङ्गयोः सामरस्यं जीवब्रह्मैक्यलक्षणम् ॥ २

तदपि द्विविधं प्रोक्तं साधनेन समन्वितम् ।
द्वितीयं तद्विनिर्मुक्तमाद्यं गुरुकृतं पुरा ॥ ३

द्वितीयमपि शिष्यस्य [3]गुरुवाक्यस्य पालनात् ।
आद्यं वेधादिदीक्षाभ्यस्त्रिपुण्ड्रस्यापि धारणात् ॥ ४

---

[1] र्थतत्परः–पा. [2] संमोहरहितस्तेषां-पा. [3] गुरुवाक्यैकपालनात्-पा.

रुद्राक्षधारणाच्चापि पञ्चाक्षरजपादपि ।
मुख्यालिङ्गधृतेश्चापि दहराकाशमण्डले ॥ ५

बहिर्दहरदेशे च हृदये लिङ्गधारणात् ।
क्रमागतेन मार्गेण कृताङ्गन्यासवान् गुरुः ॥ ६

सकलीकृत्य देहं स्वं प्रविलापपुरस्सरम् ।
तत्तद्बीजाक्षरं न्यस्य तत्तत्स्थानेषु बुद्धिमान् ॥ ७

अङ्गतत्त्वानि यान्याहुर्लिङ्गतत्त्वानि यानि च ।
सामरस्यं तयोर्ज्ञात्वा शास्त्रोक्तेनैव वर्त्मना ॥ ८

प्रबन्धादौ मया प्रोक्ता उपदेशचतुष्टये ।
लिङ्गाङ्गसामरस्यस्य प्रकारा बहवो मया ॥ ९

दहरोपासनाध्याये संवर्गोपासनादयः ।
सहिताः साधनेनैते रहिताः साधनैस्ततः ॥ १०

स वेदेत्यादिभिर्वाक्यैर्महावाक्यै रहस्यकैः ।
पञ्चाक्षरार्थतश्चैममर्थं शिष्यस्य बोधयेत् ॥ ११

नमश्शब्देनाङ्गतत्त्वं लिङ्गतत्त्वं शिवेति च ।
आयेत्यैक्यार्थबोधः स्यादिति मन्त्रार्थबोधकः ॥ १२

गुरुर्मनो निजं शिष्ये निधाय हितचेतसा ।
उद्धर्तव्यो मयायं च पाशबद्धतनुः स्वयम् ॥ १३

पाशच्छेदे च शक्तोऽहं साक्षादेव सदाशिवः ।
मदन्योऽस्य च नोद्धर्ता [1] ह्युद्धरामीति निश्चितः ॥ १४

अप्राकृताभ्यां चक्षुर्भ्यां पूर्णदृष्ट्या विलोकयेत् ।
कटाक्षधारया साक्षात्पाशच्छेत्र्या स्वयं गुरुः ॥ १५

छिन्नपाशं विभाव्याथ निस्तरङ्गो भवेत्स्वयम् ।
दिनमात्रं याममात्रं घटिकामात्रमेव वा ॥ १६

अभेदभावनां ज्ञात्वा शिवानन्दप्लुतो भवेत् ।
एषैव चाक्षुषी दीक्षेत्यपि शब्दैर्निगद्यते ॥ १७

---

[1] चोद्धरामीति–पा.

शिष्योऽपि मीलयन्नेत्रे निस्तरङ्गेन चेतसा।
गुरुमेवान्तरे ध्यायन् पश्यन्नपि गुरोः पदम् ॥ १८

अचञ्चलमना भूत्वा कृतार्थं स्वं विभावयेत्।
गुरोः शिवस्य चाभेदं ज्ञात्वा स्वस्य गुरोस्तथा ॥ १९

अभेदभावानां ज्ञात्वा लिङ्गतत्त्वाङ्गतत्त्वयोः।
अभेदभावना कार्या व्युत्क्रमेण स्वयं गुरोः ॥ २०

तस्यायं क्रमः—

त्रयस्त्रिंशत्तत्त्वमिदमिति वेदान्तिनो जगुः।
पृथिव्यापश्च तेजांसि वायुराकाश एव च ॥ २१

एतानि पञ्चभूतानि क्रमशः प्रविलापयेत्।

हृदिस्थं पङ्कजमधोमुखं प्रणवविशिष्टपञ्चाक्षर्यार्ध्वमुखीकृत्य, ऊर्ध्वीकरणप्रकारः—

प्रणवमुच्चार्य परब्रह्माद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुपादाम्बुजं यावद्यावत्प्रणौमीति परब्रह्मादिगुरुपरम्परां नमस्कृत्य, गुं गुरुभ्यो नमः, गं गणपतये नमः, दुं दुर्गायै नमः, सं सरस्वत्यै नमः, अं आत्मने नमः, उं अन्तरात्मने नमः, पं परमात्मने नमः, [1]गां अङ्गुष्ठाभ्यां नमः, गीं तर्जनीभ्यां नमः, गूं मध्यमाभ्यां नमः, गैं अनामिकाभ्यां नमः, गौं कनिष्ठिकाभ्यां नमः, गः करतलकरपृष्ठाभ्यां नमः, गां हृदयाय नमः, गीं शिरसे स्वाहा, गूं शिखायै वषट्, गैं कवचाय हुं, गौं नेत्रत्रयाय वौषट्, गः अस्त्राय फट्, शूलाय नमः, शराय नमः, नाराचाय नमः, खड्गाय नमः, नाराचमुद्रां प्रदर्श्य अस्त्रमन्त्रेण संरक्ष्य, शं ईशान्यां सुप्रतिष्ठितो भव, मां रक्ष रक्ष,

पार्ष्णिघातकरस्फोटतिग्मदृष्ट्यवलोकनैः।
पातालभूनभोलीनभूतप्रत्यूहशान्तिमान् ॥
अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

[1] गं–पा.

आसनमन्त्रस्य (पृथिव्या) मेरुपृष्ठ ऋषिः, सुतलं छन्दः, भूतलाभिमानी देवता, आसनशुध्यर्थे जपे विनियोगः; धर्मासनाय नमः, ब्रह्मासनाय नमः, विमलासनाय नमः, कमलासनाय नमः, योगासनाय नमः, अनन्तासनाय नमः, वीरासनाय नमः, गारुडासनाय नमः, अस्त्रमन्त्रेण दश दिशः संरक्ष्य—ओं अस्य श्रीशरीरस्य अन्तर्यामी ऋषिः, प्रकृतिपुरुषं छन्दः, सत्यो देवता, अप्राकृतशरीरार्थे जपे विनियोगः, आत्मनः प्राण ऋषिः, दीपं छन्दः, मनुर्देवता, लिङ्गाङ्गसामरस्यार्थे जपे विनियोगः—

अज्ञानतिमिरध्वंसिज्ञानालोकप्रदायि[1] च।
यद्दर्शितं नमस्तस्मै गुरवे परमात्मने॥

यदबोधादिदं भाति यद्बोधाद्विनिवर्तते।
नमस्तस्मै परानन्दवपुषे परमात्मने॥

इत्येवं गुरुशिष्यौ लिङ्गाङ्गसामरस्यं करिष्ये कारयिष्ये (इति संकल्प्य) अनन्तरं प्रणवविशिष्टपञ्चाक्षर्या हृत्पङ्कजमूर्ध्वमुखीकृत्य मूलेन विकसितं कृत्वा तत्रस्थं जीवं ततः सुषुम्नामार्गेण द्वादशान्तं नीत्वा ततः स्वशरीरं विभाव्य पृथिवीमप्सु प्रविलाप्य, अपस्तेजसि प्रविलाप्य, तेजो वायौ प्रविलाप्य, वायुमाकाशे; तत्प्रकारः—तत्तद्बन्धिभेदेन हंस हंसेति अङ्गतत्त्वं लिङ्गतत्त्वे संयोजयेत्। पृथिवीमुपसंहरामि पृथिवीं पञ्चगुणितां पीताभां चतुरश्रकां, द्वादशाङ्गुलं कठिनं वज्रलाञ्छनं ब्रह्मदैवत्यं लं पृथिव्यात्मने हुं फट्। पृथिवीमण्डलं पादादिजानुपर्यन्तं पृथिवीमप्सु प्रविलापयामि। अब्बीजेनाप उपसंहरेत्। आपश्चतुर्गुणिताः पीतश्वेताभाः अर्धचन्द्राकाराः षोडशाङ्गुलं द्रवमब्जलाञ्छनं विष्णुदैवत्यं वं अबात्मने हुं फट्। अम्मण्डलं जान्वादिनाभिपर्यन्तं अपस्तेजसि प्रविलापयामि। तेज उपसंहरामि—तेजस्त्रिगुणं रक्ताभं त्र्यश्रं चतुरङ्गुलं राजसं स्वस्तिकलाञ्छनं रुद्रदैवत्यं रं तैजसात्मने हुं फट्। तेजोमण्डलं नाभ्यादिहृदयपर्यन्तं तेजो वायौ प्रविलापयामि। वायुमुपसंहरामि—वायुं द्विगुणं कृष्णाभं षडश्रमष्टाङ्गुलं गमनागमनं

[1] प्रदाय—पा.

षड्बिन्दुलाञ्छनं ईश्वरदैवत्यं यं वाय्वात्मने हुं फट्। वायुमण्डलं हृदादिभ्रूमध्यपर्यन्तं वायुमाकाशे प्रविलापयामि। आकाशमुपसंहरामि—आकाशं शब्दतन्मात्रमेकगुणं धूम्रवर्णं बुद्बुदाकारप्रमाणं स्वच्छं वृत्तलाञ्छनं सदाशिवदैवत्यं हं आकाशात्मने हुं फट्। आकाशं भ्रुवादिब्रह्मरन्ध्रपर्यन्तं (पञ्चतत्त्व)माकाशं अहङ्कारे प्रविलापयामि। अहङ्कारं महदात्मिकायां प्रकृतौ प्रविलापयामि। प्रकृतिं परब्रह्मणि प्रविलापयामि। [1]अङ्गतत्त्वे समरसीभूय द्वात्रिंशता शरीरं संशोष्य अग्निबीजेन दग्ध्वा प्रारब्धसञ्चितागामि सर्वं लिङ्गे समर्प्य लं बीजेन पृथिवीमुद्ध्वा, वं बीजेन प्लावितं, भुवनेश्वरीबीजेनाङ्गानि विभाव्य, उक्तव्युत्क्रमेण परंज्योतिस्वरूपं यल्लिङ्गं तस्मादीपादीपान्तरमिव लिङ्गे सन्निधाय तस्य वर्तिस्थानशरीरे धारयेत्। प्रकारान्तरं च—

मन्त्राणां सप्तकोटीनामुत्पत्तिस्थानमुत्तमम्।
कामिकाद्यागमानां च संहितानामशेषतः॥

उत्पत्तिस्थानमाख्यातं शुद्धविद्याख्यमैश्वरम्।
अप्रतर्क्यमनिर्देश्यमनिर्वाच्यमनामयम्॥

त्रयस्त्रिंशत्तत्त्वमिदमुदितं परमर्षिभिः।
द्वात्रिंशत्तत्त्वनिष्पत्तिर्वर्ण्यते क्रमशो मया॥

आदौ तत्त्वं त्रिधा भिन्नं तत्तन्नामविशेषतः।
अशुद्धाध्वा च मिश्राध्वा शुद्धविद्येति भेदतः॥

पृथिव्यादीनि तत्त्वानि प्रकृत्यन्तानि यानि तु।
[2]पञ्चविंशतितत्त्वानि ह्यशुद्धाध्वेति गीयते॥

पृथिव्यापश्च तेजांसि वायुराकाश एव च।
एतानि पञ्चभूतानि पञ्चतत्त्वान्यतः परम्॥

गन्धो रसस्तथा रूपं स्पर्शशब्दौ च पञ्चके।
पञ्चतन्मात्रनामानि कार्याण्येतानि वै दश॥

वाक्पाणिपादं पायुश्च ह्युपस्थमिति पञ्चकम्।
कर्मेन्द्रियाणि पञ्चैषां गुणपञ्चकमुच्यते॥

---

[1] लिङ्गतत्त्वे–पा. [2] षड्विंशानि तु–पा.

व्याहारश्च तथादानं गमनं तु तृतीयकम्।
विसर्गश्च तथानन्दः पञ्चैते वर्णिताः क्रमात् ॥

ज्ञानेन्द्रियाणि श्रोत्रत्वक् चक्षुश्च रसना तथा।
घ्राणेन्द्रियमिति प्राहुरथ तद्विषयाः क्रमात् ॥

शब्दश्च स्पर्शरूपे च रसगन्धौ च पञ्च तु।
करणानि त्रिधा तत्र मनोहङ्कारबुद्धयः ॥

क्रियाः प्रवर्तयन्त्यन्तः स्थित्वान्तः करणं ततः।
सङ्कल्पनं तथार्थानां श्रोत्रादीनां बहिः स्थिते ॥

प्रवर्तनं च विषये मनसो वृत्तिरिष्यते।
अभिमानः प्रेरणं च वायूनां देहवर्तिनाम् ॥

अहङ्कृतेर्गुणो बुद्धेर्गुणस्त्वध्यवसायकः।
इदं रजतमेवेति निश्चयोऽध्यवसायकः।
त्रयोविंशतितत्त्वानि क्रमशः कथितानि हि ॥

एतेषु बुद्धितत्त्वात्स्यादहङ्कारस्त्रिरूपवान्।
सात्विको राजसश्चेति तामसश्चेति भेदतः ॥

मनोज्ञानेन्द्रियोत्पत्तिं सात्त्विकाहङ्कृतेर्विदुः।
कर्मेन्द्रियाणामुत्पत्ती राजसाहङ्कृतेर्मता ॥

गन्धादिपञ्चतन्मात्रसमुत्पत्तिं निशामय।
तामसो यस्त्वहङ्कारस्तस्मादेतज्जनिः स्मृता ॥

तन्मात्रेभ्यः पृथिव्यादिपञ्चभूतसमुद्भवः।
भूतानां वृत्तयो ज्ञेयाः पृथिव्याः कथिता धृतिः ॥

अपां समूहीकारणं दाहवृत्तिस्तु तेजसः।
वायोरवयवानां तु योजनावृत्तिरिष्यते ॥

अवकाशप्रदानं तु वियद्वृत्तिरुदाहृता।
शब्दस्पर्शौ रूपरसौ पृथ्व्याः साधारणा गुणाः ॥

चत्वार एते गन्धस्तु विशेषगुण इष्यते।
अपां साधारणा एते शब्दस्पर्शौ च रूपकम् ॥

एते त्रयः समाख्याता गुणो वैशेषिको रसः ।
तेजसः स्पर्शशब्दौ तु साधारणगुणाविमौ ॥

गुणौ वैशेषिको रूपमथ वायोरुदाहृतः ।
शब्दः साधारणः स्पर्शो विशेषगुण इष्यते ॥

आकाशे शब्द एवैकः स वर्णात्मा प्रतिध्वनिः ।
द्वाविंशतेः परस्यास्य बुद्धितत्त्वस्य कारणम् ॥

गुणतत्त्वं त्रिधा तच्च भिन्नं सत्त्वादिभेदतः ।
सुखस्य कारणं विद्धि सात्त्विकं गुणतत्त्वकम् ॥

राजसं गुणतत्त्वं तु दुःखकारणमीरितम् ।
तामसं गुणतत्त्वं तु विमोहे कारणं भवेत् ॥

एतस्य गुणतत्त्वस्य कारणं प्रकृतिं विदुः ।
गुणतत्त्वं चतुर्विंशं प्रकृतिः पञ्चविंशकम् ॥

स्वभिन्नार्वाक्स्थबुध्यादित्रयोविंशतितत्त्वके ।
सुखदुःखविमोहेषु गुणतत्त्वं तु कारणम् ॥

उक्तान्येतानि तत्त्वानि पञ्चविंशतिसङ्ख्यया ।
अशुद्धाध्वेति गीयन्ते रागतत्त्वमतः परम् ॥

प्रकृत्युद्भूतवस्तूनामात्मने तत्प्ररोचकम् ।
नियत्याख्यं सप्तविंशं तत्त्वं तत्कथितं बुधैः ॥

कृतानि स्वेन कर्माणि स्वस्यानुभवसाधनम् ।
नापरस्येति नियमस्तस्य ज्ञेयं प्रयोजनम् ॥

अतः परं कालतत्त्वं तस्य चैतत्प्रयोजनम् ।
भोगेषु यः परिच्छेदो ह्रस्वो दीर्घोऽयमित्यपि ॥

अतः परं तु विद्याख्यं तत्त्वमीरितमुत्तमम् ।
विषयेष्वपरक्काया बुद्धेर्ग्रहणकारणम् ॥

तस्मात्परं कलातत्त्वं ताम्रे नैल्यं यथा स्थिरम् ।
तथात्मा निर्मलः स्वच्छ इति धीस्तत्प्रयोजनम् ॥

मायातत्त्वस्य कार्येऽस्मिंस्तत्त्वे प्रकृतिरागयोः ।
विद्यायाश्च समुत्पत्तिः [1]कलासर्गे व्यवस्थिता ॥

---

[1] कलासंज्ञे–पा.

नियतेः कालकलयोर्मायातत्त्वे समुद्भवः।
कलाविद्या कलारागौ नियतिः पञ्चकञ्चुकम् ॥

एतद्वृत्तस्य बोधस्य पुंस्वरूपमलावृतेः।
पुरुषव्यपदेशोऽथ आत्मनो जडरूपता ॥

आरागादाकलातत्त्वान्मिश्राध्वाख्यं तु पञ्चकम्।
एकत्रिंशा तु मायैव सूक्ष्माङ्गं देहिनां पृथक् ॥

एतेषामपि सर्वेषां कारणत्वेन कीर्तितम्।
अशुद्धमायातत्त्वं तु नित्यं व्यापकमेव च ॥

सर्वात्मकर्मसम्बद्धं स्ववृत्तिद्वारतोऽखिलम्।
[1] प्रकाशयदपि स्वैरं मोहकं जगतामिदम् ॥

ततः परं च द्वात्रिंशं विद्यातत्त्वमितीरितम्।
ततः परं त्रयस्त्रिंशमुदितं तत्त्वमैश्वरम् ॥

शुद्धविद्याख्यतत्त्वेऽस्मिन्मन्त्राणां च समुद्भवः।
एतेषां व्युत्क्रमेणैव सामरस्यमित्यन्यः कल्पः।

अथ लिङ्गधारणम्

धारणार्हस्य लिङ्गस्य लक्षणं त्वथ कथ्यते ॥

स्फाटिकं शैलजं वापि चन्द्रकान्तमयं तु वा।
पाषाणं सूर्यकान्तं वा लिङ्गमेकं समाहरेत् ॥

नादेयं शैलसंभूतं पुण्यक्षेत्रसमुद्भवम्।
गङ्गोद्भवं सागरजं लिङ्गं तन्मम संमतम् ॥

यद्देवि [2]शिवनाभाख्यं लिङ्गं तदहमेव हि।
[3](काम्यान्यन्यानि लिङ्गानि तत्तदिष्टार्थदानि हि ॥

---

[1] प्रकाशमपि वै स्वैरं–पा. [2] शिवनामाख्यं–पा. [3] अयं कुण्डलितः पाठः कोशयोर्नास्ति.

श्रीशैलजं महादेवि ऐहिकामुष्मिकप्रदम् ।
सर्वोत्तमोत्तमं लिङ्गं सर्वाभीष्टफलप्रदम् ॥

यद्दत्तं गुरुणा देवि लिङ्गं तदहमेव हि ।)
श्वेतं रक्तं तथा पीतं कृष्णं चेति चतुर्विधम् ॥

विप्रादीनां च वर्णानामिदं धार्यं यथाक्रमम् ।
लिङ्गवृत्तसमं पीठं दैर्घ्यं विस्तार एव च ॥

तदर्धं गोमुखं चैव प्रोक्तं लिङ्गस्य लक्षणम् ।
सपीठस्य तु लिङ्गस्य लक्षणं तु तदुच्यते ॥

एकादित्रयन्तमङ्गुल्याश्चरलिङ्गस्य दैर्घ्यकम् ।
लिङ्गस्य सदृशं पीठं पीठार्धं गोमुखं भवेत् ॥

लिङ्गदैर्घ्यं चतुर्भागं द्विभागं शक्तिसंयुतम् ।
द्विभागं च चतुर्भागमेकभागं च बन्धनम् ॥

अङ्गुलं तु त्रिधा भज्य तन्मानं वा समाचरेत् ।
लिङ्गमस्तकविस्तारे लिङ्गोच्छ्रायसमन्वितम् ॥

वेदभागवशान्मानं विस्तारं मस्तकस्य तु ।
त्रिभागं परिणाहस्य तद्वत्पीठे च विस्तृतिः ॥

एकं नाहं त्रिधा भज्य भागेनैकेन हीनतः ।
नाहमेकं प्रकर्तव्यं द्विहीनं वा समाचरेत् ॥

लिङ्गाधिक्ये भवेन्मृत्युः शक्त्याधिक्ये धनक्षयः ।
लिङ्गशक्त्योः समत्वं हि भोगमोक्षफलप्रदम् ॥

लाक्षासर्जरसः सिक्थं कुरुविन्दं च गुग्गुलम् ।
गैरिकं गुडतैले च अष्टबन्धमिति स्मृतम् ॥

अनेन च दृढीकुर्यालिङ्गं पीठे सुसंस्थितम् ।
आदिष्टो गुरुणा शिष्यः प्रभाते पुण्यवासरे ॥

विधाय मङ्गलस्नानं धौतवस्त्रपरिच्छदः ।
ललाटादिक्रमेणैव कुर्यात्त्रिपुण्ड्रकं मुदा ॥

शिवक्षेत्रे शिवारामे समीपे वा शुभे गृहे ।
शिवालयसमीपे वा देशिकस्य गृहेऽपि वा ॥

उपेत्य गुरुपादाब्जे प्रणम्य तदनन्तरम् ।
पूजयेत्स्वर्णपुष्पाद्यैर्यथावित्तानुसारतः ।
एतत्ते कथितं देवि तव स्नेहान्मम प्रिये ॥

यजुरारण्यकश्रुतौ—"निधनपतये नमः" इत्यारभ्य निधनपतेः सकलजगदण्डपिण्डसृष्टिस्थितिसंहारास्पदत्वेन प्रतिपादितस्य लिङ्गस्य "सर्वलिङ्गः स्थापयती"त्यन्तेन वाक्येन लिङ्गस्थापनं विधाय; लिङ्गस्थापनस्याधिकरणं किमित्याकाङ्क्षायां "पाणिमन्त्रं पवित्र" मिति विशेषणात्पाणिधारणं विधीयते । पाणौ मननात्त्रायते रक्षतीति पाणिमन्त्रम् । पवित्रमित्यनेन यज्ञोपवीतं परमं पवित्रमितिवत् शौचाचमनाद्यपावित्र्यसमये पवित्रत्वविधानाद्यज्ञोपवीतवत्सर्वथा धार्यमिति प्रतीयत इति प्रत्यक्षश्रुत्यैव विधीयते ॥

किं च "नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयास"मिति मन्त्रे ब्रह्मशब्दवाच्यस्यानिराकरणं यथा तथा धारणं मम भूयादिति प्रार्थनया "निधनपतये नम" इत्युपक्रमगतलिङ्गधारणमेवात्रापि विधीयत इति तस्य वैदिकत्वं कुतो न स्यादिति ब्रह्मशब्दवाच्यलिङ्गस्य श्रीशैलोद्भवरूपस्य धारणं विधीयते ।

पाणिपीठं मुदा कृत्वा पार्थिवं लिङ्गमैश्वरम् ।
पूजयेद्वैदिकः प्राज्ञो जन्मकर्मनिवृत्तये ॥ इति ।

अत्र 'जन्मनिवृत्तय' इति वक्तव्ये 'जन्मकर्मनिवृत्तय' इति जननमरणसाधनधर्माधर्मरूपादृष्टसंपादनोपायभूतपशुकर्मणां त्यागविधानात् पतिकर्मरूपाष्टावरणपञ्चाचारानुकूलश्रीशैलसंभूतपार्थिवलिङ्गस्य कण्ठदेशधृतस्य द्वित्रिकालं मुख्यतया पूजाविधानादुदाहृतश्रुत्यनुरोधेन तदुपबृंहणरूपत्वेनास्य वचनस्य नेयत्वाच्च ॥

लिङ्गधारणं न वैदिकम् , प्रत्युत निषिद्धम् ,
शैवान् पाशुपतांश्चैव लिङ्गिनो व्रतिनस्तथा ।
जटिलान्मुण्डिनश्चैव पाषण्डान् परिवर्जयेत् ॥

इत्येवमादिवचनजालमवैदिकत्वान्न श्रवणपथमारोहतीति न श्राव्यमेव । किं च वेदान्तसारोपनिषदाद्यनेकश्रुतिमूलत्वेन वैदिकत्वस्य सार्वजनीनत्वात् । तथाहि—"अत्याश्रमिणः साक्षादमृतीभूत्वा

मोक्षीभवन्ती "त्युपक्रम्य,—'न कर्मणा न प्रजया धनेन शिवं पूज्यामृतत्वमानशुः' इति कर्मप्रजाधनैर्मोक्षो [1]नास्तीति निषेधपुरस्सरं सामरस्यपुरस्सरं धृतलिङ्गपूजनेनैव मोक्ष इति प्रतिपाद्य, ततः परं "परेण शुद्धेन हृदब्जमध्ये लिङ्गं धृत्वा ज्योतिषि संविशन्ति। अत्याश्रमस्थाः परिमुच्यन्ति सर्वे लिङ्गाङ्गशोभा मोक्षमार्गैकनिष्ठाः। ते ब्रह्मलोके तु परान्तकाले शिवप्रसादात्परिमुच्यन्ति सर्वे" इति कण्ठरवेणैव लिङ्गधारणस्य प्रतिपादनात्। नचास्या उपनिषदः 'लिङ्गे सुषुप्ति' रिति हंसोपनिषदि विद्यमानलिङ्गशब्दवाच्यपरमात्मनः सुषुप्तयाधारत्वेन प्रतिपादनं दृश्यते, तद्वत्प्रकृतेऽपि परमात्मपरं लिङ्गपदम्, तस्य च बहिर्दहरदेशे धारणस्य स्पष्टत्वात्। उत्तरसन्दर्भे 'लिङ्गाङ्गशोभा मोक्षमार्गैकनिष्ठा' इति वाक्यस्य

तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमाः।
तदेव शुक्रः सर्वे च बृहस्पतिमुखामराः॥

प्राप्योपास्य शिवं साम्बं ब्रह्म स्वहृदयाम्बुजे।
लिङ्गाङ्गसामरस्याच्च शरीरे लिङ्गधारणात्॥

नियमेनैव धृत्वा ते मुक्ताः संसारसागरात्।

इत्यादि लिङ्गधारणस्य पुनः पुनः प्रत्यक्षश्रुत्यैवोपवर्णनात् तद्वाक्यविरोधेन लिङ्गशब्दस्य वीरशैवागमवचननिकुरुम्बनिर्णीतेऽर्थे पर्यवसानस्य स्पष्टत्वात्। तथा च कालिकाखण्डे—

श्रीशैलजं कण्ठधृतं मदीयं
प्रातस्तथा सायमतिप्रवीणाः।
कराम्बुजे न्यस्य यजन्ति भक्ता-
स्तद्भक्तिभावेन वसामि देवि॥

वातुलोत्तरे—

उत्तमाङ्गे गले बाहौ हृदि वक्षस्थलेऽपि वा।
मत्प्राणलिङ्गं यो धत्ते स्थितस्तत्सन्निधावहम्॥

---

[1] नास्तीतीतरनिषेध—पा.

यजुर्वेदे चतुर्थकाण्डे प्रथमप्रश्ने प्रथमानुवाके --

'युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोकायन्ति पथ्येव सूराः। शृण्वन्ति विश्वे अमृतस्य पुत्रा आये धामानि दिव्यानि तस्थुः'। अस्य मन्त्रस्यायमर्थः—वां शिवशक्त्यात्मकयोर्लिङ्गवेद्योर्युजे योगेन युजिर्-योगे इत्यस्माद्धातोः क्विप्प्रत्ययः, तृतीयार्थे चतुर्थी। व्यत्ययो बहुलमिति छन्दसि बहुलग्रहणान्नमोभिरित्युत्तरत्र श्रूयमाणतृतीयानुगुण्येन "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाडयायाजालः" इति 'शे' इति वा वक्तव्यत्वात्। तथा च शिवशक्त्यात्मकश्रीशैलसंभूतदिव्यधारणेनेत्यर्थः पर्यवस्यति। ब्रह्मव्यापकलिङ्गतत्त्वस्वरूपं पूर्व्यं पञ्चाचाराष्टावरणपरिपालनरूपेण संरक्षणीयम्। पॄ पालनपूरणयोरित्यस्माद्धातोः 'अचो यत्' इति यत्प्रत्यये 'उदोष्ठ्यपूर्वस्ये'ति रपरे उकारे 'हलिचे'ति रेफान्तत्वाद्दीर्घे 'च्छ्वोः शूडनुनासिके चे'ति वकारे पूर्व्यं, तयोरेव 'कृत्यक्तखलर्थाः' इति कृत्यप्रत्ययस्य योग्यार्थकत्वेन पालनयोग्यत्वं प्रतिपादितम्। तच्च पञ्चाचाराष्टावरणैरेवेति वचनान्तरेणावगम्यते। अथवा पूरणार्थोऽयं धातुः सामरस्यात्मकलिङ्गतत्त्वस्य गुरूपदिष्टमार्गेण पञ्चाचाराष्टावरणैः पूरणं भवति। साधनसहितसामरस्यमविच्छिन्नसाधनपरम्परया संपूर्तिमेत्य साधनविनिर्मुक्तं सामरस्यं भवतीत्यर्थः। साधनविच्छेदे गुरुणाङ्कुरितसामरस्यविच्छेदेन पतनवर्णनात्। एतदेव व्याचष्टे—सूराः सूरयो विद्वांसो लिङ्गतत्त्वाङ्गतत्त्वविज्ञानवन्तः। अथवा 'सूरसूर्यार्यमादित्ये' त्यादिकोशानुगुण्येन आदित्याः। अत एव वेदान्तसारोपनिषदि—'तदेव शुक्रस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इति लिङ्गधारणपुरस्सरं[1] लिङ्गाङ्गसामरस्येन दिव्यज्योतिष्ट्वं प्रतिपादितम्। प्रकृते चोपनिषदन्तरसिद्धस्यार्थस्य वर्णनौचित्यात्। 'द्वादशात्मा दिवाकर' इति अवान्तरभेदं पुरस्कृत्य बहुवचनम्। अथवा प्रतिकल्पं सूर्यभेदादिति वा बोध्यम्। पथ्येव लिङ्गाङ्गसामरस्यानुकूलपञ्चाचाराष्टावरणरूपवीरशैवमार्ग एव। सावधाना अप्रमादिन इत्यध्याहारः। नमोभिः पूजाभिः, नमस्कारस्य पूजां विनाऽप्रवृत्तेः। विश्लोकायन्ति विशेषेण श्लाघ्या-

[1] लिङ्गधारणेन-पा.

भवन्ति पुण्यश्लोका भवन्तीत्यर्थः। श्लोकत्वं चानितरसाधारण-शिवपदप्राप्तिमत्वम्। चिदम्बरशक्तिसमन्वितलिङ्गतत्त्वतया सायुज्यमिति सकलेतरविद्यातिशयितत्वमुपवर्णितं भवति। विश्लोकायन्तीति विशेषार्थवाचकस्य वीत्युपसर्गस्य श्रूयमाणत्वात्। श्रुण्वन्ति ब्रह्मशब्दवाच्यपूरणपालनयोग्यं तत्प्रतिपादकं प्रतिशास्त्रमित्यर्थः। वाच्यवाचकयोरभेदात्। श्राव्यः शंभुः, श्राव्यं शांभवमित्युभयथा प्रयोगदर्शनात्। शिवशक्त्यात्मकपञ्चाक्षरमन्त्रं गुरुमुखादीक्षापुरस्सरमुपदिष्टास्तज्जपशालिन इत्यर्थः। विश्वे सर्वे। विश्वशब्दप्रयोगाद्विश्वान्तःपातिनःसर्वेऽपि सूर्याः, विश्वेश्वरत्वाच्छिवस्येति भावः। अमृतस्य पुत्राः। अमृतस्य लिङ्गस्य सत्यं ज्ञानं सुखं [1]दीप्यं वार्धकं शरणं श्रुतम्। अमृतमित्यादीनामुपनिषत्सु लिङ्गपदसमानार्थकत्वेन परस्सहस्रस्थलेषु वर्णनात्। तस्यामृतस्य लिङ्गस्य पुत्राः लिङ्गांशभूताः। प्रकाशगुणसाम्यात्परमप्रकाशरूपलिङ्गतत्त्वादेवादित्यानां मण्डलभेदेन कल्पभेदेन च ज्वलद्दावानलसमुद्गतविस्फुलिङ्गवद्भिन्नभिन्नांशाः। 'अन्तस्तद्धर्मोपदेशात्' 'ज्योतिश्चरणाभिधानात्' इत्यधिकरणयोः स्पष्टोऽयमर्थ इति नात्र पुनः समर्थ्यते। तस्मादुक्तसाधनसहिता ये आदित्या लिङ्गतत्त्वांशाः, धामानि तेजांसि, धाम्नो लिङ्गतत्त्वस्यैकत्वेऽपि विस्फुलिङ्गसमूहरूपदावाग्निज्वालावदनेककोट्यन्तरजीवशब्दितांशसमूहरूपत्वेन नदीजलानि कूपजलानि इतिवदानेत्यभेदेनानेयबहुत्ववद्धाम्नो बहुत्वं वर्णितम्। धाम्नि लिङ्गतत्त्वे। स्थाधातोराङ्पूर्वस्याधारः कर्म छान्दसः। एतादृशानि दिव्यानि प्राप्यानि। 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्वि'ति वह्वर्थत्वात्प्राप्यानि आनन्दयोग्यानि स्तुत्यानीति वा धामानि लिङ्गतत्त्वे आतस्थुः आस्थितवन्तः। 'व्यवहिताश्चे'त्याङः छान्दसो व्यवहितप्रयोगः। तथाचायमर्थः पर्यवसितः—वेदाविरुद्धागमोक्तदीक्षापुरस्सरं लिङ्गधारणेन धृतस्य लिङ्गस्य यथाकालं पूजाभिः पञ्चाचारावरणाष्टकपरिवृद्धसामरस्याङ्कुरा उक्तपञ्चाक्षरजपशालिन आदित्याः सकललोकोत्तराः सन्तः परस्मिन् लिङ्गतत्त्वे सामरस्येन रूपेणामृतं प्राप्तवन्त इति॥

[1] नीप्यं वार्धिक—पा.

ननु श्रुतिरियं कर्मकाण्डमध्यवर्तिनी विजातीयकाण्डोक्तार्थपर्यवसायिनी कथं स्यात् । प्रवर्ग्यादौ कर्मविशेषे समिद्विशेषप्रक्षेपे चतुगृहीताज्यहोमे च (कल्पसूत्रविनियोजित) 'युञ्जते मन' इति पूर्वमन्त्राणां विनियोजनात् उत्तरमन्त्राणां स्पष्टमेव कर्मविशेषविनियोजनेन च तन्मध्यवर्तिनो 'युजे वामि'त्युदाहृतमन्त्रस्यापि कर्मकाण्डोक्तकर्मण्येव विनियोजनस्योचितत्वेन तद्विरुद्धब्रह्मकाण्डप्रतिपादनीय निःश्रेयससाधनविधानस्यानुचितत्वादिति चेदत्रोच्यते—सकलकर्मकाण्डप्राथमिकस्य प्रणवस्य सकलपशुकर्मनिकरेषु तदधिकारसंपादकोपनयनावसरे मुख्यतयोपदिश्यमानगायत्र्यादावनधीतगायत्रीत्वादनागतब्राह्मण्यस्यापि प्रथमत उपदिष्टस्य सकलकर्मपरित्यागपुरस्सरं विसृष्टेषणस्यापि यतेः परमपुरुषार्थनिर्वाहकत्वेन कर्मकाण्डविहितस्य ब्रह्मकाण्डोचितार्थप्रतिपादकत्वस्य सार्वजनीनत्वात्, छान्दोग्ये—" आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषणाभिसमावृत्य कुटुम्बे शुचौ देशे " इत्यादिना कर्मभिः समवहितज्ञानस्य मोक्षप्रतिपादनात्, प्रकृतोदाहृतमन्त्रस्य कर्मकाण्डविहितकर्मोपयुक्तस्यापि ब्रह्मकाण्डविहितधर्मप्रतिपादकत्वस्य सुवचत्वात् । अग्निचयनविनियुक्तरुद्रसूक्तस्य ब्रह्मप्रतिपादकत्वमप्यस्तीति यार्किंचिदेतत् । छान्दोग्ये " ओमित्येतदक्षरमि "त्युपक्रम्योद्गीथविद्यां विधाय लोकद्वारादिपञ्चविधसामोपास्तीनां विधानेन काण्डद्वयस्याप्युभयार्थप्रतिपादकत्वनियमाभावाच्च ॥

किंच " युञ्जानः प्रथमं मनस्तत्त्वाय सविता भगः । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् " इति चतुर्थकाण्डोपक्रममन्त्रे भगनामकः सविता प्रथमं तत्त्वाय तत्त्वज्ञानाय मनो युञ्जानः अग्निं अग्निशब्दवाच्यं रुद्रं कार्यरूपं ज्योतिः ज्योतिश्शब्दवाच्यलिङ्गतत्त्वं निचाय्य लिङ्गतत्त्वाङ्गतत्त्वयोः सामरस्यं ज्ञात्वा, अग्निशब्दस्य कार्यरुद्रवाचकस्योपलक्षकत्वेन जाठराग्निसाधारणसकलजीवोपवर्णनादङ्गतत्त्वलिङ्गतत्त्वयोः सामरस्यं ज्ञात्वा पृथिव्या श्रीशैलोद्भवलिङ्गवेदिस्वरूपया अध्याभरत् । डुभृञ् धारणपोषणयोरिति धारणं कृतवानिति स्पष्टमेव सवितुर्लिङ्गधारणस्य प्रतिपादितत्वेन, उपक्रमोपसंहारयोर्विरोधे असञ्जातविरोधिन उपक्रमस्यैव प्रबलत्वे-

नोपसंहारस्यापि तदानुगुण्येनैव नेयत्वात् तन्मध्येवर्तिनो 'युञ्जते मन' इत्यस्य मन्त्रस्योपक्रमगतलिङ्गधारणपरतयैवार्थस्य नेयत्वात् ॥

नन्वेवमपि "युञ्जान" इत्युपक्रममन्त्रे अध्याभरदिति लङो भूतार्थप्रतिपादकत्वेन, तथा "युजे वामि" त्युत्तरमन्त्रे आतस्थुरिति लिटो भूतार्थवाचकत्वेन, विध्युन्नायकानां लिङ्लोट्तव्यप्रत्ययानामन्यतरस्याप्यश्रवणेनानुवादरूपत्वात्, अनुवादस्य च पुरोवादानुरोधेन तात्पर्यवर्णनौचित्यात्, पुरोवादे च 'इषेत्वोर्जेत्वा वायवस्थोपायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इति मन्त्रे इषे त्वा शाखामाच्छिनत्ति ऊर्जे त्वा इत्यादिना विनियोगं प्रतिपाद्य, सविता प्रार्पयत्वित्यादिना शाखया (गोचराय) गाः प्रस्थापयतीति कर्मविशेषे विनियोजनेन, तत्र च प्रार्पयत्विति लोट्प्रत्ययेन श्रेष्ठतम कर्मणः प्रापणविधानात्तस्य च कर्मणो दर्शपूर्णमासादिधर्मविशेषरूपत्वेन तदनुरोधेनास्य तस्यानुवादकत्वेन प्रवृत्तस्य मन्त्रजातस्यानुवादरूपस्य पुरोवादानुरोधाद्धर्मविशेषपरत्वमिति, तदेतदविचारितरमणीयम्। 'तदेव शुक्रस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इत्यादिना वेदान्तसारोपनिषदि—'निधनपतये नमः, अमृतस्य देव धारणो भूयास' मित्यनेकेषां श्रुतिवाक्यानां लिङ्गधारणपराणां पुरोवादत्वेनोपवर्णनस्योचितत्वेनानुवादत्वेऽपि लिङ्गधारणपरत्वस्य दुर्वारत्वात् ॥

वस्तुतस्तु अध्याभरदिति नात्र भृञ्धातोरध्याङ्पूर्वाल्लुङ्प्रत्ययः। किं तु लेट्प्रत्ययः। तस्य विध्यर्थकत्वात्। 'युजे वा' मिति मन्त्रेऽपि लिङ्गधारणमनूद्य पञ्चाचाराष्टावरणानामप्रमादः पञ्चाक्षरविद्यायाः पठनं करणरूपेण तत्सन्नियोगशिष्टशिवपूजा च, सर्वस्मादेतस्मात्परं ज्योतिर्द्वं फलमनूद्य कर्तृविशेषं सवितारं पुरस्कृत्य विधीयत इति नात्र शङ्कावकाशः ॥

नन्वत्र कीदृशो विधिः? विधिश्च त्रेधा [1]विद्यते। अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति। तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिरपूर्वाख्यः— यथा 'व्रीहीन् प्रोक्षति' इति।

---

[1] भज्यते—चा.

नात्र व्रीहीणां संस्कारकर्मणो विना नियोगं मानान्तरेण कथमपि प्राप्तिरस्ति। प्रकृतोदाहृतमन्त्रयोः 'पृथिव्या अध्याभर' दित्यस्य वेदान्तसारोपनिषदादिवाक्यप्रा(प्य)प्तत्वात्। तथैवोत्तरमन्त्रेऽपि परंज्योतिष्टुस्य वाक्यान्तरप्राप्तत्वात्॥

पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलको विधिर्द्वितीयो नियमविधिः—यथा 'व्रीहीनवहन्ती'ति। अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिर्भवतीति न तत्प्राप्त्यर्थो विधिः; किं त्वाक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादित्यवहननाप्राप्तांशसंभवात्तदंशपरिपूरणं फलम्। प्रकृते चाप्राप्तांशाभावात्॥

नापि तृतीयो विधिः, द्वयोः शेषिणोरेकस्य शेषस्य वा एकस्मिन् शेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः परिसङ्ख्येति गीयते। यथा अग्निचयने 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति। यथा वा चातुर्मास्यान्तर्गतेष्टिविशेषे गृहमेधीये 'आज्यभागौ यजती'ति। अग्निचयने अश्वरशनाग्रहणं गर्दभरशनाग्रहणं चेति द्वयमनुष्ठेयम्। तत्राश्वरशनाग्रहणे इमामगृभ्णन्निति मन्त्रो लिङ्गादेव रशनाग्रहणसामर्थ्यरूपात् नित्यं प्राप्नोतीति न तत्प्राप्त्यर्थः अप्राप्तांशपरिपूरणार्थो वा विधिः; किं तु लिङ्गाविशेषाद्गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयादिति तन्निवृत्त्यर्थः। तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् प्रकृतिवद्विकृतिः कर्तव्येति वाक्यादतिदेशादेवाज्यभागौ प्राप्नुत इति न तत्र विधिस्तत्प्राप्त्यर्थः तन्नियमार्थो वा; किं त्वतिदेशात्प्रयाजादिकमङ्गान्तरमपि प्राप्नुयादिति तन्निवृत्त्यर्थः। [1](तथा गृहमेधीयाधिकरणे पूर्वपक्षरीत्येदमुदाहृतम्) प्रकृते च किंनिवृत्त्यर्थः, नियमार्थो वा विधीरिति चेदत्रोच्यते—'पृथिव्या अध्याभर' दिति वाक्ये चात्र नियमविधिः। वेदान्तसारोपनिषदादिना सामान्यतः शिलारूपस्य हिरण्यरसाद्यन्यतमस्य च लिङ्गस्य धारणप्रसक्तौ पृथिव्येति पृथिवीशब्देन श्रीशैलादिसंभूतयोग्यलिङ्गस्य धारणविधानान्नखविदलनादि

[1] इदमधिकमिति भाति।

[1] वदधारणीयलिङ्गनिवृत्तिः फलमिति नियमविधिरूपमेवेदं वाक्यं नानुवादरूपम्। तथैव शैषिणि [2]दिव्यधामप्राप्तौ पञ्चाक्षरेतरमन्त्राणामनेकेषां साधनत्वप्रतिषेधात्पञ्चाक्षरस्यैव वीरशैवानां मुक्तिसाधनत्वम्, नान्येषाम्। वीरशैवेतरेषां पञ्चाक्षराद्वा मृत्युञ्जयप्रसादाष्टाक्षरादिना वेति साधनत्वाविशेषः प्रतिपादितो भवति। तथैव सामरस्यस्याविशेषेण लिङ्गधारणात्पञ्चाचारानुष्ठानादष्टावरणाच्चेत्यविशेषप्राप्तौ लिङ्गधारणपुरस्सरं साधनविशिष्टसामरस्यं लब्ध्वा पञ्चाचाराष्टावरणपरिपालनादेवेति नियमविधिः। तेन पञ्चाचाराष्टावरणेष्वन्यतमनिवृत्तिरप्रमादेन सावधानत्वं च सिध्यतीत्यास्तां विस्तरः। "अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीये" ति मन्त्रेण कृतकलासंविधानस्य लिङ्गस्य दीक्षापूर्वकं धारणमित्यागमप्रकारो भाषाप्रबन्धेऽस्मत्कृतेऽवलोकनीयः॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठशिवाचार्यकृते निगमागमसारसर्वस्वसङ्ग्रहे क्रियासारे लीङ्गाङ्गसामरस्यलिङ्गधारणनिरूपणं नामैकोनविंशोपदेशः

अथ विंशोपदेशः

अथ विंशोपदेशेऽस्मिन् लिङ्गधारणवैभवम्।
वर्णयामि समासेन पुराणागमचोदितम्॥ १

कामिकोत्तरे—

श्रीशैललिङ्गाभरणो भक्तः सुन्दरि यः पुमान्।
वसामि निकटे तस्य सगणोऽहं सदाशिवः॥

मल्लिङ्गधारणात्प्रीतिर्या पुनर्जायते मम।
सा प्रीतिर्नैव विज्ञानात्केवलान्मम पूजनात्॥

न यज्ञान्नैव तपसा कृच्छ्रचान्द्रायणादिभिः।
न भूमण्डलदानाद्वा न वेदपठनादपि॥

---

[1] वत् हिरण्यरसाद्यन्यतमलिङ्ग. [2] दिव्यधाम्नि पञ्चा.

मल्लिङ्गधारणादेव सज्जिकायां यथाविधि।
मल्लिङ्ग[1]धारणाल्लोके न किंचिदपि दुर्लभम् ॥
यल्लोक[2]वसतिं काङ्क्षे ? तत्तत्सिध्यति पार्वति।
ब्रह्मलोकं विष्णुलोकं रुद्रलोकमथापि वा ॥
संप्राप्य[3] योगिविहितं सोमलोकं मदालयम्।
सालोक्यं चैव सारूप्यं सार्ष्टिं सायुज्यमप्यथ ॥
प्रयाति धृतलिङ्गो यः सामरस्यपुरस्सरम्।
न तस्य नियमः कश्चित्कामिकः श्रुणु सुन्दरि ॥
पञ्चाचारपरो यस्तु निष्ठोऽष्टावरणेषु च।
तेन तप्तं तपः सर्वं तेन सर्वमनुष्ठितम् ॥
प्रातः सायं हस्तपीठे सज्जिकातोऽवरोप्य माम्।
यथाशक्ति यथाकालं वित्तशाठ्यविवर्जितः ॥
मल्लिङ्गपरमो भूत्वा मल्लिङ्गे लीनमानसः।
निमील्य नयनद्वन्द्वं रोदसोः सन्धिवीक्षणः ॥
जपन्मन्त्रं मदीयं यः प्रमत्त इव मत्परः।
क्षणं गायति मामुच्चैरेभिर्नामभिरन्वहम् ॥
हर शंभो महादेव नीलकण्ठ निरामय।
कालकाल कलानाथ कामितार्थप्रदायक ॥
करोटिमालाभरण कटकीकृतसर्पराट्।
करुणाकर कङ्कालधर कान्तार्धविग्रह ॥
कम्रविग्रह कामारे कलयामि कराम्बुजे।
एवं ध्यात्वाथ विन्यस्य प्राणान् स्वीयानिवादरात् ॥

स्कान्दे अन्त्यभागे—

श्रीशैलसंभवं लिङ्गं कण्ठदेशे बिभर्ति यः।
बिभर्ति शाङ्करं रूपं शङ्करस्तस्य किंकरः ॥
शिवलिङ्गधरो मर्त्यो यस्मिन् देशे वसेत्स्वयम्।
तद्देशस्था नराः सर्वे राजा च सुखमेधते ॥

---

[1] धारिणां लोके. [2] वसतौ काङ्क्षा इति स्यात्. [3] याति महित:-पा.

लिङ्गधारणसंपन्नो यस्मिन्निवसति स्वयम् ।
तद्देशमेव कैलासं विद्याद्वित्तार्धिसम्पदाम् ॥
देशो यः शिवभक्तानामावासस्तत्र निर्भयम् ।
सुखिनः सकला मर्त्याः समेष्यन्ति मुदान्विताः ॥
अच्छिन्नभक्तपादाब्जपवित्रीकृतपांसवः ।
यस्य गेहे निपतितास्तस्य गेहं [1]पवित्रितम् ॥
तत्क्षणात्पितरस्तस्य प्रयान्ति गतिमुत्तमाम् ।

शिवरहस्ये उत्तरभागे कृतकलं प्रति कुण्डोदरवचनम्—

वैश्योऽसि त्वं कृतकल जात्या भक्त्या तु शाङ्करः ॥
यतस्त्वं शिवलिङ्गेन विभूषितहृदम्बुजः ।
अज्ञानादथवा ज्ञानाच्छिवलिङ्गं बिभर्ति यः ॥
शिखायां बाहुमूले वा कण्ठदेशे हृदम्बुजे ।
हृदये श्लाघ्यमुदितं शिवलिङ्गस्य धारणम् ॥
अन्तर्दहरमध्ये च बहिर्हृदयमध्यतः ।
दीक्षाक्रमेण धत्ते चेत्तद्वशे सिद्धयोऽष्टकाः ॥
स एव धन्यः पूतात्मा सफलं तस्य जीवितम् ।
पिता माता सुतः पत्नी पौत्रः पौत्री सुता स्नुषा ॥
कृतार्थाः शिवसंबन्धाः मुक्तिं यान्त्यतिदुर्लभाम् ।
अत्रैकमितिहासं ते कथयामि समासतः ॥
सावधानेन मनसा शृणुयास्त्वमतन्द्रितः ।
पुरात्वजामिलो नाम्ना स्वर्णस्तेयी दुरासदः ॥
पापिष्ठः परदारेषु स्वयं विटनियोजकः ।
इतश्चेतश्च विचरन् स्वकुक्षिपरिपूर्तये ॥
कालेन गच्छता सोऽयं हठात्कृतकलः स्वयम् ।
वेश्यां कृशोदरीं कांचिन्नृत्यकौशलशालिनीम् ॥

---

[1] पवित्रकम्—पा.

आसाद्य देशदेशेषु तया सार्कं चचार सः ।
सुवर्णभूषणैर्दिव्यैर्मुक्ताहारैर्विभूषिता ॥

सहस्रान्तरवित्तानि नृत्तविद्यार्जितानि तु ।
गृहीत्वा स्वस्य विषयं गन्तुमुद्युक्तमानसा ॥

सर्वदेशविभागज्ञा चतुरा रूपशालिनी ।
मित्रगुप्तस्य विषयं प्राप्ता शैवस्य कस्य चित् ॥

तस्यास्ति नियमः कश्चिद्दिकालं लिङ्गधारिणः ।
कृत्वा प्रदक्षिणं भक्त्या पूजयामि प्रयत्नतः ॥

ततः पापानि सर्वाणि भस्मसात्करवाण्यहम् ।
इति निश्चित्य विषये चौर्येणाध्वनि चारिणाम् ॥

सर्वस्वहर्ता द्रव्येषु लोभाद्वैश्यकुलोद्भवः ।
एवं संपादितद्रव्यो भुजिष्यैर्बहुभिर्वृतः ॥

अजामिलं मध्यमार्गे दृष्ट्वा वेश्यां च भूषिताम् ।
स्वभृत्यांश्चौर्यकुशलान् प्रेषयाप्रास भूमिपः ॥

सौधमास्थाय विपुलं रुचिरस्तम्भसंयुतम् ।
मित्रगुप्तः स्वकीयाभिः संवृतः स्त्रीभिरञ्जसा ॥

योजनत्रयपर्यन्तं पश्यन्नध्वनि चारिणः ।
[1]प्रेषिताश्च भटास्तीव्रमगच्छन्निकटे तदा ॥

अजामिलं तदा प्राह वेश्या सा च कृशोदरी ।
आयान्ति निकटं भृत्या मित्रगुप्तेरिता इमे ॥

मदीयं सकलं वित्तं हरिष्यन्ति तदञ्जसा ।
अशक्तस्त्वं पालने हि संचितद्रविणस्य तु ॥

अनायुधकरोऽशक्त एकाकी भयकम्पितः ।
अबलाहमुपायं ते कथयेऽवहितः शृणु ॥

नियमः कश्चिदस्त्यस्य भूपतेश्चौर्यशालिनः ।
प्रातः सायं समायातविरक्तपरिपूजने ॥

---

[1] प्रेषितास्ते तु गणिकाम्- पा.

अयं च सवितेदानीमस्तमेति द्रुतं ततः ।
विरक्तवेषमास्थाय कौपीनेनावशेषितः ॥

लिङ्गाकारेण बध्नीयाः कण्ठदेशे मदार्जितम् ।
द्रविणं सकलं शीघ्रं काषायेनावकुण्ठितम् ॥

प्रमत्त इव मूकः सन् भस्मभूषितविग्रहः ।
विरक्त इव गच्छ त्वं पुरतः पुण्यलक्षणः ॥

प्रापयिष्यन्ति राजानं भटास्त्वामाज्ञयेशितुः ।
सायमभ्यर्चितः शीघ्रं बहिर्निर्गच्छ मौनतः ॥

भुक्त्वा तद्दत्तमन्नादि शून्यदेवालयं व्रज ।
अहं व्रजामि तत्रैव निशीथे हृतभूषणा ॥

मिलित्वा मामकं देशं गच्छावस्त्वरया तदा ।
इत्युक्त्वा तं तथा कृत्वा बध्वा कण्ठे निजं धनम् ॥

पुरतः प्रेषयामास पृष्ठतः स्वयमागता ।
भटाः कृशोदरीं प्राप्य सर्वाभरणभूषिताम् ॥

सर्वस्वमपहृत्याशु विरक्तं तमजामिलम् ।
गृहीत्वा राजनिकटं प्रापयामासुरञ्जसा ॥

विरक्तं सायमायान्तं दृष्ट्वा भक्तिसमन्वितः ।
अवरुह्य स्वयं सौधाद्गृहीत्वा तत्पदद्वयम् ॥

नीत्वान्तर्गृहमप्येनमन्नैर्भक्ष्यैरपूजयत् ।
स्वीकृत्य पूजां तां राज्ञो मौनव्रतपरायणः ॥

भस्मानुलिप्तसर्वाङ्गः प्राणवत्कण्ठवर्तिनि ।
न्यस्तदृष्टिर्दृढं चित्तं तत्रैवाधाय रागतः ॥

लिङ्गवत्तिष्ठतीत्येवं लिङ्गं मनसि संस्मरन् ।
किमेवमन्यथा वेति विचाराविष्टमानसः ॥

निर्गत्य त्वरया गन्तुं वेश्यावञ्जनतत्परः ।
विचचार स्वदेशस्य मार्गं कातरमानसः ॥

तत्र देवालये शून्ये गत्वा गतविभूषणा ।
कालोऽतीतः स्वकीयोऽसौ नागतः किं करोम्यहम् ॥

किमेष जीवति क्रूरैर्द्रव्यलोभाद्धतः किमु ।
गृहीत्वा द्रविणं किं वा गतोऽसाविति चिन्तया ॥

कृशोदरी बहिर्गत्वा दृष्ट्वान्येन तु वर्त्मना ।
गच्छन्तं सहसा गत्वा जग्राह गणिका करम् ॥

धनलोभादसावुच्चै रुदन्नन्याय इत्यसौ ।
किमेतदिति मार्गस्थास्त[1]मपृच्छन्त मानुषाः ॥

अजामिलः—

विरक्तोऽहं शिवाचारो वेश्या गृह्णाति मत्करम् ।
युक्तं किमेतद्द्रष्टव्यमित्येवं तानभाषत ॥

सा च वेश्या मदीयोऽसौ भूत्या मद्धञ्चनोद्यतः ।
एवं प्रवृत्तः संवादस्तयोर्वैश्याभुजिष्ययोः ॥

कोलाहलमिमं श्रुत्वा राजकीयाः समागताः ।
विचार्य तद्गले बद्धं द्रविणं समुपाहरन् ॥

सर्वं निवेद्य राज्ञे तन्निकटे प्रापयन्निमम् ।
दृष्ट्वा कपटिनं दुष्टं शिरश्छेदमकारयत् ॥

शाङ्करास्तं समारोप्य विमानमतिसुन्दरम् ।
प्रापयंस्तं च कैलासं निकटं शङ्करस्य च ॥

श्रीशङ्करः—

नन्दीश दृश्यतामेष दीक्षां कुरु मदाज्ञया ।
[2] कृतदीक्षः पूर्वदिशि कैलासाचरणाधिपः ॥

डुण्डिनाम्नातिविख्यातो मत्सारूप्यं प्रयातु सः ।
बाढमित्यथ वक्ष्यन्तं नन्दिनं प्रशशास सः ॥

दीक्षां शैवीं विधायाशु विधिनागमचोदिताम् ।
निगमानागमानेनमध्यापयदथाञ्जसा ॥

सुयशा प्राह नन्दीशं शिवभक्तिपरायणम् ।
नाथ मे संशयः कश्चिदागतः कोऽत्र सन्निधौ ॥

---

[1] मभाषन्त–पा. [2] कृत्वा दीक्षां–पा.

अनेन किं तपश्चीर्णं कीदृशी भक्तिरूर्जिता।
को यज्ञस्तेन निर्वृत्त ईदृशी प्रापि वै गतिः ॥

एवं पृष्टो नन्दिकेशः प्राह गम्भीरया गिरा।
अजामिलस्य वृत्तान्तं सुयशायै यथातथम् ॥

सुयशा पुनरेवाह विस्मयाविष्टमानसा।
एतादृशस्य दुष्टस्य दुष्कृत्योद्युक्तचेतसः ॥

सारूप्यं ज्ञानिनां प्राप्यं प्रादादस्य कथं शिवः।
इत्येवं सन्दिहानां तां नन्दीशः प्रत्यभाषत ॥

वल्लभे शृणु गौरीशः सुलभः सर्वकामदः।
भक्तिलेशेन सन्तुष्टो भगवान् भक्तवत्सलः ॥

अन्तकाले विशेषेण भूतिभूषितविग्रहः।
सुवर्णे प्राणवल्लोभाल्लिङ्गबुद्धिसमन्वितः ॥

अजामिलो न्यस्तभाव औपम्याल्लिङ्गवद्धने।
आशया लीनहृदयो लिङ्गं सम्यगनुस्मरन् ॥

लिङ्गे समर्पितप्राणस्तत्याजासौ कलेवरम्।
तन्मात्रेणैव सन्तुष्टः स्वगणेषु न्ययोजयत् ॥

दीक्षां कृत्वा मया सम्यगनुशिष्टः शिवाज्ञया।
गणत्वमपि [1] संप्राप्य ख्यातो डुण्डीशनामतः ॥

इत्येवं सुयशां देवीं नन्दीशोऽभाषत स्फुटम्।
ततो डुण्डी तपस्तप्त्वा वरमासाद्य शङ्करात् ॥

गणिकायाः कृशोदर्याः प्रार्थयामास निर्वृतिम्।
सा चान्ते शिवसायुज्यं प्राप शंभोरथाज्ञया ॥

मित्रगुप्तोऽप्यसौ राजा ततः कालेन गच्छता।
भक्तपूजामहिम्नैव विरक्तो विषयेषु सः ॥

चौर्यबुद्धिं विहायाथ स्वार्जितानि धनानि च।
इष्टे पूर्ते शिवस्थानस्योद्धारे च व्यवर्तयत् ॥

---

[1] संप्राप्तं–पा.

शिवलिङ्गी शिवाचारः सामरस्यमवाप सः ।
एवं कृतकलं प्राह प्रीत्या कुण्डोदरः स्वयम् ॥

नत्वा कृतकलः प्रीतः कुण्डोदरपदाम्बुजम् ।
दृढभक्तिसमायुक्तः स्वेच्छाचारे निजान् सुतान् ॥

बन्धूनपि विशेषेण कृत्वा लिङ्गाङ्गसङ्गिनः ।
[1]निवेश्य शंभोर्निकटे चिरजीवितया स्वयम् ॥

सशरीरो वसत्येषस्तस्माच्छाङ्करदीक्षया ।
दीक्षिता लिङ्गपरमाः प्रयान्ति परमं सुखम् ॥

इत्यादिवचनैरन्यैर्वीरशैवं विशिष्यते ।
तस्माच्छ्रीशैलजं लिङ्गं धत्ते यः शिव एव सः ॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठ-
शिवाचार्यकृते निगमागमसारसर्वस्वसङ्ग्रहे क्रियासारे
लिङ्गधारणवैभवं नाम विंशोपदेशः समाप्तः

एकविंशोपदेशप्रारम्भः

[2]श्रीमन्त्रमूर्तये तुभ्यं शिवाय शिवदायिने ।
नमः श्रीगुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥ १

एकविंशोपदेशेऽस्मिन् महालिङ्गस्य लक्षणम् ।
[3]आद्यतत्त्वस्य शैवानां ध्येयस्य हृदयाम्बुजे ॥ २

"य आत्मा अपहतपाप्मे"त्यादि छान्दोग्यवाक्येन विरजत्व-विशोकत्वादिविशिष्टस्य हार्दाकाशमध्यवर्तिनः सकलनिष्कलात्मकस्यादितत्त्वस्योक्तक्रमेणाङ्कुरितसामरस्याविच्छि[4]न्नधारणारूपेण

---

[1] निवेद्य–पा. [2] अयं श्लोको मातृकासु न दृश्यते. [3] अद्य तत्त्वस्य–पा.
[4] नाधाररूपेण–पा.

बहिर्धृतस्यान्तर्विद्यमानस्य चाभेदभावनाप्रकारः। क्वचिच्चतुर्विंशतितत्त्वानि। क्वचित्त्रयस्त्रिंशत्तत्त्वानि। क्वचित् षट्त्रिंशत्तत्त्वानि। तेषु च विलक्षणशब्दैरवान्तर भेदकल्पनेत्यनियमप्राप्तौ नियमेनागमोक्तप्रकारेण कर्तृसादाख्यकर्मसादाख्यमूर्तसादाख्यामूर्तसादाख्यशिव सादाख्यानां निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीत[1]कलाः संज्ञाभेदाः

अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च॥

शक्तिश्च व्यापिनी चैव व्योमरूपात्व[2]नन्तरम्।
अना[3]थानाश्रिता चैव समना उन्मना तथा॥

समनान्तं पाशजालमुन्मन्यन्ते परः शिवः।
इत्याद्याष्षोडशकलाः [4]सादाख्ये संपुटीकृताः॥

कलाभिश्चैता वर्णरूपाः ख्याताः, पञ्चाक्षराख्यया प्रणवव्यष्टिरूपया पञ्चाक्षरसमष्टिरूपेण अकारोकारमकारबिन्दुनादात्मकप्रणवेन च वाच्यरूपस्याद्यतत्त्वरूपमहालिङ्गस्यैवोपास्यस्यागमिकैर्वैदिकैरपीत्यविशेषात्तदवान्तरतत्त्वभेदे ऽप्य[5]विशेष इति सर्वविद्यैकरूप्यं वीरशैवे अतिशयश्च।

धर्मक्षेत्रे [6]महातीर्थे गङ्गाकालिन्दिसङ्गमे।
प्रयागे परमे पुण्ये ब्रह्मलोकस्य वर्त्मनि॥

मुनयः शंसितात्मानः सत्यव्रतपरायणाः।
महौजसो महाभागा महासत्रं वितेनिरे॥

तत्र [7]सर्वं समाकर्ण्य व्यासशिष्यो महामुनिः।
आजगाम मुनीन् द्रष्टुं सूतः पौराणिकोत्तमः॥

तं दृष्ट्वा सूतमायान्तं हर्षिता मुनयस्तदा।
चेतसा सुप्रसन्नेन पूजां चक्रुर्यथाविधि॥

[8]वेदान्तसारसर्वस्वं पुराणं श्रावयाद्भुतम्।
(इति श्रुत्वा मुनीनां स वचनं सुप्रहर्षितः॥
संस्मरंश्छङ्करं सूतः प्रोवाच मुनिसत्तमान्।

---

[1] कलासंज्ञाभेदाः [2] नन्तका-**पा.** [3] अनाधा-**पा.** [4] सादाख्यैः-**पा.**
[5] देष इति-**पा.** [6] महाक्षेत्रे-**पा.** [7] सत्रं-**पा.** [8] (विद्ये-सं-आध्या. ३)

श्रुण्वन्तु मुनयः सर्वे स्मृत्वा शिवमनामयम् ॥
पुराणश्रवणं शैवं पुराणं वेदसारजम् ।
यत्र गीतं त्रिकं प्रीत्या भक्तिज्ञानविरागकम् ॥
वेदान्तवेद्यं सद्वस्तु विशेषेण प्रवर्णितम् ॥)

सूतः—

श्रुण्वन्तु मुनयः सर्वे पुराणं वेदसारजम् ।
पुरा कालेन महता कल्पेऽतीते पुनः पुनः ॥
अस्मि[1]न्नुपस्थिते कल्पे प्रवृत्ते सृष्टिकर्मणि ।
मुनीनां षट्कुलीनानां ब्रुवतामितरेतरम् ॥
इदं परमिदं नेति विवादः सुमहानभूत् ।
तेऽभिजग्मुर्विधातारं ब्रह्माणं द्रष्टुमव्ययम् ॥
वाग्भिर्विनयगर्भाभिः सर्वे प्राञ्जलयोऽब्रुवन् ।
त्वं हि सर्वजगद्धाता सर्वकारणकरणम् ॥
कः पुमान् सर्वतत्त्वेभ्यः पुराणः परतः परः ।

ब्रह्मोवाच—

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥
यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैः सर्वैः प्रथमं संप्रसूयते ॥
एष देवो महादेवः सर्वज्ञो जगदीश्वरः ।
अयं तु परया भक्त्या दृश्यते नान्यथा क्वचित् ॥
रुद्रो [2]हरिश्चाप्यत्रैव तथान्ये च सुरेश्वराः ।
भक्त्या परमया तस्य नित्यं दर्शनकाङ्क्षिणः ॥
बहुनात्र किमुक्तेन शिवभक्त्या विमुच्यते ।
प्रसादादेव सा भक्तिः प्रसादो भक्तिसंभवः ॥
यथेहाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः ।
तस्मादीशप्रसादार्थं यूयं गत्वा भुवं द्विजाः ॥

---

[1] उपस्थिते. [2] हरिर्हरश्चैव.

दीर्घसत्रं समाकृध्वं यूयं वर्षसहस्रकम् ।
अमुष्यैवाध्वरेशस्य शिवस्यैव प्रसादतः ॥

वेदोक्तविद्यासारं तु जायते साध्यसाधनम् ।

मुनयः—

अथ किं परमं साध्यं किं वा तत्साधनं परम् ॥
साधकः कीदृशस्तत्र तदिदं ब्रूहि तत्वतः ।

ब्रह्मा—

साध्यं शिवपदप्राप्तिः साधनं तस्य सेवनम् ॥
साधकस्तत्प्रसादा[1]द्योऽनित्यादिफलनिस्पृहः ।
कर्म कृत्वा तु वेदोक्तं तदर्पित[2]महाफलम् ॥

परमेशपदप्राप्तिः सालोक्यादिक्रमात्ततः ।
तत्तद्भक्तयनुसारेण सर्वेषां परमं[3] पदम् ॥

तत्साधनं बहुविधं साक्षादीशेन बोधितम् ।
संक्षिप्य तत्र वः सारं साधनं प्रब्रवीम्यहम् ॥

श्रोत्रेण श्रवणं तस्य वचसा कीर्तनं तथा ।
मनसा [4]मननं तस्य महासाधनमुच्यते ॥

श्रोतव्यः कीर्तितव्यश्च मन्तव्यश्च महेश्वरः ।
इति श्रुतिः प्रमाणं नः [5](साधनेऽस्मिन्महत्तरे ॥

अनेन साधनेनैव गताः साध्यं महाजनाः ।
साधका मुनयो यूयं) साधनेनामुना परम् ॥

साध्यं व्रजत सर्वार्थसाधनैकपरायणाः ।
प्रत्यक्षं चक्षुषा दृष्ट्वा तत्र लोकः प्रवर्तते ॥

अप्रत्यक्षं हि सर्वत्र ज्ञात्वा श्रोत्रेण चेष्टते ।
तस्माच्छ्रवणमेवादौ श्रुत्वा गुरुमुखाद्बुधः ॥

---

[1] द्व्यनित्यादि–पा [2] महद्वरं, महद्धरं–पा. [3] फलम्–पा. [4] साधनं–पा.
पुराणे न दृश्यते.

ततः संसाधयेदन्यत्कीर्तनं मननं सुधीः ।
क्रमान्मननपर्यन्ते साधनेऽस्मिन् सुसाधिते ॥
शिवयोगो भवेत्तेन सालोक्यादिक्रमाच्छनैः ।
सर्वदुःखक्षयः पश्चात्सर्वानन्दश्च लभ्यते ॥
[1]अभ्यासात्क्लेशतस्तद्वै पश्चादत्यन्तमङ्गलम् ।

मुनयः—(विद्येः सं. ४)

मननं कीदृशं ब्रह्मन् श्रवणं चापि कीदृशम् ॥
कीर्तनं वा कथं तस्य कीर्तयैतद्यथातथम् ।

ब्रह्मा—

पूजाजपेशगुणरूपविलासनाम्नां
मुक्तिप्रियेण मनसा परिशोधनं यत् ।
तत्सन्ततं मननमीश्वरदृष्टिलभ्यं
सर्वेषु साधनवरेष्वपि मुख्यमुख्यम् ॥

गीतात्मना श्रुतिपदेन च [2]भूषया वा
शंभुप्रतापगुणरूपविलासनाम्नाम् ।
वाचा स्फुटं तु रसवत्स्तवनं यदस्य
तत्कीर्तनं भवति साधनमत्र मध्यम् ॥

येनापि केन करणेन च शब्दपुञ्जा
यत्र क्वचिच्छिवपरं श्रवणेन्द्रियेण ।
स्त्रीकेलिवद्दृढतरं प्रणिपीयते य-
त्तद्वै बुधाः श्रवणमत्र जगत्प्रसिद्धम् ॥

सत्सङ्गमेन भवति श्रवणं पुरस्ता-
त्सङ्कीर्तनं पशुपतेरथ तद्दृढं स्यात् ।
सर्वोत्तमं भवति तन्मननं तदन्ते
सर्वं हि संभवति शङ्करदृष्टिपाते ॥

---

[1] अभ्यासात्क्लेशमेतद्वै पश्चादाद्यन्तमङ्गलम्—पु. पा. [2] भाषया—पु. पा.

सूतः—

अस्मिन् साधनमाहात्म्ये पुरावृत्तं मुनीश्वराः ।
युष्मदर्थं प्रवक्ष्यामि श्रुणुध्वमवधानतः ॥

पुरा मम गुरुर्व्यासः पराशरमुनेः सुतः ।
तपश्चचार संभ्रान्तः सरस्वत्यास्तटे शुभे ॥

गच्छन्यदृच्छया तत्र विमानेनार्करोचिषा ।
सनत्कुमारो भगवान् ददर्श मम देशिकम् ॥

ध्यानारूढः प्रबुद्धोऽसौ ददर्श तमजात्मजम् ।
प्रणिपत्याह संभ्रान्तः परं कौतूहलं मुनिः ॥

दत्वार्घ्यमस्मै प्रददौ देवयोग्यं च विष्टरम् ।
प्रसन्नः प्राह तं प्रह्वं प्रभुर्गम्भीरया गिरा ॥

सनत्कुमारः—

सत्यं वस्तु मुने दध्याः साक्षात्करणगोचरः ।
सशिष्योऽप्यसहायोऽत्र तपश्चरसि किं कृते ॥

एवमुक्तः कुमारेण प्रोवाच स्वाशयं मुनिः ।
धर्मार्थकाममोक्षाश्च वेदमार्गे कृतादराः ॥

बहुधा स्थापिता लोके मया त्वत्कृपया तथा ।
एवंभूतस्य मेऽप्येवं गुरुभूतस्य सर्वतः ॥

मुक्तिसाधनकं ज्ञानं नोदेति परमाद्भुतम् ।
तपश्चरामि मुक्त्यर्थं न जाने तत्र कारणम् ॥

[1] इत्थं कुमारो भगवान् व्यासेन मुनिना[2]र्थितः ।
समर्थः प्राह विप्रेन्द्रा निश्चयं मुक्तिकारणम् ॥

श्रवणं कीर्तनं शंभोर्मननं च महत्तरम् ।
त्रयं साधनमुक्तं च विद्यते वेदसंमतम् ॥

पुराहमपि संभ्रान्तो मुक्तिसाधनसंभ्रमः ।
अचले मन्दरे शैले [3]तपश्चरणमाचरम् ॥

---

[1] इत्थमुक्तः स भगवान् इति स्यात्. [2] ततः—पा. [3] तपः परमतिस्थिरम्.

शिवाज्ञया ततः प्राप्तो भगवान्नन्दिकेश्वरः ।
स मे दयालुर्भगवान् सर्वसाक्षी गणेश्वरः ॥

उवाच मह्यं सस्नेहं मुक्तिसाधनमुत्तमम् ।
श्रवणं कीर्तनं शंभोर्मननं वेदसंमतम् ॥

त्रिकं च साधनं मुक्तौ शिवेन मम भाषितम् ।
श्रवणादित्रिकं ब्रह्मन् कुरुष्वेति मुहुर्मुहुः ॥

एवमुक्त्वा ततो व्यासं सानुगो विधिनन्दनः ।
जगाम स्वविमानेन पदं परमशोभनम् ॥

एवमुक्तं समासेन पूर्ववृत्तान्तमद्भुतम् ।

ऋषयः—

श्रवणादित्रिकं सूत मुक्त्युपायस्त्वयेरितः ॥

श्रवणादित्रिकेऽशक्तः किं कृत्वा मुच्यते जनः ।
अयत्नेनैव मुक्तिः स्यात्कर्मणा केन हेतुना ॥

सूतः—

श्रवणादित्रिकेऽशक्तो लिङ्गं बेरं च शाङ्करम् ।
संस्थाप्य नित्यमभ्यर्च्य तरेत्संसारसागरम् ॥

अपि द्रव्यं वहेदेव यथाबलमवञ्चयन् ।
अर्पयेल्लिङ्गबेरार्थमर्चयेदपि सन्ततम् ॥

मण्टपं गोपुरं तीर्थं मठं क्षेत्रं तथोत्सवम् ।
वस्त्रं गन्धं च माल्यं च धूपं दीपं च भक्तितः ॥

विविधान्नं च नैवेद्यमपूपव्यञ्जनैर्युतम् ।
छत्रं ध्वजं च व्यजनं चामरं चापि (साङ्गकं) वाहनम् ॥

राजोपचारवत्सर्वं (धारये) रचयेल्लिङ्गबेरयोः ।
प्रदक्षिणं नमस्कारं यथाशक्ति जपं तथा ॥

आवाहनादिसर्गान्तं नित्यं कुर्यात्समाहितः ।
[1] इत्थमभ्यर्चयन्देवं लिङ्गे बेरे च शाङ्करे ॥

[1] नित्यमभ्यर्चयेद्देवं–पा.

सिद्धिमेति शिवप्रीत्या हित्वापि श्रवणादिकम् ।
[1] लिङ्गबेरार्चनामात्रान्मुक्ताः पूर्वे महाजनाः ॥

मुनयः—

बेरमात्रे तु सर्वत्र पूज्यन्ते देवतागणाः ।
लिङ्गे बेरे च सर्वत्र कथं संपूज्यते शिवः ॥

सूतः—

अहो मुनीश्वराः पुण्यं प्रश्नमेतन्महाद्भुतम् ।
अत्र वक्ता महादेवो नान्योऽस्ति पुरुषः क्वचित् ॥
शिवेनोक्तं प्रवक्ष्यामि क्रमाद्गुरुमुखाच्छ्रुतम् ।
शिवैको ब्रह्मरूपत्वान्निष्कलः परिकीर्तितः ॥
रूपित्वात्सकलस्तद्वत्तस्मात्सकलनिष्कलः ।
निष्कलत्वान्निराकारं लिङ्गं तस्य समागतम् ॥
सकलत्वात्तथा बेरं साकारं तस्य सङ्गतम् ।
सकलाकाररूपत्वाद्ब्रह्मशब्दाभिधः परः ॥
अपि लिङ्गे च बेरे च नित्यमभ्यर्च्यते जनैः ।
अब्रह्मत्वात्तदन्येषां निष्कलत्वं नहि क्वचित् ॥
तस्मात्ते निष्कले लिङ्गे नाराध्यन्ते सुरेश्वराः ।
अब्रह्मत्वाच्च जीवत्वात्तथान्ये देवता गणाः ॥
तूष्णीं सकलमात्रत्वादर्च्यन्ते बेरमात्रके ।
जीवत्वं शङ्करान्येषां ब्रह्मत्वं शङ्करस्य च ॥
वेदान्तसारसंसिद्धं प्रणवार्थप्रकाशनात् ।
एवमेव पुरा पृष्टो [2]मन्दरे नन्दिकेश्वरः ॥
सनत्कुमारमुनिना ब्रह्मपुत्रेण धीमता ।

सनत्कुमारः—

शिवान्य[3]देवतांशानां सर्वेषामपि सर्वतः ।
बेरमात्रं हि पूजार्थं श्रुतं दृष्टं च भूरिशः ॥

---

[1] शिवलिङ्गार्चनामात्रान्मुक्ताः–पा. [2] मण्डले–पा. [3] देवसंश्यानां.

शिवमात्रस्य पूजायां लिङ्गं बेरं च दृश्यते ।
[1] तदेतद्ब्रूहि कल्याणं तत्त्वं मे साधु बोधनम् ॥

नन्दिकेश्वरः—

अनुत्तरमिमं प्रश्नं रहस्यं ब्रह्मलक्षणम् ।
कथयामि शिवेनोक्तं भक्तियुक्तस्य तेऽनघ ॥

शिवस्य ब्रह्मरूपत्वान्निष्कलत्वाच्च निष्कलम् ।
लिङ्गं तस्यैव पूजायां सर्ववेदेषु संमतम् ॥

तस्यैव सकलत्वाच्च तथा सकलनिष्कलम् ।
सकलं च तथा बेरं पूजायां लोकसंमतम् ॥

शिवान्येषां तु जीवत्वात्सकलत्वाच्च सर्वतः ।
बेरमात्रं हि पूजायां संमतं वेदनिर्णये ॥

स्वाविर्भावं च देवानां सकलं रूपमेव हि ।
शिवस्य लिङ्गं बेरं च दर्शने दृश्यते खलु ॥

सनत्कुमारः—

उक्तं त्वया महाभाग लिङ्गबेरप्रचारणम् ।
शिवस्य च तदन्येषां विभज्य परमार्थतः ॥

[2] तस्मात्तदेव परमं लिङ्गबेरादिसंभवम् ।
श्रोतुमिच्छामि योगीन्द्र लिङ्गाविर्भावलक्षणम् ॥

नन्दिकेश्वरः—

शृणु वत्स भवत्प्रीत्या वक्ष्यामि परमार्थतः ।
पुराकल्पे महाकाले प्रलये लोकविश्रुते ॥

अयुध्यतां महात्मानौ ब्रह्मविष्णू परस्परम् ।
तयोर्मानं निराकर्तुं तन्मध्ये परमेश्वरः ॥

निष्कलस्तम्भरूपेण स्वरूपं समदर्शयत् ।
ततः [3]स्वलिङ्गचिह्नत्वात्स्तम्भतो निष्कलं शिवः ॥

---

[1] अतस्तद्ब्रूहि. [2] मुद्रितपुस्तके—नास्ति. [3] स्तम्भकं निष्कलं—पा.

स्वलिङ्गं दर्शयामास जगतां हितकाम्यया ।
तदा प्रभृति लोकेषु निष्कलं लिङ्गमैश्वरम् ॥
सकलं च तथा बेरं शिवस्यैव प्रकल्पितम् ।
शिवान्येषां तु देवानां बेरमात्रं प्रकल्पितम् ॥
तत्तद्बेरं तु देवानां तत्तद्भोगप्रदं शुभम् ।
शिवस्य लिङ्गं बेरं च भोगमोक्षप्रदं शुभम् ॥

नन्दिकेश्वरः—(विद्ये-सं-६)

पुरा कदाचिद्यो[1]गीन्द्रो विष्णुर्विषधरासनः ।
सुष्वाप परया भूत्या स्वानुगैरपि संवृतः ॥
यदृच्छयागतस्तत्र ब्रह्मा ब्रह्मविदां वरः ।
अपृच्छत्पुण्डरीकाक्षं शयानं सर्वसुन्दरम् ॥
कस्त्वं पुरुषवच्छेषे दृष्ट्वा मामपि दृप्तवत् ।
उत्तिष्ठ वत्स मां पश्य तव नाथमिहागतम् ॥
आगतं गुरुमाराध्यं दृष्ट्वा यो दृप्तवच्चरेत् ।
द्रोहिणस्तस्य मूढस्य प्रायश्चित्तं विधीयते ॥
इति श्रुत्वा वचः क्रुद्धो बहिः शान्तवदाचरन् ।

विष्णुः—

स्वस्ति ते स्वागतं वत्स तिष्ठ [2]पीठमिदं विश ॥
किमु ते व्यग्रवद्वक्त्रं विभाति विषमेक्षणम् ।

ब्रह्मा—

वत्स विष्णो महामानमागतं कालवेगतः ॥
[3]पितामहश्च जगतः पिता च तव वत्सक ।

विष्णुः—

[4](आस्त्वं) मत्स्थं जगदिदं वत्स मन्यसे त्वं हि चोरवत् ॥
मन्नाभिकमलाज्जातः पुत्रस्त्वं भाषसे मुधा ।

---

[1] योगीन्द्र-पा. [2] पीठमितो व्रज-पा. [3] पितामहस्य जगतः पाता च तव वत्सक-पा. [4] अस्तं-पा.

नन्दिकेश्वरः—

एवं हि वदतोस्तत्र मुग्धयो[1]रजयोस्तदा ॥
अहमेव वरो न त्वमहं प्रभुरहं प्रभुः ।
परस्परं हन्तुकामौ चक्रतुः समरोद्यमम् ॥
युयुधातेऽमरौ वीरौ हंसपक्षीन्द्रवाहनौ ।
वैरिञ्चा वैष्णवाश्चैवं मिथो युयुधिरे तदा ॥
तावद्विमानगतयः सर्वे वै देवजातयः ।
दिदृक्षवः समाजग्मुः समरं तन्महाद्भुतम् ॥
क्षिपन्तः पुष्पवर्षाणि पश्यन्तः स्वैरमम्बरे ।
सुपर्णवाहनस्तत्र क्रुद्धो वै ब्रह्मवक्षसि ॥
मुमोच बाणानसहानस्त्रांश्च विविधान् बहून् ।
मुमोचाथ विधिः क्रुद्धो विष्णोरुरसि दुस्सहान् ॥
बाणाननलसङ्काशानस्त्रांश्च बहुशस्तदा ।
तदाश्चर्यमतिस्पष्टं तयोः समरगोचरम् ॥
समीक्ष्य दैवतगणाः शशंसुर्भृशमाकुलाः ।
ततो विष्णुः सुसंक्रुद्धः श्वसन् व्यसनकर्शितः ॥
माहेश्वरास्त्रं मतिमान्त्सन्दधे ब्रह्मणोपरि ।
ततो ब्रह्मा भृशं क्रुद्धः कम्पयन् विश्वमेव हि ॥
अस्त्रं पाशुपतं घोरं सन्दधे विष्णुवक्षसि ।
ततस्तदुत्थितं व्योम्नि तपनायुतसन्निभम् ॥
सहस्रमुखमत्युग्रं चण्डवातभयङ्करम् ।
अस्त्रद्वयमिदं तत्र ब्रह्मविष्ण्वोर्भयङ्करम् ॥
इत्थं बभूव समरं ब्रह्मविष्ण्वोः परस्परम् ।
ततो देवगणाः सर्वे विषण्णा भृशमाकुलाः ॥
ऊचुः परस्परं तात रा(ज्य)जक्षोभे यथा द्विजाः ।
सृष्टिः स्थितिश्च संहारस्तिरोधानोऽप्यनुग्रहः ॥

---

[1] रनयोः—पा.

यस्मात्प्रवर्तते तस्मै ब्रह्मणे च त्रिशूलिने ।
अशक्यमन्यैर्यदनुग्रहं विना
तृणक्षयोऽप्यत्र यदृच्छया क्वचित् ।
इति [1] देहमतिं कृत्वा विचिन्वन्तः [2] शिवेक्षणम् ।
जग्मुः कैलासशिखरं यत्रास्ते चन्द्रशेखरः ॥

[3] दृष्ट्वैनममरा हृष्टाः पदं तत्पारमेश्वरम् ।
प्रणेमुः प्रणवाकारं प्रविष्टास्तत्र सद्मनि ॥

तेऽपि तत्र सभामध्ये मण्डपे मणिविष्टरे ।
विराजमानमुमया ददृशुर्देवपुङ्गवम् ॥

सव्योत्तरेतरपदं तदर्पितकराम्बुजम् ।
स्वगणैः सर्वतो जुष्टं सर्वलक्षणलक्षितम् ॥

वीज्यमानं विशेषज्ञै[4]र्व्यजनैस्तीव्रचालितैः ।
शस्यमानं सदा वेदैरनुगृह्णन्तमीश्वरम् ॥

दृष्ट्वैवमीशममराः सन्तोषसलिलेक्षणाः ।
दण्डवद्दूरतो वत्सा नमश्चक्रुर्महागणाः ॥

तानवेक्ष्य पतिर्देवान् समीपे चाह्वयद्गणैः ।
अथ [5]संह्लादयन् देवान् देवो देवशिखामणिः ॥

अवोचदर्थगम्भीरं वचनं मधु मङ्गलम् ।

ईश्वरः—(विद्ये-सं-७)

वत्सकाः स्वस्ति वः कच्चिद्वर्तते मम शासनात् ॥

जगच्च देवतावंशः स्वस्वकर्मणि किं न वा ।
प्रागेव विदितं युद्धं ब्रह्मविष्ण्वोर्मया सुराः ॥

[6] भवतामभिलाषेण पौनरुक्त्येन [7] भाषितम् ।
इति सस्मितया मृद्व्या कुमारपरिभाषया ॥

---

[1] देवमतिं, देवा भयं-पा. [2] शिवक्षयम्-पा. [3] दृष्ट्वैवममरा-पा. [4] स्त्रीजनैस्ती-व्रभावितैः-पा. [5] स ह्लादयन्-पा. [6] भवतामभिलाषेन-पा. [7] भावितम्-पा.

समतोषय[1]दार्यायाः स पतिस्तत्सुरव्रजम् ।
अथ युद्धाङ्गणं गन्तुं हरिधात्रोरधीश्वरः ॥
आज्ञापयद्गणेशानां शतं तत्रैव संसदि ।
ततो वाद्यं बहुविधं प्रयाणाय परेशितुः ॥
गणेश्वराश्च सन्नद्धा नानावाहनभूषणाः ।
प्रणवाकारमाद्यन्तं पञ्चमण्डलमण्डितम् ॥
आरुरोह रथं भद्रमम्बिकापतिरीश्वरः ।
ससूनुगणमिन्द्राद्याः सर्वेऽप्यनुययुः सुराः ॥
चित्रध्वजव्यजनचामरपुष्पवर्ष-
सङ्गीतनृत्तनिवहैरपि वाद्यवर्गैः ।
संमानितः पशुपतिः परया च देव्या
साकं तयोः समरभूमिमगात्ससैन्यः ॥
समीक्ष्य तु तयोर्युद्धं निगूढोऽभ्रं समास्थितः ।
समाप्तवाद्यनिर्घोषः शान्तो[2]रुगणनिस्वनः ॥
अथ ब्रह्माच्युतौ वीरौ हन्तुकामौ परस्परम् ।
(अज्ञातस्वामिचरितौ शिवमायाविमोहितौ ॥)
माहेश्वरेण चास्त्रेण तथा पाशुपतेन च ।
[3]अस्त्रज्वालैरथो दग्धं ब्रह्मविष्ण्वोर्जगत्त्रयम् ॥
ईशोऽपि तं निरीक्ष्याथ ह्यकालप्रलयं भृशम् ।
महानलस्तम्भविभीषणाकृति-
र्बभूव तन्मध्यतले स निष्फलः ।
ते अस्त्रे चापि सज्वाले लोकसंहरणक्षमे ॥
[4]निपेततुः क्षणेनैव ह्याविर्भूतमहानले ।
दृष्ट्वा [5]तदद्भुतमतश्चित्तशान्तिकरं शुभम् ॥
किमेतदद्भुताकारमित्यूचुश्च परस्परम् ।
अतीन्द्रियमिदं स्तम्भमग्निरूपं किमुत्थितम् ॥

---

[1] दम्बायाः-पा. [2] रुगगवर्जितः-पा. [3] तत्र ज्वा-पा. [4] निपेत्रतुः-पा.
[5] तदद्भुतं चित्रमत्र शान्ति-पा.

अस्योर्ध्वमपि चाधश्च आवयोर्लक्ष्यमेव हि ।
इति [1] व्यवसितावीशौ मिलितौ वीरमानिनौ ॥

तदाद्यन्तपरीक्षार्थं प्रतस्थातेऽथ सत्वरम् ।
आवयोर्मिथ्रयोस्तत्र कार्यमेकं न संभवेत् ॥

इत्युक्त्वा सूकरतनुर्विष्णुस्तस्यादिमेयिवान् ।
तथा ब्रह्मा हंसतनुस्तदन्तं वीक्षितुं ययौ ॥

भित्वा पातालनिलयं गत्वा दूरतरं हरिः ।
नापश्यत्तस्य संस्थानं स्तम्भस्यानलवर्चसः ॥

श्रान्तः स सूकरहरिः प्राप पूर्वं रणाङ्गणम् ।
अथ गुच्छंस्तु व्योम्ना च विधिस्तात पिता तव ॥

ददर्श केतकीपुष्पं किंचित्प्रच्युतमद्भुतम् ।
अतिसौरभ्यमम्लानं बहुवर्षच्युतं तथा ॥

अन्वीक्ष्य च तयोः कृत्यं भगवान् परमेश्वरः ।
परिहासं तु कृतवान्कम्पनाच्चलितं शिरः ॥

तस्मात्ता[2]वनुगृह्णातु च्युतं कैतकमुत्तमम् ।
किं त्वं पतसि पुष्पेश पुष्पराट् केन वा धृतः ॥

आदिमस्याप्रमेयस्य स्तम्भमध्याच्च्युतश्चिरम् ।
न संपश्यामि तस्मात्त्वं जह्याशामन्तदर्शने ॥

अस्यान्तस्य च सेवार्थं हंसमूर्तिरिहागतः ।
इतः परं सखे मेऽद्य त्वया कर्तव्यमीप्सितम् ॥

मया सह त्वया वाच्यं [3] एतद्विष्णोश्च सन्निधौ ।
स्तम्भान्तो वीक्षितो धात्रा तत्र साक्ष्यहमच्युत ॥

इत्युक्त्वा कैतकं तत्र प्रणनाम पुनः पुनः ।
असत्यमपि शस्तं स्यादापदीत्यनुशासनम् ॥

---

[1] व्यवसितौ वीरौ–**पा.** [2] मनुगृह्णन्तु–**पा.** [3] सत्यं यद्विष्णुसन्निधौ–**पा.**

समीक्ष्य [1]तत्राच्युतमायतश्रमं
प्रनष्टहर्षं तु ननर्त हृष्टवान् ।
उवाच चैनं परमार्थमच्युतं
[2]शठार्थवादी स विधिस्ततोऽच्युतम् ॥

स्तम्भाग्रमेतत्समुदीक्षितं हरे
[3] तत्रैव साक्षी ननु कैतकं त्विदम् ।
ततोऽवदत्तत्र हि कैतकं मृषा
[4] तथेति तद्धातृवचस्तदन्तिके ॥

हरिश्च तत्सत्यमितीव चिन्तय-
श्चकार तस्मै विधये नमः स्वयम् ।
षोडशैरुपचारैश्च पूजयामास तं विधिम् ॥

विधिं प्रहर्तुं शठमभ्यलिङ्गतः
स ईश्वरस्तत्र बभूव साकृतिः ।
समुत्थितः स्वामिविलोकना[5]त्पुनः
प्रकम्पपाणिः परिगृह्य तत्पदम् ॥

आद्यन्तहीनवपुषि त्वयि मोहबुध्या
भूयान्विमर्श [6]इह यः पतिकामनोत्थः ।
स त्वं प्रसीद करुणाकर कश्मलं नौ
मृष्टं क्षमस्व विहितं भवतैव [7]केल्या ॥

ईश्वरः—

वत्स प्रसन्नोऽस्मि हरे यतस्त्व-
मीशत्वमिच्छन्नपि सत्यवाक्यम् ।
ब्रूयास्ततस्ते भवता जनेषु
साम्यं मया सत्कृतिरप्यलप्सि ॥

इतः परं ते पृथगात्मनश्च
क्षेत्रप्रतिष्ठोत्सवपूजनं च ।

---

[1] तत्राश्रम–पा. [2] षण्डात्तवादः स–पा. [3] तदर्थसाक्षी–पा. [4] तदेति–पा.
[5] पुरः–पा. [6] इह नावति काम–पा. [7] केल्या–पा.

इति देवः पुरा प्रीतः सत्येन हरये परम् ।
ददौ स्वसाम्यमत्यर्थं देवसङ्घे च पश्यति ॥

नन्दिकेश्वरः—(विद्ये-सं-८)

ससर्जाथ महादेवः पुरुषं कंचिदद्भुतम् ।
भैरवाख्यं भ्रुवोर्मध्याद्ब्रह्मदर्पजिघांसया ॥

स वै तदा तत्र पतिं प्रणम्य शिवमङ्कणे ।
किं कार्यं करवाण्यद्य शीघ्रमाज्ञापय प्रभो ॥

वत्सार्यायं विधिः साक्षाज्जगन्नामाद्यदैवतम् ।
नूनमर्चय खड्गेन तिग्मेन सहसा परम् ॥

स वै गृहीत्वैककरेण केशं
तत्पञ्चमं दृप्तमसत्यभाषणम् ।
च्छित्वा शिरांस्यस्य निहन्तुमुद्यतः
प्रकम्पयन् खड्गमतिस्फुटं करैः ॥

पिता तवोत्सृष्टविभूषणाम्बर-
स्रगुत्तरीयामलकेशसंहतिः ।
प्रवातरम्भेव लतेव चञ्चलः
पपात वै भैरवपादपङ्कजे ॥

तावद्विधिं तात [1] दिदृक्षुरच्युतः
कृपालुरस्मत्पतिपादपल्लवम् ।
निषिच्य बाष्पैरगदत्कृताञ्जलि-
र्यथाशिशुः स्वं पितरं कलाक्षरम् ।

अच्युतः—

त्वया प्रसन्नेन पुरा हि दत्तं
यदस्य पञ्चाननमीश चिह्नम् ।
तस्मात्क्षमस्वाद्यमनुग्रहार्हं
कुरु प्रसादं विधिये ह्यमुष्मै ॥

---

[1] रिरक्षुरच्युतः—पा.

इत्यर्थितोऽच्युतेनेशस्तुष्टः सुरगणाङ्गणे ।
निवर्तयामास तदा भैरवं ब्रह्मदण्डतः ॥

अथाह देवः कितवं विधिं विगतकन्धरम् ।
ब्रह्मंस्त्वमर्हणाकाङ्क्षी शठमीशित्वमास्थितः ॥

नातस्ते सत्कृतिर्लोके भूयात्स्थानोत्सवादिकम् ।

ब्रह्मा—

स्वामिन् प्रसीदाद्य महाविभूते
मन्ये वरं मे शिरसः प्रमोक्षम् ॥

नमस्तुभ्यं भगवते बन्धवे विश्वयोनये ।
सहिष्णवे च दोषाणां शंभवे शैलधन्वने ॥

ईश्वरः—

अराजभयमेतद्वै जगत्सर्वं नशिष्यति ।
ततस्त्वं जहि दण्डार्हं वह लोकधुरं शिशो ॥

वरं ददामि ते तत्र गृहाण परदुर्लभम् ।
वैतानिकेषु गृह्येषु यज्ञेषु च भवान् गुरुः ॥

निष्फलस्त्वदृते यज्ञः साङ्गश्च सह दक्षिणः ।
अथाह देवः कितवं केतकं कूटसाक्षिणम् ॥

रे रे केतक दुष्टस्त्वं शठ दूरमितो व्रज ।
ममापि प्रेम ते पुष्पे मा भूत्पूजास्वितः परम् ॥

इत्युक्ते तत्र देवेन केतकं देवजातयः ।
सर्वा निवारयामासु[1]स्तत्पार्श्वादन्यतस्तदा ॥

केतक उवाच —

नमस्ते नाथ मे जन्म निष्फलं भवदाज्ञया ।
सफलं क्रियतां तात क्षम्यतां मम किल्बिषम् ॥

ज्ञानाज्ञानकृतं पापं नाशयत्येव ते स्मृतिः ।
तादृशे त्वयि दृष्टे मे शाठ्यदोषः कुतो भवेत् ॥

---

[1] स्तत्स्पर्शादन्यत—पा.

तथा स्तुतः स भगवान् केतकेन सभातले ।
न मे तद्धारणं योग्यं सत्यवागहमीश्वरः ॥

मदीयास्त्वां धरिष्यन्ति जन्म ते सफलं ततः ।
त्वं वै वितानव्याजेन ममोपरि भविष्यसि ॥

इत्यनुग्राह्य भगवान् कैतकं विधिमाधवौ ।
विरराज सभामध्ये [1] सर्वदेवैरभिष्टुतः ॥

नन्दीश्वरः– (विद्ये-सं-९)

तत्रान्तरे तौ च नाथं प्रणम्य विधिकेशवौ ।
बद्धाञ्जलिपुटौ तूष्णीं तस्थतुर्दक्षवामगौ ॥

तत्र संस्थाप्य [2] तौ देवं सकुटुम्बं वरासने ।
पूजयामासतुः पूज्यं पुण्यैः पूरुषवस्तुभिः ॥

पौरुषं प्राकृतं वस्तु ध्येयं दीर्घाल्पकालिकम् ।
हारनूपुरकेयूर किरीटमणिकुण्डलैः ॥

यज्ञसूत्रोत्तरीयैः स्रक्क्षौममाल्याङ्गुलीयकैः ।
पुष्पताम्बूलकर्पूरचन्दनागरुलेपनैः ॥

धूपदीपसितच्छत्रव्यजनध्वजचामरैः ।
अन्यै[3]र्दिव्योपचारैश्च वाङ्मनोऽतीतवैभवैः ॥

पतियोग्यैः पश्वलभ्यैस्तौ समार्चयतां पतिम् ।
यद्यच्छ्रेष्ठतमं वस्तु पतियोग्यं हि तद्विजाः ॥

तद्वस्त्वखिलमीशोऽपि पारम्पर्यचिकीर्षया ।
सभ्यानां प्रददौ हृष्टः पृथक्तत्र यथांक्रमम् ॥

कोलाहलो महानासीत्तत्र तद्वस्तु गृह्णताम् ।
तत्रैव ब्रह्मविष्णुभ्यां चार्चितः शङ्करः पुरा ॥

प्रसन्नः प्राह तौ नम्रौ सस्मितं भक्तिवर्धनः ।
तुष्टोऽहमद्य वां वत्सौ पूजयास्मिन् महादिने ॥

---

[1] सर्वराजैरमि–**पा.** [2] तं देवं–**पा.** [3] दैवोपचारैश्च–**पा.**

दिनमेतत्ततः पुण्यं भविष्यति महत्तरम् ।
[1](शिवरात्रिरिति ख्यातं मम नाम्नैव नामकम् ॥

तद्दिनेष्वपि सर्वेषु महदेतन्मम प्रियम् ।
माघफाल्गुनयोर्मध्ये माघकृष्णचतुर्दशी ॥)

शिवरात्रिरिति ख्याता तिथिरेषा मम प्रिया ।
एतत्काले तु यः कुर्यात्पूजां मल्लिङ्गवेरयोः ॥

कुर्यात्स जगतां कृत्यं स्थितिसर्गादिकं पुमान् ।
शिवरात्रावहोरात्रं निराहारो जितेन्द्रियः ॥

अर्चयेद्वा यथान्यायं यथाबलमवञ्चकः ।
यत् फलं मम पूजायां वर्षमेकं निरन्तरम् ॥

तत् फलं लभते सद्यः शिवरात्रौ ममार्चनात् ।
मद्धर्मवृद्धिकालोऽयं चन्द्रकाल इवाम्बुधेः ॥

प्रतिष्ठाद्युत्सवो यत्र मामको मङ्गलाय नः ।
यत् पुनस्तम्भरूपेण आविरासमहं पुरा ॥

स काले मार्गशीर्षे तु स्यादार्द्राऋक्षमर्भकौ ।
आर्द्रायां मार्गशीर्षे तु यः पश्येन्मामुमासखम् ॥

मद्वेरमपि वा लिङ्गं स गुहादपि मे प्रियः ॥

अलं दर्शनमात्रेण फलं तस्मिन् दिने शुभे ।
अभ्यर्चनं चेदधिकं फलं वाचामगोचरम् ॥

रणरङ्गतलेऽमुष्मिन् यदहं लिङ्गवर्ष्मणा ।
जृम्भितो लिङ्गवत्तन्माल्लिङ्गस्थानमिदं भवेत् ॥

अनाद्यन्तमिदं स्तम्भमणुमात्रं भविष्यति ।
दर्शनार्थं हि जगतां पूजनार्थं हि पुत्रकौ ॥

भोगावहमिदं लिङ्गं भुक्तिमुक्त्येकसाधनम् ।
दर्शनस्पर्शनध्यानाज्जन्तूनां जन्ममोचनम् ॥

[1] पुराणे न दृश्यते.

अनलाचलसंकाशं यदिदं लिङ्गमुत्थितम्।
अरुणाचलमित्येव तदिदं ख्यातिमेष्यति॥

अत्र तीर्थं च बहुधा भविष्यति महत्तरम्।
मुक्तिरप्यत्र जन्तूनां वासेन मरणेन च॥

रथोत्सवादिकल्याणं जनवासं च सर्वतः।
अत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत्॥

मत्क्षेत्रादपि सर्वस्मात्क्षेत्रमेतन्महत्तरम्।
अत्र संस्मृतिमात्रेण मुक्तिर्भवति देहिनाम्॥

तस्मान्महत्तरमिदं क्षेत्रमत्यन्तशोभनम्।
सर्वकल्याणसंपूर्णं सर्वमुक्तिकरं शुभम्॥

अर्चयित्वात्र मामेव लिङ्गे लिङ्गिनमीश्वरम्।
सालोक्यं चैव सामीप्यं सारूप्यं सार्ष्टिरेव च।

सायुज्यमिति पञ्चैते क्रियादीनां फलं मतम्।
सर्वेऽपि यूयं सकलं प्राप्स्यथाशु मनोरथम्॥

नन्दिकेश्वरः—

इत्यनुग्राह्य भगवान् विनतौ विधिमाधवौ।
यत्पूर्वं प्रहतं युद्धे तयोः सैन्यं परस्परम्॥

तदुत्थापयदत्यर्थं स्वशक्त्यामृतधारया।
तयोर्मौढ्यं च वैरं च व्यपनेतुमुवाच तौ॥

सकलं निष्कलं चेति स्वरूपद्वयमस्ति मे।
नान्यस्य कस्यचित्तस्मादन्यः सर्वोऽप्यनीश्वरः॥

पुरस्तात्स्तम्भरूपेण पश्चाद्रूपेण चार्भकौ।
ब्रह्मत्वं निष्कलं प्रोक्तमीशत्वं सकलं तथा॥

द्वयं ममैव संसिद्धं न मदन्यस्य कस्यचित्।
तस्मादीशत्वमन्येषां युवयोरपि न क्वचित्॥

तदज्ञानेन वां वृत्तमीशमानं महाद्भुतम्।
तन्निराकर्तुमत्रैवमुत्थितोऽहं रणक्षितौ॥

त्यजतं मानमात्मीयं मयीशे कुरुतं मतिम्।
मत्प्रसादेन लोकेषु सर्वोऽप्यर्थः प्रकाशते॥

गुरूक्तिर्व्यञ्जकं तत्र प्रमाणं वा पुनः पुनः।
ब्रह्मतत्त्वमिदं रूढं भवत्प्रीत्या भणाम्यहम्॥

अहमेव परं ब्रह्म मत्स्वरूपं कलाकलम्।
ब्रह्मत्वादीश्वरश्चाहं कृत्यं मेऽनुग्रहादिकम्॥

बृहत्वाद्बृंहणत्वाच्च तथैवात्मानमर्थतः।
अनात्मानः परे सर्वे जीवा एव न संशयः॥

अनुग्रहाद्यं सर्गान्तं जगत्कृत्यं च पञ्चकम्।
ईशत्वादेव मे नित्यं न मदन्यस्य कस्यचित्॥

आदौ ब्रह्मत्वबुध्यर्थं निष्कलं लिङ्गमुत्थितम्।
तस्मादज्ञातमीशत्वं व्यक्तं द्योतयितुं हि वाम्॥

सकलोऽहमतो जातः साक्षादीशस्तु तत्क्षणात्।
सकलत्वमतो ज्ञेयमीशत्वं मयि सत्वरम्॥

यदिदं निष्कलं स्तम्भं मम ब्रह्मत्वबोधकम्।
लिङ्गलक्षणयुक्तत्वान्मम लिङ्गं भवेदिदम्॥

तदिदं नित्यमभ्यर्च्यं युवाभ्यामत्र पुत्रकौ।
मदात्मकमिदं नित्यं मम सान्निध्यकारणम्॥

महत्पूज्यमिदं लिङ्गमभेदाल्लिङ्गलिङ्गिनोः।
यत्र प्रतिष्ठितं येन मदीयं लिङ्गमीदृशम्॥

तत्र प्रतिष्ठितः सोऽहमप्रतिष्ठोऽपि वत्सकौ।
मत्साम्यमेकलिङ्गस्य स्थापने फलमीरितम्॥

द्वितीये स्थापिते लिङ्गे मदैक्यं फलमेव हि।
लिङ्गं प्राधान्यतः स्थाप्यं तथा बेरं तु गौणकम्॥

लिङ्गाभावेन तत्क्षेत्रं सबेरमपि सर्वतः।

ब्रह्मविष्णू ऊचतुः—(विद्ये-सं-१०)

सर्गादिपञ्चकृत्यस्य लक्षणं ब्रूहि नः प्रभो॥

शिवः—

मत्कृत्यबोधनं गुह्यं कृपया प्रब्रवीमि वाम् ।
सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः ॥

पञ्चैव मे जगत्कृत्यं नित्यसिद्धमजाच्युतौ ।
सर्गः संसारसंरम्भस्तत्प्रतिष्ठा स्थितिर्मता ॥

संहारो मर्दनं तस्य तिरोभावस्तदुत्क्रमः ।
तन्मोक्षोऽनुग्रहस्तन्मे कृत्यमेव हि पञ्चकम् ॥

कृत्यमेतद्वहत्यन्यस्तूष्णीं गोपुरबिम्बवत् ।
सर्गादि यच्चतुःकृत्यं संसारपरिजृम्भणम् ॥

पञ्चमं मुक्तिहेतुर्वै नित्यं मयि च सुस्थिरम् ।
तदिदं पञ्चभूतेषु दृश्यते मामकैर्जनैः ॥

सृष्टिर्भूमौ स्थितिस्तोये संहारः पावके तथा ।
तिरोभावोऽनिले तद्वदनुग्रह इहाम्बरे ॥

सृज्यते धरया सर्वमद्भिः सर्वं प्रवर्धते ।
अर्च्यते तेजसा सर्वं वायुना चापनीयते ॥

व्योम्नानुगृह्यते सर्वं ज्ञेयमेवं हि सूरिभिः ।
पञ्चकृत्यमिदं वोढुं ममास्ति मुखपञ्चकम् ॥

चतुर्दिक्षु चतुर्वक्त्रं तन्मध्ये पञ्चमं मुखम् ।
युवाभ्यां तपसा लब्धमेतत्कृत्यद्वयं सुतौ ॥

सृष्टिस्थित्यभिधं भाग्यं मत्तः प्रीतादतिप्रियम् ।
तथा रुद्रमहेशाभ्यामन्यत्कृत्यद्वयं परम् ॥

अनुग्रहाख्यं केनापि लब्धुं नैव हि शक्यते ।
तत्सर्वं पौर्वकं कर्म युवाभ्यां कालविस्मृतम् ॥

न तद्रुद्रमहेशाभ्यां विस्मृतं कर्म तादृशम् ।
रूपे वेषे च कृत्ये च वाहने चासने तथा ॥

आयुधादौ च मत्साम्यमस्माभिस्तत्कृते कृतम् ।
मध्यानविरहाद्वत्सौ मौढ्यं वामेवमागतम् ॥

मज्ज्ञाने सति नैव स्यान्मानं रूपं महेशवत् ।
तस्मान्मज्ज्ञानसिध्यर्थं मन्त्रमोङ्कारनामकम् ॥
इतः परं प्रजपतं मामकं मानभञ्जनम् ।
उपादिशं निजं मन्त्रमोङ्कारमुरुमङ्गलम् ॥
ओङ्कारो मन्मुखाज्जज्ञे प्रथमं मत्प्रबोधकः ।
वाचकोऽयमहं वाच्यो मन्त्रोऽयं हि मदात्मकः ॥
तदनुस्मरणं नित्यं ममानुस्मरणं भवेत् ।
अकार उत्तरमुखादुकारः पश्चिमाननात् ॥
मकारो दक्षिणमुखाद्बिन्दुः प्राङ्मुखततथा ।
नादो मध्यमुखादेवं पञ्चधासौ विजृम्भितः ॥
एकीभूतः पुनस्तद्वदोमित्येकाक्षरो भवेत् ।
नामरूपात्मकं सर्वं [1] देवभूतकुलद्वयम् ॥
व्याप्तमेतेन मन्त्रेण शिवशक्त्योश्च बोधकम् ।
अस्मात्पञ्चाक्षरं जज्ञे बोधकं सकलस्य तत् ॥
अकारादिक्रमेणैव नकारादि यथाक्रमम् ।
अस्मात्पञ्चाक्षराज्जाता मातृकाः पञ्च भेदतः ॥
तस्माच्छिरश्चतुर्वक्त्रात् त्रिपाद्गायत्रिरेव च ।
वेदः सर्वस्ततो जज्ञे ततो वै मन्त्रकोटयः ॥
जज्ञेऽपि प्रणवे मन्त्रे जज्ञा वै मन्त्रकोटयः ।
तत्तन्मत्रेण तत्सिद्धिस्तत्तत्सिद्धिरितो भवेत् ॥
अनेन मन्त्रकन्देन भोगो मोक्षश्च सिध्यति ।
सकला मन्त्रराजानः साक्षद्भोगप्रदाः शुभाः ॥

नन्दिकेश्वर उवाच—

पुनस्तयोस्तत्र तिरः पटं गुरुः
प्रकल्य मन्त्रं च समादिशत्परम् ।
निधाय तच्छीर्ष्णि कराम्बुजं शनै-
रुदङ्मुखं संस्थितयोः सहाम्बिकः ॥

---

[1] वेदभूतकुलद्वयम्—पा.

त्रिरुच्चार्यागृहीन्मन्त्रं यन्त्रतन्त्रोक्तिपूर्वकम् ।
शिष्यौ च तौ दक्षिणायामात्मानं च समर्पयत् ॥

प्रबद्धहस्तौ किल तौ तदन्तिके
तमूचतुर्देववरं जगद्गुरुम् ॥

ब्रह्माच्युतौ--

नमो निष्कलरूपाय नमो निष्कलतेजसे ।
नमः सकलनाथाय नमस्ते सकलात्मने ॥

नमः प्रणववाच्याय नमः प्रणवलिङ्गिने ।
नमः सृष्ट्यादिकर्त्रे च नमः पञ्चमुखाय ते ॥

पञ्चब्रह्मस्वरूपाय पञ्चकृत्याय ते नमः ।
आत्मने ब्रह्मणे तुभ्यमनन्तगुणशक्तये ॥

सकलाकलरूपाय शंभवे गुरवे नमः ।
इति स्तुत्वा गुरुं पद्यैर्ब्रह्मा विष्णु श्च नेमतुः ॥

ईश्वर उवाच—

वत्सकौ सर्वतत्त्वं च कथितं दर्शितं च वाम् ।
जपतं प्रणवं मन्त्रं देवीदृष्टं ममात्मकम् ॥

ज्ञानं च सुस्थिरं भाग्यं सर्वं भवति शाश्वतम् ।
आर्द्रायां च चतुर्दश्यां तज्जाप्यं त्वक्षयं भवेत् ॥

सूर्यगत्या महार्द्रायामेकं कोटिगुणं भवेत् ।
मृगशीर्षान्तिमो भागः पुनर्वस्वादिमस्तथा ॥

आर्द्रासमं सदा ज्ञेयं पूजाहोमादितर्पणे ।
दर्शनं तु प्रभाते च प्रातःसङ्गवकालयोः ॥

चतुर्दशी तथा ग्राह्या निशीथव्यापिनी भवेत् ।
प्रदोषव्यापिनी चैव परयुक्ता प्रशस्यते ॥

लिङ्गं बेरं च मे तुल्यं यजतां लिङ्गमुत्तमम् ।
तस्माल्लिङ्गं परं पूज्यं बेरादपि मुमुक्षुभिः ॥

लिङ्गमोङ्कारमात्रेण वेरं पञ्चाक्षरेण तु ।
स्वयमेव हि सद्द्रव्यैः प्रतिष्ठाप्यं परैरपि ॥
पूजयेदुपचारैश्च मत्पदं सुलभं भवेत् ।
इत्याशास्य [1]तथा शिष्यौ तत्रैवान्तर्हितः शिवः ॥

(विद्ये-सं-१७)—श्लो. ३८.

पद्मासनस्थं शिवदं गङ्गाचन्द्रकलान्वितम् ।
वामोरूस्थितशक्त्या च विराजन्तं महागणैः ॥
मृगटङ्कधरं देवं वरदाभयपाणिकम् ।
सदानुग्रहकर्तारं सदाशिवमनुस्मरन् ॥
संपूज्य मनसा पूर्वं हृदि वा सूर्यमण्डले ।
जपेत्पञ्चाक्षरीं विद्यां प्राङ्मुखः शुद्धकर्मकृत् ॥
प्रातः कृष्णचतुर्दश्यां नित्यकर्म समाप्य च ।
मनोरम्ये शुचौ देशे नियतः शुद्धमानसः ॥
पञ्चाक्षरस्य मन्त्रस्य सहस्रं द्वादशं जपेत् ।
वरयेच्च सपत्नीकान् शैवान् वै ब्राह्मणोत्तमान् ॥
एकं गुरुवरं शिष्टं वरयेत्साम्बमूर्तिकम् ।
ईशानं चाथ पुरुषमघोरं वाममेव च ॥
सद्योजातं च पञ्चैव शिवभक्तान् द्विजोत्तमान् ।
पूजाद्रव्याणि संपाद्य शिवपूजां समारभेत् ॥
शिवपूजां च विधिवत्कृत्वा होमं समारभेत् ।
मुखान्तं च स्वसूत्रेण कृत्वा होमं समाचरेत् ॥
दशैकं वा शतैकं वा सहस्रैकमथापि वा ।
कापिलेन घृतेनैव जुहुयात्स्वयमेव हि ॥
[2](गव्येन केवलेनापि वृद्धवत्सान्वितेन हि ।)
कारयेच्छिवभक्तैर्वाप्यष्टोत्तरशतं बुधः ॥
होमान्ते दक्षिणा देया गुरोर्गोमिथुनं तथा ।
ईशानादि[3]स्वरूपं तु गुरुं साम्बं विभाव्य च ॥

[1] तदा. [2] पुराणे न दृश्यते. [3] स्वरूपांस्तान् गुरुं.

तेषां पत्सिक्ततोयेन स्वशिरस्स्नानमाचरेत् ।
षट्त्रिंशत्कोटितीर्थेषु सद्यः स्नानफलं भवेत् ॥

दशाङ्गमन्नं तेषां च दद्याद्वै भक्तिपूर्वकम् ।
पराबुध्या गुरोः पत्नीमीशानादिक्रमेण तु ॥

परमान्नेन संपूज्य यथाविभवविस्तरम् ।
[1]रुद्राक्षवस्त्रपूर्वं च वटकापूपकैर्युतम् ॥

[2]बलिदानं ततः कृत्वा भूरिभोजनमाचरेत् ।
ततः संप्रार्थ्य देवेशं जपं तावत्समापयेत् ॥

पुरश्चरणमेवं तु कृत्वा मन्त्री भवेन्नरः ।
पुनश्च पञ्चलक्षेण सर्वापक्षयो भवेत् ॥

अतलादि समारभ्य सत्यलोकावधि क्रमात् ।
पञ्चलक्षजपात्तत्तल्लोकैश्वर्यमवाप्नुयात् ॥

मध्ये मृतश्चेद्भोगान्ते भूमौ तज्जापको भवेत् ।
[3](पुनश्च पञ्चलक्षेण ब्रह्मसामीप्यमाप्नुयात्)
पुनश्च पञ्चलक्षेण सारूप्यैश्वर्यमाप्नुयात् ॥

आहत्य शतलक्षेण [4]साक्षाद्ब्रह्मसमो भवेत् ।
कार्यब्रह्मण एवं हि [5]सायुज्यं प्रतिपद्य वै ॥

यथेष्टं भोगमाप्नोति तद्ब्रह्मप्रलयावधि ।
पुनः कल्पान्तरे वृत्ते ब्रह्मपुत्रः स जायते ॥

पुनश्च तपसा दीप्तः क्रमान्मुक्तो भविष्यति ।
पृथ्व्यादिकार्यभूतेभ्यो लोका वै निर्मिताः क्रमात् ॥

पातालादि च सत्यान्तं ब्रह्मलोकाश्चतुर्दश ।
सत्यादूर्ध्वं क्षमान्तं वै विष्णुलोकाश्चतुर्दश ॥

क्षमालोके कार्यविष्णुर्वैकुण्ठे वरपत्तने ।
कार्यलक्ष्म्या महाभोगी रक्षां कृत्वाधितिष्ठति ॥

---

[1] रुद्राक्षं वस्त्रभूर्तिं च घटाद्युपकरायुतम् । [2] लिङ्गदानं. [3] पुराणपाठः. [4] साक्षाद्ब्रह्मा नरो भवेत्. [5] सारूप्यं प्रतिपद्यते.

तदूर्ध्वगाश्च शुच्यन्ता लोकाष्टाविंश(तिः) काः स्थिताः।
शुचौ लोके तु कैलासे रुद्रो वै भूतहृत्स्थितः॥

षड्त्तराश्च पञ्चाशदहिंसान्तास्तदूर्ध्वगाः।
अहिंसालोकमास्थाय ज्ञानकैलासके पुरे॥

कार्येश्वरस्तिरोभावं सर्वान् कृत्वाधितिष्ठति।
तदन्ते कालचक्रं हि कालातीतस्ततः परम्॥

शिवेनाधिष्ठितस्तत्र कालचक्रेश्वराह्वयः।
माहिषं धर्ममास्थाय सर्वान् कालेन युज्यति॥

असत्यश्चाशुचिश्चैव हिंसा चैवाथ निर्घृणा।
असत्यादिचतुष्पादः [1]सर्वशः कामरूपधृक्॥

नास्तिक्यलक्ष्मीर्दुस्सङ्गो वेदबाह्यध्वनिः सदा।
क्रोधसङ्गः कृष्णवर्णो महामहिषवेषवान्॥

तावन्माहेश्वरः प्रोक्तस्तिरोधास्तावदेव हि।
तदर्वाक्कर्मभोगो हि तदूर्ध्वं ज्ञानभोगकम्॥

तदर्वाक्कर्ममाया हि ज्ञानमाया तदूर्ध्वकम्।
[2]मा लक्ष्मीः कर्मभोगो वै याति मायेति कथ्यते॥

[3](मा लक्ष्मीर्ज्ञानयोगो वै याति मायेति कथ्यते)

तदूर्ध्वं नित्यभोगो हि तदर्वाङ्नश्वरं विदुः।
तदर्वाक् च तिरोधानं तदूर्ध्वं न तिरोधनम्॥

तदर्वाक् पाशबन्धो हि तदूर्ध्वं न हि बन्धनम्।
तदर्वाक् परिवर्तन्ते काम्यकर्मानुसारिणः॥

निष्कामकर्मभोगस्तु तदूर्ध्वं परिकीर्तितः।
तदर्वाक् परिवर्तन्ते [4]बिन्दुपूजापरायणाः॥

तदूर्ध्वं हि व्रजन्त्येव निष्कामा लिङ्गपूजकाः।
तदर्वाक् परिवर्तन्ते [5] शिवान्यसुरपूजकाः॥

---

[1] सर्वांशः. [2] महालक्ष्मीं कर्मयोगं याति मायेति कथ्यते. [3] पुराणपाठः. [4] बिम्बपूजा. [5] जीवदेवान्यपूजकाः.

[1](शिवैकनिरता ये च तदूर्ध्वं संप्रयान्ति ते।
तदर्वाग्जीवकोटिः स्यात्तदूर्ध्वं परकोटिका।
सांसारिकास्तदर्वाक्च मुक्ताः खलु तदूर्ध्वगाः।
तदर्वाक्परिवर्तन्ते प्राकृतद्रव्यपूजकाः॥)
तदूर्ध्वं हि व्रजन्त्येते पौरुषद्रव्यपूजकाः।
तदर्वाक्च्छक्तिलिङ्गं तु शिवलिङ्गं तदूर्ध्वकम्॥
तदर्वागावृतं लिङ्गं तदूर्ध्वं हि निरावृति।
तदर्वाक्कल्पितं लिङ्गं तदूर्ध्वं नैव कल्पितम्॥
[2]तदर्वाग्बाह्यलिङ्गं स्यादन्तरङ्गं तदूर्ध्वकम्।
तदर्वाक्छक्तिलोका हि शतं वै द्वादशाधिकम्॥
तदर्वाग्बिन्दुरूपं हि नादरूपं तदुत्तरम्।
तदवाक्कर्मलोकस्तु तदूर्ध्वं ज्ञानलोककः॥
नमस्कारस्तदूर्ध्वं हि मदाहङ्कारशासनः।
[3]यन्निजं वै तिरोधानं नान्विष्य ध्यायते इति॥
ज्ञानशब्दार्थ एवं हि तिरोधाननिवारणात्।
तदर्वाक् परिवर्तन्ते ह्याधिभौतिकपूजकाः॥
आध्यात्मिकार्चका एव तदूर्ध्वं सम्प्रयान्ति वै।
तावद्वै वेदिभागं तन्महालोकात्मलिङ्गके॥
प्रकृत्याद्यष्टबन्धोऽपि वेद्यन्ते संप्रतिष्ठितः।
एवमेतादृशं ज्ञेयं सर्वं लौकिकवैदिकम्॥
अधर्ममहिषारूढं कालचक्रं तरन्ति ते।
सत्यादिधर्मयुक्ता ये शिवपूजापराश्च ये॥
[4](कारयन्ति तिरोधानं द्वादशान्तस्थिताः सदा।
तदूर्ध्वं शिवलोकं हि शतं वै द्वादशाधिकम्॥)
तदूर्ध्वं वृषभो धर्मो ब्रह्मचर्यस्वरूपधृक्।
सत्यादिपादयुक्तस्तु शिवलोकाग्रतः स्थितः॥

---

[1] पुराणपाठः [2] तदर्वाग्बहिरङ्गं हि अन्त. [3] जनिजं वै तिरोधानं नानिषिध्यातते इति, पुराणे. [4] पुराणे नास्ति.

क्षमाशृङ्गश्शमश्शोत्रो वेद[1]ध्वनिविभूषितः ।
आस्तिक्यचक्षुर्विश्वासगुरुबुद्धिमना वृषः ॥

क्रियादिवृषभा ज्ञेयाः कारणादिषु सर्वदा ।
तं क्रियावृषभं धर्मं कालातीतोऽधितिष्ठति ॥

ब्रह्मविष्णुमहेशानां स्वस्वायुर्दिनमुच्यते ।
तदूर्ध्वं न दिनं रात्रिर्न जन्ममरणादिकम् ॥

पुनः कारणसत्यान्ताः कारणब्रह्मणस्तथा ।
[2]गन्धादिभ्यस्तु भूतेभ्यस्तदूर्ध्वं निर्मिताः सदा ॥

सूक्ष्मगन्धस्वरूपा हि स्थिता लोकाश्चतुर्दश ।
पुनः कारणविष्णोर्वै स्थिता लोकाश्चतुर्दश ॥

पुनः कारणरुद्रस्य लोकाष्टाविंशका मताः ।
पुनश्च कारणेशस्य षट्पञ्चाशत्तदूर्ध्वगाः ।
ततः परं ब्रह्मचर्यलोकाख्यं शिवसम्मतम् ॥

तत्रैव ज्ञानकैलासे पञ्चावरणसंयुते ।
पञ्चमण्डलसंयुक्तं पञ्चब्रह्मकलान्वितम् ॥

[3](प्रथमावरणे पञ्चमूर्तिकं मण्टपान्वितम् ।)
आदिशक्तिसमायुक्तमादिलिङ्गं तु तत्र वै ॥

शिवालयमिदं प्रोक्तं शिवस्य परमात्मनः ।
परशक्त्या समायुक्तस्तत्रैव परमेश्वरः ॥

सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः ।
पञ्चकृत्यप्रवीणोऽसौ सच्चिदानन्दविग्रहः ॥

ध्यानधर्मः सदा यस्य सदानुग्रहतत्परः ।
[4]समाध्यासनमासीनः स्वात्मारामो विराजते ॥

तस्य सन्दर्शनं साध्यं कर्मध्यानादिभिः क्रमात् ।
[5]नित्यादिकर्मयजनाच्छिवकर्ममतिर्भवेत् ॥

---

[1] ध्वजवि. [2] गन्धादिसूक्ष्मभूतेभ्यस्तदूर्ध्वंनिर्मितेः सदा. [3] पुराणे नास्ति.
[4] सदाध्यानसमासीनः. [5] नित्यादिदेवयज.

क्रियादिशिवकर्मभ्यः शिवज्ञानं प्रसाधयेत् ।
तद्दर्शनगताः सर्वे मुक्ता एव न संशयः ॥
मुक्तिरात्मस्वरूपेण [1] स्वात्मारामत्वमेव हि ।
[2](क्रियातपोजपज्ञानध्यानधर्मेषु सुस्थितः ।
शिवस्य दर्शनं लब्धा स्वात्मारामत्वमेव हि ॥
यथा रविः स्वकिरणादशुद्धिमपनेष्यति ।
कृपाविचक्षणः शम्भुरज्ञानमपनेष्यति ॥
अज्ञानविनिवृत्तौ तु शिवज्ञानं प्रवर्तते ।
शिवज्ञानात्स्वस्वरूपमात्मारामत्वमेष्यति ॥
आत्मारामत्वसंसिद्धौ कृतकृत्यो भवेन्नरः ।
पुनश्च शतलक्षेण ब्रह्मणः पदमाप्नुयात् ॥
पुनश्च शतलक्षेण विष्णोः पदमवाप्नुयात् ।)
पुनश्च शतलक्षेण रुद्रस्य पदमाप्नुयात् ॥
पुनश्च शतलक्षेण ऐश्वर्यपदमाप्नुयात् ।
पुनश्चैवंविधेनैव जपेन सुसमाहितः ॥
शिवलोकादिभूतं हि कालचक्रमवाप्नुयात् ।
कालचक्रं पञ्चचक्रमेकैकेन क्रमात्तरेत् ॥
सृष्टिमोहौ ब्रह्मचक्रं भोगमोहौ तु वैष्णवम् ।
कोपमोहौ रौद्रचक्रं भ्रमणं त्वैश्वरं विदुः ॥
शिवचक्रं ज्ञानमोहौ पञ्चचक्रं विदुर्बुधाः ।
पुनश्च दशकोट्या हि कारणब्रह्मणः पदम् ॥
पुनश्च दशकोट्या हि तत्पदैश्वर्यमाप्नुयात् ।
एवं क्रमेण विष्ण्वादेः पदं लब्धं महौजसः ॥
क्रमेण तत्पदैश्वर्यं लब्ध्वा चैव महात्मनः ।
शतकोटिमनुं जप्त्वा पञ्चाक्षरमतन्द्रितः ॥
शिवलोकमवाप्नोति पञ्चमा[3]वरणाद्बहिः ।
राजसं मण्टपं तत्र [4] नन्दीसंस्थानमुत्तमम् ॥

---

[1] विष्णोः पदमवाप्नुयात्. [2] पुराणपाठः. [3] वरणात्पुनः. [4] नन्दीशस्थान.

तपोरूपश्च वृषभस्तत्रैव परिदृश्यते ।
सद्योजातस्य तत्स्थानं पञ्चमावरणं परम् ॥
वामदेवस्य च स्थानं चतुर्थावरणं पुनः ।
अघोरनिलयं पश्चात्तृतीयावरणं परम् ॥
पुरुषस्यैव साम्बस्य द्वितीयावरणं शुभम् ।
ईशानस्य परस्यैव प्रथमावरणं ततः ॥
ध्यानधर्मस्य च स्थानं पञ्चमं मण्टपं ततः ।
बलिनाथस्य संस्थानं तत्र पूर्णामृतप्रदम् ॥
चतुर्थं मण्टपं पश्चाच्चन्द्रशेखरमूर्तिमत् ।
सोमस्कन्दस्य च स्थानं तृतीयं मण्टपं परम् ॥
द्वितीयं मण्टपं नृत्यमण्टपं प्राहुरास्तिकाः ।
प्रथमं मूलमायायाः स्थानं तत्रैव शोभनम् ॥
ततः परं गर्भगृहं लिङ्गस्थानं शुभं परम् ।
नन्दीसंस्थानतः पश्चान्न विदुः शिववैभवम् ॥
नन्दीश्वरो बहिस्तिष्ठन् पञ्चाक्षरमुपासते ।
एवं गुरुक्रमालुब्धं नन्दीशाच्च मया पुनः ॥
ततः परं स्वसंवेद्यं शिवेनैवानुभावितम् !
शिवस्य कृपया साक्षाच्छिवलोकस्य वैभवम् ॥
[1] (विज्ञातुं शक्यते सर्वैर्नान्यथेत्याहुरास्तिकाः ।)
एवं क्रमेण मुक्ताःस्युर्महात्मानो जितेन्द्रियाः ॥
अन्येषां च क्रमं वक्ष्ये गदतः शृणुतादरात् ।
गुरूपदेशाज्ज्ञाप्यं वै ब्राह्मणानां नमोऽन्तकम् ॥
पञ्चाक्षरं पञ्चलक्षमायुष्यं प्रजपेद्विधिः ॥
स्त्रीत्वापनयनार्थं हि पञ्चलक्षं जपेत्पुनः ।
[2] (ब्राह्मणी च नमःपूर्वं पञ्चाशद्धर्षतः परम् ॥
पौरुषप्राप्तिसिध्यर्थं पञ्चलक्षं जपेत्पुनः ।)
मन्त्रेण पुरुषो भूत्वा क्रमान्मुक्तोऽभवेद्बुधः ।

---

[1] पुराणपाठः. [2] पुराणपाठः.

क्षत्रियः पञ्चलक्षेण क्षत्रत्वमपनेष्यति ।
पुनश्च पञ्चलक्षेण क्षत्रियो ब्राह्मणो भवेत् ॥
मन्त्र[1]सिद्धिर्जपाच्चैव क्रमान्मुक्तो भवेन्नरः ॥
वैश्यस्तु पञ्चलक्षेण वैश्यत्वमपनेष्यति ॥
पुनश्च पञ्चलक्षेण मन्त्रक्षत्रिय उच्यते ।
पुनश्च पञ्चलक्षेण क्षत्रत्वमपनेष्यति ॥
पुनश्च पञ्चलक्षेण मन्त्रब्राह्मण उच्यते ।
शूद्रश्चैवं नमोऽन्तेन पञ्चविंशतिलक्षतः ॥
मन्त्रविप्रत्वमापद्य पश्चाच्छुद्धो भवेद्द्विजः ।
नारी वाथ नरो वाथ ब्राह्मणो वान्य एव वा ॥
नमोऽन्तं वा नमःपूर्वमातुरः सर्वदा जपेत् ।
तत्र स्त्रीणां तथैवोह्य गुरुर्निर्दर्शयेत् क्रमात् ॥
साधकः पञ्चलक्षान्ते शिवप्रीत्यर्थमेव हि ।
महाभिषेकनैवेद्यं कृत्वा भक्तांश्च पूजयेत् ॥
पूजया शिवभक्तस्य शिवः प्रीततरो भवेत् ।
शिवस्य शिवभक्तस्य भेदो नास्ति शिवो हि सः ॥
शिवस्वरूपमन्त्रस्य धारणाच्छिव एव हि ।
[2]शिवभक्तः शरीरं हि शिवलिङ्गं शिवो भवेत् ॥
शिवभक्तप्रियाः सर्वा वेदाः सर्वक्रिया विदुः ।
यावद्यावच्छिवमन्त्रं येन जप्तं भवेत् क्रमात् ॥
तावद्वै शिवसान्निध्यं तस्मिन् देहे न संशयः ।
देवीलिङ्गं भवेद्रूपं शिवभक्तः स्त्रियस्तथा ॥
यावन्मन्त्रं जपेद्देव्यास्तावत्सान्निध्यमस्ति हि ।
शिवं संपूजयेद्धीमान् स्वयं वै शक्तिरूपभाक् ॥
स्वयं चैव शिवो भूत्वा परां शक्तिं प्रपूजयेत् ।
शक्तिं बेरं च लिङ्गं च हृल्लेखया मायया यजेत् ॥

---

[1] सिद्धित्रयेणैव. [2] शिवभक्तशरीरे हि शिवे तत्परमो भवेत् । शिवभक्ताः क्रियाः सर्वा वेदसर्वक्रियां विदुः ॥ पुराणपाठः

शिवलिङ्गं शिवं मत्वा स्वात्मानं शक्ति (रूप) पूर्वकम् ।
शक्तिं लिङ्गं च देवीं च मत्वा स्वं शिवरूपकम् ॥

शिवलिङ्गं नादरूपं बिन्दुरूपं तु शक्तिकम् ।
उपप्रधानभावेन अन्योऽन्यासक्तलिङ्गकम् ॥

पूजयेच्च शिवं शक्तिं स शिवो मूलभावनात् ।
शिवभक्ताञ्छिवमन्त्ररूपकाञ्छिवरूपकान् ॥

षोडशैरुपचारैश्च पूजयेदिष्टमाप्नुयात् ।
पुनः शुश्रूषणाद्यैश्च शिवभक्तस्य लिङ्गिनः ।

आनन्दं जनयेद्विद्वाञ्छिवः प्रीततरो भवेत् ।
शिवभक्तान् सपत्नीकान् पन्त्या सह सदैव तत् ॥

पूजयेद्भोजनाद्यैश्च पञ्च वा दश वा शतम् ।
धने देहे च मन्त्रे च भावनायामवञ्चकः ॥

शिवशक्तिस्वरूपेण न पुनर्जायते भुवि ।

नाभेरधो ब्रह्मभागमाकण्ठं विष्णुभागकम् ॥

मुखं लिङ्गमिति प्रोक्तं शिवभक्तशरीरकम् ।
[1] मृतान्दाहादियुक्तान् वा दाहादिरहितान् मृतान् ।

उद्दिश्य पूजयेदादिपितरं शिवमेव हि ।
पूजां कृत्वादिमातुश्च शिवभक्तांश्च पूजयेत् ॥

पितृलोकं समासाद्य क्रमान्मुक्तो भवेन्मृतः ।
क्रियायुक्तदशभ्यश्च तपोयुक्तो विशिष्यते ॥

[2](तपोयुक्तशतेभ्यश्च जपयुक्तो विशिष्यते ।
जपयुक्तसहस्रेभ्यः शिवज्ञानी विशिष्यते ॥

शिवज्ञानिषु लक्षेषु ध्यानयुक्तो विशिष्यते ।
ध्यानयुक्तेषु कोटिभ्यः समधिस्थो विशिष्यते ।)

उत्तरोत्तरवैशिष्ट्यात् पूजायामुत्तरोत्तरम् ।
फलं वैशिष्ट्यरूपं च दुर्विज्ञेयं मनीषीभिः ॥

---

[1] मन्त्रदाहादि. [2] पुराणपाठः.

तस्माद्वै शिवभक्तस्य माहात्म्यं वेत्ति को नरः ।
शिवशक्त्योः पूजनं च शिवभक्तस्य पूजनम् ॥
कुरुते यो नरो भक्त्या स शिवः शिवमेधते ।
इत्येतैर्वचनैरन्यैः पञ्चाक्षरजपः स्वयम् ॥
महालिङ्गस्वरूपी स प्रीयते मुक्तिदायकः ।

ननु महालिङ्गस्यावरणस्थानादिवर्णनात् कथं वा पञ्चाक्षरमन्त्रप्रतिपादितत्वम् । पञ्चाक्षरस्य मन्त्रस्य प्रणवव्यष्टित्वेन प्रणववाच्यपरब्रह्मणः प्रतिपादकत्वमेव युक्तम् । परब्रह्मणो नीरूपत्वनिर्गुणत्वनिराकारत्वप्रतिपादनेन महालिङ्गस्य कारणविशेषस्य लोकविशेषस्य च प्रतिपादनेन पञ्चाक्षरप्रतिपाद्यत्वं नेति पूर्वपक्षः । सिद्धान्तस्तु नीरूपस्यैवाकारविशेषवतः साधकानुग्रहार्थं स्वीकर्तव्यत्वेन निर्गुणस्य ध्यानानर्हत्वेनारूढप्राप्यस्य निर्गुणस्योपासनानर्हत्वेनारुरुक्षुतावस्थायां सगुणोपासनस्य विधानात्सगुणनिर्गुणोभयसाधारण्येन प्रणवविशिष्टषडक्षर्या एव तारत्वेन सगुणनिर्गुणोभयसाधारण्येन संसारदावानलपरितप्तानां पाशविच्छेदार्थं षडक्षर्यास्तारकत्ववर्णनात् 'सगुणेऽन्यत्, निर्गुणेऽन्यदि'ति वैयधिकरण्येन तारकत्वानौचित्यात् । निर्गुणोपासनायामशक्तोऽपि सगुणोपासनावसरे नित्यप्राप्तायाः प्रणवविशिष्टपञ्चाक्षर्या एव वाचकत्वेन सगुणब्रह्मानुशील्योपासनां कुर्यात् । एवं निर्गुणोपासनाशक्तोऽपि प्रणवविशिष्टपञ्चाक्षर्या एव वाच्यत्वेन निर्गुणोपासनं कुर्यात् ॥

यत्तु सगुणोपासनायां पञ्चाक्षर्याः षडक्षर्या एव वा वाच्यवाचकयोरभेदोपासना, निर्गुणोपासनायां प्रणवमात्रस्य वाच्यवाचकयोरभेदोपासनेति, तदेतदविचाररमणीयम् । सगुणनिर्गुणयोर्भेदाभावात् । साधकानुग्रहार्थमाविर्भूतशक्तेः परमेश्वरस्योभयत्र साधारण्येन षडक्षर्यास्तारकत्वमिति महालिङ्गस्य परब्रह्मण एवोपासनं युक्तमिति सिद्धान्तः ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठशिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारे महालिङ्गलक्षणं नामैकविंशोपदेशः

अथ द्वाविंशोपदेशः

उच्यते शक्तिवैशिष्ट्यं द्वाविंशे सप्रमाणकम्।
उमासहायमित्यादि श्रुतिभिः समुदीरितम्॥
शंभुराकाशमध्ये च श्रुतिवर्ण्यः शिवः प्रभुः।

तात्पर्यसङ्ग्रहे—

यामामनन्ति तव शङ्कर धर्मदारा-
नध्वर्यवः सहजसिद्धतया स्वसारम्।
आथर्वणा यदुपसृष्टतया भवन्तं
ध्यातव्यमाहुरपहाय पितामहादीन्॥
एकः श्रुतोऽपि परमेश्वर साद्वितीयं
मन्त्रा[1] मया व्यपदिशन्ति पुनः पुनस्त्वाम्।
तस्याः प्रभावमतिवाङ्मनसं शिवायाः
कात्स्न्र्येन वक्तुमनलं कमलासनोऽपि॥
इत्यादिवचनैरन्यैः शिवशक्त्योश्च वर्णनात्।
द्वौ पदार्थाविति प्राप्ते तयोरैक्यं प्रतीयते॥
अथ शक्तेश्च बहवो भेदास्ते चोपवर्णिताः।
क्वचिच्छक्तिपुराणादौ जगतां ललिता परा॥
दुर्गा क्वचित् क्वचित् काली क्वचिदन्येति शक्तयः।
एकैव परमा शक्तिस्तद्भेदाः सर्वशक्तयः॥
शक्ते रूपद्वयं पुंस्त्वं स्त्रीत्वं चैव प्रमाणतः।
पुंरूपं विष्णुरूपं स्याच्छक्तिरूपमनेकधा॥
वर्णितस्त्वय[2]मेकार्थो वेदवेदार्थकोविदैः।
एकैव शक्तिः परमेश्वरस्य
भिन्ना चतुर्धा विनियोगकाले।
भोगे भवानी पुरुषेषु विष्णुः
कार्येषु काली समरेषु दुर्गा॥

---

[1] यथाप्युपदिशन्ति. [2] मेवार्थो.

साक्षाच्चिच्छक्तिरूपा तु पुष्पगन्धवदुज्वला ।
द्वौ भेदौ तत्र चिच्छक्तेरुमानारायणात्मकौ ॥

स्फुटं कूर्मपुराणेषु शिवेनैवोपवर्णितम् ।
प्रणम्य प्रार्थितो देवस्त्रीभिर्दारु[1]वनेश्वरम् ॥

दृष्ट्वा सिंहासनासीनं देव्या नारायणेन च ।
प्रणम्य देवमीशानं पृष्टवत्यो वराङ्गनाः ॥

कस्त्वं विभ्राजसे कान्त्या केयं बाला रविप्रभा ।
कोन्वयं भाति पुरुषः पङ्कजायतलोचनः ॥

इति पृष्टो देवताभिः प्रत्यभाषत शङ्करः ।
अयं नारायणो गौरी जगन्माता सनातनी ॥

विभज्याहं स्थितो देवः स्वात्मानं परमेश्वरः ।
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ॥

एकोऽहं वेद विश्वात्मा भवानी विष्णुरेव च ।
अहं हि निष्क्रियो धाता केवलो निष्परिग्रहः ॥

मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ।
कूटस्थो ह्यक्षरो व्यापी योगी नारायणोऽद्वयः ॥

तारकः पुरुषो ह्यात्मा केवलः परमं पदम् ।
सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना ॥

शान्ता सत्या परानन्दा परमं पदमव्ययम् ।
इत्यादिवचनैर्विष्णोः शक्त्यंशत्वं प्रतीयते ॥

तस्याः शक्तेः शिवस्यापि परस्परमभिन्नता ।
परमं पदमित्युक्त्या स्फुटीकृतमभूत्पुनः ॥

कथितं विष्णुरूपस्य पारम्पर्येण चाभिधा ।
परमं पदमित्येवमेकत्वं न नियामकम् ॥

द्वित्वं [2]न श्रूयते यस्माद्भेदश्चापि भवेद्धरेः ।
शक्त्यन्तर्भाव एवास्य विष्णो[3]रित्येव वर्णितम् ॥

---

[1] वने स्वयम्. [2] श्रूयेत यदि चेदभिधापि भवेद्धरेः-पा. [3] रित्युपवर्णितं.

शक्त्यंशविष्णोरंशास्ते रामकृष्णादयोऽखिलाः ।
अयं पौराणिकः पक्षः श्रुतिपक्षस्तु वर्ण्यते ॥

"आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतम्" इति परमाकाशशब्दितपराशक्तेर्नामरूपवदभेदवर्णनात्। विष्णोः श्रुत्या शक्त्यंशताया अनुपवर्णनात् शब्दार्थयोः परस्परा-भेदभावना शक्तेराकाशशब्दिताया एव। विष्णोर्जीवकोटित्वमेव। तस्योत्पत्तेः प्रसिद्धत्वात्। अत एव यजुरादिकाण्डे 'एक एव रुद्रो न द्वितीयाय तस्थे आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्रभागः। सह स्वस्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजं अथो अस्मभ्यं भेषजं सुभेषजम्'। अस्यायमर्थः—एक एव रुद्र इति। संसार-दावानलपरीतापपरिश्रान्तपशुपाशरूपरोगद्रावकः। शिव एवेत्येवकारार्थः शङ्खः पाण्डर एवेतिवदन्ययोगव्यवच्छेदाच्छङ्खे वर्णान्तरनिषेधात् पीतादिज्ञानस्य काचकामिलादिदोषरूषितत्ववत् प्रकृतमन्त्रेऽपि रोगद्रावकत्वं शिवस्यैवेत्येतावन्मात्रेणापि शिवेतरस्य पाशच्छेत्तृत्वनिषेधस्य शिवलिङ्गेतरस्य पाशच्छेदभ्रमस्य दोष-दूषितबुध्या जन्मान्तरोपार्जितदुष्कृतनिकरविघ्नस्यैव हेतुत्वस्य च संभवे पुनः श्रुतावेक इत्येकत्वसङ्ख्यायाः पुनरपि सन्देहेन विधानाच्छिवलिङ्गेतरपदार्थस्य ब्रह्मकोटित्वं नास्त्येवेति सिद्धम्। स्पष्टश्चायमग्रे प्रतिपादितोर्थः आखुरित्यादिना न द्वितीयाय तस्थ इति शिवलिङ्गेतरपदार्थस्य शिवसदृशस्य शिवान्यूनस्य वा पाशच्छेदकस्य सत्वं निषिध्यते। द्वितीय इति वक्तव्ये द्वितीयायेति निर्देशश्छान्दसः। तिष्ठतीति वक्तव्ये तस्थ इति भूतार्थनिर्देशो भूतभविष्यत्कालावच्छेदेनेतरावस्थाननिरासार्थः। आसमन्तात् खनति विदारयतीत्याखुः आदिवाराहरूपो विष्णुः ते पशुः सकलजडाजडप्रपञ्चपाशविमोचकस्य पशुपतेस्तव संबन्धी पशुः पाशरूपेण जननमरणयोनिजत्वजायापहरणादिना दुःखजातेनोपबद्धः। पशुरित्यनेन आदिविष्णोर्जीवकोटित्वं शिवभजनरूपलिङ्गप्रतिष्ठापनलिङ्गधारण विभूतिधारणरुद्राक्षधारणपञ्चाक्षरजपैरासादितभक्तिविशेषेण मुक्तत्वं च वर्णितं भवति। अनेन शिवशक्त्यपेक्षया भिन्नत्वं जीवकोटित्वं स्पष्टमेव। तं जुषस्वेति च तादृशागणित-

गुणगणरत्नरत्नाकरस्त्वं पशुं [1]पशुपुरोडाशरीत्या गृह्णाणेति जुषी प्रीतिसेवनयोरिति धातोरवगम्यते। एष ते रुद्रभागः सकलाध्यात्मिकाधिभौतिकाधिदैविकसंसारदुःखच्छेत्तृत्ववतस्ते तव एष भाग हविर्भागः। तं जुषस्वेत्यनेनैव सिद्धे पुनरेष ते रुद्रभाग इति हविर्भागस्य शिवलिङ्गसंबन्धित्वप्रतिपादनादुक्तरूपेण क्रत्वधीश्वरत्वं शिवस्यैव। अन्येषां तद्गन्धोऽपि नास्तीत्यष्टमूर्त्यन्तर्गतयजमानमूर्तिरूपस्य यज्ञाद्यनुष्ठानात् प्रतिपादितः। स च यज्ञादिर्वीरशैवानामन्तर्यागः शिवलिङ्गपूजादिकं केवलवैदिकानामग्निष्टोमाद्यनुष्ठानमित्यवश्यं इष्ट्वा यथायोगं शिवप्रीतिः संपादनीया। तया चित्तशुद्धिद्वारा शिवज्ञानादेव मुक्तिरिति ह्युपवर्णितम्॥

ननु धर्मधर्मिणोः शिवशक्त्योर्मध्ये धर्मिणः शिवस्यैव क्रत्वधीश्वरत्वादिपरब्रह्मलक्षणं न शिवशक्तेरित्यत आह- सह स्वस्रा अम्बिकया तं जुषस्वेत्यन्तेन वाक्येन। अम्बिकया सकलजगदण्डपिण्डप्रसवित्र्या 'अम्बा माताथ बाला स्यात्' इति कोशात्। आविर्भूतशक्तेरपगतकोरकभावकुसुमादेव गन्धोपलब्धेर्वायुसंपर्काद्विसृतावयवात् पुष्पगन्धवदंशा निस्सरन्ति तद्वदिति शैवशक्तेरेव सकलजगण्डपिण्डप्रसवः प्रतिपादितो भवति। अत एव मातृवदाविर्भूता चिच्छक्तिः सकलपाशच्छेददक्षा, मातुः स्वोदरसंभवतनुजेषु[2] वात्सल्येन पोषणस्य दर्शनादिति भावः। एतदुक्तं भवति—पाशविच्छेदिकां साक्षान्निरूढां स्वगुणैर्भृशमिति कूर्मपुराणोपबृंहितश्वेताश्वतरोपनिषदि किं कारणं ब्रह्म कुतः स्म जाता इति प्रश्नानुगुण्येन शक्तेरेव पाशविच्छेदवर्णनाद्बालकानां मातृरक्षणात्कार्श्यवत्केवलब्रह्मवादिनः क्षरन्तीति व्यज्यते॥

ननु शिवः शक्तिरिति द्वयोः प्रपञ्चमातापित्रोः प्रतिपादनात् 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्यनुगृहीताद्वैतव्याकोप इत्यत्राह—स्वस्रेति। स्वसृत्वं सहजसिद्धत्वं पट्टमहिषीरूपम्। "एक एव रुद्र" इति संसृतिरोगनिवर्तकस्यैकत्वप्रतिपादनपुरस्सरमेवकारेणान्यस्या द्वित्वसङ्कथाया उपक्रमे प्रतिपादनात्। अत एव

---

[1] पशुपुरोडाशं प्रीत्या. [2] तनयेषु.

सुदर्शनाचार्यैरपि "सहजसिद्धतया स्वसारम्" इत्युपवर्णितम्-तथा च 'सह स्वस्राम्बिकया तं जुषस्व' इति ऋत्वधीश्वरत्वस्य ब्रह्मलक्षणस्योभयात्मकस्य जगत्कारणत्वप्रतिपादनाद्विशिष्टाद्वैतमेव प्रतिष्ठितं भवति। गवे वृषभेश्वराय। कीदृशस्येत्यत आह—अश्वायेति। अश्वानां वाहनत्वेन प्रसिद्धेः वाहनत्वेन परिगृहीतस्येत्यर्थः। पुरुषायेति नन्दिविशेषणम्। पुरुषाय पुरुषाकाराय, नन्दीश्वरनाम्नो वृषभेश्वरस्य गोरूपं नन्दीश्वरनाम्ना पुरुषरूपं चेत्युभयं वर्णितम्। भेषजं सेव्यम्। गणेषु प्रसिद्धनन्दीश्वरस्योपादानात्सगणस्य हविर्भागप्रतिपादनाद्यागे ये ये हविर्भुजस्ते सर्वे शिवप्रसादेनैव हविर्भागस्वीकारिण इति शिवाधीनत्वमपि व्यज्यते। (सेव्यमिति वक्तव्ये भेषजमिति प्रयोगाद्भवपाशरूपविषदष्टानां पाशरूपविषनिवारकत्ववर्णनाद्वैद्यनाथः शिव इति व्यज्यते।) अथो एतादृग्वैभवशालित्वात्। अस्मभ्यं पत्नीपुत्रमित्रकलत्रशिष्यप्रशिष्यविशिष्टेभ्यः। बहुवचननिर्देशादयमर्थः। सुभेषजं अत्यन्तमुत्तरोत्तरं लोकोत्तरं संजीवनौषधं अनेनैव प्रतिपादितं भवति। यथा रोगनिदानज्ञेन रोगाद्यनुगुणौषधदानेन रोगनिवृत्तिर्विपरीतौषधदानेन रोगाभिवृद्धया मरणवद्गमनागमनरूपजननमरणपथिपथिकतामासाद्य परिश्रान्तचित्तानां संसृतिरोगनिवृत्तिस्तत्त्वज्ञैश्शिवशक्त्यात्मकविशिष्टब्रह्मोपासनेन मुक्तिः संसाररूपरोगप्रतीकारानभिज्ञानां देवतान्तरभजनरूपेण शिवस्य केवलभजनरूपेण वा संसारभेषजत्वेनाभिमतविपरीतौषधप्राशनाद्रोगान्तररूपशिवद्रोहमासाद्य कुम्भीपाकरौरवादिनरकयातनाः स्वात्महितमजानन्तः पुनः पुनरधोगतिमेष्यन्ति। तत्र तेषां दुरदृष्टमेव कारणमिति गौतमादिमुनिशापा अनुसन्धेयाः। नामरूपवच्छब्दार्थवत्पुष्पगन्धवदित्याद्यनेकोपमानसद्भावादिति संक्षेपः॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठशिवाचार्यकृते क्रियासारे निगमागमसारसंग्रहे शक्तिवैशिष्ट्यं नाम द्वाविंशोपदेशः समाप्तः

अथ त्रयोविंशोपदेशः

त्रयोविंशे गोलकादिस्खलनादिनिरूपणम् ।
क्रियते वीरशैवानां संप्रदायानुसारतः ॥
आगमार्थानुसारेण न्यायमार्गानुसारतः ।
दीक्षितानां दैवयोगादन्तराये समागते ॥
अवैकल्यं समारब्धयावज्जीवव्रतस्य तु ।
मन्त्रदीक्षादिसंस्कारैः शक्तिपातपुरस्सरम् ॥
संस्कृत्य गुरुणा दत्तं लिङ्गं समरसात्मना ।
[1] तस्मिन् दृष्टे विकलने पीठलिङ्गाष्टबन्धकैः ॥
भिन्ने चोद्गलिते चापि कर्तव्यार्थो विचार्यताम् ।
आगमेषु श्रूयते च निजप्राणसमर्पणम् ॥
नैतद्युक्तिसहं प्राणत्यागस्य प्रतिषेधतः ।
असुर्या नाम ते लोका अन्धेन तमसावृताः ॥
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ।
इत्यादीनि निषेधानि दृश्यन्ते च परश्शतम् ॥
विधयश्च प्रदृश्यन्ते सर्वतश्चात्मगोपने ।
इति चेच्छ्रूयतां न्यायः प्रमाणान्यपि कोटिशः ॥
शक्तिक्षोभवशादेव शिवे परमकारणे ।
उत्पद्यते बहुविधं जगदेतच्चराचरम् ॥
तत्रैव विलयं याति शिवे परमकारणे ।
एवं स्थिते सद्गुरुणा करुणापूर्णचेतसा ॥
अणुदीक्षादिसमयं चैवमेवोपदिश्यते ।
लिङ्गं साक्षात्परं ब्रह्म पीठं शक्तिः परात्परा ॥
तयोरन्योन्यसंबन्धः सकलीकरणं मतम् ।
इष्टलिङ्गमिदं तस्मात्परं ब्रह्मावधारय ॥

---

[1] तस्मिन्नदृष्टे विरले—**पा.**

अभिव्यक्ता यदा शक्तिर्जगदेतच्चराचरम् ।
न व्यनक्ति यदा शक्तिर्नास्ति चैतच्चराचरम् ॥
तथैवास्मिन्निष्टलिङ्गे पीठे वा शक्तिरूपके ।
नष्टे सति ततः प्राणान् सहसैव समर्पय ॥
याहि तत्रैव विलयं लिङ्गे परमकारणे ।
प्राप्यते परमानन्द इति तत्त्वार्थनिश्चयः ॥
अस्मिन्नर्थे प्रमाणानि दृश्यन्ते सुबहूनि च ।
जन्मनैवेद्यदानेन जन्मार्पणफलं भवेत् ॥
जन्मार्पणाच्छिवः प्रीतः स्वसायुज्यं प्रयच्छति ।
इदं तु जन्मनैवेद्यं शिवस्यैव प्रदापयेत् ॥
[1]योनिलिङ्गस्वरूपेण शिवो जन्मनिरूपकः ।
तस्माज्जन्मनिवृत्त्यर्थं जन्मपूजा शिवस्य हि ॥
बिन्दुनादात्मकं सर्वं जगत् स्थावरजङ्गमम् ।
बिन्दुः शक्तिः शिवो नादः शिवशक्त्यात्मकं जगत् ॥
नादाधारमिदं बिन्दुर्बिन्द्वाधारमिदं जगत् ।
जगदाधारभूतौ हि बिन्दुनादौ व्यवस्थितौ ॥
बिन्दुनादयुतं सर्वं सकलीकरणं [2]भवेत् ।
सकलीकरणाज्जन्म जगत् प्राप्नोत्यसंशयः ॥
बिन्दुनादात्मकं लिङ्गं जगत्कारणमुच्यते ।
बिन्दुर्वेदिः शिवो नादः शिवलिङ्गं तु कथ्यते ॥
तस्माज्जन्मनिवृत्त्यर्थं शिवलिङ्गं प्रपूजयेत् ।
माता देवी बिन्दुरूपा नादरूपः शिवः पिता ॥
पितृभ्यां दत्तमैश्वर्यं यथा भोगाय कल्पते ।
तयोरैश्वर्यलाभार्थं शिवलिङ्गं प्रपूजयेत् ॥
जगत्पित्रोस्तदैश्वर्यं परमानन्दमेव हि ।
परमानन्दलाभार्थं शिवलिङ्गं प्रपूजयेत् ॥

---

[1] योगिलिङ्गस्वरूपेण–पा. [2] जगत्.

सा देवी जगतां माता स शिवो जगतः पिता ।
पित्रोः शुश्रूषुके नित्यं कृपाधिक्यं हि वर्धते ॥

कृपयान्तर्गतैश्वर्यं पूजकस्य ददाति हि ।
तस्मादन्तर्गतानन्दलाभार्थं मुनिपुङ्गवाः ॥

पितृमातृस्वरूपं हि शिवलिङ्गं प्रपूजयेत् ।
अथ पूजत्ययं धातुः प्रसवार्थे हि वर्तते ॥

जगत्प्रसविता देवः स शिवः पुरुषः परः ।
सर्वप्रकृतिरूपं हि महदाद्यमिदं जगत् ॥

[1]गर्भः पुरुषरूपो हि [2] गर्भः प्रकृतिरुच्यते ।
अव्यक्तान्तरधिष्ठानं [3]गर्भः पुरुष एव हि ॥

सुव्यक्तान्तरधिष्ठानं [4] गर्भः प्रकृतिरुच्यते ।
पुरुषस्त्वादिगर्भो हि गर्भवान् पुरुषो यथा ॥

पुरुषात्प्रकृतौ युक्तं प्रथमं जन्म कथ्यते ।
प्रकृतेर्व्यक्ततायां तद्द्वितीयं जन्म कथ्यते ॥

जन्यं जन्तुर्मुहुर्जन्म पुरुषात्प्रतिपद्यते ।
जन्यते भव्यतेऽवश्यं भव्यते जन्म कथ्यते ॥

जीर्यते वर्यते कर्म कालाज्जीव इति स्मृतः ।
जन्यते तन्त्र्यते पाशैर्जन्तुशब्दार्थ एव हि ॥

जन्मपाशनिवृत्त्यर्थं जन्मलिङ्गं प्रपूजयेत् ।
भं बुद्धिं गच्छतीत्यर्थाद्भगः प्रकृतिरुच्यते ॥

प्रकृतेः शब्दमात्राद्यैः प्राकृतेन्द्रियभोजनैः ।
भगस्येदं भोगमिति शब्दार्थो मुख्यकः श्रुतः ॥

मुख्यो भगस्तु प्रकृतिर्भगवान् शिव उच्यते ।
भगवान् भोगदाता हि नान्यो भोगप्रदायकः ॥

भगस्वामी च भगवान् भर्ग इत्युच्यते बुधैः ।
भगेन सहितं लिङ्गं [5](भगं लिङ्गेन संयुतम् ॥

---

[1]–[4] भर्गः. [5] क्वचिन्नास्ति.

इहामुत्र च भोगार्थं नित्यभोगार्थमेव च ।
भगवन्तं महालिङ्गं) शिवलिङ्गं प्रपूजयेत् ॥

लोकप्रसविता सूर्यस्तच्चिह्नप्रसवोद्भवे ।
लिङ्गे प्रसूतिकर्तारं लिङ्गिनं पुरुषं यजेत् ॥

लीनार्थगोचरं चिह्नं लिङ्गमित्यभिधीयते ।
लीनमर्थं हि पुरुषं नित्यं गमयतीत्यतः ॥
शिवशक्त्योस्तु चिह्नस्य मेलनाल्लिङ्गमुच्यते ।
स्वचिह्नपूजनात् प्रीतश्चिह्नकार्यं न युज्यते ॥

चिह्नकार्यं तु जन्मादि जन्माद्यं विनिवर्तते ।
प्रणवध्वनिलिङ्गं तु नादलिङ्गं स्वयंभुवः ॥

बिन्दुलिङ्गं तु यन्त्रं [1] स्याद्यकारं तु प्रतिष्ठितम् ।
उकारं चरलिङ्गं स्यादकारं गुरुविग्रहम् ॥

[2] षलिङ्गे पूजया नित्यं जीवन्मुक्तो न संशयः ।
शिवभक्तस्य पूजा हि जन्ममुक्तिकरी नृणाम् ॥

रुद्राक्षधारणात्पादमर्धं वै भूतिधारणात् ।
[3] त्रिपादं मन्त्रजापाच्च पूजया पूर्णभक्तिमान् ॥

इत्यादीनि प्रमाणानि श्रूयन्ते तत्र तत्र च ।
अविनाभूतचिच्छक्तिस्वेष्टलिङ्गस्य चेत्क्षतिः ॥

पीठे वाप्यथ वा लिङ्गे कुर्यात्प्राणसमर्पणम् ।
शिवशक्त्योरभेदेन लिङ्गपीठस्वरूपयोः ॥

द्वयोरन्यतरस्यापि क्षतौ प्राणान् समर्पयेत् ।
तत्रापि स्थूलसूक्ष्मार्थौ विजानीयात्प्रमाणतः ॥

तिलावरप्रमाणेन लिङ्गवैकल्यदर्शने ।
यवावरप्रमाणेन पीठवैकल्यसंभवे ॥

न कुर्याज्जन्मनैवेद्यमित्येवं वातुलोत्तरे ।
सकलीकरणे नष्टे पुनः कुर्यादमुं विधिम् ॥
इत्येवं श्रूयते तत्र विचार्यं सूक्ष्मदर्शिभिः ॥

---

[1] स्यान्मकारं. [2] षड्लिङ्गं, पलिङ्गे. [3] त्रिपात्तन्मन्त्र.

या परा देवता शक्तिः सैव पीठस्वरूपिणी ।
कारणानां च यो धाता लिङ्गं सर्वेश्वरः शिवः ॥

एकमेव द्वयं वस्तु द्वित्वं वै वादमात्रकम् ।
भेदाभेदप्रकरणे तच्च सम्यक् प्रदर्शितम् ॥

तस्मात्तयोस्तु संबन्धो नित्यसंबन्ध उच्यते ।
सकलीकरणं नित्यसंबन्धस्य निरूपणम् ॥

निरूपकत्वरूपस्य गुणस्य यदि चेत्श्रुतिः ।
कल्प्यते नैव दोषाय पूर्वतन्त्रेषु निश्चितम् ॥

अङ्गगुणविरोधे च तादर्थ्यादिति विस्तरात् ।
लिङ्गमत्र प्रधानं स्यात्तत्र शक्तेर्विशेषतः ॥

समभिव्यक्तिरङ्गस्य गुणस्तत्रोच्यते तयोः ।
संबन्धश्च स्वरूपाख्यः सकलीकरणाह्वयः ॥

अङ्गीयगुणवैकल्ये न प्रधानं विरुध्यते ।
न वाच्यमङ्गनिष्ठस्य गुणस्य सकलीकृतेः ॥

विलये व्यक्तशक्तेश्च शिवे परमकारणे ।
ऐक्ये निरूपिते लिङ्गकैवल्यान्न चराचरम् ॥

जगद्दृश्येत किं त्वत्र ब्रह्ममात्रं विशिष्यते ।
जगतः सत्यता किं तु लिङ्गे परमकारणे ॥

चराचरस्य [1] चित्रस्य प्रपञ्चस्याहितो लयः ।
अनभिव्यक्तिमात्रं स्यान्न स्वरूपविनाशिता ॥

अतः स्वरूपसंबन्धशब्दिता सकलीकृतिः ।
[2]शक्तिःशक्तयङ्गनिष्ठा न स्वरूपेण विनश्यति ॥

तन्त्रं तु जगदुत्पत्तौ शक्तिमात्रं स्फुटीभवेत् ।
सकलीकरणं चापि न तन्त्रं जगतामिदम् ॥

शिवशक्त्यात्मके लिङ्गे पीठे च विकले सति ।
पीठादुद्गलिते लिङ्गे [3] विकले सकलीकृतौ ॥

---

[1] चेत्तस्य. [2] शक्तिशक्तयङ्ग. [3] दिरले.

संभवाज्जगदुत्पत्तेर्नैव प्राणान् समर्पयेत् ।
अतश्च पूर्वतन्त्रेऽपि चैवं सिद्धान्तितं पुनः ॥

दर्भैस्तृणीत हरितैरिति मन्त्रे च दर्भके ।
हरितत्वादिवत्स्वस्मिन् समवैति गुणो यथा ॥

काशिताः पर्यवस्यन्ते यथा संभवदर्थके ।
तद्वत् प्रपञ्चजननं संभवेत्सकलीकृतौ ॥

सोमः पवत इत्यादिमन्त्रे सोमलतादिकम् ।
अग्न्यादिजनकत्वं च समवेतगुणो यथा ॥

प्रकाशितः पर्यवस्येत्तद्वच्च सकलीकृतिः ।
अविद्यमानजगतामुत्पत्तौ कारणं भवेत् ॥

प्रधानलोपकृन्न स्यात्तद्वन्न्यायोऽप्युदीरितः ।
यदात्महत्यादोषाय गोपायेदिति भाषितम् ॥

तत्रोच्यते यथा यज्ञे श्रौते प्राणसमर्पणे ।
तदन्यत्वं निषेधस्य विधेश्चापि विशिष्यते ॥

तद्वदेवात्र सामान्यविशेषपरिकल्पनम् ।
तत्र प्रमाणतः सर्वैरनुध्येयत्वमाहृतम् ॥

तद्वदेव प्रमाणानि शृणुध्वं कामिकादिके ।
देवदेव जगन्नाथ श्रुतानि बहुशो मया ॥

मतानि शिवपूजायां धारणे लिङ्गरूपिणः ।
नानाविधान्तरायेषु कथमुद्धरणं भवेत् ॥

[1] लिङ्गप्रणवतां नाथ भक्तानां निश्चितात्मानाम् ।
श्रोतुमिच्छाम्यशेषेण विस्तरात्कथयस्व मे ॥

शिवः—

शृणु देवि प्रवक्ष्यामि सावधानेन चेतसा ।
मल्लिङ्गधारणाल्लोके मदेकन्यस्तचेतसाम् ॥

---

[1] लिङ्गप्रमाणवन्नाथ,

प्रमादात्प्राणलिङ्गादौ वैकल्यपरिपूरणम् ।
मल्लीनमनसां देवि प्रमादो [1] नहि वास्तवः ॥
मद्गणैर्मम भक्तानां प्रारब्धे पूर्वसञ्चिते ।
आशु नष्टे मयाज्ञप्तैर्मद्रूपप्रतिपत्तये ॥
[2] क्रियायास्तन्त्रवैकल्ये ह्यन्तः प्राणान् समर्पयेत् ।
ये तु नार्हन्ति मद्रूपं तेषां श्रद्धा न जायते ॥
बिन्दुरूपा परा शक्तिर्नादात्माहं सदाशिवः ।
द्वयोरन्योन्यसंबन्धं सकलीकरणं विदुः ॥
प्राणलिङ्गे परं नष्टे मम प्राणान् समर्पयेत् ।
पीठाद्उद्गलिते लिङ्गे सकलीकृत्य पूर्ववत् ॥
धारयेन्मामसन्देहो भावनालब्धलिङ्गवान् ।
पीठे नष्टे लब्धलिङ्गः कुर्यात्प्राणसमर्पणम् ॥
यवावरे लिङ्गभङ्गे स्वयं सामान्यदीक्षितः ।
धारयेल्लिङ्गमन्येषां नैष धर्मः कृतात्मनाम् ।
विशेषदीक्षितो भक्तस्तिलादर्वाक् प्रमाणतः ॥
न्यूने मदात्मके लिङ्गे नार्पयेत् प्राणलिङ्गवान् ।
प्राणानेवं विजानीहि समयं प्राणलिङ्गिनाम् ॥
बहुनात्र किमुक्तेन श्रद्धैका सर्वकारणम् ।
गुरुं मदात्मकं विद्धि मां विद्धि गुरुलिङ्गकम् ॥
विश्वसेद्गुरुवाक्यानि गुरुवाक्यैकतत्परः ।
दीक्षाकाले तथाज्ञप्तस्तथा कुर्यान्न चान्यथा ॥
दिने दिने भक्तिवृद्धिर्गुरौ लिङ्गे च जङ्गमे ।
प्रसादलिङ्गे यस्य स्यात्तं जानीहि मदात्मकम् ॥
आश्रयं श्रेयसां पात्रं कटाक्षाणां मम प्रिये ।
इति प्रमाणतो वीरशैवैः प्राणसमर्पणम् ॥
स्वगुर्वाज्ञानुसारेण समयानुगुणेन च ।
आर्यो दृढमनोवृत्तिः स याति परमं पदम् ॥

---

[1] नैव. [2] क्रियते तत्र वैकल्यमतः,

प्रतिष्ठिते स्वयं व्यक्ते नष्टे च सकलीकृतौ ।
अष्टबन्धविधौ तन्त्रे कलासङ्कोचदर्शनात् ॥

पुनः कलाभिषेकाच्च लिङ्गे सान्निध्यमुच्यते ।
तद्वच्च गुरुणा दीक्षासमये स्वेष्टलिङ्गके ॥

कृतं च शिवसान्निध्यं गच्छतीति न भावयेत् ।
गुरुणा शिवरूपेण सान्निध्यं यत् कृतं महत् ॥

तन्न मुञ्चति तल्लिङ्गं यद्दत्तं गुरुणा पुनः ।
यदि लिङ्गे च पीठे वा वैकल्यं परिदृश्यते ॥

निवर्तते तत्सान्निध्यं प्रमाणान्यत्र चागामाः ।
प्रतिष्ठिते स्वयं व्यक्ते पुनरप्यभिषेचनम् ॥

आगमेषु शिवेनोक्तं तस्मात्तत्र निवर्तते ।
प्रकृते वीरशैवेषु महेशान्नोपवर्णितम् ॥

इति सङ्गृहतः प्रोक्तं गोलकस्खलनादिके ।
अवैकल्यं प्रमाणेभ्यो न्यायतश्च समीरितम् ॥

वीरत्वमत एवैषां प्राणार्पणयतात्मनाम् ।
किमन्येन बहूक्तेन भक्तिरेवात्र कारणम् ॥

विष्णुर्नेत्रार्पणं भक्त्या कृत्वा शिवपदाम्बुजे ।
स्वाङ्गैकदेशवैकल्यपरिपूर्तिपुरस्सरम् ॥

लब्धवानायुधं दिव्यं सुदर्शनसमाह्वयम् ।
रावणाद्या राक्षसाश्च निजगात्रासृगुक्षणम् ॥

कृत्वा महत् फलं प्राप्ताः स्वयं दत्ताभिलाषिणः ।
किमु वक्तव्यमत्रास्ति निस्पृहाहितमानसैः ॥

वीरशैवैरर्पितेऽस्मिन्निजप्राणसमर्पणे ।
पितृहत्यादिदोषोऽपि गुणतां याति मुक्तये ॥

शिवैकनिष्ठभावानां भक्तानां महतां पुनः ।
बुद्धिपूर्वं निजप्राणानर्पयन्ति गतस्पृहाः ।

शिवैकशरणास्तेषां किमसाध्यं जगत्त्रये ।
ते धन्यास्ते कुलीनाश्च कृतकृत्यास्त एव हि ॥

करस्थमुक्तयस्ते वै शिवलीलार्थमूर्तयः ।
संवसेत् सह तैरेव पूज्यास्ते सर्वदा नरैः ॥
तैरेव सह भाषेत तानेव शरणं व्रजेत् ।
[1]तृणीकृत्य ब्रह्मविष्णुदेवान् देवस्य किङ्करान् ॥

इति श्रीमद्विशिष्टाद्वैतरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठशिवाचार्यकृते
निगमागमसारसङ्गृहे क्रियासारे त्रयोविंशोपदेशः ।

अथ चतुर्विंशोपदेशः

चतुर्विंशोपदेशेऽस्मिन् षट्स्थ[2]लानि तु वर्णये ।
स्थलं स्थितिलयाधारं लिङ्गं ब्रह्मेति कीर्तितम् ॥
अङ्गादिषु स्थलत्वोक्तिर्गौणमित्युपवर्णितम् ।
[3]अङ्गादिषु स्थलत्वोक्तिः प्रशंसार्थं प्रकीर्तिता ॥
यथा मन्त्रिणि राजत्वबुद्धिः प्राशस्त्यदायिनी ।
स्थलत्वोक्तिर्ब्रह्मभावस्फुरणार्थमुदीरिता ॥
षट्स्थलज्ञानतो मोक्षः शैवानामिति निश्चयः ।
कामिकाद्यागमेष्वेवं वर्णितं परमात्मना ॥
देवीं प्रति बहुप्रीत्या तत्र तत्रोपवर्णितः ।

दिव्यागमे—

अथ लोकोत्तरं देवि वक्ष्यामि वरवर्णिनि ॥
नन्दिडुण्डिमहाकालप्रमुखाः शंभुकिङ्कराः ।
यज्ज्ञानकाङ्क्षिणस्तीव्रं तपश्चक्रुर्व्रतोद्यताः ॥
षट्स्थलज्ञानमेवेदं ज्ञानं मोक्षस्य साधनम् ।
आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरं स्थलम् ॥
इत्यादिषट्स्थलज्ञानं मुक्तिस्तेषां च वर्णिता ।

---

[1] तृणीकृत. [2] लानीह. [3] लिङ्गादिषु इति युक्तम्.

वातुलोत्तरे—

सरयूर्नाम तटिनी कैलासद्वारनिस्सृता ॥
तस्यास्तीरे तपस्तेपे नन्दिकेशः शिवं प्रति।
विभूतिभूषिततनुस्त्रिपुण्ड्राङ्कित[1]वक्षसः ॥
रुद्राक्षमालाभरणः पञ्चाक्षरजपान्वितः।
पञ्चाग्निमध्यमास्थाय दिव्यं वर्षसहस्रकम् ॥
तपस्तपन्तं नन्दीशं शिवः सम्यक्तमन्वशात्।
कामिकाद्यां वातुलान्तां संहितां तेन भाषिताम् ॥
[2] अध्यापयंस्तदर्थांश्च कदाचिद्गणनायकः।

शिवः—

स्कन्द वक्ष्यामि तत्त्वं ते श्रुते यस्मिन् [3] परावरे ॥
मनस्तृप्तिर्भवेत्तूर्णं वीरशैवागमोदितम्।
षट्स्थलज्ञानतः सर्वं वशीकृतमिदं भवेत् ॥
सारूप्यं चैव सायुज्यं षट्स्थलज्ञानिनो ध्रुवम्।

तत्र चरमभागे—

रे रे नन्दीश भक्तया त्वं सम्यक् सावहितः शृणु ॥
[4]अतः परं प्रवक्ष्यामि शिवाश्रमनिषेविणाम्।
वीरमाहेश्वराचारपावनीकृतचेतसाम् ॥
कलिकल्मषकान्तारदावाग्निसमतेजसाम्।
शिवानन्दामृतास्वादतृप्तानां सुमहात्मनाम् ॥
सदा ध्यानं समाख्यातं न कालनियमोऽस्ति वै।
पूर्वोक्तगुणजालं च सज्जिकायां प्रकल्पयेत् ॥
सदाशिववपुः प्रोक्तं सज्जिका वेदवित्तमैः।
हृत्प्रदेशे स्थिता या हि सज्जिका शिवरूपिणी ॥
तस्यामन्तर्धृतं लिङ्गमकलं गुरुचोदितम्।
हृदये धारणादेव सदा ध्यानं प्रचक्षते ॥

---

[1] आर्षमेकवचनम्, [2] अभ्यासयंस्त, [3] परात्परे, [4] अतः शक्तिर्भवेत्.

वीरशैवः समाख्यातः साक्षाल्लिङ्गाकृतिः स्वयम् ।
तस्य ध्यानं तु कुत्रास्ति कुतः पूजा कुतः स्तुतिः ॥

तथापि लोकतुष्ट्यर्थं परमेश्वरसृष्टिवत् ।
कर्तव्यमिति निर्णीतमागमार्थविशारदैः ॥

आगमेषु पुराणेषु तल्लक्षणमुदीरितम् ।
यो हस्तपीठे निजलिङ्गमिष्टं
विन्यस्य तल्लीनमनःप्रचारः ।
बाह्यक्रियासङ्कुलनिस्पृहात्मा
यः पूजयेदङ्ग स वीरशैवः ॥

पाणिपीठे महालिङ्गं पूजितं शास्त्रवर्त्मना ॥

सञ्जिकारोपणं कृत्वा तध्यानं परमं भवेत् ।
निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम् ॥

नान्यत्पश्यति यद्विश्वं न शृणोति तदन्यथा ।
नान्यद्विजानाति तथा तन्महालिङ्गमुच्यते ॥

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तन्महालिङ्गमुच्यते ॥

ऋतं सत्यं परं ब्रह्म सच्चिदानन्दलक्षणम् ।
अन्यन्न परमं ब्रह्म तदतो ध्येयमास्तिकैः ॥

अतः सर्वं परित्यज्य महालिङ्गैकतत्परः ।
निर्ममो निरहङ्कारस्तध्यानपरमो भवेत् ॥

किमस्मिन् बहुनोक्तेन कृष्ण सर्वार्थसाधनम् ।
प्रथमं लिङ्गतत्त्वानि वक्ष्यामि शिवशासनात् ॥

शृणु कृष्ण महाभाग सावधानेन चेतसा ।
घनलिङ्गं महाभागं सच्चिदानन्दलक्षणम् ॥

निष्कलं निष्क्रियं शान्तं स्वतन्त्रं स्वप्रकाशकम् ।
सर्वेषां स्थानभूतत्वाल्लयभूमित्वतस्तया ॥

तत्त्वानां महदादीनां स्थलमित्यभिधीयते ।
स्थाणौ सर्वाश्रयेऽनन्ते सच्चिदानन्दरूपिणि ॥

यस्मिन् ब्रह्मणि लीयेत प्रपञ्चस्तत्स्थलं स्मृतम् ।
स्वशक्तिक्षोभमात्रेण स्थलं तद्विविधं भवेत् ॥

एकं लिङ्गस्थलं प्रोक्तमन्यदङ्गस्थलं स्मृतम् ।
लिङ्गस्थलं त्रिधा ज्ञेयं भावप्राणेष्टभेदतः ॥

प्रथमं भावलिङ्गं स्याद्द्वितीयं प्राणलिङ्गकम् ।
तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं स्मृतम् ॥

एवमेतत्स्थलं भूयो द्विविधं द्विविधं भवेत् ।
महालिङ्गं प्रसादाख्यं भावलिङ्गविभागजम् ॥

प्राणलिङ्गाज्जङ्गमाख्यं शिवलिङ्गं च भिद्यते ।
गुरुलिङ्गं तथाचारलिङ्गमिष्टविभागतः ॥

अङ्गस्थलं तथा प्रोक्तमाचार्यैः सूक्ष्मदर्शिभिः ।
योगाङ्गं प्रथमं प्रोक्तं भोगाङ्गं च द्वितीयकम् ॥

त्यागाङ्गं च तृतीयं स्यादित्येवं त्रिविधं स्मृतम् ।
योगाङ्गमैक्यं शरणस्थलमित्युभयं भवेत् ॥

प्राणलिङ्गी प्रसादीति द्वयं भोगाङ्गमिष्यते ।
माहेश्वरस्थलं भक्तस्थलमित्युभयं स्थलम् ॥

त्यागाङ्गं भवतीत्येव प्रोच्यते तत्त्वदर्शिभिः ।
अयं भावः प्रपञ्चस्य सकलस्यापि यद्भवेत् ॥

सृष्टिस्थितिलयादीनामाधाराद्वित्तिसंज्ञकम् ।
यद्वस्तु स्थलशब्देन तद्वदन्ति मनीषिणः ॥

तदुक्तलक्षणान्मूलप्रमाणं स्वप्रकाशकम् ।
विग्रहं परमेशस्य सत्त्वमन्यानपेक्षया ॥

भासमानात्स्वप्रकाशं कारणान्यानपेक्षया ।
कुर्वाणत्वात्स्वतन्त्रं तत् सर्वेषामपि कर्मणाम् ॥

तस्मादेवानपेक्ष्यैव न्यस्यात्तत्कर्मक(का) क्रमात् ।
स्वसंवेदनलक्ष्यं च सच्चिदानन्दरूपतः ॥

पूर्णाहन्तात्मकत्वाच्च स्फुरणात्सर्वतस्सदा ।
एवमुक्तगुणाढ्यत्वात् परमस्य शिवस्य हि ॥

पूज्यपूजकलीलायां निस्तरङ्गे च सागरे ।
तरङ्गोत्पत्तितः पूर्वं लहरीवात्मनि स्वके ॥

ईषदुत्पद्यते तत्र चलनं चलनेन च ।
अन्योन्यसामरस्याच्च स्वतन्त्रस्वप्रकाशता ॥

प्रकाशमात्रे तूत्पन्ने कर्तृता चोत्तमा ततः ।
तन्मात्रस्य वियोगेन न्यूनाधिक्येन तद्विधा ॥

भिद्यते तत्र चाधिक्यमापन्ना स्वप्रकाशता ।
तस्यां प्रतिस्फुरणया गत्याविष्टं प्रकर्षतः ॥

मूलप्रणवरूपत्वाच्छिवचैतन्यमेव हि ।
लिङ्गतत्त्वं भवत्यादौ सर्वतत्त्वैकगोचरम् ॥

न्यूनीभूतस्वप्रकाशतायां तत्र तथैव हि ।
प्रविष्टं शिवचैतन्यं तदेवाङ्गाभिधां वहत् ॥

तत्त्वं भवति तत्रापि लिङ्गतत्त्वमथ (दः) क्रमात् ।
सति चित्यपि चानन्दे प्रतिभानात्मतस्तथा ॥

कलय्यात्मतया चैव त्रेधा भवति तद्यथा ।
भावलिङ्गं प्राणलिङ्गमिष्टलिङ्गमिति क्रमात् ॥

पुनर्लिङ्गत्रयमिदं प्रत्येकं द्विविधं भवेत् ।
तत्रेदं भावलिङ्गस्य द्वैविध्यं पृथगुच्यते ॥

महालिङ्गं तथान्यत् प्रसादलिङ्गमिति क्रमात् ।
प्राणलिङ्गमपि द्वेधा ह्याद्यं जङ्गमलिङ्गकम् ॥

शिवलिङ्गमथेष्टस्य भेदो द्वेधा भवत्ययम् ।
गुरुलिङ्गमथाचारलिङ्गमित्येव नामतः ॥

एवं भवति लिङ्गानामुक्तानां षड्विधं स्थलम् ।
स्वतन्त्रस्वप्रकाशा सा शाक्तिरेव यथाक्रमात् ॥

लिङ्गेष्वेतेषु संभूतनाम्ना षड्रूपतामगात् ।
सूक्ष्मकार्यस्य करणप्रपञ्चोत्पादनस्य तु ॥

कारणीभूतचिच्छक्तेरन्यपर्यायरूपिणः ।
प्रणवस्य स्वरूपाढ्या (द्या) शान्त्यतीतोत्तराभिधा ॥

कलेयं वक्ष्यमाणानां षण्णामाद्या निगद्यते।
द्वितीयानन्दरूपायाः पराशक्तेस्तथैव च॥

अन्यर्पाययमयी शान्त्यतीतकलेति च।
औन्मुख्यलक्षणायाः स्यादादिशक्तेस्तथैव च॥

अन्यपर्यायवमयी शान्तिस्तार्तीयिकी कला।
सूक्ष्मक्रियालक्षणाया इच्छाशक्तेरथापि च॥

विद्याकला तुरीयान्यपर्यायशिमयी भवेत्।
बहिर्मुखी ज्ञानशक्तेरन्यपर्यायरूपिणः॥

मकारस्य स्वरूपा च प्रतिष्ठा पञ्चमी कला।
स्थूलाद्यमक्रियाशक्तेरन्यपर्यायरूपिणः॥

नकाररूपिणी षष्ठा सा निवृत्तिकलाभिधा।
महालिङ्गं तु सर्वेषां पदार्थानां स्वभावतः॥

अनुसन्धानकरणहृदयाकारतः स्वतः।
शुद्धानुसन्धातृ रूपं [1] तद्गोप्यमुखमुच्यते॥

प्रसादादिकलिङ्गानां पञ्चमं तु महेशितुः।
शब्दादिभूतनियतपदार्थानामनुक्रमात्॥

ईशानपुरुषाघोरवामसद्यादिनामकः।
एतेऽनुसन्धातृरूपाः पञ्च तेषां हि नाम यत्॥

अन्यत् प्रकटमित्येषां तत्पञ्चकमुखं विधुः।
तस्मादेवंविधस्यास्य लिङ्गतत्त्वस्य वारिधेः॥

तरङ्गभङ्गिन्यायेन चाभेदाध्यवसायिनः।
[2] भेदप्रधानलक्षणशुद्धसन्धातृरूपतः॥

तदनुग्रहहेतुत्वादुपास्यमिति चोच्यते।
एवमेवाङ्गतत्त्वं च त्रिविधं भवति क्रमात्॥

स्वात्मनश्च गुरोश्चैवजङ्गमस्यापि तत्क्रमात्।
ऐक्ययोगानुसन्धानलक्षणं तत् प्रचक्षते॥

---

[1] तज्ज्ञातृमुखमुच्यते—पा. [2] शुद्धप्रधान.

योगाङ्गमित्यथ तदाप्यस्यैवातिप्रसादतः ।
परमं यदुपादेयं तत्स्वीकारेण यत् सुखम् ॥

तस्य यः परिणामोऽस्ति यस्तल्लक्षणलक्षितम् ।
भोगाङ्गमिति तत्प्राहुर्द्वितीयं सूक्ष्मदर्शिनः ॥

गुरुलिङ्गस्य च तथा जङ्गमस्य च वा पुनः ।
[1]इष्टस्यावञ्चनीयस्य त्यजनीयेतरस्य च ॥

तनोर्मनोरथस्यापि रूपं त्यागाङ्गमिष्यते ।
इदं च त्रिविधं भेदात् प्रत्येकं[2] त्रिविधं स्मृतम् ॥

योगाङ्गस्य द्विधा भेद ऐक्यं शरणमित्यपि ।
भोगाङ्गं प्राणलिङ्गीति प्रसादीति द्विधा स्मृतम् ॥

तथा माहेश्वरं भक्तस्थलं त्यागाङ्गमिष्यते ।
षड्विधाङ्गप्रकाशानां न्यूनीभावमुपागता ॥

सा शक्तिरेव षड्भक्तिरूपतां समुपागता ।
आद्या समरसा भक्तिर्द्वितीयानन्दभक्तिका ॥

तृतीयानुभवा भक्तिरवधाना तुरीयका ।
पञ्चमी नैष्ठिकी भक्तिः षष्ठी सद्भक्तिरुच्यते ॥

भावो ज्ञानं मनो बुद्धिरहङ्कारस्तथैव च ।
चित्तलक्षणमप्यन्तःकरणं चैव षट् क्रमात् ॥

एतत्समष्टितां चैव श्रोत्रादीनां च पञ्चताम् ।
शब्दादितद्विषयकतृप्तिलक्षणषट्कताम् ॥

तद्वाचकषडक्षर्या रूपतां च समागता ।
क्रियायाः साधनीभूतवागादीनां च पञ्चताम् ॥

सूक्ष्मस्वरूपव्योमादिभूतपञ्चकरूपताम् ।
(त)सद्भावश्चापि सुज्ञानं सुमनो निरहङ्कृतिः ॥

सुबुद्धिश्च सुचित्तश्चाप्येतत् षट्कस्वरूपताम् ।
प्राप्याङ्गतत्त्वमभवत् [3]सा शक्तिश्च सनातनी ॥

---

[1] इष्टस्य वञ्चनीयस्य त्यजनीयतरस्य च. [2] द्विविधं. [3] सैव शक्तिः सनातनी.

एवंविधाङ्गतत्त्वस्य या लीला च महेश्वरी ।
[1]शक्त्या तया कल्पिता या या च संकोचिता पुनः ॥

चिदादिशक्तिस्तस्यैव स्वभावत्वेऽपि सत्यपि ।
सूक्ष्मरूपैर्मानसाख्यै(भै)र्व्योमाद्यैस्तदुपाधिभिः ॥

चलितत्वेनोर्ध्वसृष्टि(ष्टे)रूपभागनिबन्धनः ।
भेदः स एव यस्याभूत् प्रधानं लक्षणं तथा ॥

शुद्धविद्या हि सा सद्भिरुच्यते सूक्ष्मदर्शिभिः ।
तस्याः प्रमातृरूपत्वादुपासकमितीष्यते ॥

एवं हि लिङ्गतत्त्वस्य चाङ्गं शरणतत्त्वकम् ।
शरणस्य तु लिङ्गं तत् प्राणस्तदनयोः पुनः ॥

बीजभूरुहयोर्न्यायादन्योन्यं सामरस्यकम् ।
एवं त्वनादितः प्रोक्तः शरणो लिङ्गमेव च ॥

अन्योन्यमेतयोः सिद्धं चन्द्रचन्द्रिकयोरिव ।
अथास्यैवंविधस्येह शरणस्यात्मनि स्वके ॥

विमर्शलक्षणस्याथ सद्गुरोस्तु कटाक्षतः ।
[2]संस्वात्मप्रत्यभिज्ञानशालित्वादस्य तत्त्वतः ॥

मन एव प्राणरूपमहालिङ्गमितीरितम् ।
बाह्येन्द्रियस्वरूपाणां श्रोत्रादीनां पृथक् पृथक् ॥

श्रोत्रादिविषयीभूतपदार्थग्रहणे पुनः ।
साधनत्वात्तथा चान्तर्मुखत्वाच्च स्वभावतः ॥

नादः सुनादोऽथ महानाद इत्युक्तरूपिणः ।
महागुरोर्हि वाक्यस्य विवक्षाध्यवसायतः ॥

तद्रूपेण जपः शान्तक्रमेणैव ततः परम् ।
अनुग्राहकरूपस्य प्रसादस्येह हेतुतः ॥

ततः शब्दग्रहस्येह साधनं श्रोत्रमेव हि ।
यकाररूपप्रासादलिङ्गमित्यभिधीयते ॥

---

[1] सक्तिस्तया. [2] सम्प्राप्त, सम्प्राप्य.

चरजङ्गमयोरत्र पर्यायत्वेन [1] निश्चयः ।
त्वक् सर्वाङ्गव्यापनेन शीतादिस्पर्शसाधनम् ॥

तस्माद्भकाररूपं च जङ्गमं लिङ्गमुच्यते ।
[2]महः प्रकाशयेत्तत्र नेत्रगोलमधिष्ठितः ॥

सर्वरूपपदार्थानां प्रकाशे साधनत्वतः ।
नेत्रमेव शिकारस्य शिवलिङ्गं प्रचक्षते ॥

[3]गुरोस्तु मन्त्ररूपित्वात्तस्मिन्याऽऽस्ते षडक्षरी ।
तद्रूपमधुरादीनां षड्रसानां स्वरूपताम् ॥

गता तदुच्चारणे च रसास्वादे च साधनम् ।
[4]जिह्वैव मस्वरूपं यद्गुरुलिङ्गं तदिष्यते ॥

इडापिङ्गलयोर्द्वारा प्राणवायोः समाश्रयात् ।
सत्कर्माचरणे हेतुभूतदेहस्य शुद्धये ॥

शुद्धरूपाद्रेचकादेः क्रमेणैवोद्गतस्य च ।
प्राणायामसमभ्यासे साधनत्वात्तथैव च ॥

घ्राणमेव नकाराख्यमाचारं लिङ्गमिष्यते ।
इत्येवमवगन्तव्यं यथावल्लिङ्गलक्षणम् ॥

अथ [5]स्वस्य गुरोश्चैव लिङ्गजङ्गमयोस्तथा ।
[6]एषामेव धिया भस्मरुद्राक्षे शिवलाञ्छने ॥

शिवस्य शरणेष्वेषु प्रीतिलक्षणभक्तिमान् ।
स एव भक्तो भक्तनां [7]माहत्म्यज्ञानपूर्वकम् ॥

सुदृढः सर्वभक्तानामधिकः परिकीर्तितः ।
स्नेहो भक्तिरिति प्रोक्तस्तथामूर्तिर्न चान्यथा ॥

शिव एव गुरुर्लिङ्गं जङ्गमात्मक इत्यसौ ।
निष्ठा यत्रास्ति महती [8]स एव तु महेश्वरः ॥

गुरोरपि च लिङ्गस्य जङ्गमस्य महात्मनः ।
गुरुर्लिङ्गं जङ्गमश्च पादोदश्च प्रसादकः ॥

---

[1] तस्य तु. [2] महाप्रकाश एवात्र. [3] गुरोस्तु मन्त्रमूर्तिस्त्वात्तस्मिन्याति षडक्षरी. जेह्वैव य स्वरूपं. [5]स्वीयगुरोश्चैव. [6] एषामैक्यधिया. [7] महात्मज्ञान. [8] तत्रैव तु.

भस्मरुद्राक्षमन्त्राश्चावरणान्यष्ट कीर्तिताः ।
एतैस्तदन्तर्भूतेषु चाद्यपञ्चविधेषु च ॥

पञ्चाचारेषु विस्मृत्या रहितत्वेन वर्तकः ।
सावधानो भवेदेष प्रसादीति निगद्यते ॥

व्याध्यादौ संप्रसक्तेऽपि पादोदव्यतिरेकतः ।
लिङ्गार्पितौषधं चायं स्वीकरोति न यः पुमान् ॥

ताभ्यां विशिष्टं यल्लिङ्गं तदेव प्राणसंज्ञितम् ।
प्राणा एव हि लिङ्गं चेत्यनुसन्धानवान् पुमान् ॥

स एव [1]प्राणलिङ्गीति प्रोच्यते सूक्ष्मदर्शिभिः ।
तादृशं प्राणलिङ्गं यत्तदेव पतिवाचकम् ॥

स्वयमेव सतीभक्तः सतीपत्योः पुनः स्वयम् ।
भावं गतः सन् सत्यास्तु नास्ति सत्यन्तरं त्विति ॥

संत्यज्यान्यसतीसङ्गं स्वस्य चिच्छक्तिमेलनात् ।
आनन्दभरितोऽत्यन्तं निवृत्तेर्मार्गमाप्य यः ॥

सद्भक्तिज्ञानवैराग्यैः संपन्नश्चापि यो भवेत् ।
धीमान् स एव शरण इति विद्वद्भिरुच्यते ॥

एवं विधसतीपत्योर्भावापन्ननिवृत्तिकः ।
निराभासः सन्विकल्पवैमुख्येन च शान्तधीः ॥

सर्वं शिवात्मकमिति विमृशन् हृदि सन्ततम् ।
शिखिकर्पूरयोर्योगो यथा तद्वदयं पुनः ॥

अन्तर्मुखमहालिङ्गलोलीभूतो ह्यनन्यधीः ।
संप्राप्तसामरस्योऽयं मोदमानः प्रकाशते ॥

(स एवैक्य इति प्रोक्तः परमार्थविशारदैः ।)
[2]अत्रेदमङ्गस्थलमित्येतत्सम्यग्विमृश्यते ॥

कर्पूरस्य हि भूतत्त्वरूपत्त्वात्तेजसः कृतिः ।
तथा परम्परा तेजः [3]कार्यात्प्राक्कार्यनाशनः ॥

---

[1] प्राणलिङ्गं तत्प्रोच्यते. [2] अत्रैकमङ्ग. [3] कार्यत्वात्कार्य.

तस्य कारणरूपेण स्थितिरूपत्वमिष्यते ।
तस्मान्न च स्वरूपस्य हानिशङ्कालिपका ह्यपि ॥

एवं भक्तादिकानां तु षड्विधानां महेशितुः ।
आवृत्तीनामथाचारप्रमुखानां तथैव च ॥

विमर्शनीयः संबन्धः षड्लिङ्गानां यथाक्रमात् ।
आचारलिङ्गं प्राणाख्यं भक्तस्थलसमाश्रयम् ॥

निवृत्तिकलयोपेतं गन्धग्रहणसाधनम् ।
गुरुलिङ्गं तु जिह्वाख्यं महेशस्थलसंश्रयम् ॥

प्रतिष्ठाकलयोपेतं रसग्रहणसाधनम् ।
शिवलिङ्गं तु नेत्राख्यं प्रसादस्थलसंश्रयम् ॥

तद्विद्याकलयोपेतं रूपग्रहणसाधनम् ।
त्वगाख्यं जङ्गमं लिङ्गं प्राणलिङ्गस्थलाश्रयम् ॥

शान्त्याख्यकलयोपेतं स्पर्शग्रहणसाधनम् ।
प्रसादलिङ्गं श्रोत्राख्यं शरणस्थलसंश्रयम् ॥

शान्त्यतीतकलोपेतं शब्दग्रहणसाधनम् ।
मानसं तु महालिङ्गमैक्यस्थलसमाश्रयम् ॥

शान्त्यतीतोत्तरोपेतं सर्वग्रहणसाधनम् ।
अथात्र मानसादीनां करत्रयमुदाहृतम् ॥

तथात्वे सत्यपि घ्रातृत्वादिलक्षणकस्य च ।
चैतन्यकस्याघ्रेयादिपदार्थानां [1] यथा पुनः ॥

स्वीकारसाधनत्वेन [2] तदेकस्थलतस्तथा ।
येषां हि लिङ्गरूपत्वव्यपदेशः स्फुटीकृतः ॥

अन्यथा च तथा घ्रातृघ्राण[3]वद्रसनेऽपि च ।
गन्धस्य ग्रहणे तस्य साधनं हि भवेदिति ॥

तात्पर्यमथ भक्तादिलक्षणं तु निगद्यते ।
सदाचारः शिवे भक्ति[4]र्लिङ्गे जङ्गम एकधीः ॥

---

[1] तथा पुनः. [2] तदेकस्तत्त्वतस्तथा. [3] वद्रसनेन च. [4] र्लिङ्गजङ्गम.

लाञ्छने शरणे भक्तिर्भक्तिस्थलमनुत्तमम् ।
परस्त्रियं परार्थं च वर्जयन् भावशुद्धिमान् ॥

[1] लिङ्गनिष्ठो नियुक्तात्मा माहेश्वरमहास्थलम् ।
लिङ्गार्पितपदार्थं च सुभोगी लिङ्गमाहितः ॥

अनर्पितविवर्जी च [2] प्रसादिस्थलमुच्यते ।
वायौ प्राणगु(णी)णे लिङ्गं लिङ्गे प्राणः समाहितः ॥

सुखदुःखोभयं नास्ति प्राणलिङ्गस्थलं भवेत् ।
पतिर्लिङ्गं सती चाहं हृदि युक्तः स्वयं प्रभुः ॥

प्रापञ्चिकसुखं नास्ति शरणस्थलमुत्तमम् ।
षड्भूमयश्च षड्भावा नास्ति चाष्टविधार्चनम् ॥

निर्भावो निजलिङ्गैक्यः शिखिकर्पूरयोगवत् ।
अथात्र शरणस्यास्य नास्ति प्रापञ्चिकं सुखम् ॥

इत्यनेन स्त्रीग्रहणमिह नास्तीति दर्शितम् ।
एवमत्राङ्गस्थलस्य तथा लिङ्गस्थले पुनः ॥

अन्तर्गतत्वाच्च शान्त्यतीत्तोरकलाख्यया ।
उपेतं च महासादाख्यं महालिङ्गतत्त्वकम् ॥

तदेकमथ शिष्टं च कलापञ्चकलिङ्गकम् ।
यच्छिवामूर्तिमूर्त्याख्यकर्मकर्तृकपञ्चकैः ॥

सादाख्यरूपैर्युक्तत्वाल्लिङ्गतत्त्वार्थदर्शिभिः ।
एवं स्थिते निष्कलस्य लिङ्गतत्त्वस्य वस्तुतः ॥

महालिङ्गं मानसाख्यमन्तर्मुखमुदाहृतम् ।
प्रसादिपञ्चकं लिङ्गं तद्बाह्य[3]मुपपञ्चकम् ॥

सादाख्यपञ्चकं चापि विद्यादीनां यथाक्रमम् ।
पर्यायनामधेयानीत्येवं तात्पर्यमिष्यते ।

अथ तस्य महेशस्य घनलिङ्गस्वरूपिणः ॥
स्थूलप्रपञ्चनिर्माणलीलायां तेषु वै पुनः ।

---

[1] लिङ्गनिष्ठोऽतिमुक्तात्मा. [2] प्रासादस्थल. [3] मुखपञ्चकम् .

आचारादिषु लिङ्गेषु क्रियाशक्तेः कलाऽभवत् ।
अन्यपर्यायरूपा च निवृत्तिरथ तद्वशात् ॥

अहङ्कारादिभूम्यन्तत्रयोविंशतितत्त्वकम् ।
तन्मूलकारणीभूताः भूयः सत्वादयो गुणाः ॥

तदात्मिकायाः प्रकृतेरनपाया ततः पुनः ।
मायातत्त्वं समुत्पन्नमथ सत्वादिकर्तृषु ॥

संप्रविष्टं तु चैतन्यं तदेवैवं निगद्यते ।
रुद्रो विष्णुरजश्चेति सद्भिः सूक्ष्मार्थदर्शिभिः ॥

क्रमेण वह्निः सूर्यश्च सोमश्चैतेषु वै पुनः ।
अन्तर्गताश्च चत्वारो वर्णाश्च ब्राह्मणादयः ॥

लिङ्गस्थलं त्रिधा ज्ञेयं तद्भेदो वर्ण्यते क्रमात् ।
प्रथमं भावलिङ्गं स्याद्द्वितीयं प्राणलिङ्गकम् ॥

तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं स्मृतम् ।
निष्कलं भावलिङ्गं स्याद्भावग्राह्यं परात्परम् ॥

सन्मात्रं भावलिङ्गं स्यादिति निष्ठा महात्मनाम् ।
प्राणलिङ्गं मनोग्राह्यं भवेत् सकलनिष्कलम् ॥

[1] तत् प्राणेष्वन्तर्मनसो लिङ्गमाहुरिति श्रुतिः ।
सकलं हृकलाग्राह्यमिष्टलिङ्गस्थलं महत् ॥

इष्टसिद्धिकरं सम्यगनिष्टपरिहारकम् ॥
इष्टसंपूजया नित्यमिष्टं पूजितमादरात् ।
इष्टलिङ्गमिति प्रोक्तं गुरुभिस्तत्त्वदर्शिभिः ॥

[2] इष्टमूर्जं तु तपसामनुयच्छति मध्यतः ।
तदिष्टलिङ्गमित्यन्ये तस्मादाथर्वणी श्रुतिः ॥

सद्रूपं भावलिङ्गं स्याच्चिद्रूपं प्राणलिङ्गकम् ।
आनन्दरूपमाचार्यैरिष्टलिङ्गमुदाहृतम् ॥
भावलिङ्गं परं तत्त्वं प्राणलिङ्गं तु सूक्ष्मकम् ।

---

[1] तत्प्राणेष्टं तन्मनसो. [2] इष्टमूर्जं तु तपसा मनुर्यच्छति.

इष्टलिङ्गं भवेत् [1] स्थूलमेव तत्तत्र यत् स्मृतम् ।
स्थूलं बाह्यमिति प्रोक्तं सूक्ष्ममाभ्यन्तरं स्मृतम् ।
बाह्याभ्यन्तरयोर्यत्तत्परमित्यभिधीयते ॥

देहप्राणात्मरूपेण क्रियामन्त्रप्रयोगतः ।
बिन्दुनादकलाभेदाल्लिङ्गत्रयमुदाहृतम् ॥

एवमेव स्थलं भूयो द्विविधं द्विविधं भवेत् ।
भावलिङ्गस्थलं द्वेधा प्राणलिङ्गस्थलं द्विधा ॥

इष्टलिङ्गस्थलं चैव द्विधा प्रोक्तं महात्मभिः ।
महालिङ्गं प्रसादाख्यलिङ्गमित्युभयस्थलम् ॥

भावलिङ्गं भवत्येव स्वानुभूतिप्रमाणतः ।
तथैवाचारलिङ्गं च शिवलिङ्गमिति द्वयम् ॥

प्राणलिङ्गं भवत्येव स्वानुभूतिप्रमाणतः ।
गुरुलिङ्गं तथाचारलिङ्गमित्युभयं स्थलम् ॥

इष्टालिङ्गं भवत्येव सत्यमेव न संशयः ।
महालिङ्गं प्रसादाख्यलिङ्गमाचारलिङ्गकम् ॥

शिवलिङ्गं तथा चैव गुरुलिङ्गं ततः परम् ।
तथैवाचारलिङ्गं च प्रोच्यते षड्विधं पुनः ॥

एवं हि षड्विधं [2] भूतं लिङ्गं परमकारणम् ।
स्वशक्तिवैभवाच्चैव स्वातन्त्र्याल्लीलयापि च ॥

शक्तयः षड्विधा ज्ञेयाः षट्स्थलेषु समाहिताः ।
शक्तीनामधुना तासां सद्भावो वर्ण्यते क्रमात् ॥

शान्त्यतीतोत्तरा शक्तिश्चिन्मात्रानन्दविग्रहा ।
शिवाभिन्ना शिवा साक्षाच्छिवस्यापि शिवंकरी ॥

शान्त्यतीतोत्तरा नाम चिच्छक्तिरिति कीर्तिता ।
शान्त्यतीता परा शक्तिः शान्तिरेवेति संहिता ॥

इच्छाशक्तिस्तु विद्या स्यात् प्रतिष्ठा ज्ञानरूपिणी ।
निवृत्तिस्तु क्रियाशक्तिरिति पर्यायसङ्गतिः ॥

---

[1] स्थूलमेवं तत्त्रितयं स्मृतम्. [2] भूय.

चिच्छक्तिश्च परा शक्तिरादिशक्तिस्तथैव च ।
इच्छाज्ञानक्रियारूपाः शक्तयष्षड्विधाः स्मृताः ॥
स्थलानां शक्तियुक्तानां षण्णामेतत् पृथक् पृथक् ।
स्वरूपलक्षणं चैव क्रमशो वर्ण्यतेऽधुना ॥

आद्यन्तशून्यममलं परिपूर्णमेकं
सूक्ष्मं परात्परमनामयमप्रमेयम् ।
भावैकगम्यमजडं शिवतत्त्वमाहु-
[1]श्चिच्छक्तिसंस्फुरणरूपमथात्मलिङ्गम् ॥

ज्योतिः परं निजमखण्डमतीन्द्रियार्थं
ज्ञानोपलभ्यममृतं परिणामबीजम् ।
सादाख्यतत्त्वमुदितं परया स्वशक्तया
प्राहुः प्रसादघनलिङ्गमुपाधिहीनम् ॥

साभ्यन्तरङ्गबहिरङ्गममूर्ति[2]तत्त्वं
ज्योतिर्मयं पुरुषमक्षरतः पराख्यम् ।
स्वात्मादिशक्तिघटितं मनसैव नित्यं
ध्यातव्यरूपमिति [3]तच्चरलिङ्गमाहुः ॥

विद्याकलाकलितरूपसुशोभमानं
दिव्यप्रभापटलमेकमुखं प्रशान्तम् ।
इच्छास्वशक्तिपरिजृम्भितमूर्तितत्त्वं
व्यक्ते ह्यहंकृतिपदे शिवलिङ्गमाहुः ॥

स्वज्ञानशक्तिविभवोत्थितकर्तृतत्त्वं
सर्वोपदेशविधितन्त्रकृतप्रतिष्ठम् ।
तेजोनिधिं परमपारसुखाम्बुराशिं
बुद्धेः पदे विनिहितं गुरुलिङ्गमाहुः ॥

कर्मात्मना कलिततत्त्वनिवासहेतो-
राधारतत्त्वमचलं क्रियया स्वशक्तया ।
चित्तेन धार्यमधिरूढनिवृत्तिमार्ग-
माचारलिङ्गमिति वेदविदो वदन्ति ॥

---

[1] चिच्छक्तयः स्फुरण. [2] सत्वं. [3] वै धरलिङ्ग.

एवमेव स्वरूपं च लक्षणं परिकीर्तितम् ।
महालिङ्गस्थलादीनां षड्विधानां यथाक्रमम् ॥

किंत्वेतेषां स्थलानां तु प्रादुर्भावः प्रदर्श्यते ।
शिव एव स्वचिच्छक्त्या महालिङ्गस्थलं दधौ ॥

तदुपासकरूपत्वादैक्यस्थलमभून्महत् ।
स्फुरणादौ महाशक्तिर्महालिङ्गस्थले परे ॥

प्रसादलिङ्गसंज्ञं तु प्रादुरासीन्महास्थलम् ।
तदुपासकरूपत्वाच्छरणस्थलमाबभौ ॥

प्रादुर्भूते तथा तस्मिन्नादिशक्तेः प्रभावतः ।
[1] चराभिदं स्थलं तत्र समुत्पन्नमनुत्तमम् ॥

तदुपासकरूपत्वात् प्राणलिङ्गस्थलं बभौ ।
लिङ्गे समुत्थितं ज्योतिर्मये तस्मिन् सुशोभने ॥

शिवलिङ्गस्थलं साक्षादिच्छा[2]शक्तिप्रभावतः ।
तदुपासकरूपत्वात् प्रसादिस्थलमाबभौ ॥

शिवलिङ्गस्थले ज्ञानशक्तिस्फुरणयोगतः ।
उदभूत् कारणत्वेन गुरुलिङ्गाभिधस्थलम् ॥

तदुपासकरूपत्वादासीन्माहेश्वरस्थलम् ।
गुरुलिङ्गस्थले तस्मिन् क्रियाशक्तिप्रभावतः ॥

आचारलिङ्गसंज्ञं तु स्थलं जातं सुशोभनम् ।
तदुपासकरूपत्वाद्भक्तस्थलमजायत ॥

महालिङ्गं प्रसादाख्यलिङ्गं च चरलिङ्गकम् ।
शिवलिङ्गं तथा चैव गुरुलिङ्गमतः परम् ॥

आचारलिङ्गमित्येवं प्रवृत्तिस्थलमागतम् ।
इत्येषा वैखरी प्रोक्ता शैवागमविशारदैः ॥

ननु लिङ्गतत्त्वाङ्गतत्त्वयोः शिवशक्त्यात्मकत्वेन शिवशक्त्युभयात्मके जगत्कारणे मिलितानां प्रमुष्टद्वारे क्रमप्रवेशवत्क्रमो[3]त्पत्तिः । व्युत्क्रमेण सर्वेषां लिङ्गतत्त्वे लयः । उपाधिभेदादेकस्यैव लिङ्गस्यानेकत्वव्यपदेशः । एकोत्तरशतस्थलानां षट्स्थलान्तर्गतत्वेन न तेषां पृथगुपदेशः । तद्भेदस्तु भाषाप्रबन्धादेवावगन्तव्यः ॥

---

[1] चरलिङ्गस्थलं. [2] शक्तेः. [3] त्पत्तिव्युत्क्रमेण.

स्थाणौ सर्वाश्रयेऽनन्ते सच्चिदानन्दरूपिणि ।
यस्मिन् ब्रह्मणि लीयेत प्रपञ्चस्तत्स्थलं स्मृतम् ॥

इति स्थलशब्दनिर्वचनेन प्रपञ्चलयाधारत्वेन प्रसिद्धस्य लिङ्गतत्त्वस्यैव स्थलशब्दवाच्यत्वं वक्तुं युक्तम् । अङ्गतत्त्वस्यापि लिङ्गतत्त्वे लयस्य प्रतिपादितत्वेन प्रपञ्चलयाधारत्वाभावात्स्थलत्वोपवर्णनमसङ्गतम् ॥

किं च लयाधारत्वमेकस्यैवोपवर्णयितुं युक्तम् । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति' इति लयाधारस्य ब्रह्मण एकस्यैव स्थलत्वोपवर्णनं युक्तमित्यवान्तरभेदविशिष्टानां स्थलत्वं न युक्तमिति चेत्—न; स्थाणुत्वसर्वाश्रयत्वानन्तत्वसच्चिदानन्दत्वादिघटिते लयाधारे मुख्यत्वेन प्रवृत्तं लक्षणं वर्तुल चतुरस्रदीर्घाद्याकारपात्रपूरितक्षीरस्य स्वरूपानुपमर्देन क्षीरभाण्डनिक्षेपे सत्याकारविशेषपात्रोपाधिकृतचतुरस्रत्वादिविशिष्टक्षीरवत् क्षीरत्वव्यवहारस्य सार्वत्रिकत्वादुक्तलक्षणविशिष्टमुख्यस्थलस्यैव परिच्छेदादेतेषां गौणं स्थलत्वमिति तदवान्तरभेदानां स्थलत्वव्यपदेशः । स्थाणुशब्दवाच्यनिश्चलत्वादिविशिष्टप्रपञ्चलयाधारत्वरूपस्थलत्वबुद्धिरङ्गावबद्धोपासना, छान्दोग्योपनिषदादौ तथैव बहुशः प्रतिपादनादिति सर्वं समञ्जसम् ॥

पार्वत्युवाच—

भगवन् देवदेवेश करुणाकर शङ्कर ।
शैवभेदस्वरूपं च वीरशैवं विशेषतः ।
तदाचारस्वरूपं च श्रुतं त्वत्कृपया विभो ।
तत्र लिङ्गाङ्गसंबन्धज्ञानं मोक्षैकसाधनम् ॥
इत्युक्तं भवता सम्यक्कथं ज्ञानमुपास्यताम् ।

ईश्वर उवाच—

यत् पृष्टं हि त्वया देवि रहस्यमिदमुत्तमम् ॥
षट्स्थलात्मकमेतच्च श्रूयतां सावधानतः ।
प्रथमं गुरुलिङ्गं स्यात्तत आचारलिङ्गकम् ॥
ततः प्रसादलिङ्गं तु चरालिङ्गमतः परम् ।
शिवलिङ्गमतो ज्ञेयं महालिङ्गमतः परम् ॥
एवं षड्विधलिङ्गानां स्वरूपं शृणु शाङ्करि ।
दीक्षा शिक्षानुभावश्च गुरुलिङ्गं त्रिधा भवेत् ॥

कुण्डमण्टपहोमाद्यैर्न्यासैरध्वकलादिभिः ।
मन्त्रोपदेशसहिता क्रिया दीक्षेति गीयते ॥
दीयते लिङ्गसंबन्धः क्षीयते कर्मसञ्चयः ।
दीयते क्षीयते यस्माद्दीक्षेति परिगीयते ॥
[1] गुरुलिङ्गचराख्यानां लिङ्गानामेकरूपकम् ।
यज्ज्ञानं बोधितं सद्भिः सा दीक्षेति निगद्यते ॥
संस्कारैः प्राक्तनैर्देवि स्वकीयसुकृतार्जितैः ।
भक्तिश्रद्धार्चनाद्यैर्यदनुभावः स उच्यते ॥
स्थलमाचारलिङ्गस्य त्रिविधं श्रूयतां क्रमात् ।
सदाचारस्तु नियतो गणाचारस्ततः परम् ॥
सज्जनः शिवभक्तश्च येन मार्गेण सर्वदा ।
तुष्टस्तोषयते देवि सदाचारः स वै स्मृतः ॥
यस्तु स्वकृतमाचारं न त्यक्ष्येऽहं तदत्यये ।
त्यजाम्यस्मूनिति स वै नियताचार ईरितः ॥
गुरुलिङ्गादिविषयं न श्राव्यं दूषणं यदि ।
श्रुतवान् शिक्षयामीति गणाचारः स हि स्मृतः ॥
प्रसादलिङ्गत्रैविध्यमपि श्रुणु वरानने ।
शुद्धं सिद्धं प्रसिद्धं च भेदश्चैषामथोच्यते ॥
आदौ गुरुत्रयं ज्ञात्वा ततः स्याद्दास भावतः ।
तद्भुक्तशेषभोगो यः स शुद्धः परिकीर्तितः ॥
ज्ञात्वा लिङ्गत्रयं सम्यक्तथैक्यं च वरानने ।
लिङ्गार्पितप्रसादोऽयं सिद्ध इत्याहुरास्तिकाः ॥
गुरुलिङ्गचराणां चाप्यभेदाद्भक्तिमानपि ।
यः परित्यक्तविषयः प्रसिद्धः स उदाहृतः ॥
चरलिङ्गस्थलस्यास्य स्वरूपं कथयामि ते ।
स्वयं चरं परं चेति त्रैविध्यं समुपागतम् ॥
लिङ्गलाञ्छनसंयुक्तं बहिः कृत्यविवर्जितः ।
केवलानन्दरूपो यः स स्वयं लिङ्गमीरितम् ॥

---

[1] गुरुलिङ्गं चरा.

स्वच्छन्दचारी स्वाभिन्नलिङ्गरूपो निराकुलः ।
लिङ्गन्यस्तकलाशुद्धिः स चरं लिङ्गमुच्यते ॥

निर्द्वन्द्वो हि सदा स्थाणुर्गमागमविवर्जितः ।
ज्योतिर्लिङ्गस्वरूपो यः परलिङ्गमुदाहृतम् ॥

शिवलिङ्गस्वरूपं ते वक्ष्यामि शृणु पार्वति ।
इष्टलिङ्गं प्राणलिङ्गं भावलिङ्गमिति त्रिधा ॥

[1] दीक्षाविधाने गुरुणा यल्लिङ्गं प्रतिपादितम् ।
मन्त्रोपदेशसहितमिष्टलिगमुदाहृतम् ॥

त्यक्तदेहेन्द्रियगुणं शिवार्पितनिजान्तरम् ।
शिव एव मनो लीनं प्राणलिङ्गं तदुच्यते ॥

जाग्रदादिष्ववस्थासु ज्योतिर्लिङ्गैकमानसम् ।
अज्ञानविनिवृत्तं तद्भावलिङ्गं तदुच्यते ॥

महालिङ्गस्थलं चापि त्रिधा भिन्नं शृणु प्रिये ।
पिण्डजं प्रथमं प्रोक्तमण्डजं च ततः परम् ॥

बिन्द्वाकाशं ततो ज्ञेयमेषां लक्षणमुच्यते ।
देहो देवालयः प्रोक्तो जीवो देवः सदाशिवः ॥

इति निश्चितसद्भावः पिण्डजं लिङ्गमुच्यते ।
पीठिका पृथिवी लिङ्गमकाशं सृष्टिकारणम् ॥

निस्सन्देहमिदं ज्ञानमण्डजं [2] लिङ्गमीरितम् ।
ध्यात्वात्मानमथाकाशे [3] ध्यात्वाकाशं तथात्मनि ॥

आत्माकाशमयं लिङ्गं बिन्द्वाकाशमुदाहृतम् ।

देव्युवाच—

एषु लिङ्गेषु देवेश कथं पूजादिकं भवेत् ॥

तदाचारस्तु को वात्र प्रसादः कीदृशो भवेत् ।
एतत्सर्वं समासेन कृपया वद मे प्रभो ॥

---

[1] दीक्षां विधाय, [2] लिङ्गमुच्यते, [3] ध्यात्वात्मानं–पा.

शिव उवाच—

अङ्गस्थलं समासेन वक्ष्ये षड्विधमादितः ।
यस्मिन् ज्ञाते महादेवि ज्ञायते चाधिकं ततः ॥
भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः ।
शरणः शिवलिङ्गैक्यं षट्स्थलं मम पार्वति ॥
अथैषां लक्षणं वक्ष्ये शृणुष्व सुसमाहिता ।
गोपनीयं प्रयत्नेन शिवानुग्रहमिच्छता ॥
त्यक्ताभिमानो देहादौ भक्त इत्युच्यते बुधैः ।
तच्चित्तमचलं यस्य स वै माहेश्वरः स्मृतः ॥
चित्तशुद्धिर्भवेद्यस्य स प्रसादी भवत्यसौ ।
[1] त्यक्तजीवभ्रमश्चायं लिङ्गात्मा प्राणलिङ्गकः ॥
शिवं निश्चित्य निश्चिन्तः सानन्दः शरणो भवेत् ।
शिवजीवोभयभ्रान्तिरहितश्चैक्यमुच्यते ॥
गुरुभक्तो लिङ्गभक्तश्चरभक्तस्तथैव च ।
एवं भेदसमायुक्तः स भक्तस्त्रिविधो भवेत् ॥
मोही भक्तः पूजकश्च वीरशैवः प्रसादवान् ।
प्राणी च गुरुलिङ्गादिष्वेवं भक्तोऽपि षड्विधः ॥
त्यक्तपित्रादिमोहः स गुरुलिङ्गैकमोहवान् ।
एवं यो वर्तते देवि स तन्मोहीति कथ्यते ॥
लौकिकान्बान्धवांस्त्यक्त्वा गुरुलिङ्गैकबान्धवः ।
हर्षपूर्णो महादेवि स सद्भक्त इति स्मृतः ॥
पूजामन्यां परित्यज्य गुरुलिङ्गैकपूजकः ।
अतिनिष्ठापरो यस्तु स वै तत्पूजकः स्मृतः ॥
गुरूपदिष्टमेवाथ समाचरणमाचरन् ।
यश्च त्यक्तेतराचारो गुरुधीरः स उच्यते ॥
यो वै न लङ्घयेद्देवि कदाचिद्गुरुशासनम् ।
स वै गुरुप्रसादी स्यान्निवृत्तेतरशासनः ॥

---

[1] त्यक्तबीज,

सेवामन्यां परित्यज्य गुरुलिङ्गैकसेवकः ।
वर्तते यः स्थिरतरो गुरुप्राणी स हि स्मृतः ॥

एवं भेदैश्च मां देवि गुरुमूर्तिधरं शिवम् ।
भजेदनन्यचित्तो यः स मुक्तः स्यन्न संशयः ॥

एवमाचारलिङ्गेऽपि षड्भेदाः संभवन्ति हि ।
(मोहं त्यक्त्वा कलत्रादौ मोहिता चर एव हि ॥)

शिवाचारविरुद्धांश्च त्यजेदपि [1]सुतादिकान् ।
अथवाचारमोही स्यादन्याचारविवर्जितः ॥

पूर्वाचारं परित्यज्य शिवाचारं समाश्रितः ।
आचारलिङ्गभक्तः स्याद्विरुद्धाचारवर्जितः ॥

अन्यपूजां परित्यज्य लिङ्गपूजैकतत्परः ।
शिवाचारपरो यस्तु स स्यादाचारपूजकः ॥

[2]अपि प्राणात्यये देवि स्वाचारं न परित्यजेत् ।
आचारवीरः स भवेदाचारैकपरायणः ॥

शुचित्वमशुचित्वं चेत्यादिसन्देहवर्जितः ।
ग्राह्याग्राह्यादिरहितः [3]सदाचारप्रसादकः ॥

परैः कृतां भक्तिनिन्दां श्रुणु[4]यान्नैव कुत्रचित् ।
इति बुध्या सदाचारो लिङ्गप्राणीति कथ्यते ॥

एवमाचारलिङ्गैकतत्परो मां समाश्रयेत् ।
प्रतिपाद्य स नित्यत्वं गाणापत्यमवाप्नुयात् ॥

एवं प्रसादलिङ्गस्य स्थलं च श्रुणु तत्त्वतः ।
अन्यद्रव्यरुचिं त्यक्त्वा पूर्वभोज्यादिवर्जितः ॥

प्रसादलिङ्गमोही स्यादन्यमोहविवर्जितः ।
प्रसादलिङ्गभक्तस्तु पूर्वाहारनिरासकः ॥

[5]देवि प्रसादलिङ्गस्य पूजकोऽनन्यपूजकः ।
परवित्तं परस्त्रीश्च परमैत्रीं परश्रियम् ॥

---

[1] सुरादि. [2] शरीरपातपर्यन्तम्. [3] स्यादाचार. [4] श्रुणुयान्नहि. [5] देवीप्र.

त्यक्त्वा प्रसादलिङ्गैकपरः स्यान्निस्पृहः सदा।
[1]आदानार्थं च दानार्थं करौ नैव प्रसारयेत् ॥

नैव किंचित् [2]प्रसादान्यत् प्रसादी क्वापि संस्पृशेत्।
न कुर्याज्जीवहिंसां च परैर्वा नापि कारयेत् ॥

प्रसादलिङ्गप्राणी स्यान्न भवेदात्म[3]भावकः।
इत्थं प्रसादलिङ्गैकपरो भूतदयान्वितः ॥

यः पूजयति मां देवि मत्सायुज्यमवाप्नुयात्।
चरलिङ्गस्थलेऽप्येवं भक्तस्याचरणं शृणु ॥

कुलं चैव कुलाचारं नियमं च विवर्जयेत्।
चरलिङ्गैकमोही स्यादन्यमोहविवर्जितः ॥

त्यक्ताभिमानो देहादौ जङ्गमैकाभिमानवान्।
चरलिङ्गैक[4]भक्तः स्यादन्यभक्तिविवर्जितः ॥

अन्यपूजां परित्यज्य चरलिङ्गं प्रपूजयेत्।
स्वयं च चर[5]लिङ्गैकपूजकोऽनन्यपूजकः ॥

अर्थप्राणादिकं सर्वं प्रीत्या कुर्याच्चरार्पितम्।
[6]चरलिङ्गस्य वीरः स्यादन्यद्भूयोऽपि न स्मरेत् ॥

सर्वं चरार्पितं कृत्वा तत्प्रसादं विशेषतः।
यो भुङ्क्ते चरलिङ्गस्य प्रसादी नान्यलोलुपः ॥

शिवलाञ्छन[7]संयुक्तश्चिदद्वैतमदात्मकः।
अयं तु चरलिङ्गैक[8]प्राणः स्यान्नान्यमानसः ॥

एवं मद्रूपतापन्नं चरलिङ्गं समर्चयन्।
गणत्वं प्राप्य सुचिरं मोदते घनलीलाया ॥

[9]शिवलिङ्गस्थलेष्वेवं षड्विधं व्रतमाचरेत्।
शिवलिङ्गैकमोहः स्यादन्यमोहविवर्जितः ॥

---

[1] अदानार्थं. [2] प्रसादः स्यात्. [3] बाधकः. [4] भक्तिः. [5] लिङ्गस्य
[6] चरलिङ्गैकवीरः. [7] संयुक्तान् बिन्दद्वैतमदात्मकान्. [8] प्राणी. [9] जीवलिङ्ग.

अनन्यदेवपूजः स्याच्छिवलिङ्गैकपूजनः ।
शिवलिङ्गै[1]कवीरः स्यात्पुण्यक्षेत्रादिनिस्पृहः ॥

शिवलिङ्गप्रसादी स्यान्निर्द्वन्द्वो[2]ऽनन्यकाङ्क्षकः ।
यः सदा शिवलिङ्गैकप्राणो भोगविवर्जितः ॥

एवं भेदेन मां देवि पूजयेल्लिङ्गरूपिणम् ।
गाणापत्यं भवेत्तस्य दुर्लभं प्राकृतात्मनाम् ॥

महालिङ्गस्थलेऽप्येवं [3]विच्छेदः कथ्यतेऽधुना ।
[4]त्यक्तलोकसमाचारो लिङ्गनिष्ठैकमानसः ॥

स महालिङ्गमोही [5]स्यादन्यमोहविवर्जितः ।
पूर्वभक्तस्थलं त्यक्त्वा पूर्वकर्म विवर्जयेत् ॥

स महालिङ्गभक्तः स्यादन्यभक्तिविवर्जितः ।
त्यजेत्संसर्गमन्येषां सहवासादिकं त्यजेत् ॥

शुद्धसत्वाश्रयो यस्तु स महालिङ्गपूजकः ।
सृष्टिस्थितिलयाद्यं यज्जीवकृत्यं न च स्मरेत् ॥

स महालिङ्गवीरः स्यान्नान्यलिङ्गसमाश्रयः ।
पूर्ववासादिकं सर्वमन्तर्लिङ्गे निवेशयेत् ॥

महालिङ्गप्रसादी स्यात् पङ्क्तिभोजनवर्जितः ।
बाह्यार्चनाद्यं संत्यज्य भवेदान्तरपूजकः ॥

आत्मार्पणान्महालिङ्गप्राणी भवति पार्वति ।
महालिङ्गस्थलेऽप्येवं मानसैरुपचारकैः ॥

अर्चयेद्यस्तु मां नित्यं मम सायुज्यमाप्नुयात् ।
एवं लिङ्गस्थलं देवि तदङ्गस्थलयोगतः ॥

एकैकं षड्विधं प्रोक्तं तेन षट्त्रिंशदात्मकम् ।
पूर्वपूजासमायोगादुत्तरोत्तरमाश्रयेत् ॥

तस्मादेकं परं लिङ्गं नामरूपक्रियात्मना ।
संस्थितं ज्ञानकर्मभ्यामङ्गेऽस्मिन् षट्स्थलात्मके ॥

---

[1] कपूजः. [2] ऽन्यानपेक्षकः. [3] विभेदः. [4] सत्यलोक. [5] स्याल्लिङ्गमोह.

इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे ।
आत्मनि स्याद्भावलिङ्गमेवं [1]ज्ञेयं नगात्मजे ॥

जिह्वाङ्गे गुरुलिङ्गं स्यादाचारं नासिकाङ्गके ।
प्रसादलिङ्गं श्रोत्राङ्गे त्वगङ्गे चरलिङ्गकम् ॥

दृगङ्गे शिवलिङ्गं स्यान्महालिङ्गं हृदि स्थिम् ।
[2]एकं कर्मेन्द्रियाङ्गेषु लिङ्गयोगं विदुर्बुधाः ॥

आचारलिङ्गं यत् प्रोक्तं शिवलाञ्छनसंयुतम् ।
आचारलिङ्गसंबन्धिगुरुलिङ्गमुदाहृतम् ॥

गुरुलिङ्गोपदिष्टं यच्छिवलिङ्गमुदाहृतम् ।
शिवलिङ्गमुखं यच्च चरलिङ्गमुदाहृतम् ॥

चरलिङ्गोपलब्धं च लिङ्गं प्रासादमुच्यते ।
प्रसादानुग्राहकं स्यान्महालिङ्गमिति क्रमात् ॥

गुरुलिङ्गस्थलादीनां संबन्धं चोत्तरोत्तरम् ।
ज्ञात्वा लिङ्गाङ्गयोरर्थं तत्संबन्धं च पार्वति ॥

गुरूक्तेनैव मार्गेण जानीयात्सूक्ष्मभावतः ।
एवं लिङ्गाङ्गसंबन्धज्ञानं गोप्यं सुदुर्लभम् ॥

उपदिष्टं तव प्रीत्या मोक्षमार्गैकसाधनम् ।
वीरशैवपरो भूत्वा यजेन्मां लिङ्गरूपिणम् ॥

स एव सर्वतत्त्वज्ञो ज्ञेयः सर्वोत्तमोत्तमः ।
क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाधिकाः ॥

पशुभ्योऽपि नराः श्रेष्ठास्तेषु श्रेष्ठाः द्विजातयः ।
द्विजातिष्वधिका विप्रा विप्रेषु कृतबुद्धयः ॥

कृतबुद्धिषु कर्तारस्तेभ्यः सन्न्यासिनोऽधिकाः ।
तेषु विज्ञानिनः श्रेष्ठास्तेषु शङ्करपूजकाः ॥

तेषु श्रेष्ठा महाभागाः मम लिङ्गाङ्गसङ्गिनः ।
लिङ्गाङ्गसङ्गिष्वधिकाः षट्स्थलज्ञानसंयुताः ॥

---

[1] ज्ञेयमगात्मजे. [2] एवं.

तस्मात्तेभ्योऽधिकतरा लोके सन्ति न वै जनाः ।
एवं षट्स्थलभेदाश्च तत्स्वरूपं च कीर्तितम् ॥
पूर्वोक्तानादिभक्तस्य नित्यं निर्मलताजुषः ।
एतानि षट्स्थलान्येव तत्त्वं जानीहि षडङ्गकम् ॥ ?
इदमेव परं ब्रूमो हितं तव विशेषतः ।
यदुक्तो भवता स्वामिन् शैवदीक्षाविधिक्रमः ॥
विस्तरेण कृपालुस्त्वं वद भक्तिरतीव मे ।

शिव उवाच—

दीयते कर्मसंबन्धः क्षीयते च मलत्रयम् ॥
दीयते क्षीयते येन दीक्षेत्येषा निगद्यते ।
सेयं दीक्षा द्विधा भिन्ना साधाराधारवर्जिता ॥
आचार्यमन्तरेणैव क्रियते शङ्करेण या ।
विज्ञानाकलनान्नश्च प्रलयाकलकस्य च ॥
तीव्रशक्तिनिपातेन दीक्षा साधारवर्जिता ।
गुरुमूर्तिं समाश्रित्य मन्दशक्तिनिपातनात् ॥
कुरुते सकलस्येशः साधारां तामिमां विदुः ।
सा दीक्षा द्विविधा प्रोक्ता सबीजाबीजचिन्मया ॥
यथाक्रमं कर्म भवेत् ।'' इत्यादि दीक्षापि वक्ष्यमाणरूपेण षट्स्थलज्ञानिनां कर्तव्येति षट्स्थलज्ञानं मोक्षसाधनम् ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलामिश्रश्रीनीलकण्ठ-
शिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारे
चतुर्विंशोपदेशः

पञ्चविंशोपदेशः

पञ्चविंशोपदेशोऽस्मिन् शैवदीक्षा[1]विधिक्रमः ।
वर्ण्यते वीरशैवा[2]नामागमोक्तानुसारतः ॥

[1] विधिः क्रमात्–पा. [2] नां मुदे शिष्यानुसारतः–पा.

ननु दीक्षाशब्दस्य 'दीक्षा[1]मौञ्ज्युपनयननियमव्रतादेशेषु' इति व्रतादेश[2]रूपा दीक्षा पाशुपतविरजादीक्षादिपरा, वीरशैवानुकूलत्वात्। इयं दीक्षा तान्त्रिकी वा, वैदिकी वा, वैदिकत्वे सति तान्त्रिकी वा। नाद्यः। वैदिकत्वं पुरस्कृत्य [3]तावत्पर्यन्तमुपपादनेन विवक्षितार्थविरोधात्। अत एव न वैदिकीयं दीक्षा। न दिवा मूत्रपुरीषे कुर्यात् यदि कुर्याच्छायायां मूत्रं चिकीर्षन् तृणं लोष्टं वापादायेति मन्त्रविशेषविधानात्। श्वापदावमृष्टमभिमन्त्रयते। स्वप्नेऽन्नं भुक्त्वा मन्त्रविशेषैरुपयुक्तकर्मविधानात् प्राग्वंशेऽन्नभोजनादिनियमात्। कनीयः कनीयो व्रतमुपेयादिति वैदिकनियमानामनेकेषां प्रतिपादनेन तादृशनियमगन्धस्याप्यभावात्। नापि वैदिकतान्त्रिकत्वम्; वीरशैवीयदीक्षायाः क्वापि वेदेष्वदृष्टत्वात्। तस्मात् केवलतान्त्रिकत्वम्। दीक्षायामनुष्ठेयधर्माधिकारसंपादकत्वेन तद्धर्माणामष्टावरणपञ्चाचाराणामपि न वैदिकत्वम्। किं तु तान्त्रिकत्वमिति प्राप्ते—

ब्रूमः; दीक्षाशब्दस्यानेकार्थत्वेनेज्यार्थकदीक्षां पुरस्कृत्योक्त[4]दीक्षानियमानां विधानान्नियमवाचकवीरशैवदीक्षाया अन्यत्वेनोक्तनियमानां सन्नियोगशिष्टदीक्षापरत्वे[5]नाधिकृतत्वाद्यर्त्किंचिदेतत्। दीक्षाशब्दितानां विभूतिप(दा)ट्टादीनां "भूत्यै न प्रमदितव्यम्" "लिङ्गाङ्गशोभा मोक्षमार्गैकनिष्ठा अमृतस्य" इत्यादिप्रत्यक्षश्रुत्यैव विधानाद्दीक्षाशब्दितानां वीरशैवनियमानां वैदिकत्वं सार्वजनीनम्॥

ननु तर्हि जननतदितरादिप्रयुक्तसूतकपञ्चकस्याप्यनुष्ठानं स्यात्, वेदवाक्यैरेव रजस्वलादिविषये "यदि मलवद्वासाः स्यात्" इत्यनूद्य "अखर्वेण वा पात्रेण" इति विधानादिति चेन्न; तत्परित्यागस्यापि नियमरूपत्वेन ब्रह्मचारियतीनां सूतकमिव शावादिष्वग्निहोत्रानुष्ठानस्यार्द्रवस्त्रेण तात्कालिकशुद्धिवदिति संक्षेपः॥

---

[1] मौण्डयेज्योपनयन—**पा.** [2] रूपत्वात् दीक्षा—**पा.** [3] एतावत्पर्यन्तं प्रतिपादनेन—**पा.** [4] दीक्षावयवानां—**पा.** [5] नोक्तत्वाद्यर्त्किंचिदेतत्, नाप्रकृतत्वाद्यर्त्किंचिदेतत्—**पा.**

शिव उवाच—

दीयते कर्मसंबन्धः क्षीयते च मलत्रयम् ।
दीयते क्षीयते येन दीक्षेत्येषा निगद्यते ॥

सेयं दीक्षा द्विधा भिन्ना साधाराधारवर्जिता ।
आचार्यमन्तरेणैव क्रियते शङ्करेण या ॥

विज्ञानाकलनाम्नश्च प्रलयाकलकस्य च ।
तीव्रशक्तिनिपातेन दीक्षा साधारवर्जिता ॥

गुरुमूर्तिं समाश्रित्य मन्दशक्तिनिपातनात् ।
कुरुते सकलस्येशस्साधारां तामिमां विदुः ॥

सा दीक्षा द्विविधा प्रोक्ता सबीजाबीजचिन्मया ।
यथाक्रमं कर्मभक्तिज्ञानकाण्डेषु ताः स्मृताः ॥

अथ निर्बीजदीक्षाया (द्वे) द्विधा भेदो निगद्यते ।
सद्यो निर्वाणदा त्वाद्या चिरनिर्वाणदा परा ॥

प्रारब्धसंचितागामिकर्मजालं विशोध्यते ।
अतितीव्रेण पातेन शरीरादि जुगुप्सताम् ॥

ययात्यन्तविरक्तानां सद्यो निर्वाणदा तु सा ।
प्रारब्धकर्मणां भोगे यया मुक्तिं निरन्तरम् ॥

यान्ति बालादयः सेयं चिरनिर्वाणदा भवेत् ।
शिवस्यानुग्रहाद्दीक्षा जायते कर्तृकर्मणः ॥

सा चानेकविधा प्रोक्ता तत्प्रपञ्चोऽयमुच्यते ।
समासाच्च द्विधा सेयं दीक्षा तज्ज्ञैरिहोच्यते ॥
(' एका भवेज्ज्ञानवती 'त्यादिवायवीयसंहितायां द्रष्टव्यम् ।)

एका भवेज्ज्ञानवती क्रियावत्यपरा स्मृता ।
विनेज्यानलकर्माणि मनोव्यापारमात्रतः ॥

दीक्षा ज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधजा ।
इज्यानलवती या तु क्रियाकौशलसंभवा ॥

क्रियावत्यथ सा द्वेधा निर्बीजा च सबीजका ।
तत्र निर्बीजका या सा जननीपुत्रयोर्वरम् ॥

सबीजा च भवेद्दीक्षा साधकाचार्ययोरपि ।
अथ निर्बीजका दीक्षा प्रोक्ता सा द्विप्रकारिका ॥
एका निर्वाणदा सद्यो द्वितीया देहपाततः ।
बालबालिशवृद्धस्त्रीभोगमुक्त्यभिलाषिणाम् ॥
भवेन्निर्बीजिका दीक्षा समयाचारशुद्धिदा ।
विदुषां च समर्थानां सबीजा परिकीर्तिता ॥
सबीजा च त्रिधा भिन्ना प्रथमा शिवधर्मिणी ।
आचार्यगोचरा प्रोक्ता साधके लोकधर्मिणी ॥
धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम् ।
संस्कृत्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी ॥
यत्र रुद्रपदे योगो योगो यश्चैश्वरे पदे ।
अधर्मसञ्चितं सर्वकर्मागामीव शोध्यते ॥
[1] कर्माविशेषिते यत्र सा दीक्षा लोकधर्मिणी ।
भौतिकी नैष्ठिकी चेति द्विधा सा शिवधर्मिणी ॥
व्रतमोक्षसमायुक्ता भौतिकीति निगद्यते ।
भौतिकः काम्य इत्युक्तस्तत्सन्तानक एव वा ॥
शरीरपातपर्यन्तव्रता सा नैष्ठिकी मता ।
चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ॥
शास्त्री च योगदीक्षा च होत्रीत्यादिरनेकधा ।
चक्षुरुन्मीलयंस्तत्त्वं ध्यात्वा शिष्यं समीक्षयेत् ॥
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत् ।
निधाय दक्षिणे हस्ते शिवं सर्वाङ्गसंयुतम् ॥
संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम् ।
तत्त्वे चित्तं समाधाय बृंहितान्तरचेतसा ॥
उच्चरेत्संहितामन्त्रान् वाग्दीक्षेयं समीरिता ।
मनस्सन्निधिमात्रेण मानसीत्यभिधीयते ॥

---

[1] कर्मावशोषते—पा.

शास्त्रस्य संप्रदानेन शास्त्री दीक्षा समीरिता ।
योगेन योगदीक्षा स्याच्छिवत्वे [1]साप्यवस्थिता ॥

[2]इज्याकुण्डवती होत्री सा द्विभेदा किलोदिता ।
शक्तिपातविभेदेन पाशभेदेन सा भवेत् ॥

शक्तिपात[3]विभेदाङ्गं लक्षणं वक्ष्यते क्रमात् ।
अधर्मधर्मयोः साम्ये जाते शक्तिः पतत्यसौ ॥

आज्ञोपमादिभेदेन सा पुनः सप्तधा भवेत् ।
गुर्वाज्ञापालने दीक्षा सा चाज्ञेति प्रकीर्तिता ॥

पूर्वेषां समयाचारसदृशी चोपमा स्मृता ।
आरोप्य स्वस्तिकां शिष्यं गुरोरीक्षणकर्मणा ॥

स्वस्तिकाकलश[4]स्नानमभिषेकाह्वया च सा ।
भूतिपट्टमयी दीक्षा भस्मना परिकीर्तिता ॥

शिष्यस्य फाले गुरुणा समयाचारमार्गतः ।
आचार्यो लिङ्गमादाय समभ्यर्च्य यथाविधि ॥

शिष्यस्यालोकनं सम्यगायत्ता परिकीर्तिता ।
प्रह्वीभूय ततः शिष्यो लिङ्गं स्वीकृत्य भक्तितः ॥

गुरोः स्वायत्तमित्युक्तं स्वोत्तमाङ्गादिधारणम् ।
सा दीक्षा त्रिविधा ज्ञेया [5]वेधामन्त्रक्रियात्मिका ॥

शिवासनमिति ज्ञात्वा शिष्यमूर्ध्नि [6]यथागमम् ।

यः शिवत्वसमावेशः इत्यादि शिवत्वसमावेशस्य वेधादीक्षात्वं प्रतिपादितमिदं सर्वमसङ्गतम् । दीक्षाया लिङ्गधारणादिपञ्चाचाराष्टावरणयोग्यतानिर्वहणाङ्गत्वेन शेषशेषिभावो दरीदृश्यते । तथैव पूर्वतन्त्रे 'यदीष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इत्यत्र एकादीक्षापक्षेषु दीक्षाणीयासोमयागयोरन्यतरस्यै[7]तद्वाक्यप्राप्तपर्वकालत्वस्यासंभवादावश्यके त्यागे प्रधानानुग्रहस्यैवोचितत्वाद्गुणभूताया दीक्षणीयाया

[1] साप्यवस्थिता. [2] राज्ञः कुण्डवती. [3] विभेदाङ्गं. [4] स्नानादभिषेक. [5] वेदमन्त्र. [6] यथाशिवम् . [7] स्यैकवाक्य–पा.

एव त्याग इति निर्णीतम्। एवमेवाहीनचयनप्रकरणे रत्नघचित-स्वर्णेष्टकोपधाने यज्ञपुरुषसंमितमित्यादीनामुत्तममध्यमाधमाङ्गुलि-काण्डानां परिमितत्वेन प्रसिद्धे तदङ्गभूते तार्क्ष्यचयने उपधानद्रव्य-त्वेन प्रसक्तस्य शर्करानिचयस्यैककालत्वेन प्राप्तयोरङ्गाङ्गिभावेन प्रधा-नोपसर्जनतया निबद्धयोर्द्वयोर्वस्तुतः प्रधानैककालानुष्ठानाशक्ता-वन्यतरस्योक्तकालपरित्यागेऽङ्गस्यैवोक्तकालपरित्यागस्य अङ्गगुणा-धिकरणन्यायेनोपसर्जने तद्भावोपवर्णनस्यैव मुख्यतया नेयत्वात्। प्रकृते च शिवत्वसमावेशस्य वेधादीक्षायां लिङ्गधारणमन्त्रोपदेशा-दावपि प्रतिपादितत्वेन पूर्वावस्थितस्य समवधानस्य वर्णनीयत्वा-च्छिवत्वसमावेशस्य नित्यत्वेन प्रतिपादनेन समावेशे वेधादीक्षायां कृते पुनर्लिङ्गधारणादौ शिवत्वसमावेशस्यासंभवेन मुख्ये लिङ्ग-धारण एव शिवत्वसमावेशस्य वक्तव्यतया वेधादीक्षायां शिवत्व-समावेशस्य परित्यागेन तदर्था दीक्षा सुतरां न युज्यत इति चेन्न ; 'स्वर्गकामो ज्योतिष्टोमेन यजेत' 'स्वर्गकाम इष्ट्या यजेत' इति-वत्स्वर्गस्य सुखविशेषस्य वैलक्षण्यं ज्योतिष्टोमेनान्यत्स्वर्गरूपं सुखमन्यत्सुखमिष्ट्या इति वा शिवत्वसमावेशस्य लिङ्गधारणे-ऽतिशयितत्वेन दीक्षायां यत्किंचित्समावेशस्याङ्कुरोपचयक्रमेण दीक्षाभूतिधारणरुद्राक्षधारणपञ्चाक्षरोपदेशेषु पूर्वपूर्वविलक्षणस्य शिवत्वसमावेशस्य सुवचत्वेन, पूर्वतन्त्रानुरोधेन च,

यः शिवत्वसमावेशो वेधादीक्षेति सा मता।
मन्त्रदीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी॥

लिङ्गोपदेशिनी प्रोक्ता क्रियादीक्षा क्रियोत्तरा।
रससिद्धं यथा ताम्रं ताम्रभावाद्विमुच्यते॥

सुवर्णेन तथैकत्वं गतं तद्याति हेमताम्।
नवनीतं यथा तप्तं तत्स्वभावं परित्यजेत्॥

घृतभावं समापन्नं न याति नवनीतताम्।
यथा शुक्तिगतं तोयं मौक्तिकं जायते ध्रुवम्॥

न पुनस्तोयतां याति मौक्तिकत्वं न मुञ्चति।
एवं स शिवतां प्राप्तो न पुनर्जीवतां व्रजेत्॥

शिवत्वान्न च हीयेत विमुक्तो दीक्षया भवेत् ।
सा दीक्षा गुरुणा कार्या स गुरुः कथ्यतेऽधुना ॥

आश्रमाणां समस्तानां गृही स्यादुत्तमो गुरुः ।
यथाहं सर्वलोकानां गुरुरम्बिकया सह ॥

ब्रह्मचारी द्विधा प्रोक्तो नैष्ठिको भौतिकस्त्विति ।
नैष्ठिको मध्यमो ज्ञेयो भौतिकस्तु ततोऽधमः ॥

आकौमाराद्ब्रह्मचारी यावज्जीवं स नैष्ठिकः ।
व्यवस्थीकृतकालान्तं ब्रह्मचारी पुनर्गृही ॥

स भौतिक इति ज्ञेयस्तौ गुरू मध्यमाधमौ ।
वानप्रस्थयतीनां तु गुरुत्वं नेष्यते क्वचित् ॥

स्वयमेव यतीनां तु यतिर्गुरुरथापि वा ।
वानप्रस्थो द्विधा प्रोक्तः साग्निकोऽनग्निकस्तथा ॥

सदारः साग्निको ज्ञेयस्त्वदारोऽनग्निकः स्मृतः ।
साग्निकस्य गुरुत्वं स्यान्नेष्यतेऽनग्निकस्य चित् ॥

मठस्थलसमुत्पन्नः शान्तः शैवागमार्थवित् ।
[1]अनूचानः प्रसन्नात्मा शिवदीक्षाभिषेचितः ॥

शिवागमज्ञो मतिमाञ्छिवपूजापरायणः ।
रुद्राक्षमालां बिभ्राणस्त्रिपुण्ड्राङ्कितमस्तकः ॥

विशुद्धदेहः [2]कुलजः शिवाचारसमन्वितः ।
भस्मोद्धूलननिष्णातो भस्मतत्त्वविवेकवान् ॥

वर्णाश्रमक्रियानिष्ठो धर्मविच्छास्त्रकोविदः ।
मिताशी मितनिद्रश्च मितवाग्योगतत्परः ॥

जितेन्द्रियो जितद्वन्द्वस्तपश्शीलो दयापरः ।
स्थिरबुद्धिः स्थिरारम्भः शिवपूजादिकर्मवित् ॥

सत्यवागूर्जितः प्राज्ञो मेधावी नियतः शुचिः ।
लिङ्गाङ्गस्थलभेदज्ञः षट्स्थलज्ञानतत्परः ॥

---

[1] अनुज्ञातः. [2] कुशलः.

वयष्षोडशकादूर्ध्वं सप्ततेरध इष्यते ।
व्यासमुद्राविधानज्ञो ह्यङ्कुरार्पणतत्त्ववित् ॥
शिवसिद्धान्ततत्त्वज्ञष्षडध्वज्ञानतत्परः ।
नित्याधिकारकुशलो नैमित्तिकविचक्षणः ॥
काम्याधिकारचतुरो दीक्षाकर्मणि कर्मठः ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठ-
शिवाचार्यकृते निगमागमसारसर्वस्वसङ्ग्रहे क्रियासारे
दीक्षाविधानं नाम पञ्चविंशोपदेशः

षड्विंशोपदेशः

उपदेशोऽथ षड्विंशे सगुणध्यानमुच्यते ।
सामरस्यानुगुण्येन शिवस्य परमेशितुः ॥

कृष्णः—

भगवन् भवता सम्यङ्निष्कलध्यानमीरितम् ।
अधिकारी च तध्याने वर्णितः क्रमशः पुरा ॥
इदानीं श्रोतुमिच्छामि सकलस्य महेशितुः ।
ध्यानप्रकारं दयया मयि ब्रूहि तपोधन ॥

उपमन्युः—

श्रुणु वक्ष्यामि ते कृष्ण ध्यानं सकलमीशितुः ।
अनन्तपूर्वपुण्यात्तलिङ्गाङ्गैक्यानुसन्धिमान् ॥
गुरुप्रसादसंपन्नः सदा सद्भक्तिभावितः ।
धृतलिङ्गोऽनघः शान्तो भस्मरुद्राक्षभूषणः ॥
विविक्ते च समासीनो ध्यायीतैवं महेश्वरम् ।
मध्ये हृदयपाथोजं महादेवासनोचितम् ॥
महिताकारशोभाढ्यं मण्टपं परिचिन्तयेत् ।
अतिचिन्तामणिप्रख्यैरतिकौस्तुभकान्तिभिः ॥

रत्नैरप्राकृतैर्लोकं रञ्जयन्तं समन्ततः ।
दक्षिणद्वारपार्श्वे तु संस्मरेन्नन्दिकेश्वरम् ॥

अनेकरुद्रप्रमथभूतसङ्घैर्निषेवितम् ।
शिवधर्ममहाध्यक्षं शिवान्तःपुरपालकम् ॥

चामीकराचलप्रख्यं सर्वाभरणभूषितम् ।
बालेन्दुमकुटं सौम्यं चतुर्बाहुं त्रिलोचनम् ॥

दीप्तशूलमृगीटङ्कहेमवेत्रधरं विभुम् ।
चन्द्रबिम्बाभवदनं हरिवक्त्रमथापि वा ॥

उत्तरद्वारपार्श्वे तु तत्पत्नीं मरुतां सुताम् ।
सुयशां सुव्रतामम्बां पादमण्डनतत्पराम् ॥

सहितां रुद्रकन्याभिः सखीभिश्चाप्यनेकशः ।
मध्येऽथ मण्टपस्यास्य वेदिकां विपुलप्रभाम् ॥

चतुस्तम्भयुतां मध्ये चतुरश्रमनोहराम् ।
तस्यां शक्त्यादिशक्त्यन्तं तन्वीत परमासनम् ॥

आधारशक्तिं श्यामाङ्गीमादौ धृतवराभयाम् ।
तस्याः पुरस्तादुत्कण्ठमनन्तं कुण्डलाकृतिम् ॥

तस्योपरि शुभं ध्यायेत् सिंहासनमुमापतेः ।
धर्मो ज्ञानं च वैराग्यमैश्वर्यं च तदङ्घ्रयः ॥

आग्नेयादिस्थिताः श्वेतपीतरक्तहरिप्रभाः ।
सिंहाकाराः सिंहकोट्या प्रत्येकं परिवारिताः ॥

अधर्मादीनि पूर्वादिफलकानि समन्ततः ।
राजावर्तप्रकाशानि नवाकारधराणि च ॥

मध्यमं फलकं तस्य साक्षाल्लक्ष्मीपतिः स्वयम् ।
तस्मिन् प्रागादिमध्यस्थप्रणवादिस्वराष्टकम् ॥

योगासनं विभोर्ध्यायेत्कूर्माकृत्यनलप्रभम् ।
तस्योर्ध्वछदनं पद्ममासनं विपुलं स्मरेत् ॥

शिवधर्ममहाकन्दं शिवज्ञानैकनालकम् ।
अष्टैश्वर्यदलोपेतं पूर्वादिपरितः क्रमात् ॥

अष्टवामादिशक्त्यङ्गं रुद्रकल्पितकेसरम् ।
वैराग्यकर्णिकं शुभ्रं वामादिनवबीजकम् ॥

वामा ज्येष्ठा च रौद्री च काली विकरिणी तथा ।
बलपूर्वा विकरिणी बलप्रमथिनी तथा ॥

अष्टावेताः सर्वभूतदमन्या सह शक्तयः ।
केसरेषु स्थिता ध्येया रक्ताभा धृतचामराः ॥

कलाधरकलाद्योतकर्णिकायां मनोन्मनी ।
स्मर्तव्येशानदिग्भागे पाशाङ्कुशवराभयैः ॥

पद्मासनस्थितं ध्यायेद्देवस्य विमलासनम् ।
गणाम्बिका महादेवी तन्नो गौरी प्रचोदयात् ॥

क्रान्तं शक्तिभिरेताभिः सौम्यादिविमलासनम् ।
तस्योपरि गुणानां च मण्डलानां च साधकः ॥

तत्त्वानामपि मूर्तीनां त्रितयानि विभावयेत् ।
सर्वासनोपरि सुखं विचित्रकुसुमास्तृतम् ॥

परं व्योमावकाशाख्यमासनं कल्पयेद्विभोः ।
तस्मिन् सदाशिवं ध्यायेद्वृद्धपद्मासने स्थितम् ॥

शुद्धस्फटिकसङ्काशं प्रसन्नं शीतलद्युतिम् ।
विद्युद्वलयविद्योतजटामकुटमण्डितम् ॥

शार्दूलचर्मवसनं मन्दस्मितमुखाम्बुजम् ।
रक्तपद्मदलप्रख्यपाणिपादतलाधरम् ॥

द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितम् ।
दिव्यगन्धानुलिप्ताङ्गं दिव्यमाल्यैरलङ्कृतम् ॥

पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ।
दक्षिणे शूलवज्रासिपरश्वभयमुद्रिकाः ॥

वामे च दधतं नागपाशघण्टानलाङ्कुशान् ।
[1]तस्योर्ध्ववक्त्रं विलसद्वाल्यमिन्दुकलाधरम् ॥

---

[1] अस्योर्ध्व.

ध्यानस्थमूर्ध्वाभिमुखं गगनच्छायया सितम् ।
पूर्ववक्त्रं महेन्द्रस्य छायया कनकप्रभम् ॥

बालेन्दुमकुटं सौम्यं संप्राप्तनवयौवनम् ।
दक्षिणं वदनं कालच्छायया चाञ्जनप्रभम् ॥

भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ।
दंष्ट्राकरालं दुर्धर्षं स्फुरिताधरपल्लवम् ॥

चन्द्रापीडं ज्वलत्केशं किंचिच्चलितयौवनम् ।
उत्तरं यक्षराजस्य छायया विद्रुमप्रभम् ॥

ललाटतिलकोपेतं नीलालकविभूषितम् ।
सविलासं त्रिणयनं सर्वाभरणभासुरम् ॥

अङ्गनाकृति बिम्बोष्ठं सलीलभ्रूलताञ्चितम् ।
पश्चिमं पाशहस्तस्य छायया चन्द्रसन्निभम् ॥

चन्द्रोत्तंसं नृपाकारं सितभस्मावकुण्ठनम् ।
इति ध्यात्वा पुनरपि ध्यायेदेवं सदाशिवम् ॥

इच्छाज्ञानक्रियाशक्तिविलसल्लोचनत्रयम् ।
बालचन्द्रकलाचूडं दशदिग्बाहुमण्डलम् ॥

त्रैगुण्यादिमयैर्भातं दिव्यैर्दशभिरायुधैः ।
सर्वज्ञतादिसंसिद्धहृदयादिषडङ्गकम् ॥

पञ्चब्रह्मात्मवदनं पञ्चसादाख्यवक्त्रकम् ।
श्रीमत्पञ्चाक्षरमयं प्रणवाकारशालिनम् ॥

समस्तमन्त्ररूपं च वर्णब्रह्मकलामयम् ।
निवृत्त्या [1]जानुसंबद्धमानाभेश्च प्रतिष्ठया ॥

आकण्ठं विद्यया [2] तद्वदाललाटं तु शान्तया ।
तदूर्ध्वं शान्त्यतीताख्यकलया [3]परया तथा ॥

एवं पञ्चकलारूपमिदं सादाशिवं वपुः ।
चतुर्मुखी तटिद्वर्णा निवृत्तिर्वज्रधारिणी ॥

---

[1] जानुपर्यन्त. [2] स्निग्धमाल. [3] परिशोभितम्.

एकवक्त्रा शशाङ्काभा प्रतिष्ठा पद्मधारिणी ।
अग्निवर्णा त्रिवदना विद्या शक्तिलसत्करा ॥

कृष्णवर्णा चतुर्वक्त्रा शान्तिर्ध्वजविधारिणी ।
पाशभृत् पञ्चवदना शान्त्यतीता शशिप्रभा ॥

सर्वाः पद्माक्षमालाभ्यामभयेन विराजिताः ।
चतुर्भुजास्त्रिणेत्राश्च पीनोन्नतपयोधराः ॥

आसां पञ्चाध्वगर्भत्वात् षडध्वात्मा सदाशिवः ।
मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनाध्वकः ॥

तत्त्वाध्वा च कलाध्वा च षडध्वान इमे मताः ।
चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम् ॥

भुवनाध्वा स संचिन्त्यो रोमवृन्दात्मना विभोः ।
पञ्चाशद्रुद्ररूपैस्तु वर्णैर्वर्णाध्वकल्पना ॥

असौ त्वगात्मना चिन्त्यो देवदेवस्य शूलिनः ।
सप्तकोटिमहामन्त्रैर्मूलविद्यासमुद्भवैः ॥

मन्त्राध्वा रुधिरात्मासौ विचिन्त्यः पार्वतीपतेः ।
अनेकभेदसंपन्ना मन्त्राध्वा पदसंहतिः ॥

पदाध्वासौ पशुपतेः शिरामांसतया स्थितः ।
पृथिव्यादीनि षट्त्रिंशत्तत्त्वान्यागमवेदिभिः ॥

उक्तान्यमीभिस्तत्त्वाध्वा शुक्रमज्जास्थिरूपधृत् ।
नास्य देहेऽस्ति रुधिरं न मांसं नास्थि किंचन ॥

प्रतिबिम्बमिवादर्शे शक्रचापमिवाम्बरे ॥

ज्योतिर्मयतया सिद्धमिदं सादाशिवं वपुः ।
तदापि कल्पनामात्रं कलाव्याप्यध्वनामिदम् ॥

ब्रह्मस्त्रीशानमूर्धा च पुरुषेण चतुर्मुखि ।
हृदयादीन्यघोरेण गुह्यादीनि तु वामतः ॥

सद्योजातेन मन्त्रेण पादादीनि जगत्पतेः ।
पञ्चमन्त्रतनुः शंभोरेवं कल्पनया भवेत् ॥

ओङ्कारबीजप्रभवः कलापञ्चकसंयुतः ।
शुद्धस्फटिकसंकाशः शुभमेधाविवर्धनः ॥

सदाशिवात्मा व्योमस्थ ईशानः परिकीर्तितः ।
गायत्रीप्रभवो मन्त्रः स्वर्णवर्णश्चतुष्कलः ॥

वश्यकृद्वन्धवाहस्थ ईश्वरः पुरुषः स्मृतः ।
अथर्वप्रभवो मन्त्रः कलाष्टकविभूषितः ॥

अभिचारकरोऽत्यर्थमञ्जनाद्रिसमप्रभः ।
अशेषाघहरः पुंसामघोरो रुद्रविग्रहः ॥

सामवेदोद्भवो मन्त्रस्त्रयोदशकलान्वितः ।
वामदेवः प्रवालाभो वारितत्त्वस्थितो हरिः ॥

यजुर्वेदोद्भवो मन्त्रः कलाष्टकयुतः सितः ।
शान्तिकृत् पृथिवीसंस्थः सद्योजातः पितामहः ॥

पञ्चवक्त्राः स्मृताः सर्वे दशदोर्दण्डमण्डिताः ।
खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ॥

वराभयोपेतकराः शूलपङ्कजपाणयः ।
अघोरो घोर एतेषु तदन्ये सौम्यविग्रहाः ॥

एवं ध्यात्वा सदेशस्य पञ्चब्रह्मात्मतां विभोः ।
तत्तद्ब्रह्मकलाभेदैर्विविच्याङ्गानि कल्पयेत् ॥

ईशानः सर्वविद्यानामित्येषा शङ्खपाण्डुरा ।
धूर्जटेरूर्ध्वमूर्धासौ शशिन्या सहिता कला ॥

ईश्वरः सर्वभूतानामित्येषा कुन्दसन्निभा ।
शर्वस्य पूर्वमूर्धासौ शक्त्या युक्ता गदाख्यया ॥

ब्रह्माधिपतिरित्यग्रे ब्रह्मणोऽधिपतिः सदा ।
ब्रह्मेत्येषा शशाङ्काभा सेष्टा मूर्धास्य दक्षिणे ॥

शिवो मे अस्त्विति कला शुद्धस्फटिकभास्वरा ।
महेशस्योत्तरे मूर्धा मरीचिरसवीचिका ॥

सदाशिवोमिति कला गोक्षीरधवलाकृतिः ।
शिवस्य पश्चिमो मूर्धा ज्वालिनीमेलनोज्वला ॥

कला तत्पुरुषायेति पूर्वा 'विद्महे' इत्यपि ।
शान्तियुक्ता जपावर्णा पूर्ववक्त्रं पुरद्विषः ॥

महादेवाय पूर्वाय 'धीमही'ति कला स्मृता ।
विद्यया सहिता कृष्णा दक्षिणं वक्त्रमीशितुः ॥

कला प्रतिष्ठासहिता 'तन्नो रुद्र' इति श्रुता ।
वक्त्रमुत्तरमीशस्य वर्णेन स्फटिकोपमा ॥

'प्रचोदया'दिति कला प्रतप्तकनकोपमा ।
शिवस्य पश्चिमं वक्त्रं निवृत्या नित्यसंहिता ॥

अघोरेभ्यः कला नीला हृदयं तमया युता ।
अथ घोरेभ्य इत्येषा [1] रक्तमोहसखीगले ॥

[2] सिताघोरतलस्कन्धे दक्षिणे क्षुधया युता ।
वामे निद्रायुता घोरा तरेभ्य इति कीरभा ॥

नीला मृत्युयुता नाभिः सर्वतः सर्वरूपिणी ।
कुक्षिः सर्वेभ्य इत्येषा शुभ्राभा मायया युता ॥

नमस्ते अस्तु रुद्रेति पृष्ठे रक्ताभया युता ।
वक्षो रूपेभ्य इत्येषा सचरा काञ्चनप्रभा ॥

वामदेवाय नम इत्येषा सिन्दूरसुन्दरा ।
रजया सहिता यादिमूलाधाराधरात्मिका ॥

लिङ्गे रक्षायुता पीता ज्येष्ठाय नम इत्यसौ ।
सव्योरुः सरतिर्नीला स्याद्रुद्राय नमः कला ॥

पीता सपाल्या वामोरुः कालाय नम इत्यसौ ।
शुक्ला कलकला वामा सहिता [3] जानुदक्षिणम् ॥

वामं विकरणायाथ नमश्श्यामाथ संयमा ।
सक्रिया दक्षिणा जङ्घा नीलाचलकला विभोः ॥

वामं विकरणायाथ नमो बुद्धियुतारुणा ।
विद्युद्वर्णा बलकला सव्या स्फिक्कार्यया युता ॥

---

[1] रक्तभोगा, रक्तमोहा सखीगला. [2] पीताघोरकला. [3] जानुलक्षणम्.

बलप्रमथनायाथ नमो धात्रीयुता सिता ।
बालार्काभा सर्वभूतदमनाय नमः कला ॥

भ्रामण्ययुतलावण्या कटिः कन्दर्पविद्विषः ।
सव्यपार्श्वं मनकला नीलाभा मोहिनीयुता ॥

उल्लसत्कीरपक्षाभा मन्मनाय नमः कलाम् ।
मनोन्मनीयुतां ध्यायेद्वामपार्श्वं पिनाकिनः ॥

सद्योजातं प्रपद्यामीत्येषा बालार्कसन्निभा ।
कलासिद्धिसमायुक्ता धूर्जटेर्दक्षिणं पदम् ॥

सद्योजाताय वै पूर्वा नम इत्यसिता कला ।
ऋद्धिशक्तेः सहचरी वामं गौरीपतेः पदम् ॥

नीला भवे कलाद्युत्या सहिता दक्षिणः करः ।
नीला भवे कलान्या तु वामे लक्ष्मीयुतः करः ॥

मेधासहचरी नासा पीता नातिभवे कला ।
भजस्व मामिति कला सकान्तिररुणं शिरः ॥

नीला भवकला बाहुर्दक्षिणः स्वधया युतः ।
उद्यदर्ककराभासामुन्मनाय नमः कलाम् ॥

धृतिशक्तियुतां ध्यायेद्वामबाहुं जगत्पतेः ।
अष्टत्रिंशत्कला देवास्त्रिणेत्राश्च चतुर्भुजाः ॥

वराभयपरश्वेणविलसत्करपङ्कजाः ।
तत्तद्ब्रह्मसमाकारवर्णायुधभृतोऽथवा ॥

एतेषां वामभागे तु विचिन्त्याश्शक्तयस्त्विमाः ।
पाशाङ्कुशाभयवरद्योतमानकराम्बुजाः ॥

श्रीकण्ठप्रमथान्रुद्रान् वर्णरूपान् सशक्तिकान् ।
प्रभोरवयवं ध्यायेदङ्गेषु न्यायवर्त्मना ॥

स्मरेत्सशक्तिकान्रुद्रानर्धनारीश्वराकृतीन् ।
सिन्दूरकाञ्चनप्रख्यवामदक्षिणपार्श्वकान् ॥

पाशाङ्कुशाक्षवलयवरमुद्राविराजितान् ।
प्रसन्नवक्त्रकमलान् विश्ववाञ्छितदायकान् ॥

कामिकं पादकमलं योगदं गुल्फयोर्युगम् ।
चिन्त्यं पादाङ्गुलीरूपं कारणं प्रसृतिद्वयम् ॥

अजितं जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः ।
गुह्यं बीजात्मकं सूक्ष्मं सहस्रं तु कटीतरम् ॥

पृष्ठभागोऽशुमानस्य नाभिः श्रीसुप्रभेदकम् ।
विजयं जठरं प्राहुर्निश्वासं हृदयात्मकम् ॥

स्वायम्भुवं स्तनद्वन्द्वमनलं लोचनद्वयम् ।
वीरागमः कण्ठदेशो रौरवं श्रवणद्वयम् ॥

मकुटं माकुटं तन्त्रं बाहू च विमलागमः ।
चन्द्रज्ञानमुरः शंभोर्बिम्बं वदनपङ्कजम् ॥

जिह्वा प्रोद्गीतमीशस्य ललितं गण्डयोर्युगम् ।
सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ॥

यज्ञोपवीतं शर्वोक्तं हारस्रक्पारमेश्वरम् ।
किरणं रत्नभूषास्य वातुलं वसनात्मकम् ॥

एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत् ।
शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकम् ॥

प्रणवस्य तु मात्राभिर्वर्णैः पञ्चाक्षरस्य च ।
वदनांसोरुयुगलं कल्पयेदम्बिकापतेः ॥

विशुद्धं शिवसादाख्यं विद्युद्बृन्दमिवाम्बरे ।
विश्वतः स्फुरितं विद्यादूर्ध्वं मुखमिदं विभोः ॥

अमूर्तमथ सादाख्यं मूलस्तम्भमिति श्रुतम् ।
ज्योतिस्स्तम्भमिदं लिङ्गं स्मरेदस्योत्तरं मुखम् ॥

ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् ।
मूर्तसादाख्यमित्युक्तं ध्यायेत्पश्चिममाननम् ॥

शूलं वज्रं च परशुमभयं दक्षिणैः करैः ।
पाशं वह्निं च घण्टां च वरं वामैः करैरपि ॥

दधानं कर्तृसादाख्यं चतुर्वक्त्राम्बुजोज्वलम् ।
लिङ्गमध्यसमुद्भूतं स्मरेद्दक्षिणमाननम् ॥

पञ्चवक्त्रं दशभुजं पीठलिङ्गसमुद्गतम् ।
प्रसिद्धं कर्मसादाख्यं पुरारेः पूर्वमाननम् ॥

पञ्चब्रह्माण्यूर्ध्वपूर्व दक्षिणोत्तरपश्चिमान् ।
वक्त्रपद्मान् विभोर्ध्यायेदीशानप्रभृति क्रमात् ॥

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य ॥

हृदयं हृदये शुभ्रं शिरः सिरसि पिङ्गलम् ।
शिखां शिखापदे रक्तां कवचं पार्श्वयोः स्थितम् ॥

नेत्रेषु श्यामलं नेत्रं करेऽस्त्रमसितं स्मरेत् ।
पञ्चवक्त्राः स्मृताः सर्वे जटामकुटमण्डिताः ॥

वराभयकपालं च शूलं च दधतः करैः ।
अङ्गदेवाः स्मृताः सौम्यनेत्रास्ते तूग्रविग्रहे ॥

त्रिशूलं त्रिगुणं प्राहुः परशुः सत्य[1]निष्ठिता ।
खड्गः प्रतापो वज्रं च शंभोः शक्तिरभेद्यता ॥

वह्निः संहारिणी शक्तिः शक्तिर्नागोऽप्रधृष्यता ।
मलमायाकर्मपाशो घण्टानादस्वरूपिणी ॥

अभयं पालिनी शक्तिर्विवर्णं चाङ्कुशं विदुः ।
एवं दशभुजाश्चिन्त्या दिव्यैर्दशभिरायुधैः ॥

जपकाले तु मन्त्रस्य ध्येयो देवश्चतुर्भुजः ।
वराभयपरश्वेणलसत्करसरोरुहः ॥

वक्त्रेष्वीशानवक्त्रं यदूर्ध्वस्याभिमुखं सदा ।
पूजाकाले तु तत्पूजाद्वाराभिमुखतां व्रजेत् ॥

पुरुषाघोरजाताख्यवामदेवाननानि तु ।
द्वार(रा)भेदा(न्न)न भिद्यन्ते स्वस्वस्थानव्यवस्थया ॥

---

[1] निष्ठितः.

अथवा मण्डपद्वारदिगादिपरितः क्रमात् ।
चत्वार्येतानि वक्त्राणि प्रादक्षिण्येन कल्पयेत् ॥

एवं सदाशिवं ध्यात्वा निश्चलेनान्तरात्मना ।
मन्त्रन्यासादिकं चापि कृत्वा स्वस्यां तनौ यथा ॥

मूर्तित्वेन हि संकल्प्य शिवस्य परमात्मनः ।
अभ्यर्च्य गन्धपुष्पाद्यैर्मनसैवोपपादितैः ॥

तस्या मूर्तेर्मूर्तिमन्तं शिवं सदसतः परम् ।
प्राणस्थानसदेशस्य चिन्तयेदम्बया सह ॥

ब्रह्मा विष्णुश्च रुद्रश्च तथाऽन्ये च सुरासुराः ।
तपोभिरुग्रैरद्यापि यस्य दर्शनकाङ्क्षिणः ॥

यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सहभूतेन्द्रियैः सर्वैः प्रथमं संप्रसूयते ॥

कारणानां च यो धाता ध्याता परपकारणम् ।
न संप्रसूयते यो वै कुतश्चन कदाचन ॥

सर्वैश्वर्येण संपूर्णो नाम्ना सर्वेश्वरः स्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येयः शंभुराकाशमध्यगः ॥

सर्वोपरि कृतावासः सर्वावासश्च शाश्वतः ।
षडध्वाध्वमयस्यास्य सर्वस्य जगतः पतिः ॥

उत्तरोत्तरभूतानामुत्तरश्च निरुत्तरः ।
अनन्तमहिमाम्भोधिरपरिच्छिन्नवैभवः ॥

अशेषविषयामोघः शुद्धबुद्धिविजृम्भणः ।
आत्मशक्त्यमृतास्वादप्रमोदरसलालसः ॥

अनन्तानन्दसन्दोहमकरन्दमधुव्रतः ।
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ॥

औदार्यवीर्यगाम्भीर्यमाधुर्यमकरालयः ।
अतुलः सर्वभूतानां राजराजो महेश्वरः ॥

अप्राकृतशरीरं तमतिमन्मथरूपिणम् ।
घृतरीतिघनीभूतसच्चिदानन्दविग्रहम् ॥

सर्वलक्षणसंपन्नं सर्वाभरणभूषितम् ।
सर्वातिशयसंयुक्तं सर्वावयवशोभितम् ॥

रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम् ।
शुद्धस्फटिकसंकाशं फुल्लपद्मत्रिलोचनम् ॥

चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ।
वरदाभयहस्तं च मृगटङ्कधरं हरम् ॥

सर्वकल्याणनिलयं चारुनीलगळान्तरम् ।
सर्वोपमानरहितं सर्वात्मानं विचिन्तयेत् ॥

ततः संचिन्तयेत्तस्य वामभागे महेश्वरीम् ।
उत्फुल्लोत्पलपत्राभविस्तीर्णायतलोचनाम् ॥

पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्धजाम् ।
नीलोत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम् ॥

अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम् ।
तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मतराम्बराम् ॥

सर्वाभरणसंपन्नां ललाटतिलकोज्वलाम् ।
विचित्रपुष्पसंकीर्णकेशपाशोपशोभिताम् ॥

सर्वतोऽनुगुणाकारां किंचिल्लज्जाननाम् ।
हेमारविन्दं विलसद्दधानां दक्षिणे करे ॥

दण्डवच्चापरं हस्तं न्यस्यासीनां सहासने ।
पाशविच्छेदिकां साक्षात्सच्चिदानन्दरूपिणीम् ॥

सदाशिवेश्वरहरश्रीशद्रुहिणमातरम् ।
समस्तगौरीलक्ष्म्यादिशक्तिचक्रस्य नायिकाम् ।

एवं देवं च देवीं च ध्यात्वा तरुणविग्रहौ ।
पञ्चोपचारवद्भक्त्या भावपुष्पैः समर्चयेत् ॥

अनेन च प्रकारेण सगुणोपासनां कुर्यात् । ननु सगुणस्य हार्दाकाशमध्यवर्तिनोऽनन्तकल्याणगुणनिकररत्नरत्नाकरायमाणस्य बहिःप्रदेशे दीक्षाकाल एव कृतसन्निधानस्य लिङ्गवेद्यात्मकत्वेन शिव-शक्त्युभयात्मकस्य गुरुकरुणाविशेषलब्धस्य प्राणलिङ्गस्य चाभेद-

भावनाया आवश्यकत्वेन "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्याद्युपनिषन्निकुरुम्बनिर्णीतार्थानुरूपेणैवाभेदभावना कार्या। न; सगुणयोर्द्वयोरनारुह्य द्वैतपन्थानमभेदभावनाया अशक्तत्वेनान्यतरस्य निर्गुणत्वमितरस्य सगुणत्वमित्यनियमः संपततीत्यत एवोररीकर्तव्यमन्तर्दहराकाशमध्यमध्यासीनस्यानादितेजसः परिमितपरिमाणस्याङ्गुष्ठमात्रत्वाद्युपपादकश्रुत्यानुगुण्येन सत्यसङ्कल्पत्वाद्यखिलगुणविशिष्टोपासनमित्यभिरुचिमासेदुषः सोमलोकाख्यपरशिवपुरवासिन उक्तरूपणानन्तकल्याणगुणगणानुशील्य स्वयमुपासकः स्वकीयवाङ्मनसश्रोत्रजिह्वाघ्राणप्राणानेतादृशगुणविशिष्टस्यैवोपयुक्तं तदीयस्तोत्रमन्त्रपठनस्मपनप्रसादनध्यानदर्शनश्रवणलौकिकगन्धाघ्राणैरेतैर्विभाव्य तादृशसोमलोकवासिनः परममङ्गलमूर्तेः स्वकीयहार्दाकाशवर्तिनश्चाभेदं चतुरस्रदीर्घवर्तुलस्थूलद्वित्रिपात्रेषु तत्तदाकारपरिमाणवतो गोक्षीरस्येव बृहत्कटाहादिप्रक्षेपवद्विभाव्य समनन्तरं सोमलोकविशेषवासिनः कल्याणमूर्तेरपि क्षीरसमुद्रप्रक्षेपवत्परिपूर्णत्वं मुख्योपदेशचतुष्टयोक्तरीत्या विभाव्य तादृशाखण्डानन्दमूर्तेः स्वेष्टलिङ्गस्य चाभेदं भावयित्वाऽऽनन्दनिमग्नो भवेदिति परतेजस्स्वरूपावैकल्यं क्षीरवदिति संक्षेपः॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठशिवाचार्यकृते निगमागमसारसर्वस्वसङ्ग्रहे क्रियासारे षड्विंशोपदेशः

अथ सप्तविंशोपदेशः

सप्तविंशोपदेशेऽस्मिन्निष्कलध्यानमुच्यते।
ध्यानं पूजार्थमित्यस्मादुक्तरूपेण पूजितः॥

वीरशैवस्य मोदाय क्रमात्सर्वं मयोच्यते।
अथ पूजां प्रवक्ष्यामि धूर्जटेर्लिङ्गरूपिणः॥

वेदमार्गानुसारेण वीरशैवागमोदिताम्।
आवाहनासने पाद्यमर्घ्यमाचमनीयकम्॥

इत्याद्युद्वासनान्तास्ताः पूजेति परिकीर्तिताः ।
आवाहनं नाम हार्दाकाशमध्यात्परेशितुः ॥

बहिर्लक्ष्येऽवतरणं दीपाद्वर्त्यन्तरे यथा ।
वीरशैवः कथं कुर्याद्गुरुणैव कृतं यतः ॥

सान्निध्यं सामरस्याख्यं पुनः कर्तुं तदक्षमः ।
आत्मावाहन्तुमन्त्रेण मनोवेगादिवर्णितम् ॥

पूर्वमस्थितसान्निध्ये पुनः सान्निध्यवर्णनात् ।
वैदिकावाहनं वीरशैवः कुर्यात्कथं स्वयम् ॥

अतो ध्यानं न युज्येत, यतो ध्यानं प्रचक्षते ।
अप्राकृतगुणाधारतया मानसचिन्तनम् ॥

गुरुदत्तं तु यल्लिङ्गमियत्परिमितं खलु ।
अप्राकृतगुणानां यदनुसन्धानमुच्यते ॥

स्वीकर्तव्यतया सामरस्यं गुरुकृतं यथा ।
अप्राकृतगुणावेशो न तत्पूजा च निष्फला ॥

वैदिकानां तु सङ्गच्छेदप्राकृतगुणाकृतिः ।
दिव्यमङ्गलभूयस्त्वं वेदोक्तं तव तन्न हि ॥

आसनं च न सङ्गच्छेत्कल्पनानुपपत्तितः ।
उद्वासनं नैव शक्यं सामरस्यविधानतः ॥

यद्येवं गुरुणैवादौ सर्वं कृतमतोऽधुना ।
पूजामात्रं कुरु च्छात्रेत्येवं तदुपदेशतः ॥

गुरोः शिवस्य चाभेदात्परमाप्तः शिवो यतः ।
क्रियते गुरुवाक्यानां परिपालनमादरात् ॥

इति चेद्गुरुणैवादौ सर्वं कृतमभूदिति ।
पूजा किमर्थं कर्तव्या किं चापरमथोच्यते ॥

सामरस्यं च किं नाम लिङ्गस्याङ्गस्य तद्वयोः ।
जीवब्रह्मैक्यरूपं वा किं वाहार्यमुपासनम् ॥

यथैव संपदध्यस्ता छान्दोग्याभिहिता तथा ।
नाद्यः क्षोदक्षमः पक्षः सामरस्ये तदन्तरम् ॥

जडाजडप्रपञ्चार्तिं वैलक्षण्यमवोचथ।
अखिलम्बेन मुक्तिः स्यात्सा नैव परिदृश्यते ॥

यदि चेज्जीवब्रह्मैक्ये प्राप्ते वा तदनन्तरम् ।
संसारित्वं च वर्ण्यं स्याच्छास्त्रव्याकोपनं भवेत् ॥

(न द्वितीयो वीरशैवसिद्धान्तो व्याकुलीभवेत् ।)
आरोपमात्रं यद्येवं संपदादिवदुच्यते ॥

अत्याश्रमत्वं नैव स्यात्सर्वकर्मानुवर्तनात् ।
आगमेषु च सर्वत्र उपचारास्तु षोडश ॥

ध्यानावाहनमुख्याश्च कथिता नान्यथा पुनः ।
आसनाद्युपचारो वा विनोद्वासनमर्चनम् ॥

नैवं यथा पूर्वतन्त्रे वत्सापाकरणादिषु ।
छिन्ने पिष्टेति विधिना मन्त्रोच्चारणमात्रतः ॥

द्रव्याहरणमुख्यानां यथा वा परिपूर्णता ।
षोडशेषूपचारेषु संपूर्तिर्वर्णिता क्षमा ॥

असाध्यकर्मणां मन्त्रोच्चारणेनैव केवलम् ।
ध्यानाद्याः [1] सुलभास्तस्मिन्नेवं वक्तुं हि युज्यते ॥

नन्वसाध्यवदेव स्याद्वीरशैवविरोधतः ।
इति चेन्न तथा वीरशैवैर्ध्याने च मन्त्रिते ॥

मन्त्राधीनं दैवमिति तदनुष्ठानमापतेत् ।
तद्दृष्टान्तानुरोधेन प्रकृतेनैव सङ्गतिः ॥

इत्येवं वीरशैवानां वैदिकत्वमसङ्गतम् ।
एवमाचक्षतामेता गलग्रहणयुक्तयः ॥

यदुक्तं प्रथमं पूजा शैवानां नैव युज्यते ।
ध्यानमावाहनं नैव युक्तमुद्वासनं त्विति ॥

काश्यां विश्वेश्वरे लिङ्गे स्वयं व्यक्ते न कोऽपि वा ।
आवाहनं करोत्युर्व्यां प्रादक्षिण्यं वृथा भवेत् ॥

---

[1] सुलभास्तस्मान्नैवं कर्तुं–पा.

मातृदेवो भवेत्याद्यैः श्रुतिभिर्विहितार्चनम् । ?
ध्यानपूर्वं जनः को वा करोति जगतीतले ॥

माता देवी बिन्दुरूपा नादरूपः शिवः पिता ।
आवाहनं च पूजार्थं देवताभिमुखीकृतिः ॥

सञ्जिकायां सर्वकालं सर्वेशोऽभिमुखः स्वयम् ।
विमुखानामभिमुखीकरणं किल युक्तिमत् ॥

सर्वदाभिमुखानां तु नाभिमुख्यं पुनः पुनः ।
प्रातःसन्ध्यामुपास्यन् कः सूर्यमुद्यन्तमन्वहम् ॥

नमस्कुर्वंश्च कुरुते सूर्यावाहनमुत्तमम् ।
ननु विश्वेश्वरे लिङ्गे स्वयं व्यक्ते विशेषतः ॥

सान्निध्यमात्रं शास्त्रीयज्ञानिनोऽतीव नारद (नादरः) ।
तत्र प्रवृत्तवाक्यानां प्रामाण्यं चैवमेव हि ॥

शिवोऽविलम्बविज्ञानोपदिष्टं तारकाभिधम् ।
पशूनां च विशेषेण कृत्वा मुक्तिं प्रदास्यति ॥

ज्ञानिनां विग्रहः काशी स्वात्मा विश्वेश्वरः स्वयम् ।
तद्दृष्टान्तात्ततो नैवावाहनं तव युज्यते ॥

आचार्यदेव इत्यादावाचार्यत्वेन वै मतिः ।
न कार्या किं तु देवत्वबुद्धिः प्राशस्त्यदायिनी ॥

मनो ब्रह्मेत्युपासीत प्राणो ब्रह्मेति वै यथा ।
पूर्वतन्त्रे पदार्थेषु यथोत्कृष्टमतिस्तथा ॥

यद्येवं गुरुणा लिङ्गे ब्रह्मबुद्धिः कृता भवेत् ।
प्राशस्त्यपरमेवेति पशुकर्मत्वमापतेत् ॥

आवाहनं प्रसज्येत तथा वक्तुं न शक्यते ।
आवाहनं त्वभिमुखीकरणं सञ्जिकापुटे ॥

सदा सान्निध्यमेवेति तन्नातीवोपयुज्यते ।
अप्राकृतगुणाधारमूर्तेरत्र त्वदर्शनात् ॥

आवाहनमवश्यं तदङ्गीकर्तव्यमेव हि ।
यन्नित्यकर्मकर्तारो न सूर्यावाहनार्थिनः ॥

इत्यादितत्प्रतीकोपासनमात्रं विधीयते ।
उपासनानां सर्वासां साधनत्वेन निर्णयात् ॥

नैवं सङ्गच्छते प्राप्तसामरस्यफलस्य तु ।
फलोद्देशं साधनं हि हीयते तत्फलोदयात् ॥

उदितत्वात्फलस्यात्र साधनत्वमसङ्गतम् ।
इति चेत्सत्यमेवात्र त्वयोक्तं न सहामहे ॥

कर्म द्विधा प्रोक्तमेव जीवब्रह्मैक्यलक्षणे ।
साक्षादेवोपयुक्तं च पारम्पर्येण च द्विधा ॥

पारम्पर्योपयुक्तं तु धर्मशब्देन कीर्तितम् ।
पाशाश्रयत्वात्तच्चोक्तं पशुकर्मेति वै मया ॥

यत्त्वया ज्ञानकाण्डोक्तं प्रतीकोपासनादिकम् ।
मनोनैर्मल्यसंप्राप्तया विरक्तया विषयेषु च ॥

गुरूपदेशतो लभ्य आदरस्तत्र चावयोः ।
तुल्य एव यतः साक्षाद्ब्रह्मज्ञानोपयोगि यत् ॥

न च प्रतीकमुख्योपासनेच्छाङ्गीकृता मया ।
वीरशैवत्वमुच्छिद्येच्छिवैकन्यस्तभावता ॥

लिङ्गाङ्गसामरस्यैकसाधनत्वेन वर्णयेत् ।
साधनानामनेकत्वं स्वीकृतं शैववेदिभिः ॥

साध्यैक्यमेव वीरत्वं तद्द्वैविध्यं भयावहम् ।
त्वया तथैव वक्तव्यं साध्यब्रह्मैक्यलक्षणे ॥

नानात्वं साधनानां च ग्राममुद्दिश्य गच्छतोः ।
जयैषिणोस्तदन्योन्यं श्रयतोर्भिन्नवर्त्मनि ॥

प्राप्यो ग्रामस्त्वेक एव तद्वैशिष्ट्यं भयावहम् ।
वीरशैवं वैदिकत्वमग्रजानुजलक्षणम् ॥

वीरत्वमेकतानत्वं श्रौतत्वं नातिरिच्यते ।
एकमेवाद्वितीयं चेत्यादिनैवं निवेदितम् ॥

अन्योन्यं मतसारूप्यमलङ्काराय कल्पते ।
किं तु द्वैतादिसकलमुच्छिष्टमिव दूरतः ॥

वर्जनीयं प्रयत्नेन प्रकृते नास्ति तादृशम् ।
एकं ब्रह्मेति निर्णीय जीवब्रह्मैक्यमुच्यते ॥
तदेव सामरस्यं च मयापि प्रतिपादितम् ।
साधानानामनेकत्वं मन्यतेऽपि भवन्मते ॥
साध्यैक्यमपि तत्रेयान् भेदस्तव ममाऽपि च ।
पुनः स्मृत्यैव साध्यैक्यं साधनावस्थिता वयम् ॥
साधने संस्थिते त्वं तु साध्यैक्यं किल भाषसे ।
साधनानामनेकेषां वीरशैवं विशिष्यते ॥
सामरस्यं फलं चापि गुरुणा कृतमेव तत् ।
बीजे न्युप्ते फलोद्देशं साधनादुदसेचनात् ॥
फललाभे सति पुनस्तस्मान्नैव निवर्तते ।
पुनः पुनः फलोद्देशं साधनेषु प्रवर्तते ॥
अप्राकृतत्वान्नित्यं तत्फलं समरसात्मकम् ।
प्रमाणं श्रुतयस्तत्र सर्वेषां सममेव तत् ॥
अन्यथा व्यासमुख्यानां मोक्षं प्राप्तवतां पुनः ।
शास्त्रनिर्माणकर्तृत्वं त्वयैव प्रतिपाद्यते ॥
अदृष्टफलमर्त्यः किं फलं पुंसां प्रदर्शयेत् ।
स्वयं तीर्णः परांस्तारयतीति किल दृश्यते ॥
किं च त्वयाऽ नित्यमुक्ताः केचन श्रुतिदर्शिताः ।
अङ्गीक्रियन्ते मुक्तानां पुनः सत्त्वमसङ्गतम् ॥
नानात्वं नामधेयादि वर्ण्यते वा कथं त्वया ।
एवं च सति लिङ्गाङ्गसामरस्ये पुनः स्थितिः ॥
[1] नित्यमुक्तैश्च वेदैश्च तथैव प्रतिपादनात् ।
स्वतन्त्रस्य प्रमाणस्य नियमो नैव सङ्गतः ॥
अग्निष्टोमे कृते स्वर्गं प्रयायादविलम्बतः ॥
तत्रादृष्टं कथं वा ते कल्प्यमश्रौतमेव तत् ।
कल्पनागौरवादत्र सामरस्ये कृते सति ॥

---

[1] नित्यमुक्ततया वेदे–**पा.**

प्रारब्धपाकपर्यन्तं देहोपाधिस्तु सङ्गतः ।
अत एव त्वन्मते च जीवब्रह्मैक्यलक्षणे ॥

सम्यग्ज्ञाने च संप्राप्ते पुनर्देहानुवर्तनम् ।
सिद्धस्यापि फलस्यात्र युक्ता साधनकल्पना ॥

ज्योतिष्टोमे कृतेऽन्येषां कर्मणां [1]व्यस्तता भवेत् ।
[2]फलैक्यात्तस्य सिद्धत्वात्साधनस्यानपेक्षणात् ॥

अतः सिद्धे च साध्यार्थे पुनः साधनकल्पना ।
सामरस्ये च संप्राप्ते पुनः पूजादिसाधनम् ॥

नित्यत्वेन ज्योतिरादेर्विधानेन पुनः पुनः ।
कर्तव्यतेति चेदत्र पञ्चाक्षरविधानतः ॥

पुनः कर्तव्यता प्राप्ते सामरस्ये च कर्मणाम् ।
[3]किं चापूर्वफलत्वं हि नित्यानामकृते सति ॥

प्रत्यवायश्रवणतः पुनः कर्तव्यतेति च ।
पञ्चाचाराकरणतः प्रत्यवायश्रुतेस्ततः ॥

फलस्य बहुधोक्तत्वादधिकार्थस्य लाभतः ।
सामरस्ये च संप्राप्ते पुनराचारकल्पना ॥

[4]न चैवागमवैयर्थ्यं लब्धं च गुरुणा पुनः ।
सर्वं [5]ज्ञेयं चार्थजालं साध्यं किं वागमैरिति ॥

शास्त्रोपदेशादेवासौ सामरस्यं दिशन् गुरुः ।
ननु शास्त्रोपदेशस्य चिरसाध्यतया पुनः ॥

दीक्षाकाले विशेषेण कथं बोध्यार्थबोधनम् ।
कथं काश्यां भवेन्मुक्तिं[6]स्तारकस्योपदेशतः ॥

ये तारकोपदेशार्हास्तदन्येषां [7]श्रुतिर्मम ।
अविशेषेण दीक्षायां सामरस्यात्कथं तव ॥

इति वेद्यस्य तन्मात्रात्सामरस्यं दृढं भवेत् ।
सिद्धसाधनरूपेण तदाद्यायैव कल्पताम् ॥

---

[1] व्यर्थता–पा. [2] फलैक्यं तस्य–पा. [3] षण्डापूर्व–पा. [4] न शैवागम–पा.
[5] हेयं–पा. [6] स्तारकार्हेऽपि तत्तथा–पा. [7] श्रुतिर्मतः–पा.

गुरूपदेशमार्गेण प्राप्ते तत्सामरस्यके ।
अविच्छेदाय शास्त्राणामावश्यकतया फलम् ॥
अतः प्राप्ते सामरस्ये साधनापेक्षणात्पुनः ।
नित्यत्वेनैव कर्तव्याः पूजाद्या इति निश्चयः ॥
शास्त्राणां च तथात्यन्तमुपयोगः समर्थितः ।
आवाहनं विना पूजा कथं वेति यदीरितम् ॥
आवाहनं न कर्तव्यमिति वाक्यैरनेकशः ।
उपात्तत्वान्निषेधस्य विधेः प्राबल्यवर्णनात् ॥
यजेतेत्यादिविधिना नित्यत्वेनैव [1]वर्ण्यते ।
नासोमयाजी सन्नयेदिति च [2]प्रतिषेधिते ॥
विधेर्निषेधप्राबल्यं निर्णीतं पूर्वतन्त्रके ।
तद्वदावाहनादीनां [3]विधावत्रावहन्त्विति ॥
निषेधाद्वीरशैवानां नैवावाहनमुच्यते ।
विधिः श्रौतो [4]निषेधस्वश्रौतः किं त्वागमोदितः ॥
इति चेदागमानां तु स्वतः प्रामाण्यवर्णनात् ।
अत एवावैदिकत्वमिति चेदवधारय ॥
आवाहनं दिधा लोके सावधिः प्रथमस्तयोः ।
स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ॥
इत्यादीनि द्वितीयो निरवधिः परिकीर्तितः ।
आत्वावहन्तु मन्त्रेण गुरुणावाहने कृते ॥
तदेव सामरस्यं च वर्णयन्ति [5]विशेषतः ।
एवमन्ये चोपचारा गुरुणा न कृताः कुतः ॥
इति चेच्छ्रृणु तत्रैवं निषेधत्वस्य दर्शनात् ।
एवं न्यायश्च लोकेषु घटिकामात्रपूजकम् ॥
आवाहनं तावदस्तु श्रौतेऽग्निष्टोमपूर्वके ।
एकाहादिक्रमेणैव यावत्संवत्सरक्रतु ॥

---

[1] वर्णिते. [2] प्रतिबोधिते. [3] विधावात्वावहन्विति. [4] निषेधस्तु न श्रौतस्त्वागमोदितः. [5] विपश्चितः.

ऋत्विजां वरणं प्राप्तेऽप्याशौचे नैव वै गतिः ।
न प्रत्यहं ऋत्विजां च वरणं दृश्यते पुनः ॥

तथैव वीरशैवं तदसमाप्य व्रतं यतः ।
पुनरावाहनं नैव कर्तव्यमिति वै स्थितिः ॥

यदप्युक्तं ध्यानमिति ह्यप्राकृतगुणाकृति ।
निरस्तं तदनेनैव यतस्तद्गुरुकर्तृकम् ॥

इदानीं लिङ्गमेतच्चेदियत्तापरिमाणवत् ।
कथं लिङ्गे त्वया बेरे परिमाणेन संयुते ॥

प्राकृते ध्यानमात्रेण सर्वमप्राकृतं भवेत् ।
यदि चेध्यानमात्रेण प्रकृते दीयतां मतिः ॥

ननु पूजावसानं तदप्राकृतगुणोदयः ।
मन्त्रशक्तथा तु कर्तव्यं तव तन्नोपपद्यते ॥

ध्यानात्पूर्वं त्वया प्रोक्ता इमे चाप्राकृता गुणाः ।
नैवमप्राकृतगुणा वास्तवा एव यन्मया ॥

मन्त्रशक्तथा यदि ध्याताः स्वर्ण[1]पुष्पादिवासनाः ।
अप्राकृतगुणध्यानं वास्तवं गुरुणा कृतम् ॥

मन्त्रशक्तथा च सहितं प्रत्यहं शैवमाचरेत् ।
आसनं चाप्राकृतं चेत्प्राकृतासनकल्पनम् ॥

व्यर्थमप्राकृतं चेत्स्यात्क्रमभङ्गः समापतेत् ।
इति चेन्नाप्राकृतं च गुरुणा यद्यदासनम् ॥

उपचारतयोद्दिष्टं तदेवाप्राकृतासनात् ।
समर्पितादविच्छिन्नधारा पुंसां प्रजायते ॥

यथा बालोपदेशार्थमिष्टिः [2]पात्रैर्विधीयते ।
तयेष्ट्या चैव बालानां [3]कर्तव्येष्टिर्विभासते ॥

प्राकृतैरुपचारैश्चाप्यप्राकृतफलोदयः ।
ननु बालेष्टिवत्पूजावैयर्थ्ये सति सा श्रुतिः ॥

---

[1] पुष्पजवासनाः. [2] पुत्रे विधीयते. [3] कर्तव्येष्टिर्हि भासते.

पूजायां [1]सत्फलविधिः कुप्येदेवं सतीति चेत् ।
अप्राकृता या तु पूजा श्रुतिस्तद्विषयेति चेत् ॥
तदुक्तं मुनिभिः पूर्वैर्वेदवेदार्थवेदिभिः ।
अर्चकस्य च माहात्म्यात्पूज्यलिङ्गस्य सौष्ठवात् ॥
पूजोपकरणाच्चैव त्रिभिः सान्निध्यमुच्यते ।
इत्यादिषु प्रमाणेषु महिमोक्ता तथार्चितुः ॥
महिमा च प्राकृतानामप्राकृततया कृतिः ।
एवं सर्वे चोपचाराः प्रोक्ता ह्यप्राकृता इति ॥
अन्तरेणोद्वासनं [2]तु न पूजा शक्यतेऽथ यत् ।
दूरापास्तं निरवधिरत्र चावाहनं यतः ॥
आवाहनानुसारेण वाच्यमुद्वासनं यतः ।
अतः कालानवच्छेदात्सिद्धं सर्वं समीहितम् ॥
सङ्गच्छते सामरस्यं जीवन्मुक्तवदीरितम् ।
ननु चैवं वीरशैवः स्वाचारैश्च परिच्युतः ॥
क्षरतीत्यागमैरुक्तमारुढपतनं कुतः ।
मोक्षमार्गैकनिष्ठा च किं वारूढस्य केवलम् ॥
आरुरुक्षोस्तदथ वा नाद्यः पतनवर्णनात् ।
न द्वितीयः सामरस्यवर्णनादिति चेच्छृणु ॥
न वयं प्रतिवक्तारः किं तु स्थितपरीक्षकाः ।
तदुक्तं पशुधर्मेभ्यः श्रैष्ठ्यं सम्पदुपासने ॥
प्रतीकोपासादीनां तथैव दहरादिषु ।
लिङ्गाङ्गसामरस्यस्य साधनत्वेन संमतिः ॥
वर्णयन्तस्तदा सामरस्यं तु द्विविधं पुनः ।
प्रथमं साधनावस्थासहितं गुरुणा कृतम् ॥
बीजावाप इव क्षेत्रे पालनात्तत्फलाय हि ।
परिपालनतः कालात्प्रारब्धपरिपाकतः ॥

---

[1] सकलविधिः. [2] तु सा पूजा.

फलरूपं सामरस्यं तदनावृत्तिलक्षणम् ।
अत उद्भाविता दोषा विलीना बुद्बुदा इव ॥

तस्मात् प्रातः शिवध्यानं कृत्वा संक्षेपतः स्वयम् ।
शुद्धः स्नातो भस्मना वा वारुणेनाथ वा पुनः ॥

धृतत्रिपुण्ड्रपूतात्मा शिवपूजां [1]समाचरेत् ।
शिवस्य बाह्यपूजान्ते तदेकन्यस्तमानसः ॥

वेदान्तार्थविचारोऽयं कार्यः पाशनिवृत्तये ।
वेदान्तार्थविचारोऽपि श्रुतिभिः श्रवणं भवेत् ॥

श्रुतिः पञ्चाक्षरो मन्त्रो मन्त्रार्थस्यैव चिन्तनम् ।
तच्चिन्तनानुकूलास्ताः श्रुतयः सकला अपि ॥

शास्त्राणि स्मृतयश्चैव पुराणानि दशाष्ट च ।
तथैवोपपुराणानि चेतिहासाः समेऽपि च ॥

[2] व्याससूत्रोक्तमार्गेण वेदार्थस्य च निश्चयः ।
पञ्चाक्षरार्थरूपोऽसौ पूजान्ते तदनुस्मरेत् ॥

लिङ्गाङ्गसामरस्यं [3]हि जीवब्रह्मैक्यमुच्यते ।
ज्ञानादेव तु कैवल्यं नान्यस्मादिति निश्चयः ॥

अतो ध्यानं प्रशस्तं स्यात्तदपि द्विविधं मतम् ।
सकलं निष्कलं चेति निष्कलध्यानमुच्यते ॥

निष्कलध्यानमेवेदं प्रशस्तं वेदशास्त्रयोः ।

अथ (अत्र) श्रुतिस्मृतीतिहासपुराणागमेषु परमेश्वरविषयपूजा-नमस्कारस्तुत्याद्यपेक्षया तद्ध्याने आधारो दृश्यते । तथा हि—अथर्वशिखायां—'शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य । समाप्ताथर्वशिखेति' इति ॥

कठवल्लीष्वपि—

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूँ स्वाम्'

---

[1] समारभेत्. [2] व्यासनीतोक्त. [3] च.

योगयाज्ञवल्क्यस्मृतौ—

'अथ ध्यानं प्रवक्ष्यामि शृणु गार्गि वरानने ।
ध्यानमेव हि सर्वेषां कारणं बन्धमोक्षयोः ॥
ध्यानं शिवस्वरूपस्य वेदनं मनसा खलु ।
सगुणं निर्गुणं चैव सगुणं बहुधा स्मृतम् ॥' इति
'योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥'

इति प्रस्तुत्य—

यञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥
इति भगवद्गीतायाम् ।

सूतसंहितायां—यज्ञवैभवखण्डे—

अथ मोक्षार्थिभिः प्राज्ञैः शिव एकः शिवंकरः ।
ध्येयः सर्वं परित्यज्य शिवादन्यत्तु दैवतम् ॥
अस्मिन्नर्थे श्रुतिः साध्वी समाम्नाता वेदवित्तमाः । इति

तत्रैव—

सोपानक्रमतो देवा नृणां संसारमोचकाः ।
रुद्रः संसारमग्नानां साक्षात्संसारमोचकः ॥
अतः सर्वं परित्यज्य शिवादन्यत्तु दैवतम् ।
शिव एव सदा ध्येयः साक्षात्संसारमोचकः ॥
वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा ।
शिवध्यानेन देवाश्च तथा तृप्ता भवन्ति हि ॥

तत्रैवैकत्रिंशाध्याये—

नृत्यमानस्य देवस्य ध्यानं यत्तद् द्विजोत्तमाः ।
देवदेवस्य विप्रेन्द्र महाप्रीतिकरं सदा ॥
साम्बमूर्तेर्भवस्येदं शिवस्य ध्यानमास्तिकाः । इति

तत्रैव द्विचत्वारिंशाध्याये—

श्रुत्याचार्यप्रसादेन सर्वं ब्रह्मेति भावयन् ।
मुच्यते पातकैः सर्वैर्घटिकामात्रतो नरः ॥

दिनार्धं सकलं ब्रह्म भावयन् गुरुपूर्वकम् ।
बुद्धिपूर्वकृतैः सर्वैः पातकैर्मुच्यते नरः ॥

विग्रहं परतत्त्वस्य त्रिणेत्रं साम्बमद्भुतम् ।
मुहूर्तं चिन्तयन्मर्त्यो मुच्यते सर्वपातकैः ॥

स्वस्वरूपानुसन्धानान्नृत्यन्तं सर्वकारणम् ।
मुहूर्तं चिन्तयन्मर्त्यो मुच्यते सर्वपातकैः ॥

नृत्यमानं महादेवं साम्बमूर्तिधरं तु वा ।
दिनार्धं चिन्तयन् पापात्प्रसिद्धान्मुच्यतेऽखिलात् ॥

त्रिमूर्तीनां तु रुद्रस्य विग्रहं चिन्तयन् दिनम् ।
महापातकसङ्घैश्च मुच्यते पातकान्तरैः ॥

दिनत्रयमभिध्यायन् रुद्रमूर्तिमतन्द्रितः ।
मुच्यते पातकैः सर्वैः प्रसिद्धैर्नात्र संशयः ॥ इति

अन्यत्रापि—

अतोऽयं स शिवो ध्येयः प्राधान्येन शिवंकरः ।
सर्वमन्यत्परित्यज्य दैवतं परमेश्वरात् ॥

शिखा चाथर्वणी साध्वी सर्ववेदोत्तमोत्तमा ।
अस्मिन्नर्थे समाप्ता सा श्रुतयश्च परा अपि ॥ इति

ध्यानस्यावश्यकर्तव्यता पुराणान्तरेषूक्ता—

एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते ।
दस्युभिर्मुषितेनेव युक्तमाक्रन्दितं भृशम् ॥ इति

कौर्मे—

ध्याननिष्ठस्य सततं नश्यते सर्वपातकम् ।
तस्मान्महेश्वरं ज्ञात्वा तद्ध्यानपरमो भवेत् ॥ इति

अन्यत्रापि—

आरुरुक्षुस्तु सगुणं पूजयेत् परमं शिवम् ।
पिनाकिनं त्रिणयनं जटिलं कृत्तिवाससम् ॥

पद्मासनस्थं रूक्माभं चिन्तयेद्वैदिकी श्रुतिः ।
एष योगः समुद्दिष्टः सबीजो ह्यग्निपुङ्गवाः ॥ इति

वायवीयसंहितायाम्

तस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैः सर्वैः प्रथमं संप्रसूयते ॥

कारणानां च यो धाता ध्याता परमकारणम् ।
न संप्रसूयते यस्मात् कुतश्चन कदाचन ॥

सर्वैश्वर्येण संपन्नो नाम्ना सर्वेश्वरः स्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येयः शंभुराकाशमध्यगः ॥ इति

तत्रैव—

प्रसादसाधनो धर्मः स तु वेदेन दर्शितः ।
तदभ्यासवशात्साम्यं पूर्वयोः पुण्यपापयोः ॥

साम्यात्प्रसादसंपर्काद्धर्मस्यातिशयस्ततः
धर्मस्यातिशयात्सद्यः पशोः पापपरिक्षयः ॥

एवं प्रक्षीणपापस्य बहुजन्मपरिष्कृता ।
साम्बे सर्वेश्वरे भक्तिर्ज्ञानपूर्वं प्रजायते ॥

भावानुगुणमीशस्य प्रसादोऽप्यतिरिच्यते ।
प्रसादात्कर्मसंत्यागः फलतो न स्वरूपतः ॥

तस्मात्कर्मफलत्यागाच्छिवधर्मः स्वयं शुभः ।
स च गुर्वनपेक्षश्च तदपेक्ष इति द्विधा ॥

तत्रानपेक्षात्सापेक्षो मुख्यः शतगुणाधिकः ।
शिवधर्मान्वयस्यास्य शिवज्ञानसमन्वयः ॥

ज्ञानान्वयवशात्पुंसः संसारे दोषदर्शनम् ।
ततो विषयवैराग्यं वैराग्याद्भावशोधनम् ॥

भवाशुद्धिं प्रपन्नस्य ध्याने निष्ठा न कर्मणि।
ज्ञानध्यानाभियुक्तस्य पुंसो योगः प्रवर्तते ॥
योगेन तु परा भक्तिः प्रसादस्तदनन्तरम् ।
प्रसादान्मुच्यते जन्तुर्मुक्तः शिवसमो भवेत् ॥ इति

तत्रैव—

ज्ञानभावानुरूपेण प्रसादेनैव निर्वृतिः ।
तस्मादस्य प्रसादार्थं वाङ्मनोदोष[1]वर्जितः ॥
[2]ध्यायीत शिवमेवैकं सदारतनया[3]न्वयः ॥ इति

तत्रैवोत्तरभागे—

ब्रह्मक्षत्रविशां देवि यतीनां ब्रह्मचारिणाम् ।
तथैव वानप्रस्थानां गृहस्थानां च सुन्दरि ॥
शूद्राणामथ नारीणां धर्म एषः सनातनः ।
ध्येयस्त्वयाहं देवेशि सदा जप्यष्षडक्षरः ॥ इति

तत्रैव—

जपयज्ञरतो मर्त्यस्तद्वैशिष्ट्यवशादिह।
ध्यानयज्ञरतो भूत्वा जायते भुवि मानवः ॥
ज्ञानं लब्ध्वाचिरादेव शिवसायुज्यमाप्नुयात् । इति
तस्मात् पञ्चसु यज्ञेषु ध्यानयज्ञरतो भवेत् ॥
ध्यानं ज्ञानं च यस्यास्ति तीर्णस्तेन भवार्णवः । इति

तत्रैव—

तस्माद्धीरं मनः कुर्याद्धारणाभ्यासयोगतः ॥
ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ।
अव्याक्षिप्तेन मनसा ध्यानं नाम तदुच्यते ॥

---

[1] वर्जिताः. [2] ध्यायन्तः. [3] न्वयाः.

ध्येयावस्थितचित्तस्य सदृशः प्रत्ययस्य [1]यः ।
प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते ॥

सर्वमन्यत्परित्यज्य शिव एकः शिवंकरः ।
परो ध्येयः शिवेशेति समाम्नाथर्वणी श्रुतिः ॥

[2]सर्वप्रभू शिवौ तस्मात्सर्वगौ [3]सर्वदोदितौ ।
सर्वज्ञौ सततं ध्येयौ नानारूपविभेदतः ॥

विमुक्तेः प्रत्ययः पूर्वः प्रत्ययश्चाणिमादिकः ।
इत्येतद्द्विविधं ज्ञेयं ध्यानस्यास्य प्रयोजनम् ॥

ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् ।
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित् ॥

ज्ञानवैराग्यसंपन्नः श्रद्दधानः [4]क्षमान्वितः ।
निर्ममश्च सदोत्साही [5] ध्यायेत्तं पुरुषं स्मृतः ॥

जपाच्छ्रान्तः पुनर्ध्यायेध्यानाच्छ्रान्तः पुनर्जपेत् ।
जपध्यानाभियुक्तस्य क्षिप्रं योगः प्रसिद्धयति ॥

धारणा द्वादशायामा ध्यानं द्वादशधारणम् ।
ध्यानं द्वादशकं यावत्समाधिरिति गीयते ॥

समाधीर्नाम योगाङ्गमष्टमं परिकीर्त्यते ।
[6]समाधीनां च सर्वत्र प्रज्ञालोकः प्रवर्तते ॥

[7]यदत्रामुत्र निर्भासं स्तिमितोदधिवत्स्थितम् ।
[8]स्वरूपशून्यवध्यानं तत्समाधिर्विधीयते ॥

ध्येये मनः समावेश्य तिष्ठेदविचलः स्थिरम् ।
निवातदीपवद्योगी समाधिस्थः प्रगीयते ॥

न शृणोति न चाघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न सङ्कल्पयते [9]मनः ॥

नचाभिमन्यते किंचिन्न च बुध्येत काष्ठवत् ।
एवं शिवे विलीनात्मा समाधिस्थ इहोच्यते ॥

---

[1] सः—पा. [2] सर्वप्रभूतिदौ. [3] सर्वदाधिकौ. [4] क्षमाहितः—पा. [5] ध्यातेत्थं. [6] समाधिना च. [7] यदत्र मात्रानिर्भासं. [8] स्वरूपशून्यं यध्यानं. [9] पुनः.

यथा दीपो निवातस्थः स्पन्दते न कदाचन ।
तथा समाधिनिष्ठोऽपि तस्मान्न विचलेत्सुधीः ॥

एवमभ्यस्य तस्याङ्गं [1] योगी यो योगमुत्तमम् ।
तदन्तराया नश्यन्ति विघ्नाः सर्वे शनैः शनैः ॥

आलस्यं व्याधयस्तीव्रं प्रमादस्थानसंशयाः ।
अनवस्थितचित्तत्वमश्रद्धा भ्रान्तिदर्शनम् ॥

दुःखानि दौर्मनस्यं च विषयेषु च लोलता ।
दशैते युञ्जतां पुंसामन्तरायाः प्रकीर्तिताः ॥

आलस्यमलसत्वं तु योगिनां दीनचेतसाम् ।
धातुवैषम्यजा दोषा व्याधयः कर्मयोगतः ॥

प्रमादो नाम योगस्य साधनानामभावता ।
इदं नेत्युभयालम्बि ज्ञानं तत्स्थानसंशयः ॥

अप्रतिष्ठा हि मनसस्त्वनवस्थितिरुच्यते ।
अश्रद्धा तापरहिता निवृत्तिर्योगवर्त्मनः ॥

विपर्यस्ता मतिर्या सा भ्रान्तिरित्यभिधीयते ।
दुःखमज्ञानजं पुंसां [2] चेतश्चाध्यात्मिकं विदुः ॥

आधिभौतिकमङ्गोत्थं स्वतो दुःखं पुराकृतैः ।
[3]आधिदैविकमाख्यातमशन्यस्त्रविषादिजम् ॥

इच्छाविघातजं दोषं दौर्मनस्यं प्रचक्षते ।
विषयेषु विचित्रेषु विभ्रमस्त्वत्र लोलता ॥

एवमेतेषु चिह्नेषु योगासक्तस्य योगिनः ।
उपसर्गाः प्रवर्तन्ते दिव्यास्ते सिद्धिसूचकाः ॥

प्रतिभा श्रवणं वार्ता दर्शनास्वादवेदनाः ।
उपसर्गाष्षडित्येते तदा योगस्य सिद्धयः ॥

सूक्ष्मे व्यवहितार्थे च विप्रकृष्टे त्वनागते ।
प्रतिभा कथ्यते याऽर्थे प्रतिभा सा यथातथम् ॥

---

[1] योगिनो योगमुत्तमम्. [2] चेतस्याध्यात्मिकं. [3] आधिभौतिक.

श्रवणं सर्वशब्दानां श्रवणं त्वप्रयत्नतः ।
वार्ता वार्तासु विज्ञानं सर्वेषामेव देहिनाम् ॥
दर्शनं नाम दिव्यानां दर्शनं त्वप्रयत्नतः ।
तथास्वादश्च दिव्येषु रसेष्वास्वाद उच्यते ॥
स्पर्शनाधिगमस्तद्वद्वेदना नाम विश्रुता ।
सुगन्धानां च दिव्यानामाब्रह्मभवनावधि ॥
उपतिष्ठन्ति रत्नानि यानानि च बहूनि च ।
स्वच्छन्दमधुरा वाणी विविधास्य प्रवर्तते ॥
रसायनानि सर्वाणि दिव्याश्चौषधयस्तथा ।
सिध्यन्ति प्रणिपत्यैनं नयन्ति सुरयोषितः ॥
योगसिध्येकदेशेऽपि दृष्टे मोक्षे भवेन्मतिः ।
दृष्टमेतन्मया यद्वत्तद्वन्मोक्षो भवेदिति ॥

तत्रैव—

ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् ।
एतच्चतुष्टयं ज्ञात्वा ध्याता ध्यानं समाचरेत् ॥
ज्ञानवैराग्यसंपन्नो नित्यमुद्युक्तमानसः ।
श्रद्दधानः प्रसन्नात्मा ध्याता सद्भिरुदाहृतः ॥
ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ।
अव्याक्षिप्तेन मनसा ध्यानमित्यभिधीयते ॥
बुद्धिप्रवाहरूपस्य ध्यानस्यास्यावलम्बनम् ।
ध्येयमित्युच्यते सद्भिस्तच्च साम्बः स्वयं शिवः ॥
विमुक्तप्रत्ययः पूर्वं चैश्वर्यं चाणिमादिकम् ।
शिवध्यानस्य तस्यास्य साक्षान्मुक्तिः प्रयोजनम् ॥
यस्मात्सौख्यं च मोक्षं च ध्यानादुभयमाप्नुयात् ।
तस्मात्सर्वं परित्यज्य ध्याननिष्ठो भवेन्नरः ॥
नास्ति ध्यानं विना ज्ञानं नास्ति ध्यानमयोगिनः ।
ज्ञानं ध्यानं च यस्यास्ति तीर्णस्तेन भवार्णवः ॥
ज्ञानं प्रसन्नमेकाग्रमशेषोपाधिवर्जितम् ।
योगाभ्यासेन युक्तस्य योगिनस्त्वेव सिध्यति ॥

प्रक्षीणाशेषपापानां ज्ञाने ध्याने भवेन्मतिः ।
पापोपहतबुद्धीनां तद्वार्तापि सुदुर्लभा ॥

यथा वह्निर्महान् दीप्तः शुष्कमार्द्रं च निर्दहेत् ।
तथा शुभाशुभं कर्म ध्यानाग्निर्दहते क्षणात् ॥

अत्यल्पोऽपि यथा [1] दीपस्तेजसा नाशयेत्तमः ।
योगाभ्यासस्तथाल्पोऽपि महत्पापं विनाशयेत् ॥

ध्यायतः क्षणमात्रं वा श्रद्धया परमेश्वरम् ।
भवेद्यत्सुमहच्छ्रेयस्तस्यान्तो नैव विद्यते ॥

नास्ति ध्यानसमं तीर्थं नास्ति ध्यानसमं तपः ।
नास्ति ध्यानसमो यज्ञस्तस्माध्यानं समाचरेत् ॥ इति

पराशरोपपुराणे—

महादेवस्य साम्बस्य शेषत्वेनैव केवलम् ।
देवताः सकला ध्येयाः सुविज्ञेया मनीषिभिः ॥

सर्वमेतत्परित्यज्य शिव एव शिवंकरः ।
ध्येय इत्याह परमा श्रुतिराथर्वणी खलु ॥

अथ किं बहुनोक्तेन शिवः साम्बः सनातनः ।
साक्षान्निष्ठा हि शास्त्राणां नापरः सत्यमीरितम् ॥

तदन्यत्सकलं विश्वं स हि विश्वाधिकः शिवः ।
स एव जगतां नाथः स तु संसारमोचकः ॥ इति

तत्रैव—

ब्राह्मे मुहूर्ते चोत्थाय शिवं साम्बं त्रिलोचनम् ।
ध्यात्वा समाहितो भूत्वा धर्ममर्थं च चिन्तयेत् ॥

तत्रैव सप्तदशे—

साक्षात्परतरस्यैव वस्तुनः सर्वसाक्षिणः ।
अस्ति मूर्तिः परा शुद्धा स्वतन्त्रा पापनाशिनी ॥

---

[1] दीपः सुमहन्नाशयेत्तमः- पा.

तस्यासाधारणा मूर्तिः साम्बा चन्द्रार्धशेखरा ।
नीलग्रीवा विरूपाक्षा ध्येया ब्रह्मादिभिः परैः ॥ इति

सौरसंहितायां—

सर्वैश्वर्येण संपन्नं सर्वेशं च स्वभावतः ।
तद्विज्ञानाभिवृध्यर्थं तदेव ध्येयमास्तिकैः ॥ इति

ईश्वरध्याननिष्ठं प्रति ईश्वरोऽनुगृह्णातीति योगशास्त्रकारैरप्युक्तम्—[1] 'ईश्वरप्रणिधानाद्वा' अस्य सूत्रस्येदं वैयासिकं भाष्यम्—[2] 'प्रणिधानात् भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति । अभिध्यानमात्रेण तदभिध्यानादपि योगिन आसन्नतरः समाधिलाभः समाधिफलेच्छा' इति । एतस्य भाष्यस्य व्याख्यानम्—[3] 'तत्त्वशब्दादिप्रणिधानाद्भक्तिविशेषान्मानसाद्वाचिकात्कायिकाद्वा आवर्जितोऽभिमुखीकृतस्तमनुगृह्णाति । अभिध्यानमात्रेण—अभिध्यानमनागतेऽर्थे इच्छा इदमस्याभिमतमस्त्विति तावन्मात्रेण न व्यापारान्तरेणेति । हृदयपुण्डरीके परमेश्वरस्य ध्यानं कर्तव्यम्' इति । आदौ पुराणवचनानि लिख्यते—सूतसंहितायां शिवमाहात्म्यखण्डे द्वितीयाध्याये—

पुनः साक्षाच्छिवध्यानसिध्यर्थं मुनिपुङ्गवाः ।
अग्निहोत्रसमुत्पन्नं भस्मादायादरेण तु ॥

निधाय पात्रे शुद्धे तत् पादौ प्रक्षाल्य वारिणा ।
द्विराचम्य मुनिश्रेष्ठाः सपवित्राः समाहिताः ॥

ओमापः सर्वमित्येतन्मन्त्रमुच्चार्य भक्तितः ।
ध्यात्वा शिवं जलाध्यक्षं गृहीत्वा भस्म वारिणा ॥

विमृज्य मन्त्रैर्जाबालैरग्निरित्यादिसप्तभिः ।
समाहितधियः शुद्धाः शिवं ध्यात्वा शिवामपि ॥

समुद्धूल्य मुनिश्रेष्ठा आपादतलमस्तकम् ।
सितेन भस्मना तेन ब्रह्मभूतेन भावनात् ॥

---

[1] योगसूत्रम् १–३. [2] १–३. [3] १–३.

ललाटे हृदये कुक्षौ दोर्द्वन्द्वे च सुरोत्तमाः ।
त्रिपुण्ड्रधारणं कृत्वा ब्रह्मविष्णुशिवात्मकम् ।।
एवं कृत्वा व्रतं [1] देवमथर्वशिरसि स्थितम् ।
शान्ता दान्ता विरक्ताश्च त्यक्त्वा कर्माणि सुव्रताः ।।
वालाग्रमात्रं विश्वेशं जातवेदस्स्वरूपिणम् ।
हृत्पद्मकर्णिकामध्ये ध्यात्वा वेदवीदां वराः ॥
सर्वज्ञं सर्वकर्तारं समस्ताधारमद्भुतम् ।
प्रणवेनैव मन्त्रेण पूजयामासुरीश्वरम् ॥
अथ तेषां प्रसादार्थं पशूनां पतिरीश्वरः ।
उमार्धविग्रहः श्रीमान् सोमार्धकृतशेखरः ॥
नीलकण्ठो निराधारो निर्मलो निरुपप्लवः ।
ब्रह्मविष्णुमहेशानैरुपास्यः परमेश्वरः ॥
सान्निध्यमकरोद्रुद्रः साक्षात्संसारनाशकः ॥ इति

वायवीयसंहितायां पूर्वभागेऽष्टाविंशाध्याये—

अवतार्य स्वमात्मानाममृतात्माकृतिं हृदि ।
द्वादशान्तस्थितस्येन्दोः परस्तात्सितपङ्कजे ॥
अर्धनारीश्वरं देवमतीव मधुराकृतिम् ।
शुद्धस्फटिकसङ्काशं प्रसन्नं शीतलद्युतिम् ॥
ध्यात्वा नामाष्टकैरेव भावपुष्पैः समर्चयेत् ।

तत्रैवोपरिभागेऽष्टमाध्याये—

तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम् ।
तेषां शाश्वतिकी शान्तिर्नेतरेषामिति श्रुतिः ॥ इति

तत्रैव नवमे—

व्रतं पाशुपतं कृत्वा ह्यथर्वशिरसि स्थितम् ।
भस्मसञ्छन्नसर्वाङ्गा बभूवुरमरास्तथा ।

---

[1] देवा अथर्व.

अथ तेषां प्रसादार्थं पशूनां पतिरीश्वरः ।
सगणश्चाम्बया सार्धं सान्निध्यमकरोत्प्रभुः ॥
ये विनिद्रा विनिश्वासा योगिनो वीतकल्मषाः ।
हृदि पश्यन्ति देवं तं ददृशुः सुरपुङ्गवाः ॥ इति

कौर्मे उपरिभागे एकोनचत्वारिंशाध्याये—

ये हि मां योगनिरता ध्यायन्ति सततं हृदि ।
मद्भक्तिपरमा नित्यं यतयः क्षीणकल्मषाः ॥
नाशयाम्यचिरात्तेषां घोरसंसारसागरम् । इति

सौरसंहितायां तृतीयाध्याये—

विविक्तसेवी लघ्वाशी सुखासीनो जितेन्द्रियः ।
समग्रीवशिरःकायः शुचिर्भस्मावकुण्ठितः ॥
त्रिपुण्ड्रधारणैर्युक्तो गुरुभक्तिसमन्वितः ।
हृत्पुण्डरीकमध्ये तु शिवं सत्यादिलक्षणम् ॥
सर्वस्य जगतः साक्षात्सृष्टिस्थित्यन्तकारणम् ।
उमासहायं कल्याणं नीलकण्ठं त्रिलोचनम् ॥
प्रशान्तं प्रभुमीशानं ध्यायेन्नित्यमतन्द्रितः ।
ध्यानेनैव शिवज्ञानं ज्ञानान्मुक्तिर्न कर्मणा ॥
कर्म तु ज्ञानहेतुः स्यादिति तत्त्वविदां स्थितिः ।

इतोऽपि परमेश्वरोपासनं कर्तव्यम्। यतो ब्रह्मविष्ण्वादिभिरपि तदुपासनं कृतमिति वचनानि प्रदृश्यन्ते। सूतसंहितायां मुक्तिखण्डे द्वितीयाध्याये—

उमासहायो भगवान्नीलकण्ठस्त्रिलोचनः ।
ब्रह्मणा विष्णुना चैव रुद्रेणापि सदा हृदि ॥
उपास्यमानः सर्वात्मा सर्ववस्तुविवर्जितः ।
कृतया केवलं विष्णुं विश्वमूर्तिर्वृषध्वजः ॥
अनुगृह्याब्रवीद्विप्रा देवो मधुरया गिरा ।
किमर्थं तप्तवान् विष्णो महाघोरं तपश्चिरम् ॥
अत्यन्तं प्रीतवानस्मि तव तद्वद मेऽनघ ॥ इति

यज्ञवैभवखण्डे नवमाध्याये—

उमार्धविग्रहा [1] शुद्धा चन्द्रार्धकृतशेखरा ॥
नीलग्रीवा त्रिणेत्रा च प्रसन्नवदना शुभा।
वरदाभयहस्ता च विचित्रमकुटोज्वला ॥
सर्वलक्षणसंपन्ना सर्वाभरणभूषिता ।
स्वस्वरूपानुसन्धानप्रमोदादेव केवलात् ॥
महाताण्डवसंयुक्ता ब्रह्मविष्णुशिवादिभिः ॥
ध्येयाऽऽद्यन्तविनिर्मुक्ता या मूर्तिः श्रुतिदर्शिता।
[2] सेयं प्रसन्नमूर्तिः स्यात्परात्परतरस्य तु ॥
ये सदा परमां मूर्तिं ध्यायन्ति हृदयाम्बुजे ।
[3] इह ते परमां मुक्तिं भुक्तिं च प्राप्नुवन्ति हि ॥

तत्रैव सप्तविंशे—

अरूपस्य शिवस्यापि मूर्तिर्ध्येया ह्युपासकैः ।
उमार्धविग्राहा शुद्धा त्रिणेत्रा चन्द्रशेखरा ॥
नीलग्रीवा परानन्दप्रबोधा ताण्डवप्रिया ।
ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ॥
सर्वमूर्तिविहीनस्य [4] सर्वभूताधिपस्य तु।
तथाप्येषा परा मूर्तिरित्येषा शाश्वती श्रुतिः ॥

तत्रैव सूतसंहितायां पञ्चमाध्याये—

अतः प्रसादसिध्यर्थं परया श्रद्धया सह ।
ध्येयमेव परं तत्त्वं हृदयाम्भोजमध्यमे ॥
त्रिमूर्तीनां तु रुद्रोऽपि शिवं परमकारणम् ।
सदा मूर्त्यात्मना प्रीत्या ध्यायन्ति द्विजपुङ्गवाः ॥
त्रिमूर्तीनां च विष्णुश्च शिवं परमकारणम् ।
सदा मूर्त्यात्मना प्रीत्या ध्यायन्ति द्विजपुङ्गवाः ॥

---

[1] शुद्धा. [2] सैव साधारणा मूर्तिः परात्. [3] इमां ते. [4] सर्वमूर्तेः शिवस्य तु.

त्रिमूर्तीनां विरिञ्चोऽपि शिवं परमकारणम् ।
सदा मूर्त्यात्मना प्रीत्या ध्यायन्ति द्विजपुङ्गवाः ॥
ब्रह्मविष्णुमहेशानां त्रिमूर्तीनां विचक्षणाः ।
विभूतिरूपा देवाश्च ध्यायन्ति प्रीतिसंयुताः ॥
घृतकाठिन्यवन्मूर्तिः सच्चिदानन्दलक्षणा ।
शिवाद्वैतेन नैवास्ति शिव एव हि सर्वदा ॥ इति

पराशरोपपुराणे प्रथमाध्याये —

वरदाभयहस्ताय त्रिणेत्राय त्रिमूर्तिभिः ।
हृदि ध्येयाय नित्याय नमः साम्बाय साक्षिणे ॥
वेदवेदान्तगम्याय[1]वेदमार्गनिवर्तिनाम् ।
अगम्याय सुगम्याय नमो वेदान्तवेदिनाम् ॥ इति

सौरसंहितायां तृतीयाध्याये—

महेश्वरः शिवः शम्भुः प्रणवस्यास्य गोचरः ।
अणोरणीयान् महतो महीयानम्बिकापतिः ॥
उमापतिर्नमस्कार्यः सर्वध्येयो हृदम्बुजे ।
तथा ध्येयो हरिब्रह्मप्रमुखैर्गुणमूर्तिभिः ॥ इति

वासिष्ठलैङ्गे तृतीयाध्याये—

मूर्तिरस्य मुनिश्रेष्ठ शिवा सा श्रूयते श्रुतेः ।
उमया सहिता नित्या नीलग्रीवा त्रिलोचना ।
स्वात्मतत्त्वसुखस्फूर्तिमुदिता ताण्डवप्रिया ॥
ब्रह्मविष्णुमहेशाद्यैरुपास्या सर्वदा मुने ।
भोगमोक्षप्रदा पुण्या पुंसां वेदविदां वर ॥
सैव मे परमा मूर्तिरुपास्या सर्वदा तव । इति

सूतसंहितायामेव—

अथ तेषां प्रसादार्थं पशूनां पतिरीश्वरः ।
उमार्धविग्रहः श्रीमान् सोमार्धकृतशेखरः ॥

---

[1] वेदमार्गानुवर्तिनाम्—पा.

नीलकण्ठो निराधारो निर्मलो निरुपप्लवः ।
ब्रह्मविष्णुमहेशानैरुपास्यः परमेश्वरः ॥
सान्निध्यमकरोद्रुद्रः साक्षात्संसारनाशकः ।

पराशरोपपुराण एव—

उमार्धविग्रहा शुद्धा चन्द्रार्धकृतशेखरा ॥
नीलग्रीवा परानन्दप्रमोदा ताण्डवप्रिया ।
ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ॥
सर्वमूर्तिविहीनस्य सर्वभूताधिपस्य तु ।
तथाप्येषा परा मूर्तिरित्येषा शाश्वती श्रुतिः ॥
साक्षात्परतरस्यैव वस्तुनः सर्वसाक्षिणः ।
अस्ति मूर्तिः परा शुद्धा स्वतन्त्रा पापनाशिनी ॥
तस्यासाधारणा मूर्तिः साम्बा चन्द्रार्धशेखरा ।

इत्यारभ्य—

ब्रह्मविष्णुमहेशानास्तं ध्यायन्ति निरन्तरम् ॥ इति

हृदयपुण्डरीके परमेश्वरस्याविर्भावातिशयाद्धृदयमध्यापेक्षया तत्रैव परमेश्वरोपासनं प्रशस्तमिति तदर्थं वचनानि प्रदर्शन्ते ।

भगवद्गीतायाम्—

[1]ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
तमेव शरणं गच्छ सर्वभावेन भारत । इति

'गुहाहितम्' इति, [2]'यो वेद निहितं गुहायामि'ति, 'गुहाशयं निष्कलमद्वितीयम्' [3]'आविः सन्निहितं गुहाचरं' इत्येवमाद्याः श्रुतयः ।

---

[1] गीता. १८-६०. [2] तै. उ. २-१-१. [3] मुण्ड. २-२-१.

शैवे एकादशरुद्रसंहितायां जैमिनिप्रश्नानन्तरं व्यासवचनम्—

ब्रह्म यत् सच्चिदानन्दं परिपूर्णं च सर्वतः।
सर्वत्र दृश्यते नैव करणागोचरत्वतः॥

दृश्यते तच्छरीरेऽस्मिंस्तस्माद्ब्रह्मपुरं च तत्।
तस्मिंस्तु कमलाभं यद्दहरं हृदयं मुने॥

तदिदं पुण्डरीकाख्यं वेश्म प्रोक्तं मया तव।
तस्मिन्नवस्थितं ब्रह्म तेन वेश्मेति कीर्तितम्॥

तद्वेश्म वर्तते देहे तेन देहः पुराभिधः।
यदस्मिन् वर्तते ब्रह्म पुण्डरीकाख्यवेश्मनि॥

वियत्समानरूपत्वादाकाशाख्यं च तद्भवेत्।
तदेवोक्तगुणैर्युक्तं हृदये समुपासितम्॥

भविष्यत्यपरोक्षं ते नात्र सन्देहकारणम्। इति

हृदय एव परमेश्वर एव उपास्य इत्यत्र तत्रैव न्यायोपबृंहितमिदं वचनम्—

आत्मा तु देहे सर्वत्र वर्तमानोऽपि सुव्रताः।
अतीव हृदये स्वस्य प्रकाशो नेतरे तथा॥

अहंशब्दाभिधो ह्यात्मा न विवादोऽत्र कस्यचित्।
अहंशब्दं प्रयुञ्जंश्च लोकः सर्वोऽपि जैमिने॥

हृदयं निर्दिशत्येव ह्यहं तत्र स्थितस्ततः।
[1] यथाऽस्य हृदये नित्यं प्रकाशोऽतीव विद्यते॥

न तथान्यत्र तस्माद्वै हृदयं हि विशिष्यते। इति

तथा च हृदयपुण्डरीके परमेश्वरोपासनं छान्दोग्यबृहदारण्यकतैत्तिरीयकैवल्यश्रुतिभिः प्रतिपादितम्—

[2] 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्' इति प्रस्तुत्य [3] 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु

---

[1] यतोऽस्य—पा. [2] छान्दो. ८-१-१. [3] छान्दो. ८-१-६.

कामचारो भवति' इति चोक्ताऽन्त उपसंहृतं [1]'तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' इति षड्भिः खण्डकाभिः ॥

बृहदारण्यकेऽपि [2]'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु, [3]य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इत्युपक्रम्य [4]'एष सेतुर्विधरण एषां लोकानामसंभेदाय' इत्यन्तेन ग्रन्थेन।

तैत्तिरीयकेऽपि [5]'अणोरणीयान् महतो महीयान्' इत्यारभ्य [6]'दहं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्' इत्युपासनं विधाय, एतत्तृतीयानुवाके [7]'ऋतं सत्यं' इत्युपास्यस्वरूपं प्रतिपादितम् ॥

एवं कैवल्येऽपि—[8]'विविक्तदेशे च सुखासनस्थः' इत्यारभ्य—[9]'हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य' इति हृदयपुण्डरीकमुपासनास्थानं विशदं विशोकमित्यादिना नीलकण्ठं प्रशान्तमित्यन्तेन ग्रन्थेनोपास्यस्वरूपमप्युक्त्वा [10]'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इत्यन्तेन ग्रन्थेन फलमप्युक्तम्। श्रुतेरर्थ इतिहासपुराणाभ्यां विवेचनीयः ॥

सूतसंहितायाम्—

यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः।
तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति ॥ इति

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। इति चोक्तम्।
यो विद्याच्चतुरो वेदान् सङ्गोपनिषदो द्विजः ॥
न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति।

---

[1] छान्दो. ८-६-६, कठ. ६-१६. [2] बृह. ४-३-७. [3] बृह. ४-२-३. [4] बृह. ४-४-२२. [5] तै. उ. ८-३-१२. [6] तै. उ. १०-७. [7] तै. उ. १२-१. [8] कैवल्य-. [9] कैवल्य-५. [10] कैवल्य-७.

इति वायवीयसंहितायाम्। अत्रोदाहृतोपनिषच्चतुष्टयेऽपि समुच्चित्यैव दहरोपासनं कर्तव्यमिति एकादशरुद्रसंहितायां जैमिनिं प्रति व्यासवचनम्—

ब्रह्म यत् सच्चिदानन्दं परिपूर्णं च सर्वतः।
सर्वत्र दृश्यते नैव करणागोचरत्वतः ॥

दृश्यते तच्छरीरेऽस्मिंस्तस्माद्ब्रह्मपुरं च तत्।
तस्मिंस्तु कमलाभं यद्दहरं हृदयं मुने ॥

तदिदं पुण्डरीकाख्यवेश्म प्रोक्तं मया तव।
तस्मिन्नवस्थितं ब्रह्म तेन वेश्मेति कीर्तितम् ॥

तद्वेश्म वर्तते देहे तेन देहः पुराभिधः।
यदस्मिन् वर्तते ब्रह्म पुण्डरीकाख्यवेश्मनि ॥

वियत्समानरूपत्वादाकाशाख्यं च तद्भवेत्।
तथैवोक्तगुणैर्युक्तं हृदये समुपासितम् ॥

भविष्यत्यपरोक्षं ते नात्र सन्देहकारणम्।
वदन्त्यत्यादरेणैव मुने कैवल्यशाखिनः ॥

स्वराडाख्यस्य[1] देवस्य हृदयाम्भोजमध्यमे।
उमासहायो भगवान्नीलकण्ठस्त्रिलोचनः ॥

यः प्रभुर्वर्तते नित्यं परमानन्दविग्रहः।
तं दृष्ट्वा मनुजः सद्यो विमुक्तो भवतीति हि ॥

यः सर्वासां देवतानां च हेतु-
यों वै विष्णोश्चाधिको वै महर्षिः।
ब्रह्माणं यः पश्यते जायमानं
नित्यं सोऽस्मान् सन्मतौ संयुनक्तु ॥

दहं विपाप्मं परमेश्वरस्य
यद्वेश्मभूतं कमलं पुरस्थम्।
तत्रापि दहं गगनं तु शुभ्रं
तदेव नित्यं सकलैरुपास्यम् ॥

---

[1] ह्यस्वरूपस्य.

वेदस्यान्ते वेदमध्ये तदादौ
योऽसौ रुद्रो बोध्यते सर्वयत्नात् ।
सोऽयं देवस्तत्र चोपास्य उक्तो
रुद्रः साक्षात्सच्चिदानन्दरूपः ॥
याजुर्वेद्यं वाक्यमेतत्तथान्य-
द्यच्चेदृक्स्यादत्र शाखान्तरे वा ।
आलोच्यैतत्सर्वमेतत्त्वया वै
व्याख्येयं स्यादस्मदुक्तानुसारात् ॥ इति

अस्मिन्नध्याये 'ब्रह्म यत्सच्चिदानन्दं' इत्यारभ्य 'नात्र सन्देहकारणं' इत्यन्तेन छान्दोग्यश्रुत्युक्तं प्रदर्शितम्। 'वदन्त्यत्यादरेण' इत्यारभ्य 'विमुक्तो भवतीति हि' इत्यन्तेन कैवल्योपनिषदुक्तोपासनमपि सूचितम् । 'यः सर्वासां' इत्यारभ्य 'याजुर्वेद्यं वाक्यमेतत्' इत्यन्तेन तैत्तिरीयोक्तदहरोपासनमपि स्फुटतया प्रदर्शितम् । 'तथान्यत्' इत्यारभ्य शाखान्तरे हृदयपुण्डरीके परमेश्वरो गुणविशिष्टतयोक्तश्चेत्सोऽप्यत्र गुणसमुदाय उपसंहर्तव्य इति सूचितम् । 'ईदृक्स्यात्' इत्यनेन परमेश्वराविरुद्धगुणः सूचितः । 'आलोच्यैतत्' इत्यनेन गुणोपसंहारन्यायोऽपि सूचितः । अनेन परिशेषाच्छाखान्तरं बृहदारण्यकमिति पर्यवसितम् । तथा च सूत्रकारः [1]'कामादीतरत्र तत्र चायतनादित्यः' इति । अस्य भाष्ये श्रुतिद्वयमुदाहृत्यानन्तरं [2]'कामादिः सत्यकामादिरित्यर्थः यथा देवदत्तो दत्तः सत्यभामा भामेति । यदेतच्छान्दोग्ये हृदयाकाशस्य सत्यकामत्वादिगुणजातमुपलभ्यते तत् इतरत्र वाजसनेयके [3]'स वा एष महानज आत्मा' इत्यत्र संबध्यते, यच्च वाजसनेयके वशित्वाद्युपलभ्यते तदपि तत्र छान्दोग्ये [4]'एष आत्मा अपहतपाप्मा' इत्यत्र संबध्यते। कुतः ? आयतनादिसामान्यात् । समानं ह्युभयत्रापि हृदयमायतनम् । समानश्च वेद्य ईश्वरः, समानं च तस्य सेतुत्वं लोकासंभेदप्रयोजनमित्यादि बहु सामान्यं दृश्यते ॥

---

[1] ब्रह्मसूत्र—३-३-३९. [2] शं. भा.—३-३-३९. [3] बृह—४-४-२.
[4] छा—८-१-५.

ननु विशेषोऽपि दृश्यते। छान्दोग्ये हृदयाकाशस्य गुणयोगः वाजसनेयके त्वाकाशाश्रयस्य ब्रह्मण इति, न ; [1]"दहर उत्तरेभ्यः" इत्यत्र छान्दोग्येऽप्याकाशशब्दं ब्रह्मैवेति प्रतिष्ठापितत्वात्। अयं त्वत्र विद्यते विशेषः। सगुणा हि ब्रह्मविद्या छान्दोग्य उपदिश्यते। [2]"अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' इत्यात्मवत्कामानामपि वेद्यत्वश्रवणात्। वाजसनेयके तु निर्गुणमेव परं ब्रह्मोपदिश्यमानं दृश्यते, [3]'अत ऊर्ध्वं विमोक्षायैव ब्रूहि,' [4]'असङ्गो ह्ययं पुरुषः' इत्यादि प्रश्नप्रतिवचनसमन्वयात्। वशित्वादि तत्स्तुत्यर्थमेव गुणजातं वाजसनेयके संकीर्यते। तथा चोपरिष्टात् 'स एष नेति नेत्यात्मा' इत्यादिना निर्गुणमेव ब्रह्मोपसंहरति। गुणवतस्तु ब्रह्मण एकत्वाद्विभूतिप्रदर्शनायायं गुणोपसंहारः सूत्रितो नोपासनाय' इति। तस्मादुभयत्रोपसंहारः। [5]नन्वेवं भाष्योक्तरीत्या वशित्वादिगुणानां बृहदारण्यके ध्येयत्वासंभवाच्छान्दोग्ये उपसंहृतानामपि न ध्येयत्वम्। एवं कैवल्यतैत्तिरीयकगतानामुमासहायत्वविरूपाक्षत्वादीनां स्मरणमेव नास्ति। कथमुपनिषच्चतुष्टयोक्तगुणानां समुच्चित्योपासनम्। न्यायविरोधादिति चेत्—उच्यते [6]सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्' इति सामान्यन्यायेनैवोक्तोपनिषच्चतुष्टये गुणोपसंहारस्य सिद्धत्वात्। तथाहि—चोदनाद्यविशेषादित्यादिशब्देन संयोगरूपा आख्या शाखान्तराधिकरणसिद्धान्तगता गृह्यन्ते अभेदहेतवः। अत्र चोदना उपासनाविधिः [7]'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' इति संयोगः फलं 'तेषां सर्वेषु कामाचारो भवति' इति। रूपं [8]"दहरोऽस्मिन्नन्तराकाश' इति प्रस्तुत्य [9]"य आत्मा आपहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्स' इत्यादि। तथा दहरविद्यायामपि। यथा छान्दोग्ये। एवं कैवल्येऽपि [10]'विशदं विशोकं' इत्युपक्रम्य

---

[1] ब्र. सू.–१-३-१४. [2] छा–८-१-६. [3] बृह–४-३-१४. [4] बृह–४-३-१५. [5] मातृकायां 'उपसंहार' इत्यनन्तरं "नन्वेपमपि कैवल्य" इत्यादिः विश्वस्मादेव द्रष्टव्या इत्यन्तो भागः, तदनन्तरमयं नन्वेवमित्यादिः उपगन्तव्यं इत्यन्तो भागः, तदनन्तरं तच्चिदचिदात्म–इत्यादिग्रन्थः इति क्रमो दृश्यते। [6] ब्र.सू.-३-३-१ [7] छा–८-१-६. [8] छा. ८-१-१. [9] छा. ८–७–१. [10] कैवल्ये. ५

[1]'त्रिलोचनं नीलकण्ठं प्रशान्तं' इत्यन्तेनोपास्यरूपमुक्तम्। [2]'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इति चोदनाफले उक्ते आख्यापि तदहरविद्येति कैवल्यशाखिनः प्रसिद्धैव। एवं तैत्तिरीयकेऽपि [3]'तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यं' इत्युपासनाविधिः। दहरं गगनं विशोक इति [4]'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं' इत्युपास्यस्वरूपमुक्तम्। आदावेव [5]'अणोरणीयान्' इति प्रस्तुत्य [5]'तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्' इति। [6]'स नो देवः शुभया स्मृत्या संयुनक्तु' इति फलं प्रसिद्धम्। 'दहरं विपापमि'ति दहराख्यापि प्रसिद्धैव। एवं बृहदारण्यकेऽपि [7]'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी' इत्यादिना रूपमुक्तम्। फलं च 'अत ऊर्ध्वं विमोक्षायैव ब्रूहि' इति सद्योमुक्तिरूपमुक्तम्। चोदनाशब्दः सगुणनिर्गुणोभयसाधारणः ब्रह्मचोदना त्विति भाष्ये व्यवहारात्। सूत्रकारेणापि चोदनाद्यविशेषादिति सगुणनिर्गुणविद्यासाधारण्येनोक्तत्वात्। आख्यापि वाजसनेयशाखिनः प्रसिद्धा। किं च 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति दहराख्यत्वमुन्नेयम्।

नन्वेवमपि सगुणनिर्गुणविद्यात्वेन भेदाद्गुणोपसंहारः सगुणनिर्गुणविद्ययोर्नसंभवतीत्याशङ्क्य तत्परिहारार्थतया [8]'कामादीतरत्र तत्र चायतनादिभ्यः' इतीदं सूत्रं प्रवृत्तं विद्याभेदेपि गुणोपसंहारः संभवतीति। बृहदारण्ये आम्नातानां वशित्वादीनामुपासनाविधिपरिगृहीतत्वाभावेऽपि तत्र तेषामेव धर्माणां छान्दोग्ये उपसंहारानन्तरं तत्रत्योपासनाप्रयोगविधिप्रकरणे विद्यमानं तदङ्गमिति परिग्रहसंभवात्। अथवा वशित्वादिगुणानां सत्यकामत्वादिना छान्दोग्यगतेनोन्नयनमस्तु। नहि वशित्वाद्यभावे सत्यकामत्वादिकमस्ति, येनकेन प्रकारेणोपसंहारसूत्रबलाद्दहरविद्यायां वशित्वाद्युपासनं कर्तव्यम्। अत एव भामत्यां [9]'उभयत्राप्यात्मोपदेशादाकाश,

---

[1] कैवल्ये ७. [2] कैवल्ये ७. [3] महानारा. १०–७. [4] महानारा. १२–१. [5] कठ २–२०. [6] महानारा. १०–३. [7] बृह. २–१–१७. [8] ब्र. सू. ३–३–३९. [9] ३–३–३९.

शब्देनैकत्रात्मा उक्तः, अन्यत्र च दहराकाशाधारः स एवोक्त इति सर्वसाम्याद्ब्रह्मण्युभयत्रापि सर्वगुणोपसंहारः, सगुणनिर्गुणत्वेन विद्याभेदेऽपि गुणोपसंहारव्यवस्था दर्शिता" इति। उक्तं चाधिकरणरत्नमालयाम्—

असंहृतिः संहृतिर्वा व्योम्नो दहरहार्दयोः।
उपास्यज्ञेयभेदेन सगुणानामसंहृतिः॥

उपास्ये क्वचिदन्यत्र स्तुतये चास्तु संहृतिः।
दहराकाशमात्मैव हृदाकाशोऽपि नेतरः॥ इति

छान्दोग्ये—

[1]'दहरोऽस्मिन्नन्तराकाशः' इति हृदयान्तर्गतत्वेन श्रुतस्य दहराकाशस्य सत्यकामत्वादयो गुणा उपात्ताः। बृहदारण्यके तु [2]'य एषोऽन्तर्हृदय आकाशः' इत्युक्तस्य हार्दाकाशस्य ज्ञेयत्वेन विद्याभेदादिति प्राप्ते-ब्रूमः, तत्र वशित्वादीनां दहराकाश उपसंहार उपास्त्यै भविष्यति, सत्यकामत्वादीनां तु हार्दाकाशस्तुत्यर्थमुपसंहारः। न च प्रयोजनवत्त्वेऽपि विद्याभेदो दुष्परिहर इति वाच्यम्। विद्याभेदेऽप्युभयत्राकाशवाच्यास्यात्मन एकत्वात्। दहराकाशस्य तावदात्मत्वं दहराधिकरणे वर्णितम्। हार्दाकाशस्यापि [3]'महानज आत्मे' त्युपक्रमादात्मत्वमुपगन्तव्यम्।

नन्वेवमपि कैवल्यतैत्तिरीयकयोराम्नातानां परमेश्वरगुणानां कथं छान्दोग्य उपसंहारः? सामान्यन्यायस्य विद्यमानत्वेऽपि विशेषन्यायाभावात्, न; आयतनादीनामप्युभयत्र तुल्यत्वात्। तैत्तिरीये तावत् 'यत्पुण्डरीकं पुरमध्यसंस्थम्' इति हृदयपुण्डरीकमायतनम्, 'तत्रापि दहं गगनं विशोकः' इति दहरत्वं गगनशब्दवाच्यस्याकाशत्वं विशोको विजिघत्स इत्यादिवत् विशोकत्वोपलक्षितेतरगुणादिकं च सूचितम्। [4]कैवल्येऽपि—'हृदयपुण्डरीकं विरजं' इति आयतनं विशदं विशोकमिति छान्दोग्यगतविशोकादिगुणसूचनम्। अनन्तमिति [5]'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय

[1] छा. ८–१–१. [2] बृह. २–१–१७. [3] बृह. ४–४–२२. [4] कैवल्ये-५. [5] छान्दो–८-१-३.

आकाश' इति अपरिच्छिन्नत्वादिकमपि सूचितम्। इतरत्र तत्र चेति सर्वनामशब्दप्रयोगः साधारण एव। तस्मात्पुराणवचनात्सामान्यविशेषन्यायसाम्याच्च सिद्धं समुच्चित्यैवोपासनम्॥

ननु नारायणानुवाके[1] 'सहस्रशीर्षं देवं' इत्यादिना 'विश्वं नारायणं हरिम्' इत्यादिना च नारायणस्याप्युपास्यत्वं श्रूयते। कथं परमेश्वरस्यैवोपास्यत्वमुच्यत इति चेन्न; नारायणस्योपासकत्वेनैव पुराणेषु श्रवणात्॥

तथा हि—सौरसंहितायाम्—

उमापतिर्नमस्कार्यः सर्वैर्ध्येयो हृदम्बुजे।
तथा ध्येयो हरिर्ब्रह्मप्रमुखैर्गुणमूर्तिभिः॥

तस्य ध्याता हरिः साक्षान्नारायणसमाह्वयः।
देवः सहस्रशीर्षश्च विश्वाक्षो विश्वशङ्करः॥

विश्वो विश्वस्य निर्माता पालकोऽत्ता परात्परः।
अक्षरः परमो नित्यो हरिर्मायापतिः प्रभुः॥

पुरुषश्च पुराणश्च तं विश्वमुपजीवति।
सोऽयं सर्वैर्महत्त्वेन परब्रह्मात्मनापि च॥

योऽयं परायणत्वेन परब्रह्मात्मनापि च।
अयमेव परं तत्त्वं परं ज्योतिः परात्परः॥

अयमात्मा समस्तस्य चेतनस्य परस्य च।
यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा॥
अन्तर्बहिश्च तत्सर्वं व्याप्य रुद्रो व्यवस्थितः।
साक्षाद्वेदान्तवाक्यानां निष्ठा रुद्रः पशोः पतिः।

अम्बिकापतिरानन्दः स्वयमेव न संशयः।
अस्य नारायणस्यापि ब्रह्मणः परमेष्ठिनः॥

रुद्रस्यापि शिवो ध्येयः किं पुनः सर्वदेहिनाम्।
तस्मात्सर्वप्रयत्नेन शिवं साम्बं त्रिलोचनम्॥

---

[1] महानारा—११-२-२.

ऊर्ध्वरेतसमीशानं ध्यायेन्नित्यमतन्द्रितः ।
तं सर्वकारणं रुद्रमणीयांसमणोरपि ॥
महान्तं महतः साक्षात्प्रणवेनैव पूजयेत् । इति ।

अनेन वचनेन नारायणस्यैव परमेश्वरध्याने साक्षादधिकारः । ब्रह्म-रुद्रयोश्च हृदयपुण्डरीके परमेश्वरध्याने यः प्रवर्तते स आदौ स्वा-त्मानं नारायणत्वेन सहस्रशीर्षत्वादिगुणयुक्तत्वेन परिभाव्य अनन्तरं नारायणात्मना विद्यमानस्य स्वस्य हृदयपुण्डरीकमध्ये वह्निना दीप्ते परमात्मानं परमेश्वरं ध्यात्वा अनन्तरमहन्त्वेनापि भावयेदिति । अस्मिन्नर्थे [1] 'सहस्रशीर्षं देवमि 'ति नारायणानुवाक एव प्रमाणम् ।

उक्तं च सूतसंहितायाम्—

अथवाहं हरिः साक्षात्सर्वज्ञः पुरुषोत्तमः ।
सहस्रशीर्षः पुरुषः सहस्राक्षः सहस्रपात् ॥
विश्वो नारायणो देव अक्षरः परमः प्रभुः ।
इति ध्यात्वा पुनः स्वस्य हृदयाम्भोजमध्यमे ॥
प्राणायामैर्विकसिते परमेश्वरमन्दिरे ।
अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते ॥
ज्ञाननाले महाकन्दे प्रणवेन प्रबोधिते ।
विश्वार्चिषं महावह्निं ज्वलन्तं सर्वतोमुखम ॥
वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ।
तापयन्तं स्वकं देहमापादतलमस्तकम् ॥
निवातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ।
नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम् ॥
नीवारशूकवद्रूपं पीताभासं विचिन्तयेत् ।
तस्य वह्नेः शिखायां तु मध्ये परमकारणम् ॥
परमानन्दमात्मानं परमाकाशमध्यगम् ।
ऋतं सत्यं परं ब्रह्म साम्बं संसारभेषजम् ॥

---

[1] महानारा—११-१.

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महेश्वरम् ।
नीलग्रीवं स्वमात्मानं पश्यन्तं पापनाशनम् ॥

ब्रह्मविष्णुमहेशानैर्ध्येयं ध्येयविवर्जितम् ।
सोऽहमित्यादरेणैव ध्यायेद्योगीश्वरेश्वरम् ॥

अयं मुक्तेर्महामार्ग [1] आगमान्तैकसंस्थितः । इति ।

अथवा स्वस्य हृदयाम्भोजे नारायणं ध्यात्वा सोऽहमिति विचिन्त्य तस्य नारायणस्य हृदये परमेश्वरं ध्यायेदहङ्कृहपर्यन्तमिति नारायणानुवाकस्यार्थः । तदुक्तं योगयाज्ञवल्क्ये—

हृत्पद्मेऽष्टदलोपेते कन्दमध्यात्समुत्थिते ।
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलमुन्मुखे ॥

प्राणायामैर्विकसिते वैराग्यान्वितकर्णिके ।
शुद्धस्फटिकसंकाशं सूर्यकोटिसमप्रभम् ॥

पद्मच्छविपदद्वन्द्वं परमात्मानमीश्वरम् ।
प्रभाविभावसद्रूपं परितः पुरुषोत्तमम् ॥

मनसालोक्य भूतेशं सर्वलोकहृदि स्थितम् ।
सोऽहमेवेति यज्ज्ञानं सगुणध्यानमुच्यते ॥

हृत्सरोरुहमध्येऽस्मिन् प्रकृत्याकारकर्णिके ।
ऐश्वर्याष्टदलोपेते विद्याकेसरसंयुते ॥

ज्ञाननाले महाकन्दे प्राणायामैः प्रबोधिते ।
विश्वार्चिषं महावह्निं ज्वलन्तं सर्वतोमुखम् ॥

वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ।
तापयन्तं स्वकं देहमापादतलमस्तकम् ॥

निवातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ।
दृष्ट्वा तस्य शिखामध्ये परमात्मानमीश्वरम् ॥

नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम् ।
नीवारशूकवद्रूपं पीताभं सर्वकारणम् ॥

---

[1] आगमार्थैकसंस्थितः—पा.

ज्ञात्वा वैश्वानरं देवं सोऽहमात्मेति या मतिः ।
सगुणेषूत्तमं ह्येतद्ध्यानं योगविदो विदुः ॥
वैश्वानरत्वं संप्राप्य मुक्तिं तेनैव गच्छति । इति ।

उक्तं च कूर्मपुराणे—

कृत्वा हृत्पद्मनिलयं शैवाख्यं विश्वशंभवम् ॥
आत्मानं सर्वभूतानां परस्तात्तमसः स्थितम् ।
सर्वस्याधारमव्यक्तमानन्दं ज्योतिरव्ययम् ॥
प्रधानपुरुषातीतमाकाशमजडं शिवम् ।
तदन्तः सर्वभूतानामीश्वरं विश्वरूपिणम् ॥
ध्यायेदनादिमद्वैतमानन्दादिगुणालयम् ।
अनन्तं पुरुषं ब्रह्म ब्रह्माणं सत्यमव्ययम् ॥
पुराणपुरुषं शंभुं ध्यायन्मुच्येत बन्धनात् । इति ।

महाभारते शान्तिपर्वणि अर्जुनं प्रति श्रीकृष्णवचनम्—

अहमात्मा हि लोकानां सर्वेषां पाण्डुनन्दन ॥
तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् ।
यद्यहं नार्चयेयं वै ईशानं भुवनेश्वरम् ॥
आत्मानं नार्चयेत् कश्चिदिति मे भावितं मनः ।
मया प्रमाणं हि कृतं लोकस्तदनुवर्तते ॥
प्रमाणानि च पूर्णानि ततस्तं पूजयाम्यहम् ।
इति संचिन्त्य मनसा पुराहं विश्वमीश्वरम् ॥
पुत्रार्थमाराधितवानात्मनात्मानमात्मनः । इति ।

उदाहृतोपनिषच्चतुष्टयेऽपि उपास्यब्रह्मणो गुणनिर्धारणं क्रियते। तत्र तावच्छान्दोग्ये—[1] 'एष आत्मे'त्युपक्रम्य तदनु [1] 'अपहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इत्यष्टौ गुणाः। यद्यपि [2] 'उभे अस्मिन् द्यावापृथिवी'

---

[1] छान्दो. ८-१-५. [2] छान्दो. ८-१-३.

इत्यादिना पूर्वत्र द्यावापृथिव्याधारत्वमुक्तम्, उत्तरत्रापि हृदयनाम-निर्वचनं, सत्यशब्दाक्षरत्रयनिर्वचनं, सत्त्वादिगुणाश्च सन्ति, तथापि तेषामुपास्यगुणत्वेन विवक्षा नास्ति। पूर्वत्रासत्याल्पत्वा-दिशङ्कापरिहारार्थतया द्यावापृथिव्यादिसमाधानमुक्तम्। उत्तरत्रो-पासनाप्रवृत्त्यर्थतया स्तुत्यर्थमुक्तम्। एतत्सर्वं छान्दोग्यभाष्यादौ द्रष्टव्यम्। बृहदारण्यके—[2]'सर्वस्य वशी सर्वस्येशानः सर्वस्याधि-पतिः' इति वशित्वादिगुणत्रयमेव। [1]'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इति विद्वत्फलकथनम्। [2]'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोका-नामसंभेदाय' इति तु विद्याविषयभूतेश्वरस्तुतिः। एतदुक्तं वार्ति-ककारैः—

भूयान् स साधुना नेति ज्ञानस्य फलमुच्यते।
एष सर्वेश्वरोक्तिश्च यथोक्तस्यैव संस्तुतिः॥ इति।

कैवल्ये—

[3]'हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्य' इति प्रस्तुत्य 'विशदं विशोकं' इत्यारभ्य [4]'नीलकण्ठं प्रशान्तं' इत्यन्तेन एकविंशतिगुणा आम्नाताः। तैत्तिरीयके तु [5]'दहं विपाप्मं' इत्यारभ्य 'तस्मिन्य-दन्तस्तदुपासितव्यं' इत्यन्तेनोपासनां विधाय उपास्यस्वरूपं किमि-त्याकाङ्क्षायां [6]'यो वेदादौ स्वर' इत्यादिना 'स महेश्वर' इत्यन्तेन प्रण-वप्रकृतिवाच्यत्वेन महेश्वरत्वेन च प्रस्तुत्य तस्य वा किं स्वरूपमित्या-काङ्क्षायां [7]'सहस्रशीर्षं' इत्यादिना 'समुद्रेऽन्तं विश्वशंभुवं' इत्यन्तेन परात्मानं स्तुत्वा तत्सम्बन्धित्वेन [8]'पद्मकोशप्रतीकाशं' इत्यादिना 'सन्ततं शिराभिस्तु लम्बत्याकोशसन्निभं' इत्यन्तेन हृदयपुण्डरीक-मपि परिचिन्त्य, अथवा तादृशमात्मानमुपासकस्तत्त्वेन विचिन्त्य तत्तादात्म्यमापन्नस्य स्वस्य सम्बन्धित्वेन हृदयपुण्डरीकं स्वस्थाने विद्यमानमेव परिचिन्त्य तन्मध्ये वैश्वानराग्निशिखामध्यवर्तित्वेन

---

[1] कौषी. ३-२२. [2] बृह. ४-४-२२. [3] कैवल्य-६. [4] कैवल्य ७.
[5] महानारा १०-७. [6] महानारा १०-९. [7] महानारा ११-१. [8] महानारा ११-९.

[1]'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इति पुर्वोक्तमहेश्वरशब्दवाच्यस्य परमशिवस्योपास्यभूतस्य [2]'ऋतं सत्यं' इत्यादिना 'विश्वरूपाय वै नम' इत्यन्तेनाष्टौ गुणा आम्नाताः ॥

इदानीमुपासनाप्रकारो लिख्यते। तत्राप्यधिकारी प्रदर्श्यते। [3]'अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्' इत्यादिना छान्दोग्ये ब्रह्मचर्यादिसाधनसंपन्नोऽधिकारी प्रतीयते। ब्रह्मचर्यं स्त्रीविषयतृष्णात्यागः। कैवल्योपनिषदि [4]'श्रद्धाभक्तिध्यानयोगादवैहि' इति श्रद्धादिकमधिकारिविशेषणमुक्तम्। तत्र श्रद्धा नाम गुरूपदिष्टेऽर्थे विश्वासः। भक्तिस्तस्मिन्नेवार्थे तात्पर्यम्। तस्मिन्नेवार्थे विजातीयप्रत्ययतिरस्कारपूर्वकः सजातीयप्रत्ययप्रवाहो ध्यानम्। योगः—

विविक्तदेशे च सुखासनस्थः
शुचिः समग्रीवशिरश्शरीरः।
अत्याश्रमस्थः सकलेन्द्रियाणि
निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥

इति वक्ष्यमाणः। विविक्तदेशे—एकान्तदेशे, चकारादव्याकुलकाले, सुखासनस्थः—सुखमनुद्वेगकरं दर्भासनाद्यासनं सुखासनं तस्मिंस्तिष्ठतीति सुखासनस्थः, शुचिः—बहिरन्तश्शौचवान्, समग्रीवशिरश्शरीरः—समानि ग्रीवा च शिरश्च शरीरं च यस्य सः समग्रीवशिरश्शरीरः ऋजुकायः। पद्माद्यासनस्थ इत्यर्थः। अत्याश्रमस्थः—(अत्यधिकः) ब्रह्मचारिगृहिवानप्रस्थकुटीचकबहूदकहंसाद्याश्रमास्तान् प्रत्यधिक अत्याश्रमः परमहंसलक्षणः तस्मिंस्तिष्ठतीत्यत्याश्रमस्थः, यद्वा अत्याश्रमशब्देन विभूतिधारणरूपं व्रतमुच्यते, तन्निष्ठोऽत्याश्रमस्थः। तदुक्तं सूतसंहितायाम्—

अथवाथर्वणैर्मन्त्रैर्गृहीत्वा भस्म पाण्डुरम्।
सर्वाङ्गोद्धूलनं यत्तद्व्रतं प्रोक्तं मनीषिभिः ॥
एतद्वेदशिरोनिष्ठाः प्राहुः पाशुपतं मुने।
केचिच्छिरोव्रतं प्राहुः केचिदत्याश्रमं बुधाः ॥ इति

---

[1] महानारा ११-१३. [2] महानारा १२-१. [3] छान्दो. ८-१-५. [4] कैवल्य २.

सकलेन्द्रियाणि–निखिलानि समनस्कानि ज्ञानकर्मेन्द्रियाणि, निरुध्य –स्वस्वप्रचारेभ्यो निरुध्य, भक्त्या देववद्देवाधिक्याद्वा (स्य) स्वगुरुं-स्वस्य ब्रह्मविद्योपदेष्टारं, प्रणम्य–प्रकर्षेण नत्वा। अनेन गुरुनमस्कारोऽप्यधिकारिविशेषणमुक्तम्। यद्यप्यस्यां कैवल्योपनिषदि 'न कर्मणे'त्यारभ्य [1]'परामृतात्परिमुच्यन्ति सर्वे' इत्यन्तेन सन्यासोऽपि साधनमिति प्रतीयते, एवं तैत्तिरीयकेऽपि 'न कर्मणे' त्यादिमन्त्रद्वयमस्ति, तथापि [2]'वेदान्तविज्ञानसुनिश्चितार्थाः' इति यतीनां विशेषणान्निर्गुणविद्याभिप्रायमुभयत्र मन्त्रद्वयम्। अत एवोभयत्र 'त्यागेनैके अमृतत्वमानशुः' इति प्रकृतदहरविद्याधिकार्यपेक्षया अन्यैव तादृशनिर्गुणब्रह्मविद्यार्थमेवेयं दहरविद्या प्रवृत्ता। अत एवास्यामुपनिषदि '[3]ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इति उत्तरत्र फलं वक्ष्यति। उक्तं च सूतसंहितायां कैवल्योपबृंहकाध्याये—

अस्ति तत्त्वं परं साक्षाच्छिवरुद्रादिसंज्ञकम्।
तदवश्यं महायासाद्वेदितव्यं मुमुक्षुभिः॥

इत्युपक्रम्य—

ब्रह्मदृश्ये शरीरेऽस्मिन्नन्तकाले परस्य तु।
अज्ञानाख्यस्य ते सर्वे मुच्यन्ते हि परामृतात्॥

इत्यन्तेन। अस्य ग्रन्थस्य तात्पर्यदीपिकायां निर्गुणब्रह्मविद्यापरत्वेन व्याख्यानं कृतम्। 'मुच्यन्ते हि परामृतादि' त्यनन्तरमिदमुपबृंहकवचनं सगुणविद्याधिकारिविषयम्।

'अतो विद्याभिसिध्यर्थं मुमुक्षुर्मतिमत्तमः।
विविक्तदेशमाश्रित्य सुखासीनो माहाशुचिः॥
समग्रीवशिरःकायः सितभस्मावकुण्ठनः।
इन्द्रियाणि समस्तानि निरुध्य सुरपुङ्गवाः॥
प्रणम्य स्वगुरुं भक्त्ये' त्यन्तम्।

---

[1] कैवल्य ४. [2] तै १०-६. [3] कैवल्य ७.

तैत्तिरीयके तु—

[1] अणोरणीयान्महतो महीया-
नात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥

इत्यनुवाकादौ पठिते मन्त्रे धातुः परमेश्वरस्य प्रसादादनुग्रहात्तमेवाक्रतुं सङ्कल्परहितं अत एव परमानन्दभरितं महिमानं क्षयवृद्धिरहितं एवं भूतमीशानं महेश्वरं वीतशोकः सन् पश्यति साक्षात्करोति । तादृशसाक्षात्कारार्थी मुमुक्षुरधिकारी [2] फलमप्यात्मशोकनिवर्तकसाक्षात्कार एवेति प्रतीयते । न केवलमस्य मन्त्रस्येशपदघटितत्वात् परमेश्वरपरत्वम् । किं तु शिवराघवसंवादे त्रिपुण्ड्रधारणाङ्गभस्मसंपादने शैवे कर्मणि विनियुक्तत्वाच्च । एवं [3]'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः' इति मध्ये रुद्रशब्देन परामृष्टत्वाच्च परमेश्वरज्ञानरूपफलार्थमेव प्रवृत्तो मुमुक्षुरेवाधिकारी । यद्वा 'यो देवानामि' त्यारभ्य 'संयुनक्तु' इत्यन्तो मन्त्रः फलाधिकारिसमर्पणपरः । तथा हि—महर्षिर्महाद्रष्टा [4]'यः सर्वज्ञः सर्ववित्' 'अशेषविषयामोघशुद्धबुद्धिविजृम्भणः' इत्यादिश्रुतिस्मृतिप्रतिपन्नाशेषविषयबोधनसमृद्धयो विश्वस्मादेव द्रष्टव्या इति । [5]विश्वस्माच्चिदचिदात्मकप्रपञ्चादधिकः । कृत्स्नस्य पशुपाशवर्गस्य नियन्तृत्वाद्रुद्रो मुक्तानां संसारदुःखस्य द्रावको देवानां मध्ये प्रथमं हिरण्यगर्भं पुरस्तात्कल्पादौ स्वसङ्कल्पेन स्वस्माज्जायमानं करुणापरिपूर्णया सकलभुवनसृष्टिसामर्थ्यवितरणविचक्षणयाऽऽज्ञादृष्ट्या अपश्यत् । स देवोऽस्माच्छुभया परमानन्दप्राप्तिकारिण्या [6]'स्मृति[7]प्रतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' इति श्रुतिप्रसिद्धया स्मृत्या संयोजयतीति । यस्मात्परमन्त्रोऽपि शिवपर एव । अत एवाश्वलायनस्मरणम् ॥

यस्मात्परतरं नास्ति नापरं च परात्मनः ।
न ज्यायोऽस्ति न चाणीयान्नमस्तस्मै स्वयम्भुवे ॥

---

[1] महानारा—८· ३. [2] फलमप्यविद्यानिव. [3] महानारा—१०-३. [4] मुण्डक—१-१-९. [5] तच्चिदचिदात्मक. [6] छान्दो ७-२६-२. [7] स्मृतिलम्भे.

येनेदमखिलं पूर्णं यन्मायामूर्तयः स्मृताः।
तस्मै शिवाय महते नमः सूक्ष्माक्षरात्मने ॥ इति।

यदि '[1]वेदान्तविज्ञानसुनिश्चितार्थाः' इत्ययमेव मन्त्रो 'दहं विपाप्म' मिति विधायकमन्त्रादव्यवहितोऽधिकारिफलसमर्पक इत्याग्रहः तदा 'वेदान्तविज्ञाने' त्यत्र विज्ञानशब्देन परोक्षज्ञानं 'सन्न्यासयोगा' दिति सन्न्यासशब्देन कर्मफलन्यासः, यतयो यतनशीलाः, अपरोक्षज्ञानार्थं दहरविद्यायां यत्नं कुर्वन्तः परामृतादुपास्यसाक्षात्कारात्परिमुच्यन्तीति व्याख्येयः। तथा च सत्यवादी धर्माद्यनुष्ठानपरो बाह्यविषयतृष्णारहितो ब्रह्मचर्यवानुपास्यविषये श्रद्धाभक्तियुक्त एकान्तप्रियः शुचिर्योगरसिको निगृहीतबाह्यान्तःकरणः संक्षालितकामक्रोधादिमलः कर्मफलत्यागी उपास्यसाक्षात्कारपर्यन्तं दहरविद्यायां यतनशीलो मुमुक्षुर्गुरुभक्तोऽधिकारीत्युक्तो भवति। एवं चैतादृशाधिकारी पुरस्थानापन्नस्य स्वशरीरस्य मध्ये विद्यमानं द्वारपालादियुक्तत्वेन वेश्मस्थानीयं हृदयपुण्डरीकं विरजमुपासकान्तःकरणस्य विषयवैतृष्ण्येन तत्तदुपभोगजनितकालुष्यराहित्यान्निर्मलं तदाधारत्वात्पुण्डरीकमपि विरजम्। अत एव विशुद्धम्। अत एव तैत्तिरीयके '[2]दहं विपाप्मं परवेश्मभूतं हृत्पुण्डरीकं पुरमध्यसंस्थम्' इत्युक्तम्। दहं स्वल्पपरिमाणं, विपाप्मं विपापं सर्वदुरितरहितं, परवेश्मभूतं, परवेश्म राजभवनादि तद्भावमापन्नं उपासकानुग्रहाय निर्मितं अनवद्यं वेश्म, पुण्डरीकं पुण्डरीकसदृशं पुण्डरीकाख्यं वा हृदयम्। कैवल्योपनिषदि—[3]'विरजं विशुद्धं विचिन्त्य' इति विद्यमानत्वात्। अत्राप्येवंभूतं विचिन्त्य [4]'तत्रापि दहं गगनं विशोकः' तत्रापि तथा दहरेऽपि तस्मिन् स्थाने ततो दहं तदन्तर्गतत्वाद्गगनं गगनसंज्ञं अव्याकृताकाशं मायाशबलितं ब्रह्म सर्वस्थूलसूक्ष्मकार्यसमष्टिभूतसूत्रात्मनोऽपि कारणभूतं विशोकः तत्र प्रतिष्ठितानां दुःखाभावात्तस्य शोकराहित्यं, 'तस्मिन् यदन्तस्तदुपासितव्यं' तस्मिन्नव्याकृताकाशे यन्निरुपाधिकं तत्त्वं तस्याव्या-

---

[1] महानारा–१०-६. [2] महानारा–१०-७. [3] कैवल्य–५. [4] महानारा–१०-७.

कृतस्य विशिष्टवेषेणाध्यस्तत्वात्तस्यापि सत्तास्फूर्तिप्रदत्वेन तदन्तः तत्सारभूततया विद्यमानं तदुपासितव्यम्। उक्तं चान्यत्र [1]'कस्मिन् खल्वाकाश ओतश्च प्रोतश्च' इति गार्गीप्रश्नानन्तरं [2]'एतद्वै तदक्षरं गार्गि' इति याज्ञवल्क्येनाक्षरशब्दवाच्यं ब्रह्मेति। यद्वा [3]'तत्रापि दहं गगनं विशोकः' इति दहरशब्दवाच्यं छान्दोग्योक्तरीत्या मुख्य-ब्रह्मैव "तस्मिन् यदन्तस्तदुपासितव्यं' इति। तस्मिन् ब्रह्मण्यु-पासकानुग्रहार्थमतिगुह्यतया विद्यमानं [4]'ऋतं सत्यं परं ब्रह्म' इत्यादिना च वक्ष्यमाणं परमेश्वरस्य लीलाविग्रहरूपमुपासितव्य-मिति। एवं चोपासकोऽहं नारायण इति स्वात्मानं नारायणात्म-तया विभाव्य तस्य हृदये परमेश्वरं ध्यायेदिति॥

यद्वा उपासकः स्वस्य हृदये [5]'सहस्रशीर्षं देवं' इत्याद्युक्त-प्रकारेण नारायणं ध्यात्वा सोऽहमिति विचिन्त्य स्वाभिन्नत्वेन स्वोपास्यनारायणस्य हृदये परशिवं ध्यायेत्॥

ननु नारायणाभिन्नत्वेन परमेश्वरं विचिन्त्य स्वस्य हृदये तादृशपरमेश्वर एवोपास्योऽस्तु; न च परमेश्वरस्य नारायणात्मत्वं विरोधान्न संभवतीति वाच्यम्; विरोधस्यैवाभावत्। तथाहि— कस्मिन्नंशे विरोधः? किं परतत्त्वांशे विरोधः? सर्वात्मत्वे वा? विश्वाधिकत्वांशे वा? सर्वकारणत्वांशे वा? लीलाविग्रह-मूर्त्यंशे वा? न तावदाद्यः; अद्वितीयपरिपूर्णपरमानन्द-स्वप्रकाशप्रत्यगभिन्नः परमात्मा एक एवेति मते जीवस्यापि पर-मात्मत्वं कालत्रयेऽपि विद्यत इति तत्त्वमस्यादिश्रुत्युक्तेः, [6]'नारा-यणः परं ब्रह्म तत्त्वं नारायणः परः' इति श्रुतेश्च। न द्वितीयः; सहस्रशीर्षं विश्वाक्षं विश्वं विश्वात्मानं सर्वं व्याप्य नारायणः स्थित इत्यादिना सर्वात्मत्वप्रतीतेः॥

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।
सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिवः॥

इति। [7]'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इति

---

[1] बृह–३-८-७. [2] बृह–३-८-११. [3] महानारा–१०-७. [4] महानारा १२-१. महानारा–११-९. [6] महानारा–११-४. [7] श्वे–३-१४.

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥

इत्यादि मन्त्रोपनिषादादौ यथा शिवस्य सर्वात्मत्वं वर्णितं एवं नारायणस्यापि तत्सिद्धम् । नापि तृतीयः; [1]'विश्वाधिको रुद्रः' इतिवत् [2]'विश्वतः परमं नित्यं' इति विश्वापेक्षया प्रकृष्टत्वश्रवणात् । नापि तुरीयः; यथा अथर्वशिखार्थर्वशिरश्वेताश्वतरोपनिषदादौ सदाशिवस्य सर्वकारणत्वसर्वान्तर्यामित्वसर्वोपसंहर्तृत्वादिकं प्रतिपादितं एवं नारायणस्यापि नारायणसुबालात्मप्रबोधोपनिषदादौ तत्प्रतीतेः । नापि पञ्चमः; ब्रह्मविष्णुरुद्राणां त्रयाणामपि मूर्तीनामभेदस्य तापनीये 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्य' इति च प्रस्तुत्य तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेवाविभक्तांस्त्रीनेव लिङ्गरूपानेव च संपूज्येति मूर्तित्रयात्मनो नाभ्यादौ पूजाया विहितत्वात् यथा मूर्तित्रयात्मकत्वमेकस्य, एवं हृदय उपास्यं विष्णुशिवात्मकस्तु, न, विभक्तांस्त्रीनेवेति वचनस्य विद्यमानत्वात् । तत्र ब्रह्मविष्णुरुद्रलीलामूर्तित्रयात्मकमेकमुपास्यं संभवति । व्याख्यातं च भाष्यकारेण । नैवमत्र शिवनारायणमूर्त्यात्मकमुपास्यं प्रतीयते ॥

नन्वत्रापि [3]'शाश्वतं शिवमच्युतं' इति शिवाच्युतयोरभेदः प्रतीयते । मैवम्; अत्र शिवशब्देन योगरूढ्या निरवधिकपरमानन्दस्वरूपः परमशिव उच्यते । अच्युतशब्देनापि कालत्रयेऽपि च्युतिरहितः परमात्मा नारायण उच्यते । एवं चोभयोस्तत्त्वांशेऽभेदोऽस्तु । न तु लीलाविग्रहांशे । ननु '[4]कृष्णपिङ्गलं' इति पदस्योपास्यस्वरूपसमर्पकमन्त्रे विद्यमानत्वाच्छङ्करनारायणात्मकं लीलाविग्रहरूपमेवास्तु । न; कृष्णपिङ्गलशब्देनार्धनारीश्वररूपमेवोच्यते, न तु पूर्वोक्तरूपम् । नन्वत्र 'पुरुषं कृष्णपिङ्गलं' इति गौरीवामभागात्मकार्धनारीश्वरमूर्तौ यथा प्रमाणं इदमेव नारायणवामभागात्मकशङ्करनारायणात्मकमूर्तौ प्रमाणम् । तथा च कृष्णश्च कृष्णश्च कृष्णौ । पिङ्गलशब्देन पिङ्गलवर्णविशिष्टः शिव उच्यते ।

---

[1] श्वेता–३-४. [2] महानारा–११-२. [3] महानारा–११-३. [4] महानारा–१२-२.

एवं च परमेश्वरस्य देहपरिजिघृक्षायां देवी विष्ण्वात्मकश्यामलवर्णवामभागयुक्ता शिवात्मकपिङ्गलवर्णदक्षिणभागयुक्ता चैका मूर्तिः सैव हृदये ध्येया। 'एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले। भोगे भवानी पुरुषेषु विष्णुः कोपे च काली समरे च दुर्गा' इत्यागमोपदेशात्। 'उमा या स हरिः साक्षाद्यो हरिः सा शिवा स्मृता' इत्यादि वचनात्।

प्रकृतिस्त्वं पुमान् रुद्रस्त्वयि तद्वीर्यमास्थितम्।
त्वन्नाभिपङ्कजाज्जातः पञ्चवक्त्रः पितामहः॥

इति ब्रह्माण्डपुराणे।

नावयोर्विद्यते भेदो मच्छक्तिस्त्वं न संशयः।
त्वं चन्द्रमा अहं सूर्यश्शर्वरी त्वमहं दिवा॥

इत्यादित्यपुराणे च विष्णोः शिवशक्तित्वव्यपदेशात्। कूर्मवासिष्ठलैङ्गादित्यपुराणादिषु शिवनारायणयोर्भर्तृभार्याभावेन देवदारुवनप्रवेशवर्णनात् तत्प्रकरणे—

या तस्य पार्श्वगा साम्बा स पार्वत्यंशजोहरिः।

इत्याद्युक्तेश्च। आदित्यपुराण एव—

या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः।
ये नमस्यन्ति गोविन्दं ते नमस्यन्ति शङ्करम्॥

येऽर्चयन्ति हरिं भक्त्या तेऽर्चयन्ति वृषध्वजम्।
ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम्॥

ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम्।

इति[1] देवात्मकविष्णुभेदः? शिवस्य सिद्ध इति चेत् अत्यल्पमिदमुच्यते। तत्रैवादित्यपुराणे—

सर्वदेवात्मको रुद्रः सर्वदेवाः शिवात्मकाः।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः॥

---

[1] देव्यात्मकविष्णवभेदः.

वामपार्श्वे महादेवी विष्णुः सोमः पितृत्रयम् ।

इति सर्वदेवात्मकत्वाच्छिवस्य । किं च [1]'इयं पृथिवी सर्वेषां भूतानां मधु अस्यै पृथिव्यै सर्वाणि भूतानि मधु' इत्यादिना सर्वस्य सर्वात्मत्वोक्तिपुरस्सरं सर्वेषां परमात्मपर्यवसानमुक्तं मधुब्राह्मणे । तस्मादत्रोपास्यस्वरूपमर्धनारीश्वरात्मकमेव । प्रकृते 'ऊर्ध्वरेतं विरूपाक्षं' इति विशेषणद्वयाच्छ्रुत्यन्तरगतोमासहायत्वादिगुणोपसंहाराच्च । किं चायं मन्त्रो भट्टभास्करेणाप्येवमेव व्याख्यातः ।

नन्वेते प्रकारा भाष्यकारेण न प्रदर्शिताः, न; तत्र तत्र प्रदर्शिता एव । किं परशिवस्य ध्येयत्वमेव न प्रदर्शितं? उत दहरविद्याविषयत्वं? अथवा लीलाविग्रहरूपं? उमासहायादिरूपं वा? ब्रह्मविष्ण्वाद्युपास्यत्वं वा? न तावदाद्यः; [2]'अन्तर उपपत्तेः' इत्येवमादिसूत्रेषूपास्यत्वं परमेश्वरस्य प्रदर्शितम् । तत्र ह्युपकोसल विद्याविषयसंशयप्रदर्शनवेलायां [3]'किमयं प्रतिबिम्बात्मा [4]अक्ष्यधिकरणो निर्दिश्यते, अथ वा विज्ञानात्मा, उत देवतात्मा इन्द्रियस्याधिष्ठाता, अथवेश्वर' इति परमशिववाचकेश्वरशब्द एव प्रयुक्तः । आस्मिन्नेव सूत्रे अत उपपत्तेरन्तरः परमेश्वर इति तद्वाचकशब्द एवोक्तः । एवमनेकासु सगुणविद्यासु निर्गुणविद्यासु च परशिव एव विषय इति परमेश्वरशब्द एव तत्र तत्र प्रयुक्तः । नापि द्वितीयः; [5]'दहर उत्तरेभ्यः' इत्यत्रैवाधिकरणे [6]'स किं भूताकाशः अथ वा विज्ञानात्मा अथ वा परमात्मेति संशयदशायां परमात्मेति प्रदर्श्य उत्तरत्र परमात्मपदं विहाय अत उत्तरं ब्रूमः । परमेश्वर एवात्र दहराकाशो भवितुमर्हती"ति परमेश्वरशब्दः प्रयुक्तः । परमात्मशब्दप्रयोगस्तु देवतान्तरसाधारणः स्यात् । किं च '[7]उमासहायं परमेश्वरम्' इति दहरविद्यागतपरमशिवविषयोमासहायशब्दसामानाधिकरण्याच्च तच्छब्दस्य तद्विषयत्वं निश्चीयते । नचोमासहायत्वादिगुणोपसंहारव्यवहारो भाष्यकारेण न कृत इति वाच्यम्; सत्यकामत्वादिगुणोपसंहारेऽपि भाष्यकारस्या-

---

[1] बृह. २-५-१. [2] ब्र.सू. १-२-१३ [3] शं.भा. १-२-२३. [4] ह्यधिकरणे निर्दिश्यते, उत देवतात्मा इन्द्रियस्याधिष्ठाता, अथवेश्वर इति यथावस्थितपाठः. [5] १-३-१४ [6] शं. भा. ६-३-१४. [7] छान्दो. १-८-१.

नादर एव, प्रकृतोपयोगितया 'सत्यकामः सत्यसङ्कल्पः' इत्यादि-ग्रन्थव्याख्यानं कृतम्। अत एव छान्दोग्यभाष्ये [1]'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्त स्तदन्वेष्टव्यं' इति ग्रन्थव्याख्यानावसरे तात्पर्यार्थकथनपरं भाष्यं शृणुत—तत्र [2]यद्भूतश्रुतपुण्डरीकान्तस्थस्य खस्याल्पत्वात्तत्स्थ-मल्पतरं स्यादिति तदसन्निहितपुण्डरीकवेश्मगतं पुण्डरीकादल्पतरं मत्वा अवोचाम 'दहरोऽस्मिन्नन्तराकाश' इति। किं तर्हि पुण्डरीक-मल्पं तदनुविधायि तत्स्थमन्तःकरणं पुण्डरीकाकाशपरिच्छिन्नं तस्मिन् विशुद्धे संहृतकरणानां योगिनां स्वच्छ इव उदके प्रतिबिम्बं रूपमादर्श इव शुद्धे स्वच्छं विज्ञानस्वरूपावभासं तावन्मात्रं ब्रह्मोपल-भ्यत इति दहरोऽस्मिन्नन्तराकाश इत्यवोचदन्तःकरणोपाधिनि-मित्तमिति। एवं चोपासनार्थं प्रवृत्तस्योत्तमाधिकारिणो 'दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' इति वाक्यार्थज्ञानवेलाया-मेवोपास्यसाक्षात्कार इति प्रकृतसत्यकामत्वादिगुणोपसंहारेऽप्य-नादरः। मध्यमाधिकारिणां तु सत्यकामत्वादिगुणा वशित्वादिगुणाः शाखान्तरीयोमासहायत्वादिगुणाश्चोपसंहर्तव्या एव। यथोक्तगुण-विशिष्टतयोपासनायां कृतायामन्त्यकाल एवोपास्यगुणब्रह्मसाक्षा-त्कारः शास्त्रप्रामाण्याद्भवतीति गुणोप[3]संहारो न्याय्यो दर्शितः।

नापि तृतीयः; [4]'अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणे [5]'लोककामेशितृत्वमपि निरङ्कुशं श्रूयमाणं परमेश्वरं गमयति। यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परेमश्वरे नोपपद्यत इति, अत्र ब्रूमः—स्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानु-ग्रहार्थं—

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि॥ इति स्मरणात्

अपि च यत्र तु निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते भवति तत्र शास्त्रं 'अशब्दमस्पर्शमरूपमव्ययं' इत्यादि। सर्व-कारणत्वात्तु विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन

[1] छान्दो १—८—१. [2] श्रुतपुण्डरीक. [3] संहारन्यायो. [4] ब्र. सू. अ. २ पा. ३सू. २०. [5] शं. भा. १—१—२०

निर्दिश्यते 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिना। तथा हिरण्यश्मश्रुत्वादिनिर्देशोऽपि भविष्यति' इति। एवं वैश्वानराधिकरणे [1]'अभिव्यक्तेरित्याश्मरथ्यः' इति सूत्रस्य भाष्यम्—[2]'अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात्। अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां कृते। प्रदेशेषु वा हृदयादि (षूपलब्धि) स्थानेषु विशेषेणाभिव्यज्यते। अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्याचार्यो मन्यते' इति।

नापि चतुर्थः; 'परमशिवपर्यङ्कनिलयां' इति, 'महामाये विश्वं भ्रमयसि परब्रह्ममहिषि' इति।

भवान्यै भवायापि मात्रे च पित्रे
मृडान्यै मृडायाप्यघघ्ने जनिघ्ने।
शिवाङ्गयै शिवाङ्गाय कुर्मः शिवायै
शिवायाम्बिकायै नमस्त्यम्बकाय॥

इति [3]सौन्दर्यलहरी भुजङ्गादावुमासहायमूर्तेः प्रदर्शितत्वात्। एवमर्धनारीश्वरमूर्तिरपि प्रदर्शिता—

प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहःश्याममर्धम्।
गुणस्यूतमेकं वपुःशैवमन्तः
स्मरामि स्मरापत्तिसंपत्तिहेतुम्॥ इति

नापि पञ्चमः;

[4]शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नचेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥

इति विष्ण्वाद्युपास्यत्वं शिवस्योक्तम्।

---

[1] ब्र. सू. १–२–२९ [2] शं. भा. १–२–२९ [3] सौन्दर्यलहरी ८ [4] सौन्दर्य १.

नन्वत्र शक्तिभूताया देव्या एव विष्ण्वाद्युपास्यत्वं प्रतीयते नतु शिवस्येति चेत्, अयं न्यायो न्यायविद्भिरुपहसनीयः, त्वद्धस्तेनैव दत्तं न तु त्वया दत्तमिति यद्वत् ।

तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिस्संचिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिम् ॥ इति तत्रैव ॥

विरिञ्चादिभिः पञ्चभिर्लोकपालैः
समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाणपाशाङ्कुशप्रासहस्तं
महस्त्रैपुरं शङ्कराद्वैतमव्यात् ॥ इति

त्वदुन्मेषलीलासु लब्ध्वाधिकारान्
विरिञ्चादिकांस्त्वद्गुणाम्भोधिबिन्दून् ।
भजन्तस्तितीर्षन्ति संसारसिन्धुं
शिवे तावकीयास्तु किं वा भवेयुः ॥ इति च देवीभुजङ्गे ।

अनाद्यन्तमाद्यं परं तत्त्वमर्थं
चिदाकारमेकं तुरीयं त्वमेकम् ।
हरिब्रह्ममृग्यं परब्रह्मरूपं
मनोवागतीतं महः शैवमीडे ॥ इति शिवभुजङ्ग एव ।

नापि षष्ठः ।

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।

इति सौन्दर्यलहर्यामेवोक्तम् ।

ननु ब्रह्मविद्यार्थिनः सन्यासोऽपि शमदमादिवत्साधनमिति भाष्यकारेण सर्वत्र प्रदर्शितम् । उपदेशपञ्चकेऽपि—

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।

इत्यादिना मुमुक्षोर्धर्मान्विधाय संसारदोषदर्शनानन्तरं—

शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।

इति सन्न्यासोऽपि ब्रह्मविद्यासाधनत्वेन दर्शितः। सत्यं निर्गुणब्रह्मविद्यासाधनत्वेनैव सन्न्यासः प्रदर्शितः उत्तमाधिकारिणं प्रति। अत एवोपदेशपञ्चकग्रन्थस्यान्ते—

प्राक्कर्म प्रविलाप्यतां चिति बलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥

इत्युत्तमाधिकार्येवोपसंहृतः । मध्यमाधिकारिणं प्रति तु कर्मसमुच्चितमेव ज्ञानं दर्शितं रत्नमालिकायाम् —

'किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् '। इति।
'दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमायुतं शौर्यम् ।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ' ॥

इति मध्यमाधिकारिविषयमेवोपसंहृतम्। किं च '[1]अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ' इत्यधिकरणे '[2]नन्वनारभ्यो मोक्षः, कथमस्य कर्मकार्यत्वमुच्यते? नैष दोषः; आरादुपकारकत्वात् कर्मणः। ज्ञानस्यैव हि प्रापकं सत् कर्म प्राणाड्या मोक्षकारणमित्युपचर्यते। अत एव चातिक्रान्तविषयमेतत्कार्यैकत्वाभिधानम्। नहि ब्रह्मविद आगाम्यग्निहोत्रादि संभवति; अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्। सगुणासु तु विद्यासु कर्तृत्वानातिवृत्तेः संभवत्यागाम्यप्यग्निहोत्रादि। तस्यापि निरभिसन्धिनः कार्यान्तराभावाद्विद्यासङ्गत्युपपत्तिः ' इति। तस्मात्सर्वं समञ्जसम् ॥

दर्शितप्रकारद्वयेऽप्याद्यः प्रकारः प्रदर्श्यते । [3](तस्याः शिखया मध्ये परमात्मा व्यवस्थितो वर्तते। पद्मकोशप्रतीकाश इति) आद्यः प्रकारस्तु 'तथा च सत्यवादी धर्माद्यनुष्ठानपर' इत्याद्यारभ्य 'एवं चोपासकोऽहं नारायण इति स्वात्मानं नारायणात्मतया विभाव्य तस्य हृदये परमेश्वरं ध्यायेत् ' इत्यन्तेन

---

[1] ब्र. सू.–४-१-१६. [2] शां. भा.–४-१-१६. [3] अयं कुण्डलितभागो मातृकायां न दृश्यते.

पूर्वग्रन्थेन प्रदर्शितः। तत्रापि नारायणस्वरूपं 'सहस्रशीर्षं देवं' इत्यारभ्य 'पद्मकोशप्रतीकाशं' इत्यतः प्राक्तनेन ग्रन्थेन वर्णितम्। अनन्तरं 'पद्मकोशप्रतीकाशं' इत्यारभ्य 'परमात्मा व्यवस्थित' इत्यन्तेन ग्रन्थेन हृदयादिकं प्रदर्शितम्। अनन्तरं परमेश्वरस्वरूपं 'ऋतं सत्यं' इत्युत्तरानुवाके प्रदर्शितम्। तथा हि–'सहस्रशीर्षं देवं' इत्यारभ्य 'समुद्रेऽन्तं विश्वशंभुवं' इत्यन्तेन ग्रन्थेन सर्वज्ञः सर्वेश्वरो माया[1]तत्कार्यभूतः सर्वप्रत्यगात्मा सर्वानन्दकरः सर्वोपसंहर्ता विश्वातीतश्च नारायणः, एवंभूतो नारायणोऽहमिति परिचिन्त्यानन्तरं नारायणात्मकस्यान्तर्नाभेरुपरि द्वादशाङ्गुलपरिमितदेशे कमलमुकुलाकारमधोमुखं सदीषद्विकसितं समन्तान्नाडीभिर्विधृतं विश्वात्मन आयतनभूतमत एव महल्लम्बति प्रलम्बते तदेव हृदयमित्युच्यते। तस्य पुण्डरीकस्य मध्ये सूक्ष्मं सुषिरमाकाशमस्ति। तस्मिन्नाकाशे सर्वचेतनात्मकं जीवविराड्हिरण्यगर्भेश्वरादि परं ब्रह्म च प्रतिष्ठितं निश्चलं तिष्ठति। तस्य [2]हृदयस्य सुषिरमध्ये महानग्निर्वैश्वानरो ज्वलति सर्वतः प्रसरज्ज्वालः सर्वतोमुखो भुक्तस्यान्नस्य जरयिता जाठराग्निरूपेण। स एव मुख्यवैश्वानररूपेण सर्वज्ञो वह्निसामान्यरूपेण आपादतलमस्तकं पादाग्रप्रभृति शिरःपर्यन्तमौष्ण्यं करोति। एवंभूतस्य वह्नेः शिखापि हृदये तिष्ठति। सा अणीयोर्ध्वा अणीयसामूर्ध्वा सजलजलदपटलमध्यवर्तिनी विद्युल्लेखेव दीप्यमाना अ(भि)तनुप्रमाणा तप्तकाञ्चनदीप्तिः, तस्याः शिखाया मध्ये परमात्मा व्यवस्थितो वर्तते। पद्मकोशप्रतीकाशमित्यारभ्य परमात्मा व्यवस्थित इत्यन्तेन ग्रन्थेन यद्यद्वस्तु निरूपितं तत्सर्वं सर्वेषां शरीरे विद्यमानमेवेति शास्त्रप्रामाण्यात् निश्चीयते। अत्रोपासकेनोपासनाकाले हृदयपुण्डरीकस्योर्ध्वीकरणमविद्यमानं भावनीयम्। इतरस्य सर्वस्य विद्यमानस्यैव चिन्तनम्। 'तस्याः शिखायां मध्ये परमात्मा व्यवस्थित' इत्युक्तम्। स परमात्मा कीदृग्भूत इत्यपेक्षायां प्रणवशब्दवाच्यं महेश्वरनामकमित्यप्यादावेवोपक्षिप्तम्। तस्य परमात्मनो हृदयपुण्डरीकस्थसुषिरवर्तिवह्निशिखामध्यवर्तिन उपासनार्थं-

[1] तत्कार्यबहिर्भूत इति स्यात्. [2] हृदयसुषिरस्य मध्ये–पा.

मुपनिषच्चतुष्टयेऽप्युक्तविशेषणानां निर्गुणसगुणलीलाविग्रहमूर्ति-पराणां क्रमेणार्थो वर्ण्यते। ऋतं—अवितथस्वभावं। सत्यं—काल-त्रयेऽपि बाधशून्यम्। परं—अपरब्रह्मभ्यो हिरण्यगर्भादिभ्यः परं उत्कृष्टम्। ब्रह्म—सत्यज्ञानानन्दरूपम्। पुरुषं—पूर्षु शेत इति पुरुषः। अपहतपाप्मा—अपहतो-विनाशितः, पाप्मा-धर्माधर्माख्यो यस्य। विरजः—विगतरजः। विमृत्युः—मृत्युरहितः। विशोकः—वीतशोकः। विजिघत्सः—विगताशनेच्छः। अपिपासः—पानेच्छारहितः। विशदः—निर्मलः। अचिन्त्यः—प्रकाश्यत्वेनान्तःकरणवृत्त्यविषयः। अव्यक्तः—शब्दाद्यशेषविशेषशून्यः। अनन्तरूपः—अनन्तं-त्रिविधपरिच्छेदरहितं रूपं यस्य। शिवः—मङ्गलरूपः। प्रशान्तः—अविद्यातत्कार्य[1]दोषरहितः। अमृतः—अमरणधर्मकः। आदिमध्यान्तविहीनः—उत्पत्तिपरिच्छेदविनाशवर्जितः। एकः—द्वितीयवस्तुमात्ररहितः। विभुः—व्यापी। चिदानन्दः—स्वयंप्रकाशमाननिरतिशयानन्दः। अरूपः—रूपरहितः। सत्यकामः—सत्याः-अवितथाः, कामाः-ब्रह्मलोकप्राप्त्यनन्तरं यस्य यस्योपासकस्य ये ये इच्छाविषयाः पित्रादिस्त्रीपर्यन्ताः गृहारामादयः अणिमादयो वा अन्येषामलभ्या यस्य स सत्यकामः। अत एव 'अथ य इहात्मानमनुविद्य व्रजन्ति' इति प्रकृतात्मोपासनाव्यतिरेकेण 'एतांश्च सत्यान् कामान्' इति कामानामपि पृथगुपासनमुक्तम्। सत्यसंकल्पः—कामहेतवः संकल्पा अपि सत्या यस्य स सत्यसंकल्पः। सर्वस्य वशी—सर्वस्य ब्रह्मादेर्वशी। सर्वस्येशानः—ईशिता च ब्रह्मेन्द्रप्रभृतीनाम्। सर्वस्याधिपतिः—अधिष्ठाय पालयिता स्वतन्त्र इत्यर्थः। ब्रह्मयोनिः—ब्रह्मणो हिरण्यगर्भस्य वेदस्य वा योनिः कारणम्। परमेश्वरः—उत्कृष्टब्रह्मादिनियन्ता। प्रभुः—सर्वक्रियासमर्थः। विश्वरूपः—विश्वत्वेन सर्वचेतनाचेतनत्वेन स्थितं रूपं स्वरूपं यस्य स तथा, सर्वात्मेति यावत्। कृष्णपिङ्गलः—देहपरिजिघृक्षायां स्त्रीपुरुषशबलाकारः पराशक्त्यविनाभूतो वा। उक्तं च भाष्यकारैः—'पराशक्तिमित्रं नुमः पञ्चवक्त्रम्' इति। अथवा कण्ठे कृष्णं ललाटे पिङ्गलं रूपं यस्य। ऊर्ध्वरेताः—सदा सन्दी-

[1] शेषरहितः—पा.

ततपस्कः। अनेन धर्मज्ञानवैराग्यसंपन्नः भस्मोद्धूलिताङ्गः त्रिपुण्ड्रावलिदीप्तः रुद्राक्षमालाभरणो जटामकुटमण्डितः, सर्वदा स्वात्मध्यानपर इत्युक्तं भवति। विरूपाक्षः—विषमलोचनः। विशोकः—दुःखसंस्काररहितः। आनन्दपूर्णहृदयः स्मेराननश्च। उमासहायः—उमा ब्रह्मविद्या भवानी सहायो यस्य स तथा। यद्वा उमा सैव वामभागरूपेण सहायो यस्यार्धनारीश्वरस्य स तथा। त्रिलोचनः—त्रीणि लोचनानि सोमसूर्याग्निरूपाणि यस्य। नीलकण्ठः—कालकण्ठः। प्रशान्तः—प्रसन्नेन्द्रियवदनः। ननु प्रशान्तत्वेऽविद्यातत्कार्यहीनत्वे कथं वशित्वादिकं, एकत्वे वा कथं विश्वरूपत्वं, (विशद) वशित्वादौ वा कथं सत्यकामत्वादिकं, अरूपत्वे वा कथं त्रिलोचनत्वादिकं, उमासहायत्वे वा कथमूर्ध्वरेतस्त्वं, विग्रहवत्त्वे वा कथं विरजस्त्वादिकं, इत्येवमादिविरोधशङ्कापरिहारार्थमद्भुत इति विशेषणम्। अद्भुतः—आश्चर्यकरः। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्,' इति 'एकमेवाद्वितीयम्' इत्यादि श्रुतिवशात् स्वभावत एकरूपत्वादिकं [1]मायावशाद्विश्वाधिकत्वं च सर्वमुपपद्यते। उक्तं च सूत्रकारेण '[2]सर्वधर्मोपपत्तेश्च' इति। इदमस्य भाष्यम्- [3]'चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान्विलक्षणत्वादिदोषान् पर्यहार्षीदाचार्यः। इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणं प्रारिप्समाणः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति—यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते सर्वज्ञं सर्वशक्ति महामायं च ब्रह्म इति, तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनम्' इति। अनन्तरं फलनिरूपणं क्रियते—

ननूपनिषच्चतुष्टयेऽप्येकरूपतया फलं न प्रतीयते। तथाहि—छान्दोग्ये तावत् 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति' इत्युपक्रम्य 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति' इत्यादित्योपलक्षितार्चिरादिमार्गद्वारा

---

[1] मायावशाद्वशित्वादिकं-च. [2] ब्र. सू. २ ९ ३७. [3] शं. भा. २-१-३७.

मूर्धन्यया नाड्या देहान्निर्गमनपुरस्सरं ब्रह्मलोकप्राप्तिः फलं प्रतीयते। बृहदारण्यके तु—'अभयं वै जनक प्राप्तोऽसि' इति जीवन्मुक्तिरेव फलं प्रतीयते। तैत्तिरीयके—'स नो देवः शुभया स्मृत्या संयुनक्तु' इत्यादिना ज्ञानाधिक्यमेव फलम्। कैवल्ये तु 'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इत्यज्ञानासंस्पृष्टसर्वसाक्षिस्वरूपब्रह्मप्राप्तिरूपं विरुद्धमेव ध्यानफलं प्रतीयत इति चेत्—अत्रोच्यते; कैवल्ये तावत् 'समस्तसाक्षिं तमसः परस्तात्' इत्यनेन मायासंस्पर्शरहितं केवलचैतन्यस्वरूपं निरुपाधिकं वस्तु नोच्यते; भूतयोनिशब्दसामानाधिकरण्यात्, किं तर्हि माययाऽवशीकृतं वशीकृतमायातत्कार्यं सर्वज्ञमाकाशादिभूतभौतिककारणं सोपाधिकमेव परमशिवस्वरूपमार्चिरादिमार्गेण गत्वा गच्छति प्राप्नोतीति। इतोऽपि परमेश्वर एवोपास्यः। यतो ब्रह्मरुद्रेन्द्रादयस्तद्विभूतय इत्याह श्रुतिः—'स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट्'॥

'स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः।
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्'॥ इति॥

अनन्तरमपि निरुपाधिकस्य तस्यैव परमशिवस्य प्रत्यगात्मत्वेन ज्ञानात् कैवल्यमुक्तिरित्याह श्रुतिः—'ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तय' इति। यदुक्तं तैत्तिरीयके 'सनो देवः' इत्यादिना ज्ञानमेव फलमुक्तमिति, यदि तत्र ज्ञानं निर्गुणसाक्षात्काराभिप्रायं तर्हि क्रममुक्तिरित्यभिप्रायं तत्। यद्युपास्यब्रह्मविषयकं तर्ह्युपासकस्य शरीरावसानकाले [1]'तदोकोग्रज्वलनं' इति न्यायादुपास्यसाक्षात्काराभिप्रायमेव। बृहदारण्यके तु तत्रोपसना न विवक्षितैव। सत्यकामत्वादिगुणास्तत्र ज्ञेयब्रह्मस्तुत्यर्थमेवोपसंहृता इति पूर्वमेवोक्तम्। छान्दोग्ये तु '[2]वाङ्मनसि दर्शनाच्छब्दाच्च' इत्यारभ्य [3]'समाना चात्युपक्रमादमृतत्वं चानुपोष्य' इत्यन्तेन सूत्रसन्दर्भेण 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां' इति प्राणविषयश्रुतिर्व्याख्याता। 'प्राण-

[1] ब्र. सू, ४-२ १७. [2] ब्र. सू.-४-२-१. [3] ब्र. सू. ४-२-७.

स्तेजसी'ति तेजश्शब्दवाच्यसाध्यहंसप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इति। '[1]तदापीतेः संसारव्यपदेशात्' इति सूत्रे तत्तेज आदिभूतं सूक्ष्मं श्रोत्रादिकरणाश्रयीभूतं आपीतेरासंसारमोक्षात्सम्यग्ज्ञानान्निमित्तवदवतिष्ठत इत्यप्युक्तम्। '[2]प्रतिषेधादिति चेन्न शारीरात्' इत्यारभ्य '[3]तानि परे तथा ह्याह' इत्यन्तेन सूत्रसन्दर्भेण निर्गुणब्रह्मविदुष इहैव लिङ्गशरीरनाशो दर्शितः। सगुणब्रह्मविद्यावतः '[4]तदेकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया' इति मूर्धन्यया नाड्या उत्क्रान्तिरुक्ता। इदमस्य भाष्यम्—'तस्योपसंहृतवागादिकलापस्य उच्चिक्रमिषतो विज्ञानात्मनः ओक आयतनं हृदयम्; 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति' इति श्रुतेः। तदग्रज्वलनपूर्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते—'[5]तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' इति। सा किमनियमेनैव विद्वदविदुषोर्भवति, अथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषादनियमप्राप्तावाचष्टे—समानेऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्धस्थानादेव विद्वान्निष्क्रामति, स्थानान्तरेभ्यस्त्वितरे। कुतः, विद्या सामर्थ्यात्। यदि विद्वानपीतरवद्यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्कृष्टं लोकं लभेत। तत्रानर्थिकैव विद्या स्यात्। तच्छेषगत्यनुस्मृतियोगाच्च। विद्याशेषभूता च मूर्धन्यनाडीसंबद्धा गतिरनुशीलयितव्या विद्याविशेषेषु विहिता। तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तम्। तस्माद्भ्रदयालयेन ब्रह्मणा सूपासितेनानुगृहीतस्तद्भावं समापन्नो विद्वान्मूर्धन्ययैव शताधिकया शतादतिरिक्तयैकशततम्या नाड्या निष्क्राति, इतराभिरितरे। तथा हि हार्दविद्यां प्रकृत्य समामनन्ति—

---

[1] ब्र.सू. ४-२-८. [2] ब्र.सू. ४-२-१२. [3] ब्र.सू. ४-२-१५. [4] ब्र.सू. ४-२-१७. [5] बृ. ४-४-२.

[1] शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिस्सृतैका ।
तयोर्ध्वमायन्नमृत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ति । इति ॥

एतत्सर्वं दहरविद्यायां विहितमेव । किं च सगुणब्रह्मविद्यावतो मार्गाचिन्तनमितिकर्तव्यमित्युत्क्रान्त्यनन्तरमर्चिरादिमार्गप्रकारोऽपि चिन्तितः '[2] अर्चिरादिना तत्प्रथितेः' इत्यारभ्य '[3] वैद्युतेनैव ततस्तच्छ्रुतेः' इत्यन्तैः सूत्रैः । एतेषां निष्कृष्टोऽर्थः प्रदर्श्यते —उपासको रश्मिसमन्वितया मूर्धन्यया नाड्या लिङ्गशरीरयुक्तः सन् स्वदेहान्निष्क्रम्याग्निदैवतं प्राप्नोति । तेन नीतः अहरभिमानिदैवतम् । तेन नीतः पूर्वपक्षाभिमानिनम् । तेन नीत उत्तरायणाभिमानिदैवतानि ? तैर्नीतः संवत्सराभिमानिनम् । तेन नीतो देवलोकाभिमानिनम् । तेन नीतो वायुदैवतम् । वायुकृतेन रथचक्रस्य रन्ध्रतुल्येन रन्ध्रेण वायुनैव नीत आदित्यं प्राप्नोति । तेन नीतश्चन्द्रम् । तेन विद्युदभिमानिदैवतम् । तत्र स्थितः सन् ब्रह्मलोकादागतेनामानवपुरुषेण विद्युल्लोकं प्रापेन राजोपचारयुतेन वरुणेन्द्रप्रजापतिकृतसहायानुष्ठानेन तल्लोकद्वारा च ब्रह्मलोकान्नीतो भवतीति । [4]'(स एव) ब्रह्मलोकान् गमयति, ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' इति च श्रुतिषु बहुवचनश्रवणात् । उक्तं चान्यत्र श्रुत्या— [5]'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु लोकेषु' इति लोकबहुत्वं लोकेषु तरतमभावरूपं च । किं च दहरविद्यासाधनब्रह्मचर्यस्तुत्यर्थत्वेन [6]'अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्' इत्यारभ्य [7]'अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत्' इत्यन्तेन ग्रन्थेन यज्ञादीनुक्त्वाऽनन्तरमरण्यायनशब्दव्याख्यानव्याजेन ब्रह्मलोकवर्णनमपि कृतम् । [8]'तदरश्च ह वै पय्श्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरम्मदीयं सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितं

[1] छा.–८-६-६. [2] ब्र.सू. ४-३-१. [3] ब्र.सू. ४-३-६. [4] बृह–६-२-१५. [5] छा–३-१३-७. [6] छा–८-५-१. [7] छा–८-५-३. [8] छा–८-५-३.

हिरण्यम्। [1] तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति' इति। [2] इदमस्य भाष्यम्—यो ज्ञानाद्यज्ञः, एषणादिष्टं, सतस्त्राणात्सत्त्रायणं, मननान्मौनं, अनशनादनाशकायनं, अरण्ययोर्गमनादरण्यायनमित्यादिभिर्महद्भिः पुरुषार्थसाधनैः स्तुतत्वाद्ब्रह्मचर्यं परमं ज्ञानसहकारिकारणं साधनमित्यतो ब्रह्मविदा यत्नतो रक्षणीयमित्यर्थः। तत्र हि ब्रह्मलोकेऽरश्च ह वै प्रसिद्धो ण्यश्चार्णवौ समुद्रौ समुद्रोपमे वा सरसी तृतीयस्यां भुवमन्तरिक्षं चापेक्ष्य तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकादारभ्य गण्यमानायां दिवि तत्तत्रैव ऐरंइरा अन्नं तन्मय ऐरो मण्डस्तेन पूर्णमैरम्मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः। तत्रैव चाश्वत्थो वृक्षः। सोमसवनो नामतः। सोमोऽमृतं तन्निस्रवोऽमृतस्रव इति वा। तत्रैव च ब्रह्मलोके ब्रह्मचर्यसाधनरहितै[3]र्ब्रह्मचर्यविमुखैरब्रह्मविद्भिर्न जीयत इत्यपराजिता पूः—पुरी, ब्रह्मणो हिरण्यगर्भस्य ब्रह्मणा च प्रभुणा विशेषेण मितं—निर्मितं तच्च हिरण्यं—सौवर्णं प्रभुविमितं, मण्डपमिति वाक्यशेषः। तत्—तत्र ब्रह्मलोके एतावर्णवौ यावरण्याख्यावुक्तौ ब्रह्मचर्येण साधनेनानुविन्दन्ति तेषामेवैष यो व्याख्यातो ब्रह्मलोकस्तेषां च ब्रह्मचर्यसाधनवतां ब्रह्मविदां सर्वेषु लोकेषु कामचारो भवति नान्येषां [4]ब्रह्मचर्यपराङ्मुखानां विषयासक्तबुद्धीनां कदाचिदपीत्यर्थः। इति दहरविद्याङ्गमन्त्रः। [5]'श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि' इति। अस्य भाष्यम्—[6]'श्यामाच्छबलं प्रपद्य इत्यादिमन्त्राम्नायः पावनो जपार्थश्च ध्यानार्थो वा। श्यामो—गम्भीरो वर्णः श्याम इव श्यामो हार्दं ब्रह्म, अत्यन्तदुरवगाहत्वात्। हार्दं ब्रह्म जित्वा ध्यानेन तस्माच्छधामात् शबलं शबल इव शबलोऽरण्याद्यनेककाममिश्रत्वाद्ब्रह्मलोकस्य शाबल्यं तद्ब्रह्मलोकं शबलं

---

[1] छा—८-५-४. [2] इदमत्र विभावानीयम्. [3] ब्रह्मचर्यसाधनवद्भ्योऽन्यैर्ब्र—पा. [4] अब्रह्मचर्यपराणां बाह्यविषयासक्तबुद्धीनां—पा. [5] छान्दो—८-१३-१. [6] शं. भा. छान्दो. ८-१३-१.

प्रपद्ये मनसा शरीरपाताद्वोर्ध्वं गच्छेयम्। यत् यस्मादहं शबलाद्ब्रह्मलोकान्नामरूपव्याकरणाय श्यामं प्रपद्ये हार्दभावं प्रपन्नोऽस्मीत्यभिप्रायः। अतस्त्वमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्य इत्यर्थः। कथं शबलं ब्रह्मलोकं प्रपद्य इत्युच्यते—अश्व इव स्वानि लोमानि विधूय—कम्पनेन श्रमं पांस्वादि च रोमतोऽपनीय यथा निर्मलो भवति, एवं हार्दब्रह्मजयेन विधूय पापं—धर्माधर्माख्यं चन्द्र इव राहुग्रस्तस्तस्माद्राहोर्मुखात्प्रमुच्य भास्वरतरो भवति यथैवं धूत्वा प्रहाय शरीरं सर्वानर्थाश्रयं इहैव ध्यानेन कृतात्मा कृतकृत्यः सन्नकृतं नित्यं ब्रह्मलोकमभिसंभवामि। द्विर्वचनं मन्त्रपरिसमाप्त्यर्थम्' इति॥

ननु [1]'स एतान् ब्रह्म गमयति' इति कार्यब्रह्मप्रापकत्वममानवस्य प्रतीयते, [2]'ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु' इति चोपासकस्य कार्यब्रह्मलोकप्राप्तिः प्रतीयते तेषां ब्रह्मलोकानां बहुत्वं च [3]'विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु' इति लोकानां तरतमभावश्च, किं च 'देवो भूत्वा देवानप्येति' इति च देवबहुत्वं चेति चेत्—उच्यते—मूर्धन्यनाडीयुक्तार्चिरादिगतिचिन्तनस्य श्यामाच्छबलं प्रपद्य इत्यादिमन्त्रोक्तध्यानपुरस्सरं 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' इत्युक्तप्रकारेणांहग्रहोपासनं साक्षत्कारपर्यन्तं कृतवतः पूर्वोक्ताधिकारिणः कार्यब्रह्मप्राप्तिः सायुज्यमिति यावत्। अहंग्रहोपसकानामेव उपास्यसाक्षात्कररहितानामहंग्रहव्यतिरिक्तोपासकानां—

[4]'तपः श्रद्धे ये ह्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्षचर्यं चरन्तः।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा॥'

इति मन्त्रोक्ताधिकारिणां ब्रह्मलोकप्रापककर्मानुष्ठायिनां च ब्रह्मलोकप्राप्तिः। तत्रापि योग्यतया सारूप्यं सामीप्यं सालोक्यं च। उक्तं श्रुत्या [5]'एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकता-

[1] छान्दो—४-१५-५. [2] बृह. ६-२-१५. [3] छान्दो. ३-१३-७. [4] मुण्डक—१-२-११. [5] महानारा—१२-३.

माप्नोति' इति। उक्तं च भाष्यकारेण जगद्व्यापाराधिगरणे [1]'ये सगुणब्रह्मोपासनात्सहैव मनसा ईश्वरसायुज्यं व्रजन्ति' इति [2](कण्ठरवेणोक्तं सायुज्यम्)। इदं च सगुणसायुज्यमेव। तदप्युक्तं तेनैव [3]'विकारवर्ति च तथा हि स्थितिमाह' इति सूत्र व्याख्यानावसरे [4]'विकारावर्त्यपि च नित्यमुक्तं पारमेश्वरं रूपमस्ति। न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानम्। तथाह्यस्य द्विरूपां स्थितिमाहाम्नायः। [5]'एतावनस्य महिमा, ततो ज्यायांश्च पूरुषः, पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि' इत्यादिः। न च तन्निर्विकारं रूपमितरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुम्, अतत्क्रतुत्वात्तेषाम्। अतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठन्त इति। एवं [6]'भोगमात्रसाम्यलिङ्गाच्च' इति सूत्रव्याख्यानावसरे [7]'तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति' इति श्रुतिरुदाहृता। अनेनोपासकस्य सालोक्यमप्यस्तीति सूचितम्। एवं लोकबहुत्वं लोकानां तारतम्यं चानावृत्तिसूत्रव्याख्यानावसरे सूचितम्।

[8]'नन्वेवं सति सातिशयत्वादन्तवत्वमैश्वर्यस्य स्यात्, ततश्च तेषामावृत्तिः प्रसज्येतेत्यत उत्तरं भगवान् बादरायण आचार्यः पठति [9]'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इति। नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति, यस्मिन्नरश्च ह वै एयश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरंमदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूर्ब्रह्मणो यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म यश्चानेकधा मन्त्रार्थवादादिप्रदेशेषु प्रपञ्च्यते। ते तं प्राप्य न चन्द्रलोकादिव भुक्तभोगा आवर्तन्ते। कुतः? [10]'तयोर्ध्वमयान्नमृतत्वमेति' [11]'तेषां न पुनरावृत्तिः' [12]'एतेन प्रतिपद्यमाना इमं मानव-

---

[1] शं. भा. ४-४-१७. [2] अधिकमिति भाति. [3] ब्र. सू. ४-४-१९. [4] शं.भा. ४-४-१९. [5] छान्दो. ३-१२-६. [6] ब्र.सू. ४-४-२१. [7] बृह. १-५-२३. [8] शं. भा. ४-४-२२. [9] ब्र.सू. ४-४-२२. [10] छान्दो. ८-६-६. [11] बृह. ६-२-१५. [12] छान्दो. ४-१५-६.

मावर्तं नावर्तन्ते'[1] 'ब्रह्मलोकमभिसंपद्यते'[2] 'न च पुनरावर्तते' इत्यादिशब्देभ्यः। अन्तवत्वेऽपि त्वैश्वर्यस्य यथानावृत्तिस्तथा वर्णितम्—[3]'कार्यात्यये तदध्यक्षेण सहातः परम्' इत्यत्र। तत्र हि—

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मनः प्रविशन्ति परं पदम्॥

इत्युक्तम्। अत्र मन्त्रार्थवादादीत्यादिशब्देनेतिहासपुराणादयो गृह्यन्ते॥

नन्वादिशब्देनेतिहासपुराणादय उक्ता इति कथमवगन्तुं शक्यते—उच्यते—[4]'देवताधिकरणादिषु भाष्यकारेण कण्ठरवेणोक्तत्वात्। तत्र हीदं भाष्यम्—[5]'मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवतादीनां विग्रहवत्वावगमादिति। तथा चेतिहासपुराणादिषु ब्रह्मलोक अनेकत्वेन तरतमभावेन च वर्णितः। एवं च ब्रह्मलोकप्रतिपादकौ मन्त्रार्थवादौ 'श्यामाच्छबलं प्रपद्य' इति 'अरश्च ह वै ण्यश्चार्णवौ' इति पूर्वमेव प्रदर्शितौ। भारतनामक इतिहासे महाभिषग्गङ्गादिचरित्रवर्णनं ब्रह्मलोके प्रसिद्धमेव। शिवरहस्यनामक इतिहासे तृतीयांशादौ श्रुतो यो ब्रह्मलोकत्वेन वर्णित ब्रह्मविष्णुशिवलोकादीनामतिशयविशेषस्तेषां तरतमभावश्च बहुधा प्रपञ्चितः। पुराणेषु स्कान्दशिवधर्मोत्तरादिषु ब्रह्मलोकातिशयस्तेषां तरतमभावश्च वर्णितो दृश्यते। तथा हि—स्कान्दे सूतसंहितायां मुक्तिखण्डे तृतीयाध्याये देवलोकाद्यपेक्षया ब्रह्मलोकस्योपरिभावस्तत्राप्यवान्तरविभागः, तत्र हिरण्यगर्भलोकापेक्षयापि विष्णुलोकस्योपरिभावः तल्लोकापेक्षया रुद्रलोकस्य स प्रतीयते। तस्मिन्नध्याये—

यः पुमान् देवदेवेशं त्रिणेत्रं चन्द्रशेखरम्।
उमार्धवियहं शुद्धं नीलग्रीवं महेश्वरम्॥
ब्रह्मविष्णुमहेशाद्यैरुपास्यं गुणमूर्तिभिः।
उपास्ते तस्य विज्ञानं जायते पारमेश्वरम्॥

---

[1] छान्दो. ८-१५-१. [2] छान्दो. ८-१५-१. [3] ब्र. सू. ४-३-१०.
[4] ब्र. सू. १-३-२६. [5] शं. भा. १-३-२६.

इत्युमासहायादिविशिष्टमूर्तिमहंग्रहेणोपासितस्य तस्य तत्साक्षात्कारद्वारा सगुणसायुज्यं प्राप्तस्य क्रमान्निर्गुणशिवसायुज्यप्रापकं निर्गुणशिवज्ञानं जायत इत्यप्युक्त्वा—

अथवा चित्तकालुष्याच्छिवसायुज्यमच्युतम् ।
लब्ध्वा भुक्त्वा महाभोगानन्ते विज्ञानमैश्वरम् ॥

इत्यादिना चित्तपरिपाकानुगुण्येन शिवलोकस्थितभोगेच्छावतः शिवसारूप्यं प्राप्य तत्र भोगान् भुक्त्वाऽन्ते शिवज्ञानमपि प्राप्नोतीति चोक्त्वा 'यः शिवं गुणमूर्तीनां' इत्यादि रुद्रसारूप्यमन्यद्वा सालोक्यं विद्ययाप्नुयादित्यन्तेन ग्रन्थेनाधिकारानुगुण्येन सारूप्यसालोक्यादिकमुक्त्वा अनन्तरं—

अथ वा विष्णुलोकादीनवाप्य पुरुषोत्तम ।
तत्र गत्वा महाभोगानवाप्य कमलेक्षण ॥
पृथिव्यां जायते शुद्धे शिवभक्तकुले मम ।

इति शिवलोकप्राप्त्यनन्तरं रागादियुक्तस्य (पुरुषस्य) विष्णोर्लोकादागत्य भोगान् भुक्त्वा आदिशब्देन प्रजापतीन्द्रादिलोकानवाप्यागत्य तेष्वपि भोगान् भुक्त्वा अनन्तरं भूमौ सत्कुले जायत इत्यनेन शिवलोकापेक्षया विष्णुहिरण्यगर्भलोकानामधोभावः स्पष्टीकृतः । एवं शिवविष्ण्वादिलोकानामुपर्यधोभावोऽस्मिन्नध्याये बहुधा प्रपञ्चितः । एवमेव शिवधर्मोत्तरे पातालोकमारभ्य तपोलोकपर्यन्तं त्रयोदशलोकानामुपरिभावं पूर्वपूर्वलोकापेक्षयोत्तरोत्तरलोकस्य योजनसङ्ख्यापुरस्सरं वर्णयित्वा अनन्तरं 'सत्यलोकस्तपोलोकात्कोटिषष्टिसमुच्छ्रितः' इति ब्रह्मलोकस्य तपोलोकापेक्षयोपरिभावमुक्त्वा अनन्तरं च ॥

ब्रह्मलोकाद्विष्णुलोको द्विगुणेन समुच्छ्रितः ।
विस्तरेण तदर्धं च दिव्यभोगसमन्वितः ॥

विष्णुलोकाच्च परतः श्रीमच्छिवपुरं महत् ।
द्वात्रिंशत्कोटिविस्तीर्णं तदर्धं च समुच्छ्रितम् ॥

सूर्यायुतप्रतीकाशं सर्वकामार्थसिद्धिदम् ।
अनेकाकारविन्यासरचनाप्रतिशोभितम् ॥

सर्वरत्नमयैर्दिव्यैस्तप्तजम्बूनदप्रभैः ।
सहस्रशतभौमैश्च तदष्टगुणभौमकैः ॥

अप्सरोगणसंकीर्णैः सर्ववाद्यैः समन्वितैः ।
गीतनृत्तरसोपेतैरप्रमेयगुणान्वितैः ॥

विमानैः सर्वतो व्याप्तं ताराभिरिव चाम्बरम् ।

इत्यादिना शिवपुरवर्णनादिकं च कृत्वा, अनन्तरं—

सह व्याघ्रमुखैर्दिव्यैर्गजवाजिमृगाननैः ।

इत्यादिना प्रमथगणादिवर्णनं च कृत्वा तदनु—

विचित्रा भूमयस्तत्र वज्रवैडूर्यसुप्रभाः ।

इत्यादिना तत्रत्यरम्यस्थलवर्णनं तत्र विद्यमानसुन्दरीजनवर्णनं च कृत्वा, तदनूक्तम्—

तन्मध्ये सर्वतो भद्रं दिव्यमायतनं महत् ।
शुद्धस्फटिकसंकाशं स्थानमाद्यमुमापतेः ॥

तत्रास्ते भगवान् सोमः पूज्यमानो गणेश्वरैः ।
सिद्धैश्च स्थानसंप्राप्तैर्ब्रह्मविष्ण्वग्निवायुभिः ॥

ईश्वरायतनस्याग्रे श्रीमान् धर्मो वृषः स्थितः । इति ।

किं च—

दिनकृत्कोटिसंकाशं स्थानमाश्चर्यसंयुतम् ।
सर्वकामसमायुक्तं समिद्धं नित्यमक्षयम् ॥

संप्राप्य तत्पदं दिव्यमन्तः क्लेशविवर्जिताः ।
सर्वज्ञाः सगणाः शुद्धाः परिपूर्णा भवन्ति च ॥

विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः ।
सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥

संप्राप्ता ये परं स्थानं ज्ञानयोगरता नराः ।
न तेषां पुनरावृत्तिः घोरे संसारमण्डले ॥ इति ।

[1]'संकल्पादेव तु तच्छ्रुतेः' इत्यारभ्य '[2]अनावृत्तिः शब्दात्' इत्येवमन्तैः सूत्रैः सायुज्यादिपदं प्राप्तानां व्यापारो दर्शितः। ननु—

[3]आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥

इति ब्रह्मलोकं प्राप्तानामप्यावृत्तिः स्मर्यते। न च [4]'इमं मानवमावर्तं नावर्तन्त' इति [5]'तेषां न पुनरावृत्तिः' इति चैवमादिविरोध इति वाच्यम्; इममिति विशेषणान्मानवान्तरे (कल्पान्तरे) चावृत्तेरनिवारणादिति चेत्, सत्यं ब्रह्मलोकप्राप्तिसाधनानि बहूनि सन्ति अधिकारितारतम्यानि च। तैः साधनविशेषैरधिकारितारतम्यैश्च सालोक्यसामीप्यसारूप्यसायुज्यप्राप्तिः अहंग्रहोपासकानामुपास्यतादात्म्यरहितानामुपासनान्तरानुष्ठानवतां कर्मविशेषानुष्ठानवतां ज्ञानरहितसन्यासिनां च ब्रह्मलोकगमनं तत्रापि यथायोग्यं सारूप्यसामीप्यसालोक्यमिति पूर्वमेव वर्णितम्। तत्रापि—

ब्रह्मणा सहते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥

इति वचनात्। ये कृतात्मानो ज्ञानवन्तस्तेषां परपदप्राप्तिर्निरतिशयमोक्षः। अकृतात्मानां तु आवृत्तिरेव। अकृतात्मत्वं तु इह उपासनानुष्ठानकाले विषयरागादिनेति कल्पनीयम्। इदं सर्वं पुराणेषूक्तमेव। इहैव देवतादात्म्यसाक्षात्कारपर्यन्तमुपासनावतां सगुणसायुज्यप्राप्तिरेव। तेषां मुक्तिज्ञानं च सिद्धमेव। किं चोपासनाङ्गमन्त्रोऽपि [6]'धूत्वा शरीरमकृतं कृतात्मा इति क्रममुक्तिः सिद्धैवाभिहिता। किं च [7]'तयोर्ध्वमायन्नमृतत्वमेति' इति मूर्धन्यया नाडया ब्रह्मलोकं गतस्यामृतत्वप्राप्तिर्वर्णिता। अपि च [8]'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते' इति ब्रह्मलोकं गतस्यानावृत्तिः श्रूयते॥

---

[1] ब्र. सू–४-४-८. [2] ब्र. सू–४-४-२२. [3] गी. ७-१६. [4] छान्दो–४-१५-६. [5] बृह–६-२-१५. [6] छान्दो. ८-१३-१. [7] छान्दो. ८-६-६. [8] छान्दो. ८-१५-१.

नन्विदं श्रुतिर्भाष्यकारेण ब्रह्मलोकप्राप्तिकथनत्वेन न व्याख्याता। तथा हि—कुटुम्ब इत्यारभ्य धार्मिकान्विदधदित्यन्तं व्याख्याय आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येत्यस्य ग्रन्थस्य सन्यासपरत्वेन व्याख्यानं कृतम्। तथा हि—[1] 'आत्मनि स्वहृदये हार्दे ब्रह्मणि सर्वेन्द्रियाणि संप्रतिष्ठाप्य उपसंहृत्य सर्वेन्द्रियग्रहणात् कर्माणि च सन्यस्य अहिंसन् हिंसां परपीडामकुर्वन् सर्वभूतानि स्थावरजङ्गमानि भूतान्यपीडयन्नित्यर्थः। भिक्षादिनिमित्तपर्यटनादिना परपीडा स्यादित्यत आह—अन्यत्र तीर्थेभ्यः। तीर्थं नाम शास्त्रानुज्ञाविषयः ततोऽन्यत्रेत्यर्थः। सर्वाश्रमिणां चैतत्समानम्। तीर्थेभ्योऽन्यत्र हिंसैवेत्यन्ये वर्णयन्ति। कुटुम्ब एवैतत्सर्वं कुर्वन् स खल्वधिकृतो यावदायुषं यावज्जीवं यथोक्तप्रकारेणैव वर्तयन् ब्रह्मलोकमभिसंपद्यते देहान्ते। न च पुनरावर्तते शरीरग्रहणाय। पुनरावृत्तेः प्राप्तायाः प्रतिषेधात् अर्चिरादिना मार्गेण कार्यब्रह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिस्तावत्तत्रैव तिष्ठति प्राकृतो नावर्तत इत्यर्थः' इति। यद्यपि ब्रह्मलोकप्राप्तिर्भाष्ये प्रतीयते। तथापि अन्ये वर्णयन्तीत्यादि स्वाभिमतं न भवतीति प्रतीयते॥

ननु तस्य व्याख्यानस्य युक्तत्वेऽनभिमतत्वं कथमिति चेद्युक्तत्वमेव नास्तीति प्रतीयते। तथा हि—व्यवहितान्वयदोषः, कुटुम्बएव यावदायुषं स्थित्वेति कुटुम्ब एवैतत्सर्वं कुर्वन्निति कुटुम्ब इति पदमध्याहर्तव्यम्। ब्रह्मलोकमभिसंपद्यते देहान्त इति देहान्तपदं चाध्याहर्तव्यम्। किं चाचार्यकुलादिति ब्रह्मचर्यस्योक्तत्वात्, कुटुम्ब इति गार्हस्थ्यवानप्रस्थयोरुक्तत्वात्, आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येत्यनेन सन्यासोक्त्यौचित्याच्चेति चेत्सत्यम्; अत्यन्तविरक्तमुख्याधिकारिणं प्रति श्रुतिस्वारस्यादेवमेवार्थः प्रतीयते। अत एव श्रुत्यन्तरं—[2] 'ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्' इति। किं च भाष्यकारैरप्युक्तोपदेशपञ्चके—'वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्' इत्यादिना ब्रह्मचर्यं गार्हस्थ्यं चोक्तम्। अनन्तरं 'निजगृहात्तूर्णं विनिर्गम्यताम्' इत्यनेन वानप्रस्थाश्रमः सूचितः। अनन्तरं 'दृढतरं कर्मासु सन्य-

[1] छान्दो. शं. भा. ८-१५-१. [2] जाबाल–४.

ज्यताम्' इत्यनेन सन्यासः साक्षादुक्तः। 'सद्विद्वानुपसर्प्यतां' इत्यादिना श्रवणादिकमुक्तम्। 'एकान्ते सुखमास्यतां' इत्यनेन समाधिरप्युक्तः। 'प्रारब्धं त्विह भुज्यतां' इत्यनेन जीवन्मुक्तिरुक्ता। 'अथ परब्रह्मात्मना स्थीयताम्' इत्यनेन विदेहमुक्तिरपि। अमुख्याधिकरणमविरक्तं प्रति तु कथं सर्वकर्मसन्यासविधानं सन्यासिनो वा कथं मन्दस्य निर्गुणे ब्रह्मणि प्रतिष्ठा। अत एवोक्तं भाष्यकारेण निर्गुणब्रह्मनिष्ठायामनधिकारिणं सन्यासिनं प्रति [1]'आत्मनि स्वहृदये हार्दे ब्रह्मणि सर्वेन्द्रियाणि संप्रतिष्ठाप्योपसंहृत्य सर्वेन्द्रियग्रहणात् कर्माणि च सन्यस्य' इति। किं च सगुणनिर्गुणविद्याद्वयमपि प्रकृतम्—[2]'आकाशो वै नाम' इति [3]'श्यामाच्छबलं प्रपद्ये' इति च। अविरक्तस्य तु मन्दाधिकारिण अन्ये त्विति व्याजेन सर्वमुक्तम्। अत एवोक्तं सूतसंहितायां—

अतः परं प्रवक्ष्यामि गार्हस्थ्यं सङ्ग्रहेण तु।
अधीत्य विधिवद्वेदान् पूर्वोक्तेनैव मार्गतः॥
आचार्यानुज्ञया युक्तः स्नात्वा गार्हस्थ्यमाविशेत्।

इत्यारभ्य—

पुत्रमुत्पादयेत्स्वस्यां पितृणामृणशान्तये॥
सत्यं ब्रूयात्प्रियं ब्रूयात्सर्वभूतेषु सर्वदा।

इत्यन्तेन गृहस्थधर्मान् सर्वानुक्त्वा—

एवं समाचरन् विप्रो विरक्तश्चेद्गृहाश्रमात्॥
सन्यसेत्सर्वकर्माणि वेदान्ताभ्यासयत्नवान्।
वेदान्तश्रवणाभावे पतितोऽयं भवेद्ध्रुवम्॥

[4]विरक्तोऽपि मुमुक्षुश्चेद्वंसे वा सन्यसेद्गृही।
बहूदके वाशक्तश्चेन्न्यसेद्विप्रः कुटीचके॥
अविरक्तो गृही चान्ते वानप्रस्थं समाचरेत्।
अथवा यावदायुष्यं गार्हस्थ्यं सम्यगाचरेत्॥

---

[1] छान्दो. शं. भा. ८–१५–१. [2] छान्दो. ८–१४–१. [3] छान्दो. ८–१३–१.
[4] विरक्तोऽप्य.

गार्हस्थ्यादाश्रमाः सर्वे समुत्पन्नाः सुरक्षिताः ।
तस्माद्गृहस्थ एव स्यादविरक्तो द्विजः सदा ॥ इति ।

तथा च 'आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य' इति व्यतिरिक्तकाले बाह्येन्द्रियव्यापारमकृत्वा 'हार्दे ब्रह्मणि मनः सन्दधीत' इति व्याख्येयम् । एवं च '[1]कृत्स्नभावात्तु गृहिणोपसंहारः' '[2]अनावृत्तिः शब्दादनावृत्तिः शब्दात्' '[3]कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्' [4]'स्मृतेश्च' इत्येवमादिसूत्रतद्भाष्यादिकं मुख्यार्थत्वेनोपपादितं भवति ॥

ननु दहरविद्याप्रतिपादकत्वेनोदाहृतश्रुतिषु 'एष आत्मा अपहतपाप्मा'। 'ऋतं सत्यं परं ब्रह्म' 'तदादिमध्यान्तविहीनमेकम्' इत्यादिसन्दर्भैर्निर्गुणब्रह्मस्वरूपमपि प्रतीयते । कथमेतदुपासकस्य तदप्राप्तिरिति चेत्, सत्यं; उपासकस्य सकलप्रपञ्चनिर्मुक्तत्वेन ब्रह्मानुपासकत्वात् त्वंपदार्थशोधनाभावाच्च । अत्र तु गुणवत्त्वेनैवोपासनम् । गुणानां धर्मिणमन्तरा स्वातन्त्र्येणैवोपासनाऽसंभवादात्मपरं ब्रह्मपदाद्युपासनम् । उक्तं च भाष्यकारेण— [5]'विकारावर्ति च तथा हि स्थितिमाह' इति सूत्रव्याख्यानावसरे 'न च तन्निर्विकारं रूपमितरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुम्, अतत्कृतुत्वात्तेषाम्' इति । तस्माच्छ्रुत्युक्तगुणविशिष्टं परमेश्वरं क्रममुक्त्यर्थं पूर्वोक्ताधिकारी पूर्वोक्तप्रकारेण चिन्तयेत् । उक्तं च शिवधर्मोत्तरे दशमाध्याये—

गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन्निमिषन्नपि ।
शुचिर्वाप्यशुचिर्वापि शिवं सर्वत्र चिन्तयेत् ॥

स्वदेहायतनस्यान्त[6]र्मनसोत्थाप्य शङ्करम् ।
हृत्पद्मपीठमध्ये तु ध्यानयज्ञेन पूजयेत् ॥

ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः ।
तेनेष्ट्वा मुक्तिमाप्नोति बाह्यैः शुद्धैश्च नाध्वरैः ॥

---

[1] ब्र. सू. ३-४-४८. [2] ब्र. सू. ४-४-२२. [3] ब्र. सू. ४-३-१९.
[4] ब्र. सू. ४-३-११. [5] ब्र. सू. ४-४-१९. [6] मैनसि स्थाप्य.

हिंसादिदोषयुक्तत्वाद्विशुद्धश्चित्तसाधनः ।
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ॥

तस्मादशुद्धं स्वर्गीयमनित्यं बाह्यसाधनम् ।
यज्ञाद्यं कर्म सन्त्यज्य योगं मुक्त्यर्थमभ्यसेत् ॥ इति ।

तत्रैव तृतीयाध्याये—

सर्वेषामेव यज्ञानां ध्यानयज्ञः परः स्मृतः ।
नित्यः शुद्धः प्रसन्नश्च सर्वदोषविवर्जितः ॥

शुक्लः कृष्णः परः सूक्ष्मः सुविशुद्धसमाधिजः ।
ध्यानयज्ञः परो यज्ञः स्थूलोऽशुद्धश्च कर्मजः ॥

विशुद्धैः साधनैः सूक्ष्मैर्ध्यानयज्ञस्तु साध्यते ।
यस्मात्तस्माद्विशुद्धोऽयमपवर्गफलप्रदः ॥

अन्तर्यागोपचारेण यः पूजयति शङ्करम् ।
ध्यानयज्ञेन सततं स याति परमां गतिम् ॥

पुष्पैर्यमाद्यैर्नियमैरात्मैकादशभिर्वरैः ।
दशदिक्षु तथा मध्ये यजन्ति परमेश्वरम् ॥

कर्मयज्ञात्तपोयज्ञो विशिष्टो दशभिर्गुणैः ।
जपयज्ञस्तपोयज्ञाज्ज्ञेयः शतगुणाधिकः ॥

ज्ञानध्यानात्मकः सूक्ष्मः शिवयोगो महामखः ।
विशिष्टः सर्वयज्ञानामसङ्ख्यातैर्महामखैः ॥ इति ।

तत्रैव—

अत्यल्पोऽपि यथा दीपः सुमहन्नाशयेत्तमः ।
योगाभ्यासस्तथाल्पोऽपि महत्पापं विशोधयेत् ॥

अर्धयामं मुहूर्तं वा ध्यायतः परमं शिवम् ।
यद्भवेत्सुमहत्पुण्य[1]मन्तस्तस्य न विद्यते ॥

यद्यन्तरा विपद्येत ज्ञानयोगार्थमुद्यतः ।
श्रद्धया गुरुभक्त्या च रुद्रलोकं स गच्छति ॥

[1] मतस्तस्य.

अनुभूय सुखं तत्र कुले जायेत योगिनाम् ।
ज्ञानयोगं तदा प्राप्य संसारमतिवर्तते ॥ इति ।

शिवधर्मे प्रथमाध्याये—

एककालं द्विकालं वा त्रिकालं वापि नित्यशः ।
ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः ॥ इति ।

तत्रैव—

सा हानिस्तन्महच्छिद्रं स मोहः सान्धमूकता ।
यत् क्षणं वा मुहूर्तं वा शिवमेकं न चिन्तयेत् ॥ इति ।

भवभक्तिपरा ये तु भवप्रवणचेतसः ।
भवसंस्मरणोद्युक्ता न ते दुःखस्य भागिनः ॥ इति च ।

नारुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ।
नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ॥

संपर्कात्कौतुकाल्लोभाद्भयाद्वापि च संस्मरेत् ।
कीर्तयेदर्चयेद्वापि सोऽप्यवश्यं गणो भवेत् ॥ इति ।

तत्रैव सप्तमे—

ये स्मरन्ति सदाकालमीशानं पूजयन्ति वा ।
रुद्रलोकात्परिभ्रष्टा विज्ञेयास्ते गणेश्वरा ॥ इति ।

तत्रैव—

स्मरणादेव रुद्रस्य पापसंघातपञ्जरम् ।
शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा ॥ इति ।

तत्रैवैकादशे—

शिवार्चाग्निपरो नित्यं तद्भक्तानां च भोजनम् ।
पर्वमैथुनवर्जी स्याच्छ्रीमाञ्छिवगृहाश्रमी ॥

देवाग्न्यतिथिभैक्षार्थं पचेन्नैवात्मकारणात् ।
आत्मार्थं यः पचेन्मोहात् नरकाय स जीवति ॥

यः शिवब्रह्मचारी स्यात्स शिवार्चाग्नितत्परः ।
भवेज्जितेन्द्रियः शान्तो नैष्ठिको भौतिकोऽपि वा ॥

यः सर्वसङ्गनिर्मुक्तः कन्दमूलफलाशनः ।
शिववैखानसो ज्ञेयः शिवार्चाग्निपरो भवेत् ॥

निवृत्तः सर्वसङ्गेभ्यः शिवध्यानपरः सदा ।
ज्ञेयः शिवयतीन्द्रोऽयं भस्मनिष्ठो जितेन्द्रियः ॥ इति ।

आदित्यपुराणे त्रयस्त्रिंशाध्याये इन्द्रं प्रति बृहस्पतिः—

[1] अस्त्यनन्तगुणावासः परानन्दैकविग्रहः ।
ध्यातः कैवल्यदः पुंसां महादेवो न चापरः ॥

[2] कर्मपाशनिबद्धानां महामोहात्मनां हरे ।
स्मरणान्मोचकस्तेषामुमापतिरिति श्रुतिः ॥

क्षणं मुहूर्तमथ वा ध्यातः संपूजितः स्मृतः ।
प्रदद्यादाशु कैवल्यं यस्तं भज महेश्वरम् ॥ इति च ।

तत्रैव षट्चत्वारिंशे—

शाठ्येनापि नरा नित्यं ये स्मरन्ति महेश्वरम् ।
तेऽपि यान्ति तनुं त्यक्त्वा शिवलोकमनामयम् ॥ इति ।

कुलं पवित्रं पितरः समुद्धृता
वसुन्धरा तेन च पावनीकृता ।
सनातनोऽनादिरनन्तविग्रहो
हृदि स्थितो यस्य सदैव शङ्करः ॥ इति ।

तत्रैवैकपञ्चाशाध्याये—

स्थूलानि यानि पापानि सूक्ष्माणि विविधानि च ।
तानि नाशयति क्षिप्रं मुहूर्तं शिवचिन्तनम् ॥ इति ।

तत्रैव चतुष्षष्टितमे—

ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः ।
योऽन्तकाले शिवं ध्यायेच्छिवसायुज्यमाप्नुयात् ॥ इति ।

एवं सर्वपुराणेषु श्रुतिस्मृत्यागमादिषु ।
भोगमोक्षप्रदत्वेन शिवध्यानं विधीयते ॥

---

[1] सौरपुराणे. ३२--१२. [2] मोहपाश.

श्रुत्यादि सर्वमानज्ञैराचार्यैः प्रोक्तवर्त्मना ।
दहरोपासनारीतिरेवं सम्यक् प्रकाशिता ॥

मनसि प्रणिधानार्थं पुनः श्लोकैः प्रकाश्यते ।
विविक्तदेशसंसेवी शुचिर्मौनी जितेन्द्रियः ॥

भूतिभूषितसर्वाङ्ग ऋजुकायः समाहितः ।
सुखासनो निजं भक्त्या प्रणम्य मनसा गुरुम् ॥

अहमेव हरिः साक्षात्सर्वज्ञः पुरुषोत्तमः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥

विश्वो नारायणो देवो ह्यक्षरः परमः प्रभुः ।
इति ध्यात्वा पुनः स्वस्य हृदयाम्भोजमध्यमे ॥

प्राणायामैर्विकसिते परमेश्वरमन्दिरे ।
अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते ॥

ज्ञाननाले महाकन्दे प्रणवेन प्रबोधिते ।
विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ॥

वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ।
तापयन्तं स्वकं देहमापादतलमस्तकम् ॥

निवातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ।
नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम् ॥

नीवराशूकयद्रूपं [1] पीतं भास्वद्विचिन्तयेत् ।
तस्या वह्नेः शिखायास्तु मध्ये परमकारणम् ॥

परमात्मा परानन्दः प्रणवार्थो महेश्वरः ।
ऋतं वैतथ्यरहितः सत्यं कालत्रयेऽपि सन् ॥

परं ब्रह्म परं तत्त्वं पुरुषः पूर्णविग्रहः ।
पुण्यापुण्यादिरहितो विजरो मृत्युवर्जितः ॥

विशोको विचिघत्सोन्नभक्षणे रागवर्जितः ।
अपिपासः पानरागविहीनो विशदोऽमलः ॥

---

[1] पीताभासं विचि.

अचिन्त्यो वृत्त्यविषय अव्यक्तो व्यक्तिवर्जितः ।
अनन्तरूपः कालादिपरिच्छेदविवर्जितः ॥

शिवः [1] कल्याणनिलयः प्रशान्तो मोहवर्जितः ।
[2] अमतश्चादिमध्यान्तविहीनश्चैक एव हि ॥

विभुर्व्यापी चिदानन्दो ह्यरूपो रूपवर्जितः ।
सत्यकामस्तथा सत्यसङ्कल्पश्च परात्मनि ॥

सत्याः कामाश्च सन्त्येव वशी सर्वस्य वस्तुनः ।
ईशानः सर्वभूतस्य सर्वस्याधिपतिस्तथा ॥

ब्रह्मयोनिर्वेदवेदशिरो लोकेशकारणम् ।
परमेश्वर उत्कृष्टो ब्रह्मादीनां नियामकः ॥

प्रभुः सर्वक्रियाधृष्टो विश्वरूपोऽखिलात्मकः ।
कृष्णपिङ्गल ईशाङ्गसंयुक्तार्धाङ्गसुन्दरः ॥

ऊर्ध्वरेता दीप्ततपा जटाभूत्यक्षभूषणः ।
नियतो ज्ञानसंपन्नः स्वात्मध्यानपरायणः ॥

विरूपाक्षोऽयुग्मनेत्रो विशोकस्तापवर्जितः ।
उमासहायश्चिच्छक्तिसहितः साम्बविग्रहः ॥

त्रिलोचनो वीतिहोत्रसोमभास्करलोचनः ।
नीलकण्ठः कालकण्ठः [3] सर्वपापनिवारकः ॥

प्रशान्तः सुप्रसन्नाक्षः प्रसन्नमुखपङ्कजः ।
अद्भुतो विस्मयकरः सर्वलोकविलक्षणः ॥

एवं भूतस्तारवाच्यः सर्वात्माहं महेश्वरः ।
प्रारब्धे फलसाम्ये तु नाडीरश्मिसमन्वितः ॥

[4] मूर्धद्वारा विनिर्गत्य अर्चिरादिपथादहम् ।
आतिवाहिकदेवैश्च नीतो विद्युत्स्थलावधि ॥

ब्रह्मलोकादागतेन बहुमानपुरस्सरम् ।
अमानवेन देवेन नीतो ब्रह्मसभां पुनः ॥

---

[1] कल्याणविषयः [2] अमित. [3] सर्वताप. [4] मूर्धद्वाराद्विनिर्गत्य.

ब्रह्मभावं प्राप्य ततो ब्रह्मणा सह मुक्तिमान् ।
एवं दहरविद्याङ्गमन्त्राच्छद्यामादितीरितात् ॥

उदीरितार्थध्यानाच्च ब्रह्माहमिति निश्चयः ।
इतोऽपि सङ्क्रहेणैव पूर्वोक्तं पुनरीर्यते ॥

सूर्योक्तायां संहितायामादरेण प्रकाशितः ।
विविक्तसेवी लघ्वाशी सुखासीनो जितेन्द्रियः ॥

समग्रीवशिरःकायः शुचिर्भस्मावकुण्ठितः ।
त्रिपुण्ड्रधारणैर्युक्तो गुरुभक्तिसमन्वितः ॥

हृत्पुण्डरीकमध्ये तु शिवं सत्यादिलक्षणम् ।
सर्वस्य जगतः साक्षात्सृष्टिस्थित्यन्तकारणम् ॥

उमासहायं कल्याणं नीलकण्ठं त्रिलोचनम् ।
प्रशान्तं प्रभुमीशानं ध्यायेन्नित्यमतन्द्रितः ॥

ध्यानेनैव शिवज्ञानं ज्ञानान्मुक्तिर्न कर्मणा ।
कर्म तु ज्ञानहेतुः स्यादिति तत्त्वविदां स्थितिः ॥ इति ।

शिवराघवसंवादे पाद्मे चैवमुदीरितम् ।
हृत्पुण्डरीकनिलयं विशुद्धं विरजं तथा ॥

विशोकं च विचिन्त्यात्र ध्यायेन्मां परमेश्वरम् ।
अचिन्त्यरूपमव्यक्तमनन्तममृतं शिवम् ॥

आदिमध्यान्तरहितं प्रशान्तं ब्रह्मकारणम् ।
ईशं विभुं चिदानन्दमरूपमजमद्भुतम् ।

शुद्धस्फटिकसङ्काशमुमादेहार्धधारिणम् ।
व्याघ्रचर्माम्बरधरं नीलकण्ठं त्रिलोचनम् ॥

जटाधरं चन्द्रमौलिं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥

कराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगम् ।
कोटिमध्याह्नसूर्याभं चन्द्रकोटिसुशीतलम् ॥

चन्द्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहम् ।

भूतिभूषितसर्वाङ्गं सर्वाभरणभूषितम् ॥
आत्मार्पणेऽप्येवं निर्गुणस्यैव ध्यानं प्रतिपादितम् ।

ननु ध्यानं नाम चिन्ता, चिन्ता च स्मृतिः; 'चिति स्मृत्याम्' इत्यनुशासनात् । स्मरणं च पूर्वानुभूतस्येति निर्गुणत्वनिरञ्जनत्वादिविशिष्टस्याखण्डानन्दसमरसात्मकस्य परञ्ज्योतिष्ट्वेन निर्वर्ण्यस्यानिर्देश्यस्यानुपमस्य परब्रह्मणः शिवलिङ्गस्यानेवंदृष्टस्य पूर्वमननुभूतस्य कथं वा स्मृतिरुपवर्ण्यते । स्मृतिश्चिन्ता च ध्यानमिति परब्रह्मणो ध्यानमिदमसङ्गतम् । यदि च ध्यानमप्युपवर्ण्यत ध्यानस्य चिन्तात्वेन तस्याः स्मृतिरूपायाः पूर्वानुभवसापेक्षत्वेनानुभूतेऽपि परब्रह्मण्यखण्डानन्दरूपे पुनः स्मृतिरूपस्य ज्ञानस्य विषयसन्निधानरूपस्य 'सा गङ्गा, सा माता' इत्यादिवत्कालान्तरदेशान्तरवर्तित्वस्यावश्याङ्गीकरणीयत्वेनाव्यापकत्वपरिच्छिन्नत्वादिमत्वापत्त्या 'सर्वव्यापी भगवांस्तस्मात्सर्वगतश्शिवः' इत्याद्यनेकश्रुतिस्मृतीतिहासपुराणानामप्रामाण्यापत्त्या सकलप्रमाणव्याकुलीभावः ॥

किं च रूपवत एव चाक्षुषप्रत्यक्षविषयत्वेन 'अरूपमद्भुत'मित्यादिश्रुत्यानुगुण्येनारूपिणः प्राकृतचक्षुर्विषयत्वासङ्गतेः (अप्राकृतेनापि चक्षुषा) प्राकृतरूपविशिष्टस्य 'रूपमप्राकृतं ते' इत्यात्मार्पणादिप्रतिपादनानुसारेण [1]नीरूपस्याप्राकृतचक्षुर्विषयत्वस्याप्ययोगात् । तथा च मनसाप्यनवगाहनीयत्वम् । दृष्टे कलभे गजराजस्य महेन्द्रवाहनस्यापि मनसावगाहनं शक्यम् । नीरूपस्य कस्याप्यदृष्टत्वेन शशशृङ्गायते नीरूपध्यानोपवर्णनमिति । यदपि सगुणस्य ध्यानं तदप्ययुक्तम्; ध्यानस्य स्मृतिरूपस्यानुभवमन्तरेणाप्रवृत्तेः । अनुभूतेऽपि परब्रह्मणि करचरणादिविशिष्टे पाशविच्छेदरूपमोक्षस्या[2]नागतत्वेन तत्साक्षात्कारार्थपूजादिसाधनसमुदा[3]यस्यातत्फलपर्यवसायित्वापत्तेः । 'तस्मिन् दृष्टे परावरे' इत्यादिश्रुतिसमुदायस्याप्रामाण्यापत्तेः । तस्मादुदाहृतरीत्या कस्यापि ध्यानं न युज्यत इति पूर्वः पक्षः । सिद्धान्तस्तु

---

[1] निरूपितस्य. [2] नुगतत्वेन. [3] यस्याफल.

—पूर्वमननुभूतपदार्थस्यापि स्मृतिरूपा चिन्ता दृश्यते। काशीं जिगमिषुरध्वन्यननुभूतचोरोपद्रवं गङ्गास्नानानन्दं वाऽऽप्तवाक्यश्रवणेन चिन्तयन्नध्वनि चोरोपद्रवं निवर्तयन् चोरोपद्रवमार्गादनुकूलाध्वगामी चिन्तयन् गङ्गास्नानानन्दमनुभूय चानन्दपरमो भवति। अश्रुताप्तवाक्यस्तत्र गत्वा चोरोपद्रवात् क्षरति अश्रुतकाशीदेशश्च संस्मरन् विलीयत इतिवत्परमाप्तवाक्यश्रुतिनिकरैरवगतहितानुकूलव्यापारश्चिन्तारूपमननुभूतमपरिचितं नीरूपं नित्यानन्दामृतरसं चिन्तयन्ननुभूय च परानन्दममृतीभवति। नीरूपस्याप्यपरोक्षसाक्षात्कारदशायामीश्वरानुग्रहेणैव जायमानत्वादघटितघटनापटुगस्त्यसागरपानवदिति सर्वं समञ्जसम्॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठ-
शिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारे
सप्तविंशोपदेशः समाप्तः

अथ अष्टाविंशोपदेशः

अष्टाविंशोपदेशेऽस्मिन् प्रसादग्रहणं गुरोः।
पादोदकाभिषेकश्च वर्ण्यते विस्तरान्मया॥ १

गुरूच्छिष्टं तु भोक्तव्यं गृह्यकारैः समीरितम्।
गुरुवद्गुरुपुत्रेऽपि वर्तितव्यमिति स्फुटम्॥ २

[1] पतञ्जलिस्मृतेर्भोज्यमित्यथ वर्णितैः।
यच्चतुर्विधसारायस्थलसंज्ञं समीरितम्॥ ३

दीक्षापादोदकं शिक्षापादोदकमिति द्वयम्।
ज्ञानपादोदकं चेति निरुक्तिरपि दृश्यते॥ ४

दीक्षयापगतद्वैतं यज्ज्ञानं गुरुशिष्ययोः।
आनन्दं सेव्यमेतेन दीक्षापादोदकं विदुः॥ ५

इत्याद्यैरागमैश्चापि निरुक्तिरपि वर्णिता।
दीक्षा शिक्षा ज्ञानमिति शब्दभेदः श्रुतीरितः॥ ६

---

[1] पतञ्जलिमृतेः भक्तैर्भोज्यमित्यथ वर्ण्यते.

शिवपादोदकं भक्तैः स्वीकार्यमिति चोदितम् ।
न स्वीकार्यं जलं पुष्पमसमर्प्य चरे गुरौ ॥ ७

स्वीकुर्याद्यदि मोहेन पतितो नरकं व्रजेत् ।
शिवे गुरौ चरे चैवमविशेषेण वर्तनम् ॥ ८

तत्र सन्दिह्यतेऽस्माभिः किं वा शिवसमर्पितम् ।
गुरौ चरे समर्प्यं वा किं वा गुरुसमर्पितम् ॥ ९

शिवे चरे समर्प्यं वा किं वा चरसमर्पितम् ।
गुरौ शिवे समर्प्यं वा किं तत्त्वमिति संशयः ॥ १०

एषां समर्प्य प्रत्येकं स्वीकार्यं वा पदोदकम् ।
शिवे समर्पितं तोयं ग्राह्यं पाशनिवृत्तये ॥ ११

गुरुजङ्घमपादोदं शिरसा धारयेद्द्विजः ।
इत्येवं प्रतिभातीत्थं वेदेषु परिदृश्यते ॥ १२

नैवं यथा स्वेष्टदैवपादोदामृतमन्त्रतः ।
विहितं तद्वदेवोक्तं गुरुपादोदधारणम् ॥ १३

अविद्यामूलनाशाय जन्मकर्मनिवृत्तये ।
ज्ञानवैराग्यसिध्यर्थं गुरोः पादोदकं [1]पिबेत् ॥ १४

इति मन्त्रेण विहितं धारणं पानमुच्यते ।
विवक्षितान्तःकालुष्यनिवृत्त्यर्थौषधात्मना ॥ १५

वर्णनाद्दृश्यते लोके कुक्षिरोगनिवृत्तये ।
औषधप्राशनं प्रायो दृश्यते वचनानि च ॥ १६

संपूज्य विधिवद्भक्त्या गुरोः पादोदकं पिबेत् ।
उच्छिष्टप्राशनं [2]कुर्याद्विनैतद्गुरुपुत्रके ॥ १७

इति हेमाद्रिवाक्येन तथा पातञ्जलेऽपि च ।
गुरुवद्गुरुपुत्रेऽपि वर्तितव्यं मनीषिभिः ॥ १८

उच्छिष्टादीनि मुख्यानीत्यादिव्याकरणेन यत् ।
तस्मादागमवाक्यैश्च बहुशः प्रतिपादनात् ॥ १९

---

[1] शुभम् . [2] कुर्याद्विनीते गुरुपुत्रके.

सिद्धं गुरुपदोदस्य धारणं पानमेव हि।
चरपादोदकं चापि वैदिकं [1]तत्र वर्णितम्॥ २०

चरमूर्तेर्गुरुत्वं हि गुरोरप्यधिकं भवेत्।
यदि पादोदकादीनां श्रुतौ [2]वैशेष्यवर्णनात्॥ २१

तत्सिद्धं शिवपादोदं गुरुपादोदकं तथा।
चरपादोदकं चापि धारयेदिति तत्त्रयम्॥ २२

तत्र त्रयाणामादेशात्प्रत्येकं कर्म तत्त्रयम्।
पूर्णमासेष्टिनिर्वाप्यास्तिस्रस्ता मुख्यदेवताः॥ २३

अग्नेरष्टाकपालः स्याद्विष्णोश्चोपांशुयाजनम्।
अग्निष्टोमे तथा चेन्द्रो वैमृधश्चेति देवताः॥ २४

विधीयन्ते तथैवात्र प्रत्येकं कर्म तत्त्रयम्।
न ह्येवं वक्तुमुचितं निषेधश्रवणादिति॥ २५

असमर्प्य प्राणलिङ्गे जङ्गमे च तथा गुरौ।
स्वीकुर्याद्यदि मोहेन समवायेऽपि यो जनः॥ २६

स्वाचारसंपरिभ्रष्टः शैवश्चयवति तत्क्षणात्।
इत्याद्यागमवाक्योक्तं तान्त्रिकं वैदिकं न चेत्॥ २७

त्रिपादूर्ध्व उदैन्मन्त्रः अस्मिन्नर्थे प्रवर्तते।
त्रिपादिति त्रयः पादा यस्य स स्यात्त्रिपाच्छिवः॥ १८

गुरुर्लिङ्गं जङ्गमं च तेषां पादत्रयस्त्रिपात्।
ऊर्ध्व उत्कृष्ट एवासावुदैदुदितवाञ्छिवः॥ २९

पुरुषो वै रुद्र इति पुरुषत्वं शिवस्य तत्।
पादोऽस्येह शिवस्यैव लब्धो यद्यभवत्पुनः॥ ३०

पुनः शब्दो विशेषार्थवाची वैशेष्यमत्र च।
असान्निध्यं जङ्गमस्य गुरोश्चापि ततस्तथा॥ ३१

विष्वङ्व्यक्रामदित्येवं व्यापकत्वं शिवस्य च।
अनुसन्धाय मनसा गुरुजङ्गमतामपि॥ ३२

---

[1] तन्त्रवर्णितम् [2] वैशिष्ट्यव.

अशनानशने चोभे संभवे चाशनं भवेत् ।
अत्तुं योग्यं भवेत्तत्र त्रितयं यन्न लभ्यते ॥ ३३

तदा त्वनशनं प्रोक्तमधः पातित्यमश्नुते ।
त्रिपादमात्रमन्त्रेऽस्मिन्त्रिपादोदकधारणम् ॥ ३४

इति चेत्तत्र मन्त्रान्ते साशनानशने उभे ।
गुरुलिङ्गचराणां च पादत्रयमनूद्य च ॥ ३५

विहिते तत्र भेदश्च द्वयोरेकस्य संभवे ।
वचनान्तरसिद्धार्थाः सन्धेयास्तत्र तानि तु ॥ ३६

प्राणलिङ्गपरो भक्तो लब्ध्वा तत्र पदोदकम् ।
गुरुजङ्गमपादोदं लब्धवानेव भक्तितः ॥ ३७

समावाये गुरोस्तत्र गुरोर्लब्ध्वा पदोदकम् ।
पादोदकं जङ्गमस्य लब्धवान् मनसैव सः ॥ ३८

गुरुलिङ्गचराणां च समावाये तु भक्तिमान् ।
पादोदकं चरात्लब्ध्वा गुरोर्लिङ्गस्य भक्तिमान् ॥ ३९

अश्नीयादशनं भक्तेरन्यथानशनं भवेत् ।
तच्चेदनशनं प्रोक्तमभक्ष्यमसमर्पितम् ॥ ४०

घ्रातं जिघ्रेत्तथा पीतं पिबेद्रुद्रेण मानवः ।
भुक्तं भुञ्जीत वासांसि परिदध्याद्धृतानि च ॥ ४१

उपचारतया सर्वं परिकल्प्य पुनः पुनः ।
उपभोगाय कल्पेरन्निति जाबालिकी श्रुतिः ॥ ४२

चरणं तत्पवित्रं च विततं च पुरातनम् ।
येन वा चरणेनासौ संसारी दुष्कृताम्बुधेः ॥ ४३

पारं तरति पूतात्मा [1] पवित्रेणापि तेन च ।
पूतः शरीरपाशारिमतिक्रम्य भवाम्बुधिम् ॥ ४४

तरेम [2] वयमेतादृक्पादं लोकस्य धूर्जटेः ।
द्वारं द्वारमिति प्राप्तुं ब्रह्मलोकस्य साधनम् ॥ ४५

---

[1] पवित्रेणापरेण च. [2] वयमेतादृक्पदं.

अर्चिर्वदेवं यानाख्यस्थानं स्थानप्रदं च तत् ।
पवित्रं पविरूपात्तु पाशात्त्रातं महैनसः ॥ ४६

अशनेः पालकं तस्मादसाधारणकारणम् ।
ज्योतिष्मज्ज्योतिषां स्थानं प्राणलिङ्गपदोदकम् ॥ ४७

भ्राजमानं गुरोः पादसलिलं ज्ञानदायकम् ।
[1] महस्त्वन्महसां स्थानं चरलिङ्गपदोदकम् ॥ ४८

[2] अमृतस्यामृतं तस्य जरामरणनाशनात् ।
विजरत्वविशोकत्वदातुर्मोक्षस्य केवलम् ॥ ४९

धारास्तिस्रः प्राणलिङ्गगुरुजङ्गमभेदतः ।
बहुधा [3] तत्तथा भिन्नं चरणं चरणोदकम् ॥ ५०

प्रविलापनरूपेण स्वेष्टलिङ्गसमर्पितम् ।
अद्वैतभावमापन्नं बहुधा च प्रकारतः ॥ ५१

देहमानं यथा दोग्धा कामधेनोः स्तनेषु च ।
धाराबाहुल्यमासाद्य स्थाल्यामेकीकृतं पयः ॥ ५२

प्राप्य संतुष्यति तथा पादत्रयमवाप्तवान् ।
अभेददृष्ट्याचरणं त्रयाणां चरणानि तत् ॥ ५३

नोऽस्माकं सकुटुम्बस्य सानुकूल्यस्य वर्णनम् ।
सुधितां मुक्तिरूपेण सूक्ष्मज्ञानसमेतताम् ॥ ५४

[4] ददातु दद्यादित्येवं मन्त्रार्थैरिह वर्णनात् ।
ननु मन्त्रोऽयमाख्यातो रथचक्रोपलम्भने ॥ ५५

कल्पे क्रतुविशेषेषु तथा ब्राह्मणवाक्यतः ।
अर्थवादस्तथा सूत्रव्याख्याने वेदवेदिभिः ॥ ५६

ऐककण्ठ्येन चक्रस्य स्पर्शने दक्षिणाग्रहे ।
वर्णनात्कथमत्रेत्थं मन्त्रार्थस्तेऽनुकूलति ॥ ५७

नैवं क्वचिन्नियुक्तस्य दृश्यतेऽन्यत्र वै विधिः ।
चयने घृतधारायां होमे रुद्रानुवाकतः ॥ ५८

---

[1] महत्त्वं महतां स्थानं. [2] अमृतस्यामृताभस्य. [3] तत्त्रिधा. [4] दधातु.

शिवलिङ्गाभिषेकश्च कथं युष्माभिरुच्यते ।
एवमन्येऽपि ते मन्त्रा नियुक्ताः क्वचिदन्यथा ॥ ५९

विनियुक्तास्तद्वदत्र मन्त्रो नाना वियोगवान् ।
ननु यद्देवतामन्त्रास्तद्दैवत्येव कर्मणि ॥ ६०

विनियोगः संघटते रुद्रैकादशिनी तथा ।
प्रोक्ताश्चमकमन्त्राद्याश्चयने लिङ्गपूजने ॥ ६१

अयं तु प्रकृतो मन्त्रस्तथा नेति न चावदः ।
अन्यदैवत्यमन्त्राणामन्यत्र विनियोजनम् ॥ ६२

अग्निर्मूर्धादिमन्त्राणां विनियोगाद्धहार्चने ।
कल्पसूत्रविधेस्तावत्तथा कल्प्यं तदत्र न ॥ ६३

इति चेदत्र न ब्रूमः पादोदकनिषेवणे ।
विनियोगं मामकीये किंतु युष्पत्समीहिते ॥ ६४

यतीनां पादसलिलप्राशने विनियोगतः ।
युष्मदिष्टानुरूपं तु शैवानां कथयामि तत् ॥ ६५

पूर्वस्थितिप्रार्थनया कृतार्थस्त्वं पुनर्यदि ।
आस्तां तावत्तदा मन्त्रे धाराबाहुल्यवर्णनम् ॥ ६६

कथं सङ्गच्छते पूर्वा मदुक्तां रीतिमन्तरा ।
ननु बाहुल्यमन्त्रोक्तं कथं त्रिष्वेव वर्णितम् ॥ ६७

कपिञ्जलाधिकरणं विस्मृतं किं त्वया पुनः ।
किं च ज्योतिष्मदिति च भ्राजमानमतः परम् ॥ ६८

महस्वदिति तुल्यार्थं विशेषणतया त्रयम् ।
गुरुं लिङ्गं जङ्गमं च विशेष्यत्रयमाप्य तु ॥ ६९

सार्थक्यमश्नुते धारात्रयं च बहुधेत्यतः ।
विशेषभेदान्नधायो हि विशेषणकृतस्तथा ॥ ७०

भेदोऽन्यथा स्याज्ज्योतिष्मद्विशेषणमनर्थकम् ।
तस्माच्चरण[1]मन्त्रोऽयमन्ववादि मयोदितम् ॥ ७१

---

[1] मन्त्रोऽयं वावदित्यागमोदितम्.

गुरुलिङ्गचराणां च पादोदकनिषेवणम् ।
अत एव त्रिपान्मन्त्रो मन्त्रान्तरसमीहितम् ॥ ७२

पादोदकप्राशनं तत्पुनरभ्यदधादयम् ।
ननु त्रिपादयं मन्त्र उपक्रान्तानुसारतः ॥ ७३

उपसंहारतश्चापि वैष्णवोऽयमितीरिते ।
ईशानशब्दश्रवणात्पुरुषत्वाच्छिवस्य च ॥ ७४

पुरुषो वै रुद्र इति रुद्रवाचकताश्रुतेः ।
सूक्तनाम्ना शिवस्यैव पुनर्लिङ्गपुराणके ॥ ७५

पूजां विधाय बहुशः शैवत्वेनोपवर्णनात् ।
वात्यातूलायितं तस्य वैष्णवत्वं ततः किमु ॥ ७६

अत एव विलेख्या[1]र्थाः कृता वैष्णवखण्डने ।
दुर्वादिभञ्जनेऽस्माभिः सम्यगेव समर्थिताः ॥ ७७

ननु शैवत्वमस्त्वेवं प्रकृतार्थः कथं स्मरेत् ।
उपक्रमोपसंहारौ विराट्पुरुषवर्णने ॥ ७८

तन्मध्यवर्ती मन्त्रोऽयं तस्यैव प्रतिपादकः ।
प्रकृतार्थपरत्वं तु न शक्यमिति चेच्छृणु ॥ ७९

विराडजायतेत्येवमिच्छामूर्तिमवर्णयत् ।
उपसंहारवाक्यात्तदुपक्रमगतं वचः ॥ ८०

सहस्रशीर्षमुख्यानि रूपाणि प्रत्यपीपठत् ।
तन्मध्यवर्ती मन्त्रोऽयं लिङ्गमूर्तिं चरं गुरुम् ॥ ८१

उपपादयतीत्येव वक्तव्यं तत्र मन्त्रके ।
अशनानशने चोभे विहिते चाभिचाव्ययम् ॥ ८२

उक्तार्थं च विरोधं च प्रतिपादयति स्वयम् ।
विरोधस्तदभावः स्यात्त्रिपादसलिलस्य च ॥ ८३

एकस्यापि यदाभावस्तदात्वनशनं खलु ।
अनिषेव्य पदोदं तदभोज्यमिति निश्चयः ॥ ८४

---

[1] र्था कृतौ वैष्णव.

गुरुलिङ्गचराणां च पादोदत्रयसंभवे ।
[1]अशनं तत्पदार्थानामत्तुं योग्यत्वमुच्यते ॥ ८३

तस्मादेतादृशी मूर्तिः साधकानुग्रहाय वै ।
इत्यादि तच्छिवस्यैव वर्णनं ह्युपपद्यते ॥ ८४

उपक्रमोपसंहारावनुरुध्यैव वर्ण्यते ।
अन्यथा [2]वर्णने तत्र साशनानशने उभे ॥ ८५

व्यर्थे भवेतां नद्यास्तत्तीरे पञ्चफलानिवत् ।
तस्मादुरोर्जङ्गमस्य शिवस्य च पदोदकम् ॥ ८६

निषेव्यमिति सिद्धान्तो निगमागमवर्णितः ।
किमेते पौर्णमासेष्टिप्रधानानि यथा तथा ॥ ८७

प्रत्येकं कर्म किंवाद्य पदार्थैक्यं यथा पुनः ।
[3]निर्वपेच्चतुरो मुष्टीन् सक्तानुसमयं पुनः ॥ ८८

पदार्थभेदमाशङ्क्य चतुर्मुष्टिसमन्वितः ।
एकः पदार्थ इत्यादिनाद्यः पक्षः समीहितः ॥ ८९

तत्र [4]संभवमूलोक्तं तथाहि प्राणलिङ्गके ।
गुरोश्चरस्य चालाभेऽप्यनुसन्धानमात्रतः ॥ ९०

पादोदकाशनं कर्मनिर्वाहायैव कल्पते ।
इष्टावन्यतरालाभे कर्म कैवल्यमेव हि ॥ ९१

न द्वितीयो देवतैक्यान्निर्वापादौ तदत्र तु ।
गुरुर्लिङ्गं चरं चेति भिन्नदैवत्यवर्णनात् ॥ ९२

अभेदबुद्धिरिति चेद्यूपादित्यवदत्र च ।
मीमांसाद्याकुलीभावो नानादैवत्यकर्मणि ॥ ९३

अभेदाद्धविरैक्ये च तस्मात्तन्नोपपद्यते ।
शेषशेषित्वमथवा त्रयाणां नोपपद्यते ॥ ९४

अलाभेऽन्यतमस्यापि कर्मनिर्वाहवर्णनात् ।
अत्रोच्यते मया सम्यगविरोधपुरस्सरम् ॥ ९५

---

[1] आशनं. [2] वर्ण्यते. [3] अयं क्वाचित्कः पाठः. [4] मूलत्वात्तथाहि.

पादोदकप्राशनाख्यं कर्म त्रेधा विधीयते ।
गुरुलिङ्गचराणां च समवाये तथा पुनः ॥ ९६

नित्यनैमित्तिके प्राप्ते हविश्शेषस्य भक्षणे ।
यथा पार्थिकृतीमिष्टिं प्रकृतेष्टिं च कुर्वता ॥ ९७

नैमित्तिकोपाधिकृते हविर्भक्षणमाचरन् ।
प्रकृतेष्टौ हविर्भक्षं करोति किल कर्मवित् ॥ ९८

नैमित्तिकं जङ्गमस्य स्वगुरोश्च पदोदकम् ।
निर्वर्त्य प्राणलिङ्गस्य पदोदं धारयेदिति ॥ ९९

इत्थं न्यायानुसारेण पृथक् प्राशनसंभवे ।
असमर्प्य प्राणलिङ्गे जलं वा फलमेव वा ॥ १००

स्वीकुर्याद्यदि मोहेन पतितो नरकं व्रजेत् ।
इत्यादीनां निषेधानां जागरूकतया पुनः ॥ १०१

प्राप्तं नैमित्तिकं तोयं नित्यत्वेनैव कल्पयेत् ।
निषेधस्य प्रबलता यदि स्याद्विध्यपेक्षया ॥ १०२

तस्माच्चरार्पितं लिङ्गे समर्प्य स्वीक्रिया मता ।
ननु जङ्गमपादोदं कथं लिङ्गे समर्प्यताम् ॥ १०३

विनियुक्तं जलं [1]तत्र न वैदिकमितीरयेत् ॥
पार्वणे हुतशिष्टान्नं ब्राह्मणेभ्यः कथं त्वया ॥ १०४

विनियोज्यं ब्राह्मणो वै सर्वास्ता देवता इति ।
आत्मनः शिवरूपत्वादावाह्य शिवलिङ्गके ॥ १०५

कुर्वन् पूजां प्रतिदिनमाचार्यादिपदोदकम् ।
[2] स्वीकुर्यां वाथ कथं तद्भदभेदात्प्राणलिङ्गयोः ॥ १०६

लिङ्गपीतं स्वपीतं स्यादिति सिद्धं समीहितम् ।
तारतम्यं यथा ते स्याद्गुरूणां समवायके ॥ १०७

यतिपादोदलाभेन नान्येषां कुरुते यथा ।
गुरुलिङ्गचरणां च समवाये [3] चराधिकम् ॥ १०८

प्राणलिङ्गार्पितं कृत्वा पिबेद्भक्त इति स्थितिः ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठशिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारेऽष्टाविंशोपदेशः ।

[1] तच्च. [2] स्वीकुर्याद्वा तथा तद्व. [3] चरार्पितम्.

एकोनत्रिंशोपदेशः

आगमानां तु सर्वेषां स्वतः प्रामाण्यमुच्यते ।
एकोनत्रिंशति पुनरुपदेशे समासतः ॥ १

कामिकाद्या वातुलान्ताः शिवेनोक्ताः शिवागमाः ।
ईशानवक्त्रसञ्जाताः साक्षाद्देवस्य शूलिनः ॥ २

ताल्वोष्ठदन्तव्यापारपुरस्सरमिमे समे ।
सर्वेषां धर्मपुञ्जानां बोधकाः शब्दराशयः ॥ ३

स्वतः प्रमाणभूतास्ते वेदेभ्यः स्फुटमेव हि ।
आगताः शिववक्त्रेभ्यो गताश्च गिरिजामुखम् ॥ ४

मताश्च वासुदेवेन ह्यागमा इत्युदीरिताः ।
सिद्धान्ता इति चाप्यन्ये शिवोक्ता बहवः स्फुटाः ॥ ५

चर्यायोगक्रियाज्ञानप्रतिपादनभेदतः ।
तत्तन्नामाङ्किताः पादाश्चत्वारस्तेषु विश्रुताः ॥ ६

चर्यापादे शिवाचारा बहवः काममोक्षदाः ।
वैदिकाचारसदृशाः क्वचित्तेषूपवर्णिताः ॥ ७

क्वचिद्वेदविरोधाश्च श्रूयन्ते तत्र तत्र तु ।
योगपादे तु बहवो योगाः श्रुतिविरोधिनः ॥ ८

क्वचिद्वेदानुरूप्येण योगाः श्रुतिषु चोदिताः ।
क्रियापादे त्वेवमेव प्रातिकूल्यानुकूल्यतः ॥ ९

ज्ञानपादोदितं ज्ञानं सर्वथा ग्राह्यमेव वा ।
विरुद्धमविरुद्धं वा यद्वेदेतरकीर्तितम् ॥ १०

वेदैकविहितं ज्ञानं भोगमोक्षप्रदायकम् ।
यदन्यत्रोदितं ज्ञानं न तन्मोक्षस्य साधनम् ॥ ११

श्रोतव्यवाक्यनियमाद्भाषारूपप्रबन्धतः ।
नैवोदेत्यमलं ज्ञानं किं तु श्रौतोपकारकम् ॥ १२

श्रौतज्ञानं मोक्षलक्ष्मीप्रदमन्यन्न किंचन ।
श्रुतं वेदान्तविज्ञाननिश्चितार्था इति श्रुतेः ॥ १३

श्रुत्यन्यत्वादागमानां तज्ज्ञानं नैव मोक्षदम् ।
चर्यायोगक्रियाश्चैता ग्राह्या वेदाविरोधिनः ॥ १४

विरुद्धाश्चेन्न प्रमाणं वैदिकाचारिणः प्रति ।
अवैदिका[1]नामाधारस्तन्त्रमार्गानुसारतः ॥ १५

सर्वज्ञेन शिवेनापि श्रुण्वन्तीं पार्वतीं प्रति ।
[2]स्त्रीत्वाद्देव्याः स्वानुरूपं कथितं तदवैदिकम् ॥ १६

यावच्छ्रोतुस्तावदेव कथितव्यं महात्मना ।
अधिकारानुरूप्येण दृश्यतेऽन्यत्र च श्रुतिः ॥ १७

आख्यायिकानुरूपेण कर्मणां कर्तृनिर्णयः ।
वैश्यस्तोमादिसंस्थाया वैश्यैकविषयत्वतः ॥ १८

राजसूयादियज्ञेषु क्षत्रियैकाधिकारतः ।
तदन्यैस्तन्न कर्तव्यमिति श्रौतविदो विदुः ॥ १९

अश्रौतस्यागमोक्तस्य कर्ताऽप्यश्रौतकर्मठः ।
आगमोक्तं समस्तं तु स्त्रीशूद्राणां भवेदिति ॥ २०

सामान्याधिकृतं कर्म विशेषमधिगच्छति ।
न विशेषस्य कथितं सामान्यस्य भवेदिति ॥ २१

ब्रह्मचारी स्वाविरुद्धं याति धर्मं विशेषतः ।
गृहस्थधर्मं नाप्नोति ब्रह्मचारी यमान्वितः ॥ २२

अतोऽविरुद्धतन्त्रोक्तः कर्षणादिविधिः पुनः ।
वैदिकस्यापि विदुषो भवेद्धर्माय केवलम् ॥ २३

श्रुतेर्विरुद्धं दीक्षादि [3]तन्त्रैकमनुयायिनाम् ।
निषिद्धकृत्यं तत्रापि तन्त्रोक्तं नैव चाचरेत् ॥ २४

अतो वेदानुरोधेन तन्त्राणां च प्रमाणता ।
इति घोषयतां कण्ठग्रहः सिद्धान्त उच्यते ॥ २५

श्वसितानां श्रुतीनां चैतादृशो महिमा यदि ।
तास्वोष्ठपुट[4]निष्पन्दपुरस्सरमुदीरिते ॥ २६

---

[1] नामुद्धारः. [2] तत्त्वादेव. [3] तन्त्रैकाध्वानु. [4] निष्यन्द इति स्यात्.

आगमे शिववक्त्रोत्थे वक्तव्यो महिमा कियान् ।
अत्रेदं तत्त्वमाख्याहि तन्त्राणां यावतां किमु ॥ २७

अवैदिकत्वं तच्चापि वैदिकानर्हताऽथवा ।
वेदे निषिद्धता वेदमन्त्रसङ्ज्ञाप्रकाश्यता ॥ २८

नाद्यः पक्षस्त्वागमोक्ता देवतागारनिर्मितिः ।
प्रतिष्ठा देवतायाश्च यागाद्या कर्मसंहतिः ॥ २९

अप्रमाणं यदि भवेद्वेदोक्तं गतमेव ते ।
बहूनां वैदिकार्थानां तन्त्रोक्तत्वान्महाक्षतिः ॥ ३०

अनर्हता वैदिकानां यदि वेदनिषिद्धता ।
राजसूयादियागानामधिकारिविशेषणात् ॥ ३१

ब्राह्मणानां तेषु कर्मस्वधिकारनिषेधतः ।
तन्त्रोक्तता स्यात्तेषामप्येवमेव रथन्तरम् ॥ ३२

[1] ब्रह्मवर्चसकामस्तु पृष्ठं कुर्यादिति श्रुतेः ।
ब्रह्मता याजयेद्वैश्यं राज्ञो गौरिव तेन च ॥ ३३

इत्यादिषु विशेषेण तत्तत्पृष्ठार्हता न हि ।
अतोऽन्यवेदविहितो [2] निषेधातत्र चोदितम् ॥ ३४

भवेदेतत्समस्तं च ततो नानर्हता हि तत् ।
वेदमन्त्राप्रकाश्यत्वं कर्मणां यदि तान्त्रिकम् ॥ ३५

प्रत्यक्षश्रुतिवाक्येन कर्मणामप्रकाश्यता ।
[3] परोक्षणोक्तवेदेन नाद्यः पक्षः समीहितः ॥ ३६

बहूनां [4] श्रुतिचोद्यानां कर्मणां श्रुत्यदर्शनात् ।
परोक्षश्रुतिचोद्यत्वं कल्प्यते महदुक्तितः ॥ ३७

समस्तश्रुतिसङ्ज्ञाश्च यस्य निश्वसितं श्रुतम् ।
तस्यैव साम्बमूर्तेस्तु ताल्वोष्ठपुटयत्नतः ॥ ३८

निर्गतानामागमानां परोक्षश्रुत्यपेक्षया ।
प्रामाण्यं सिध्यति ततस्तवैव स्यान्महाक्षतिः ॥ ३९

---

[1] ब्रह्मवर्चसकामस्य. [2] निषेधात्तन्त्रचोदितम्. [3] परोक्षेणाथवा तेन इति स्यात्. [4] स्मृतिचोद्यानां.

अतः किं तान्त्रिकत्वं ते कथयाश्रौषमञ्जसा ।
वेदोक्ताचरणाभावस्तान्त्रिकत्वं यदीर्यते ॥ ४०

यावदाचरणाभावो यत्किंचिद्वात्र तान्त्रिकम् ।
यावतां कर्मणां केनाप्यनुष्ठातुमशक्तितः ॥ ४१

यत्किंचिद्यदि भृत्यादिधारणं तुल्यमावयोः ।
यावन्नित्यानुवृत्तिः स्याद्वैदिकत्वप्रयोजकम् ॥ ४२

उपनीतो यदि ज्ञानी वैदिको न भवेन्मुनिः ।
नैष्ठिकब्रह्मचारी च वैदिको न भवेदिति ॥ ४३

स्वस्वाश्रमोचिताचारः सर्वस्वपरिपालनम् ।
वैदिकत्वं यदि भवेदत्याश्रमविधिश्रुतम् ॥ ४४

भूतिरुद्राक्षमन्त्रादिपरिपालनमास्ति हि ।
यदि चेत्सर्वकर्माङ्गमुपनीतिस्तु वैदिकी ॥ ४५

उपनीतोऽथ पतितः स्याद्वैदिकपरः स्वयम् ।
[1] अनिषिद्धानुवृत्तिश्चाप्युपनीतौ विशेषणम् ॥ ४६

अनिषिद्धानुवृत्तिश्च निषिद्धाचरणं द्वयम् ।
यस्मिन् स्याद्वैदिकः सोऽपि ततो वक्तव्यमत्र च ॥ ४७

निषिद्धाचरणाभावोऽप्यनिषिद्धानुवर्तनम् ।
उपनीतत्वमित्येतत्त्रयं वैदिकतावहम् ॥ ४८

कृतचौलः स्वपितरं प्रमितं वैदिकाध्वना ।
संस्कुर्याद्यदि तत्कर्म तन्त्रोक्तं स्यात्ततः पितुः ॥ ४९

पुण्यलोकावाप्तिरपि नस्यादनुपनीतितः ।
अतो वक्तव्यमेवं हि निषिद्धाननुवर्तनम् ॥ ५०

अनिषिद्धानुवृत्तिश्च स्वाश्रमानुगुणेन हि ।
वैदिकत्वं ह्येतदेव कथितं वैदिकोत्तमैः ॥ ५१

तत्रापि ज्ञानकाण्डोक्तधर्मानुष्ठानमेव हि ।
निश्रेयसफलायापि कल्पते मुख्यमेव तत् ॥ ५२

---

[1] अयं क्रान्तिकः.

तस्माद्वैदिकता तन्त्रे तान्त्रिकं चापि वैदिकम् ।
तर्हि कापालमुख्यानि तान्त्रिकाण्यपि वैदिकात् ॥ ५३

नात्यरिच्यन्त तल्लोके विभागो न भवेदिति ।
यथा शूद्रादिधर्माश्च शुश्रूषादय ईरिताः ॥ ५४

वेदेषु तावता धर्मा वैदिका नहि केवलम् ।
अवैदिकाश्चापि धर्मा वेदैकविषया इति ॥ ५५

अवैदिकाश्च तन्त्रोक्ता वेदोक्ता एव केवलम् ।
अधिकार्यनुसारेण तदनुष्ठानमुच्यते ॥ ५६

ब्रह्मचर्यं च गार्हस्थ्यं वनप्रस्थानमेव च ।
तत्तद्धर्माधिकारित्वे कारणं नान्यदुच्यते ॥ ५७

वेदोक्ता ब्रह्मचारिभ्यो गृहस्थान् प्रत्यवैदिकाः ।
गृहस्थाश्रमधर्मा ये ह्यश्रौता ब्रह्मचारिणः ॥ ५८

तद्वत्कापालधर्माश्च वैदिका एव तान् प्रति ।
तदन्यधर्मनिष्ठानां कापालाद्यास्त्ववैदिकाः ॥ ५९

तेषां कापालिकानां च वेदोक्ता अप्यवैदिकाः ।
वैदिकत्वावैदिकत्वे ह्यधिकारिणि कल्पिते ॥ ६०

न कर्मनिष्ठं किं त्वेतत्कर्तृनिष्ठं तथैव हि ।
यो गृहस्थः स्वधर्मस्थः स्वाश्रमं संपरित्यजन् ॥ ६१

वनस्थतां यतित्वं च व्रजत्येव विरक्तितः ।
रक्तिश्चेत्स तु तत्रैव रमते स्वस्वकर्मसु ॥ ६२

कदन्नं यस्तु भुञ्जानो विषण्णस्तत्परित्यजन् ।
शाल्यन्नं काङ्क्षमाणः स्यात्कदन्ने यदि रक्तिमान् ॥ ६३

तत्रैव बद्ध्वा स्वमनस्तदेव मनुते वरम् ।
उत्तमाश्रमधर्माश्च श्रमसाध्या भवन्त्यतः ॥ ६४

पूर्वाश्रमविरक्तश्चेदुत्तमाश्रममर्हति ।
रक्तिर्हेतुस्तथा पुंसस्तत्तदाश्रमवर्णने ॥ ६५

[1]ततो मनःकल्पिता स्यात्तत्तत्कर्माधिकारिता ।
कृतकं कल्पितं तस्मान्नित्यं धर्ममुपाश्रयेत् ॥ ६६

---

[1] अतो.

ननु स्वेच्छैव हेतुश्चेद्ब्रह्मचारी यदीच्छति।
अग्न्याधेयादि तत्रापि तस्य स्यादधिकारिता ॥ ६७

इति चेच्छूयतां चूतफलं वृक्षोपरि स्थितम्।
अधस्थो यदि काङ्क्षेत [1]नरस्तत्कथमाप्नुयात् ॥ ६८

स एवोन्नतदेशस्थः स्वस्थानं संपरित्यजन्।
तदाप्नोति फलं तस्माद्ब्रह्मचर्यं परित्यजन् ॥ ६९

परिगृह्य ततो दारान् स्वधर्मानर्हति स्वयम्।
नाधोगतः पुनरपि तद्वस्छेदुत्तमाश्रमम् ॥ ७०

नन्वेवं यदि शूद्रोऽपि काङ्क्षेताश्रममुत्तमम्।
तस्याधिकारः स्यात्तत्र बुद्धिकल्पितता यदि ॥ ७१

अस्त्वेवं स्वोक्तसद्धर्मैः स्वोत्तमस्यानुवर्णनात्।
अधिकारिकुले जन्म ततोऽस्मिन्नधिकारिता ॥ ७२

सोपाधिकाधिकारित्वमुपाधिपरिवर्तनात्।
निरुपाध्यधिकारित्वमुपाधेरनपेक्षया ॥ ७३

दृष्टमेवं श्रुतौ गार्गी याज्ञवल्क्यमुनीश्वरः।
उपदिश्योत्तमं ज्ञानं तां मुक्तां समचीकरत् ॥ ७४

सोपाधिकाधिकारेषु तदुपाध्यनुवर्तनम्।
निरुपाध्यधिकारित्वं सर्वेषामपि विद्यते ॥ ७५

अतः कापालमुख्यानां वैदिकत्वं भवेदपि।
तत्तत्कर्तृविशेषेण वैदिकत्वं हि कर्मणाम् ॥ ७६

अतिप्रसङ्गस्त्वास्तां तदुच्यते तन्त्रसत्यता।
आगमानां प्रमाणत्वमनन्यापेक्षमेव हि ॥ ७७

यथा श्रुतीनां प्रामाण्यमनन्यापेक्षमेव हि।
एवं चेदगमाः कर्मसंहतिं सकलामपि ॥ ७८

अग्निष्टोमादिकां सम्यक् साङ्गं वै वर्णयन्ति नः।
तद्वर्णनं श्रुतिष्वेव तथा नान्यत्र दृश्यते ॥ ७९

---

[1] स नरस्तदवाप्नुयात्.

स्वोक्तयागशरीरस्य श्रुतिश्चेत्प्रतिपादिका।
नैवमागमसङ्घातैर्यागास्ते वर्णितास्ततः॥ ८०

स्वोक्तार्थपरिपूर्त्यर्थं काङ्क्षन्ते श्रुतिमागमाः।
न श्रुतिः काङ्क्षते स्वोक्तपूर्त्यर्थं तानिहागमान्॥ ८१

प्रामाण्यं तच्छ्रुतेरेव ह्यनन्यापेक्षमुच्यते।
आगमानां श्रुत्यपेक्षा ततः श्रुत्यनुसारतः॥ ८२

प्रामाण्यमविरोधांशे तद्विरोधेऽप्रमाणता।
न चानुवादभागानां पुरोवादानुवर्तनात्॥ ८३

अप्रामाण्यं, तद्वदेव ह्यन्यापेक्षप्रमाणता।
स्वतः प्रामाण्यविरह इत्येवमुपवर्ण्यते॥ ८४

अग्निष्टोमादयो धर्मा यथा नागमचोदिताः।
कर्षणादिप्रतिष्ठान्ता धर्माः पूर्तादिकर्म च॥ ८५

इष्टापूर्तेत्यादिवेदैरुक्ता ह्यागमचोदिताः।
न पूर्तादिशरीरस्य विधिः श्रुतिषु दृश्यते॥ ८६

अतः श्रुतेरागमानुसारेण स्यात्प्रामणता।
इति चेन्न तथा वाच्यं सूत्रे बोधायनादिके॥ ८७

वैदिकेनैव मार्गेण पूर्तादिविधिदर्शनात्।
तादृशानां तु सूत्राणां मूलं तु किमिह श्रुतिः॥ ८८

प्रत्यक्षे चोपलभ्येत किं वात्राचारदर्शनात्।
[1]आहदुक्तेस्तदत्रापि श्रुतिः स्यादानुमानिकी॥ ८९

आगमोक्तस्य यागस्य वर्णनाय किलागमाः।
आनुमानिकरूपेण वर्तन्ते तुल्यमावयोः॥ ९०

तस्मात्स्वतः स्यात्प्रामाण्यमागमानां न संशयः।
प्रामाण्यं नाम किंवात्र प्रमातुः स फलोदयः॥ ९१

आगमार्थावबोधेन तदुक्तार्थानुवर्तने।
फलोदयः स्वतः पुंसां प्रत्यक्षेणैव दृश्यते॥ ९२

---

[1] आगमोक्तेरिति स्यात्.

कर्षणादि प्रतिष्ठान्तविधिनानुप्रतिष्ठिते।
लिङ्गे बेरे बहुविधे कलाभिव्यक्तिदर्शनात्॥ ९३

तद्वदिष्टार्थलाभाच्च, तत्र वैकल्यसंभवे।
बहुश्रुतेश्च दृष्टत्वादामुष्मिकफले तथा॥ ९४

दृढविश्वाससिद्धेश्च तथा वैदिकर्मणि।
क्वचित्फलोदयेऽन्यत्र फलानुदयदर्शने॥ ९५

कर्मवैकल्यमेवेति यथा वा कल्प्यते त्वया।
आमुष्मिके कर्मणि च चिरप्राप्येऽपि तत्फले॥ ९६

प्रमाणबुद्धिस्तन्त्रोक्ते शीघ्रमेवोदिता भवेत्।
तन्त्रे वेदे प्रमाणत्वं न विलक्षणमुच्यते॥ ९७

वैलक्षण्याभावसिद्धेः स्वतः प्रामाण्यमुच्यते।
यदि वेदप्रमाणं स्यादागमार्थानुवर्तनम्॥ ९८

यथा मरुजलभ्रान्तिर्विसंवादितयाऽप्रमा।
तन्त्रज्ञानं ममोत्पन्नमप्रमाणमीतीर्येत्॥ ९९

न तथा दृश्यते तस्मात्प्रामाण्यानुभवादपि।
स्वतः [1] प्रामाण्यमित्येवं सम्यगेवोपपादितम्॥ १००

इति मूर्खं मनीषा ते तन्त्राप्रामाण्यसाधने।
वक्ष्याद्यनेकवेदोक्तकर्मणामफलोदयात्॥ १०१

अप्रमाणं भवेन्नैव परेण भ्रान्तमित्यतः।
स्वेनापि भ्रमितव्यं स्यादतस्ते वेदराशयः॥ १०२

आगमाश्चैव सिद्धान्ताः स्वतः प्रामाणिकाः स्फुटम्॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठ-शिवाचार्यकृते निगमागमसारसंग्रहे क्रियासारे आगमस्वतःप्रामाण्य-निरूपणं नामैकोनत्रिंशोपदेशः समाप्तः

[1] प्रमाणमित्येवं.

त्रिंशोपदेशः

त्रिंशोपदेशे सङ्गृह्य शिवपुण्यानि वर्णये ।
पुराणेष्वितिहासेषु स्फुटानि मुनिसत्तमैः ॥

सूतः—(शं. सं. उप. ३९)

एवं व्रतानि सर्वाणि कथितानि मया द्विजाः ।
इदानीं शिवपुण्यानि शृणुध्वमवधानतः ॥

शिवस्य देवदेवस्य लिङ्गरूपस्य भूसुराः ।
[1]तथैव शिववेराणामुमायाष्षण्मुखस्य च ॥

विघ्नेशस्य गणादीनां भक्तानामपि भूसुराः ।
सालोक्यादिपदप्राप्तौ भक्तानां शङ्करेच्छया ॥

प्राकाराट्टालवलभिप्रासादादीन्यनेकशः ।
आलयानि मनोज्ञानि विदध्याल्लोभवर्जितः ॥

एताश्च निर्ममेद्भक्त्या ताम्रस्वर्णशिलादिभिः ।
प्रतिष्ठां च विधानेन कारयेत्सति संभवे ॥

अभिषेकमलङ्कारं [2]स्रग्भिः कुर्याद्विधानतः ।
वस्त्राणि गन्धान्नैवेद्यमेतेषां परिकल्पयेत् ॥

[3](दीपान् प्रकल्पयेत्स्थूलानुपचारांश्च कारयेत् ।
गाश्च सम्पादयेद्भक्त्या कन्या अपि च कल्पयेत् ॥

क्षेत्राणि दद्याद्वित्तानुसारादारामकानि च ।
वापीकूपतटाकांश्च वृक्षान्देवाय कल्पयेत् ॥)

वाहनानि रथादीनि कल्पयेत्परमेशितुः ।
उत्सवान् [4]कारयेद्विद्वान् महावैभवविस्तरम् ॥

आलयादीनि जीर्णानि पुनरेव समुद्धरेत् ।
प्रदक्षिणनमस्कारान् कुर्यान्नित्यमतन्द्रितः ॥

---

[1] तथाच. [2] सद्भिः, षड्भिः. [3] पुराणपाठः. [4] कारयेद्रम्यान्.

एवमादीनि पुण्यानि शिवस्य परमात्मनः ।
कुर्यान्नित्यं प्रयत्नेन श्रेयसे भूसुरोत्तमाः ॥

शिवार्चकाय गुरवे दद्यान्निर्माय मन्दिरम् ।
गृहोपकरणं धान्यं धनं दद्याद्यथाबलम् ॥

स्वगुरुं प्रणमेद्दृष्ट्वा कुर्याच्चैव प्रदक्षिणम् ।
एवं स्वगुरुकार्याणि नित्यं कुर्यादतन्द्रितः ॥

गृहाणि शिवभक्तेभ्यो दद्यान्निर्माय भक्तिमान् ।
गृहोपकरणादीनि वस्त्राण्यपि च भूसुराः ॥

तथा शिवपुराणानि भस्मरुद्राक्षकान्यपि ।
शिवलिङ्गानि पुण्यानि तथैवाभरणान्यपि ॥

अन्नं च भक्तिमान् दद्याद्भक्तेभ्यो भूसुरोत्तमाः ।
पुरतो वीक्ष्य भक्तांश्च दृष्ट्वोत्तिष्ठेत भक्तिमान् ॥

नमस्कुर्याच्च मतिमान् संभाष्य बहुमानतः ।
एवमादीनि कार्याणि शिवभक्तस्य निर्वहेत् ॥

विदध्याच्च शिवाचार्यभक्तानां भक्तिमुज्ज्वलाम् ।
एतेषामपि कार्यस्य न विघ्नं मनसा स्मरेत् ॥

वाचा च मनसा चैव शरीरेण धनेन च ।
कुर्यात्सहायमनिशं भक्तेभ्यः परया मुदा ॥

शिवाय गुरवे चैव [1] शिवपुण्यरताय च ।
एतानि शिवपुण्यानि स्मृतानि मुनिसत्तमैः ॥

एतानि शिवपुण्यानि ये कुर्वन्ति नरोत्तमाः ।
ते भुक्त्वा विपुलान् भोगान्पुण्यात्मानो महीतले ॥

पुत्रपौत्रसमृद्धास्ते भुक्त्वा भोगानखण्डितान् ।
काञ्चनेन विमानेन शिवलोकमवाप्य ते ॥

कल्पकोटिसहस्राणि मोदन्ते शिवसम्मताः ।
अन्ते च शिवसायुज्यं प्राप्नुवन्ति न संशयः ॥

---

[1] शिवभक्तिरताय.

(इत्थं निशम्य वचनं सूतस्य मुनिसत्तमाः।
अपृच्छन् संशयाविष्टा भक्तानां लक्षणं मुदा ॥)

[1] [शिवस्य लक्षणं पूर्वं गुरोरपि च लक्षणम्।
इति तेषां वचः श्रुत्वा सूतः पौराणिकोत्तमः ॥

प्रोवाच लक्षणं भूयो भक्तानां परमेशितुः।
शिवभक्ता महात्मानः सन्ति देवेषु केचन ॥

दैत्येषु यातुधानेषु यक्षगन्धर्वभोगिषु।
मुनीश्वरेषु मर्त्येषु ब्राह्मणेषु नृपेष्वपि ॥

ऊरुजेष्वपि शूद्रेषु सङ्करेष्वपि सर्वशः।
वर्णाश्रमव्यवस्थाश्च नैषां सन्ति मुनीश्वराः ॥

केवलं शिवभक्तास्ते सर्वे माहेश्वराः स्मृताः।
अतिवर्णाश्रमाः प्रोक्ताः सर्ववेदेषु संमताः ॥

तेषां बाह्यानि चिह्नानि दश सन्ति मुनीश्वराः।
त्रीण्यान्तराणि चोक्तानि दश सन्ति महात्मनः ॥

प्रथमं भस्मरुद्राक्षधारणं समुदाहृतम्।
द्वितीयं गुरुसेवा च शिवस्तोत्रं तृतीयकम् ॥

नामोच्चारणमीशस्य चतुर्थं परिपठ्यते।
पञ्चमं देवदेवस्य पूजनं ब्राह्मणोत्तमाः ॥

शिवालयस्य पुण्यस्य दर्शनं षष्ठमीरितम्।
तथा शिवपुराणानां श्रवणं सप्तमं द्विजाः ॥

नमस्कारं तु भक्तानामष्टमं कथितं खलु।
नवमं शिवभक्तानां गृहे भोजनमीरितम् ॥

दानं च दशमं ज्ञेयं शिवभक्ते गुरावपि।
एवं बाह्यानि चिह्नानि कथितानि दश द्विजाः ॥

आन्तराण्यपि चिह्नानि मानसः प्रथमो जपः।
पूजा च मानसी ज्ञेया द्वितीया परमेशितुः ॥

---

[1] इत आरभ्य अध्यायपरिसमाप्ति मातृकयोर्मुद्रितपुस्तके च स्खलितो ग्रन्थभागः पुराणपाठमनुसृत्यात्र निवेशितः.

साक्षात्कारस्तृतीयस्तु ब्रह्मणो ब्राह्मणोत्तमाः ।
इमानि त्रीणि चोक्तानि पुराविद्भिर्मुनीश्वरैः ॥

आन्तराण्यपि बाह्यानि येषां सन्ति यदा द्विजाः ।
तदा भाक्तानि चिह्नानि संभवन्ति महात्मनाम् ॥

कण्ठे विकारः प्रथमो गद्गदाख्यः शरीरजः ।
जिह्वास्पन्दो द्वितीयस्तु स्फुरणं चोष्ठयोरपि ॥

कम्पनं च शरीरस्य चतुर्थं भक्तिलक्षणम् ।
रोमाञ्चः पञ्चमो ज्ञेयः षष्ठः स्वेदोऽपि कीर्तितः ॥

स्खलनं सप्तमं ज्ञेयमष्टमं बाष्पनिर्गमः ।
रोदनं नवमं चिह्नं दशमं पारवश्यकम् ॥

एतानि दशचिह्नानि भाक्तान्युक्तानि शूलिना ।
त्रिविधान्यपि चिह्नानि येषां सन्ति महात्मनाम् ॥

ते भक्ताः शाङ्करा ज्ञेयाः सर्वलोकैकपावनाः ।
अथवा शिवभक्ता ये भस्मरुद्राक्षधारिणः ॥

तेषु पूर्वोक्तचिह्नानि न ज्ञायन्ते यदा तदा ।
तान् दृष्ट्वा प्रणमेद्भक्त्या शिवभक्ताञ्छिवप्रियः ॥

ये वै शिवं गुरुं भक्तान् प्रणमन्ति स्तुवन्त्यपि ।
काङ्क्षितान्यपि सर्वाणि लब्ध्वा ते परया मुदा ॥

भुक्त्वा भोगान् सुविपुलान् पुत्रैः पौत्रैः समन्विताः ।
अरोगा दृढगात्राश्च स्थित्वात्र बहुकालतः ॥

अन्ते विमानमारुह्य नानारत्नविचित्रितम् ।
सौरलोकस्थितैर्देवैश्चन्द्रलोकस्थितैरपि ॥

तथान्यैर्देवलोकस्थैर्दिक्पालैर्जगदीश्वरैः ।
ब्रह्मणा विष्णुना चापि तथैव ऋषिसत्तमैः ॥

एतैरन्यैश्च सकलैरग्रतो यायिभिर्मुदा ।
देवदुन्दुभिनिर्घोषैः पुष्पवर्षैरितस्ततः ॥

नृत्यद्भिरप्सरोवृन्दैर्गायद्भिः किन्नरैर्वृतः ।
दिव्यं शरीरं संप्राप्य शिवलोकं शिवप्रियम् ॥

गत्वात्र सन्निधौ शम्भोः स्थित्वा प्राप्य सरूपताम् ।
अन्ते च शिवसायुज्यं लभन्ते ब्राह्मणोत्तमाः ॥

तस्मान्न शिवपुण्यानां माहात्म्यं वर्णितुं मया ।
शक्यं यथा वै माहात्म्यं शङ्करस्य महात्मनः ॥

एवमेव पुरा देवी शिवपुण्यमनुत्तमम् ।
श्रुत्वा महेश्वराद्भक्त्या प्रीत्या परमया युता ॥

अत्याश्चर्येण संयुक्ता सहसोत्थाय चासनात् ।
प्रदक्षिणत्रयं कृत्वा प्रणम्य च महेश्वरम् ॥

अब्रवीत्सुस्मिता वाक्यं प्रसन्नं वीक्ष्य शङ्करम् ।
अनेन शिवपुण्येन प्राणिनः परमेश्वर ॥

विदित्वा त्वां गतिं यान्तु तव सायुज्यरूपिणीम् ।
इत्युक्तः शिवया देवः करुणारूपया पुरा ॥

ज्ञातुं न सुलभं लोकैर्मम पुण्यमनुत्तमम् ।
पशुपुण्यानि सर्वाणि कृत्वा शुद्धान्तरात्मभिः ॥

पक्वैर्हि शिवपुण्यानि ज्ञातुं शक्यानि लेशतः ।
अन्येषां केवलानां तु शिवपुण्यं कुतो भवेत् ॥

तस्मात्सर्वप्रयत्नेन पशुपुण्यमनेकशः ।
चरित्वा शिवपुण्येषु मनो भवति नान्यथा ॥

इत्युक्तं देवदेवेन देव्यै पूर्वं द्विजोत्तमाः ।
अथात्र वक्ष्ये युष्माकं कथां पुण्यां मनोरमाम् ॥]

(शं. सं. उप. ४०)—

पुनश्च शिवपुण्यस्य माहात्म्यं वर्णयामि वः ।
शृणुध्वमवधानेन ब्राह्मणानामधीश्वराः ।

अस्ति कश्चिन्महीपालः कोसलानामधीश्वरः ।
अजाह्वयश्चतस्रोऽस्य समजायन्त कन्यकाः ॥

रूपलावण्यसंपन्नाः सुकुमाराङ्ग्यष्टयः ।
कल्याणमण्टपं चक्रे तासां स मतिमान् प्रभुः ॥

आनयामास तनयान्राज्ञामतिमनोहरान् ।
तस्थुस्ते राजतनयाः समागत्यात्र मण्डपे ॥
ततः प्रतस्थिरे ताश्च कन्यास्तान्राजपुत्रकान् ।
[1] समुद्दिष्टेषु यः स्वेष्टस्तस्य जह्रुः करानिमाः ॥
प्रथमा निषधाधीशं महेन्द्रं पतिमाप हि ।
सानन्दं काम्बुदेशेशं द्वितीया चालभत्पतिम् ॥
काम्भोजाधीशमपरा सुमालिं प्राप नायकम् ।
कोङ्कणेशं चतुर्था च विशालाक्षं महामतिम् ॥
एवमाप्तः पतीनेता मालाः स्कन्धे निधाय च ।
कल्याणं कारयामास नानाविभवविस्तरम् ॥
राजासौ परया प्रीत्या बन्धुसन्मानतत्परः ।
तेषां वराणां भूरीणि ददौ द्रव्याणि पार्थिवः ॥
भूषणानि च वस्त्राणि [2]कटकानि तथैव च ।
पुत्रीणामपि दत्त्वैवं बहुमानेन पार्थिवः ॥
चतुरङ्गबलं तेषां परिकल्प्य स बुद्धिमान् ।
कन्यकाभिश्च संयोज्य [3] स्वदेशाभिगमाय तान् ॥
प्रेषयामास पुण्यात्मा प्रीत्या परमया सह ।
ततः प्रतस्थिरे राजकुमारास्ते सुसंयुताः ॥
बहिः पुराद्विनिर्गत्य स्वदेशगमनाय ते ।
संभूय तस्थिरेऽन्योन्यं वार्तां कृत्वा महीसुराः ॥
तदानीमागतस्तत्र विश्वामित्रो [4]महामुनिः ।
[5](आजुहाव महीपालसुतानेतान् स्वनामतः ॥
ते तु वाद्यारवैर्वार्ताव्यासङ्गेनान्यमानसनाः ।
अश्रुत्वा वचनं तस्थुस्तापसेशस्य भूसुराः ॥
ततः कोपेन महता विश्वामित्रो महानृषिः ।)
[6] मुक्त्वा राजकुमारांस्तांश्चतस्रो राजकन्यकाः ॥

---

[1] समुद्दीक्ष्येषु–पा. [2] विचित्राणि. [3] स्वदेशगमनाय च. [4] महानृषि
[5] पुराणपाठः. [6] विश्वामित्रः कुमारान्.

[1] शशाप तान् भटान् सर्वान् द्रव्याण्यपि वराण्यपि ।
(भवन्तु भस्मसात्सद्य इति राज्ञां तपोनिधिः ॥)
ततः क्षणेन सर्वाणि भस्मभावमवापिरे ।
कुमारास्ताश्च तत्पत्न्यः सर्वाश्च भयकम्पिताः ॥
ततस्तांस्तपतां श्रेष्ठः समीक्ष्याह वचस्तदा ।
नालोकयत मां यूयं न कृतं कर्णयोर्वचः ॥
तत् [2]संचरत घोरेऽस्मिन्नन्धभावं वने गताः ।
बाधिर्यं [3] भवतामद्य भवतात्पापिनामिह ॥
ग्रामे पुरे वा [4] युष्माकं न निवासो भवत्वलम् ।
भार्याभिः सह संभोगो नैवास्तु नृपपुत्रकाः ॥
[5] निपतिष्यन्ति मूर्धानो भविष्यति यदा तदा ।
शपित्वैवं मुनिरगात्स्वाश्रमाय मुनीश्वराः ॥
तथैव तच्छापवशात्ते सर्वे राजपुत्रकाः ।
चेरुरन्धाश्च बधिरा वने तस्मिन् सुदुःखिताः ॥
स्त्रीभिः प्रदर्शिता मार्गं कन्दमूलफलाशिनः ।
एवमेतेषु भूपेषु विचरत्सु [6]वनेष्वथ ॥
अगस्त्यस्तपतां वर्यस्तदानीमाययाविह ।
तं दृष्ट्वा तपतां श्रेष्ठं ताः स्त्रियो भर्तृभिः सह ॥
प्रणम्य भृशदुःखार्ताः स्ववृत्तान्तं व्यजिज्ञपन् ।
इतः परं कदास्माकं शापान्मोक्षो भविष्यति ॥
केनोपायेन तथ्यं त्वं वद कारुण्यवारिधे ।
शरणं त्वां प्रपन्नाः स्मो रक्षास्मांस्तापसेश्वर ॥
इत्थं निशम्य वचनं तासां तेषां घटोद्भवः ।
कृपया केवलं प्राह तमुपायमृषीश्वरः ॥
शिवपुण्यं यदि कृतं भवद्भिः सर्वपापहम् ।
शापमोक्षो भवेन्नूनमैश्वर्यं च भविष्यति ॥

---

[1] शशापान्यान्. [2] संविशथ. [3] भवतां कामं. [4] युष्माकं निवापो मा भवत्परम्. [5] व्यपतिष्यन्ति. [6] वनेऽत्र च.

राज्यं च स्ववशे याति नात्र सन्देहकारणम् ।
अन्ते च शिवसायुज्यं भविष्यति [1]शिवेच्छया ॥

शिवपुण्यं विना नैव सङ्गतिर्देहिनामिह ।
तत्रेतिहासं युष्माकं श्रृण्वतां कथयाम्यहम् ॥

कीचकाख्यपुरे पूर्वं साधारणमहीपतिः ।
भार्ययान्तःपुरे रम्ये तस्थे क्रीडारतोऽनिशम् ॥

तदा वसिष्ठस्तपतां [2]वरस्तस्य गृहाङ्गणे ।
समागत्यावसत्तत्र घटिकाः काश्चिदात्मवान् ॥

विनिर्गत्य ततो राजा भार्यया सह तापसम् ।
प्रणम्य प्रश्रयानम्रस्तस्थे बद्धाञ्जलिः पुरः ॥

तदा कोपेन तं वीक्ष्य राजानं प्राह तापसः ।
मयागत्यात्र घटिका नीता द्वित्रिचतस्रकाः ॥

इयन्तं [3]कालमन्वीक्ष्य गृहद्वारि स्थितोऽस्म्यहम् ।
न निर्गतोऽसि यस्मात्त्वं दर्पान्मूढ महीपते ॥

[4]तद्वनेचरता तेऽद्य भूयाद्भार्यासखस्य च ।
वसन्ति येऽत्र नगरे जनास्ते मृगपक्षिणः ॥

भवन्तु पत्तनं चैतद्वनं भूयाद्भयङ्करम् ।
शपित्वैवं मुनिवरः स्वाश्रमायाशु निर्ययौ ॥

तथैव सर्वं सञ्जातं वासिष्ठस्य तपोबलात् ।
चचार व्याधरूपेण वनेऽस्मिन् भार्यया नृपः ॥

तदानीमागतस्तत्र तृणबिन्दुर्महानृषिः ।
वृत्तान्तं सर्वमावेद्य पप्रच्छ स्वागतं नृपः ॥

सोऽयं कृपावशादेतौ समुद्वीक्ष्य ऋषीश्वरः ।
शिवपुण्यं विचार्याशु सर्वदुःखविमोचकम् ॥

वनेऽस्मिन् विद्यते किं वा शिवस्थानं शिवप्रियम् ।
इति पप्रच्छ तं व्याधं तापसानामधीश्वराः ॥

---

[1] यथेच्छया. [2] वरिष्ठोऽस्य. [3] कालमन्विष्य. [4] तद्वनेचरतामेत्य भार्यया सह संचर

सोऽब्रवीदविदूरेण ब्रह्मेश्वरमनुत्तमम् ।
तच्छ्रुत्वा तपतां श्रेष्ठः पुनराह समीक्ष्य तौ ॥

युवामत्र शिवस्थाने तृणं पर्ण लतामपि ।
दूरीकृत्य सदा शंभोः कुरुतं च प्रदक्षिणम् ॥

प्रणम्य साम्बमीशानं वसतं च शिवालये ।
स एव भगवानीशो युवां [1]रक्षतु मा चिरम् ॥

इत्युक्त्वा स्वाश्रमायायं जगाम ऋषिसत्तमः ।
तस्य तद्वचनं श्रुत्वा तथैवैनौ च चेरतुः ॥

व्यतीयुरेतयोस्तत्र दिनान्येकादशाञ्जसा ।
ततो वनमिदं भूयो नगरं समजायत ॥

[2]नराश्च मृगपक्षित्वं मुक्त्वा स्वं स्वमगुर्वपुः ।
भार्यया सह राजत्वं प्राप्तवान् सोऽपि भूपतिः ॥

राज्यं चक्रे च परया प्रीत्या पूर्ववदात्मवान् ।
शिवपुण्यप्रभावेन पूर्वरूपमिहागतम् ॥

एवं विचार्य चक्रेऽयं शिवपुण्यं सुविस्तरम् ।
देहान्ते सद्गतिं प्राप भार्यया सह भूमिपः ॥

तस्माद्यूयं च पुण्यानि शङ्करस्य परात्मनः ।
कृत्वा राज्यं धनं रूपं भजतात्र शिवाज्ञया ॥

इति ब्रुवन्तं तं भूयः प्रणम्यैते सभार्यकाः ।
[3] कथंकार्यं परं पुण्यं वदास्माकमृषीश्वर ॥

इत्युक्त्वा प्रणतिं चक्रुर्दण्डवत्तस्य पादयोः ।
तदानीमाययावत्र शिवविप्रः शिवप्रियः ॥

शंभुमत्रामृतेशानमयमाराधयत्यलम् ।
तं दृष्ट्वा तपतां श्रेष्ठः कुम्भभूराह सद्गुरुम् ॥

त्वं हि लोकगुरुः पुष्पगिरिसन्तानजो महान् ।
शिष्यानङ्गीकुरु क्षिप्रमेतानपि सुदुःखितान् ॥

---

[1] रक्षत्वितीरितम्. [2] जनाश्च मृगपक्षित्वं मुक्त्वा तत्स्वमवापिरे. [3] कथं कारं.

भवताराधितं शंभुममृतेशमघौघहम् ।
सेवयित्वास्य सविधे परिचर्यां च कल्पय ॥
यथा भवेयुरेते वै सुखिनो दुःखसागरात् ।
तथा त्वं कृपया विद्वन् कुरु लोकगुरुर्यतः ॥
इत्युक्त्वा योजयित्वैनं [1]कैलासं स ययौ स्वयम् ।
[2]गते तस्मिन् मुनिश्रेष्ठे प्रणम्यैतौ शिवद्विजम् ॥
[3]रक्षावां कृपया विद्वन् प्रार्थया [4]मासतुस्तदा ।
निशम्य [5]वाक्यमनयोः सोऽयं दुःखातुरो भृशम् ॥
मास्तु दुःखं [6]महाभागौ युवयोस्तिष्ठतीश्वरे ।
भक्तरक्षापरे नित्यं भक्तिगम्ये सनातने ॥
मुद्गलाख्यः पुरा विप्रः काश्यपस्य महात्मनः ।
शिष्योऽयं तस्य निकटे पठित्वा शास्त्रमास्थितः ॥
पठत्येकदिने [7]तस्मिंस्तस्योपर्यपतज्जलम् ।
तदा शशाप तं कोपात्काश्यपस्तपतां वरः ॥
यस्मादुपरि मे भ्रान्त पपातास्य जलं तव ।
तेन त्वमाशु महिषो भूयात् गर्वेण संयुतः ॥
तस्य तच्छापमात्रेण बभूव महिषाकृतिः ।
चचार नगराद्बाह्ये भक्षयंस्तृणसन्ततिम् ॥
तत्र शक्तीश्वरेशस्य प्राकारनिकटं गतः ।
परितस्तृणजालानि चचार त्रिः प्रकारतः ॥
तृणं प्राकारभित्तौ यत्तत्सर्वं च चचार सः ।
ध्वजस्तम्भं समागत्य [8]सान्निध्यं चापतद्यदा ॥
तदैव शापान्निर्मुक्तः स्वरूपं प्राप सुन्दरम् ।
देवं प्रदक्षिणीकृत्य नमश्चक्रे पुनः पुनः ॥
तत्सर्वं मनुजास्तत्र समीक्ष्याश्चर्यमापिरे ।
शिवपुण्यस्य माहात्म्यं वर्णयन्ति स्म सन्ततम् ॥

---

[1] कैलासाय ययौ. [2] गतेऽस्मिंस्तापसश्रेष्ठे. [3] रक्ष नः. [4] मासुरास्तिकाः. [5] वाक्यमेतेषां. [6] महाभागा युष्माकं तिष्ठ. [7] कस्मिन्. [8] सन्निधिं चावलोकयत्.

यदज्ञानेन महिषः संचरंस्तृणसन्ततिम् ।
[1]दारुणं माहिषं रूपं मुक्त्वा स्वं रूपमास्थितः ॥
तस्मात्पुण्यस्य माहात्म्यं को वेत्ति परमेशितुः ।
इत्युक्त्वान्योन्यमनिशं तस्थिरे मनुजोत्तमाः ॥
तस्माद्यूयं च पुण्यानि चरतात्र महेशितुः ।
कानि पुण्यानि भगवन्नुष्ठेयानि शूलिनः ॥
तद्वदात्र दयासिन्धो पापिनां नो मुनीश्वर ।
इति तेषां वचः श्रुत्वा प्राह[2] तांस्तापसोत्तमः ॥
चत्वारः पुरुषा यूयममृतेशं परात्परम् ।
सदा प्रदक्षिणीकृत्य प्रीणयध्वमतन्द्रिताः ॥
[3]एकात्र शंभुसविधं संमार्जय विलेपय ।
अभिषेकजलं [4]चान्या शंभोश्चानयतु प्रभोः ॥
[5]इतरा वनपुष्पाणि समानयतु शूलिनः ।
कन्दमूलफला [6]न्यन्या नैवेद्यायानयत्विह ॥
इत्युक्त्वा प्रेरयित्वैता[7] नानीयाथ द्विजोत्तमाः ।
तस्मिन् दिने महादेवं पूजयामास भक्तितः ॥
परेद्युः साधनं तेषां समानीय ददौ स्वयम् ।
पूजयामास स शिवं नित्यं तैस्तैः शिवद्विजः ॥
भक्तयैते [8]जग्धिरे देवनैवेद्यं कन्दमूलकम् ।
दिनान्येव गतान्येषामेकविंशति सङ्ख्यया ॥
ततो द्वाविंशतिदिने नेत्राण्येषां बभूविरे ।
श्रोत्राणि समजायन्त पूर्ववच्छङ्कराज्ञया ॥
आश्चर्येण च संयुक्ताः प्रणम्यैते महेश्वरम् ।
पुनः प्रदक्षिणं चक्रुर्दिवसानष्ट भक्तितः ॥
ततो [9]वृत्तानि सर्वाणि चतुरङ्गबलान्यपि ।
संबभूवुः परार्थाश्च यथापूर्वं शिवाज्ञया ॥

---

[1] ईदृशं रूपमापायमहो दिव्यालये शुभे. [2] तांस्तापसेश्वरः. [3] एकोऽत्र. [4] चान्यः. [5] इतरो. [6] न्यन्यो. [7] नानीयैतान्. [8] तस्थिरे देवनैवेद्यं फलमूलकम्. [9] भूतानि.

स्त्रियश्चतस्रः पुरुषाः पूर्ववद्यौवनं ययुः ।
तदा शिवद्विजं सर्वे प्रणेमुर्भक्तिसंयुताः ॥

कृपया तव विप्रेन्द्र मोक्षं प्राप्ताः स्म शापतः ।
श्रुत्वैतमुपचारं स प्रोक्तवान्वीक्ष्य तानयम् ॥

शिवपुण्यं कृतं यस्माद्युष्माभिर्वीतकिल्बिषैः ।
तत्प्रभावादियं चक्षुश्श्रोत्रावाप्तिर्न संशयः ॥

[1] युष्मदीयाश्च याः सेनास्तत एवागता ध्रुवम् ।
ततो महर्षिशापाच्च मोक्षो नात्र विचारणा ॥

[2] इतोऽपि यूयं स्वं राज्यं कुरुत त्यक्तशङ्कया ।
शिवपुण्यं सदा कृत्वा तिष्ठतात्राप्रमादतः ॥

इति तस्य वचः श्रुत्वा गुरोरेते नृपात्मजाः ।
प्रणम्य तं गुरुं पश्चादमृतेशं परात्परम् ॥

प्रीणयामासुरेते तमभिषेकविधानतः ।
चक्रुरस्य च नैवेद्यं भक्ष्यभोज्यादिभिर्भृशम् ॥

[3] हत्वा वनं च परितो महादेवालयस्य तत् ।
गुरुनाम्ना पुरं चैकं [4] लोकधर्ममिति श्रुतम् ॥

निर्माय मतिमन्तस्ते मण्टपं गोपुरं तथा ।
रथमुत्सवमन्यच्च कारयामासुरञ्जसा ॥

ततः स्वगुरवे दत्वा धनं भूरि नृपात्मजाः ।
राज्यं तदाज्ञया स्वीयं प्राप्यैते परया मुदा ॥

निष्कण्टकं महासत्वाश्चक्रुः शंभोः कृपाबलात् ।
भूरीणि शिवपुण्यानि [5]शक्तास्तत्र स्वराज्यके ॥

पुत्रानुत्पाद्य कालेन विनीताञ्छास्त्रकोविदान् ।
महता च प्रभावेन स्त्रीभिः साकं च तस्थिरे ॥

कदाचिद्धाजतनयास्तस्थिरे कुत्रचिद्गृहः ।
तदानीमागतस्तत्र दूर्वासास्तपतां वरः ॥

---

[1] युष्मदीयाः पदार्थाश्च तत एवागता ध्रुवम्. [2] इतो यूयं स्वकं राज्यं. [3] भित्वा, [4] लोकधर्मीति विश्रुतम्. [5] चक्रुस्तत्र.

तमागतमृषिं दृष्ट्वा प्रणेमुर्भक्तिसंयुताः ।
केन पापेन भगवन्नस्माकं तपतां वर ॥
अन्धत्वं बधिरत्वं च संप्राप्तं तद्वदात्र नः ।
सर्वज्ञस्त्वं यतस्तस्माद्वक्तुमर्हसि तापस ॥
इति तेषां वचः श्रुत्वा क्षणं ध्यात्वा ऋषीश्वरः ।
प्राह तान्विनयान्नम्रान्वीक्ष्य शङ्करभक्तिमान् ॥
पुरं यवनदेशेऽस्ति महदादित्यसंज्ञकम् ।
विश्वावस्वाह्वयः कश्चिद्वणिग्भूरिधनो महान् ॥
चत्वारस्तनयास्तस्य भवन्तः संबभूविरे ।
स्वव्यापारपरा नित्यमासन् विध्युक्तमार्गतः ॥
तस्मिन् पुरे शिवस्थानमादित्येश्वरसंज्ञकम् ।
अस्ति तत्र पुमान् कश्चिच्छिवालयविनिर्मकः ॥
स तु युष्मान् समभ्येत्य पप्रच्छ द्रव्यमाप्तवान् ।
शङ्करालयनिर्माणं कर्तुमभ्युद्यतः स्वयम् ॥
दास्याम इति तत्तस्मायुक्तवन्तस्तदा मुदा ।
श्वः श्वः श्व इति तं भक्तं [1]विनिवर्तयतानिशम् ॥
[2] नापश्यतैव तं भक्तं यूयं व्यापारगर्विताः ।
(आहूता अपि तद्वाक्यं न वै शृणुत गर्वतः)
युष्मान्विमुक्ता स्वस्थोऽयं तस्थे शङ्करमन्दिरे ॥
ततो नावं समारुह्य गत्वा द्वीपान्तरं प्रति ।
यूयं तत्र मृतिं प्राप्ताः कालपाशेन बन्धिताः ॥
यस्माद्दास्याम इत्युक्तं शिवपुण्याय वै धनम् ।
तावता जगदीशत्वं युष्माकं राजसूनवः ॥
न दत्तं तद्धनं तस्मै न दृष्टो न श्रुतं वचः ।
तेन युष्मद्धनं सर्वं गतमान्ध्यं च संगतम् ॥
बाधिर्यं चागतं शंभोः प्रीणनेन पुनर्नृपाः ।
संबभूवुश्च नेत्राणि श्रोत्राण्यपि यथापुरा ॥

---

[1] सन्नथव. [2] न पश्यतागतं भक्तं युष्मद्व्यापारमार्गतः

राज्यं च संगतं युष्मद्वंशे पूर्ववदेव हि ।
इति तस्य वचः श्रुत्वा तापसस्य नृपात्मजाः ॥

तथेति ते [1]विनिर्गत्य दूर्वाससमृषीश्वरम् ।
प्रणम्य भक्त्या परया प्रेषयित्वाऽऽश्रमाय तम् ॥

पालयन्तो निजं देशं नीतिमार्गेण ते नृपाः ।
शिवपुण्यानि भूरीणि तत्र तत्र विधाय च ॥

चिरकाल्ममी भोगान् भुक्त्वा निष्कण्टकं मुदा ।
अन्ते विमानमारुह्य दिव्यं कैलासमापिरे ॥

(शं—सं—उप—४१)

शंभुदेशे पुरं किंचिन्मायाख्यमतिसुन्दरम् ।
सद्बुद्धिरिति विख्यातस्तत्रास्ति पृथिवीपतिः ॥

तस्यासंस्तनायाश्चाष्टौ भीमाद्याः प्रथितौजसः ।
समजायत कन्यैका सर्वलक्षणसंयुता ॥

विभज्य नवधा देशं पुत्रेभ्यो दुहितुर्ददौ ।
स्वयं प्राप्य वनं तत्र तपस्तप्त्वा सुदुश्चरम् ॥

मोक्षमाप महादेवप्रसादान्मुनिपुङ्गवाः ।
कुमारास्ते च कन्या च राज्यं चक्रुरिन्दमाः ॥

सा कुमारी विशेषेण सर्वधर्मरता सदा ।
तां द्रष्टुं धर्मनिरतां [2]मुनयस्सप्त सुव्रताः ॥

आजग्मुरञ्जसा वेश्म तस्याः परमशोभनम् ।
तत्र दृष्ट्वा कुमारीं तां सदा धर्मरतां पराम् ॥

संतोष्य वाग्भिरर्थ्याभिरपृच्छन् कुशलं द्विजाः ।
कुशलं तव भक्तायाः शिवपुण्यं च सुव्रते ॥

क्रियन्तेऽहर्निशं भद्रे सर्वे धर्मास्त्वया भृशम् ।
न तुल्या तव लोकेऽस्मिन् स्त्रीषु सर्वासु सर्वथा ॥

---

[1] विनिश्चित्य दूर्वाससमसुं मुनिम् . [2] मुनयस्तत्र.

इति तेषां वचः श्रुत्वा कुमारी प्राह तानियम् ।
नैव जानामि पुण्यानि तापसानामधीश्वराः ॥
पतिपुण्यं परमिति युस्माभिः समुदीरितम् ।
[1]कृत्वैतत्प्रथितं पुण्यं सद्भर्तृं प्रापुरुत्तमाः ॥
तच्छ्रोतुं महती वाञ्छा वर्तते मम तापसाः ।
इति तस्या वचः श्रुत्वा तेषां मध्ये महातपाः ॥
गौतमः प्राह पुण्यात्मा कथां परमपावनाम् ।
पुरं पाञ्चालदेशेऽस्ति शोभनाख्यं मनोहरम् ॥
माधवाख्यो द्विजस्तत्र महानासीन्महीसुराः ।
तस्यासीत्तनया नाम्ना सुन्दरीति मनोरमा ॥
सैषा करिपुरस्थस्य पुष्करस्य द्विजन्मनः ।
भार्या भूत्वा सहैतेन तस्थे संतोषसंयुता ॥
सैषा कर्मवशान्नारी स्ववेश्मासन्नवेश्मनि ।
ब्राह्मणं कंचनाभासमरमद्यभिचारिणी ॥
तदेतज्ज्ञातवांस्तस्याः पतिः कालेन भूसुराः ।
बध्वैनां ताडयामास [2]प्रग्रहैरेव निष्ठुरम् ॥
सा पतिं मारयामास कालेन विषदानतः ।
सा पुनर्विधवा भूत्वा जारासक्तातिरागिणी ॥
संजातेष्वपि पुत्रेषु मारयामास तानपि ।
[3]न पपात विषेणापि गर्भस्त्वेको यदा तदा ॥
ज्ञात्वैनां बान्धवाः सर्वे तत्यजुर्दुष्टचारिणीम् ।
तैस्त्यक्ता सा पुनः प्राप देशाद्देशान्तरं [4]भिया ॥
एकत्रासूत तनयं दशमे मासि सा पुनः ।
मारयित्वा शिशुं तं च निर्घृणा विषदानतः ॥
पुनश्च [5]जारासक्ता सा चिक्रीड व्यभिचारिणी ।
[6]तांस्तांश्च विषदानेन मारयित्वाप तद्धनम् ॥

---

[1] कृत्वैतत्पतिपुण्यं के. [2] प्रहरैरेव. [3] न पपातौषधेनापि. [4] यथा. [5] जारं किंचित्साप्यरमद्यभि. [6] तं च सा विषदानेन मारयित्वा परं धनम्

पुनश्चातिधनं कंचिद्द्विजं [1] प्राप्तं यदृच्छया ।
रराम वञ्चनाबुध्या तस्मा अपि ददौ विषम् ॥

तस्मिन् व्यर्थं विषं सर्वं समजायत वै यदा ।
एकदा सा पुनर्विप्रं तमाहूय वनान्तरे ॥

क्रीडयित्वा च संसुप्तं पाषाणेन जघान तम् ।
जहार च धनं तस्य सर्वं पापा [2] यथेच्छया ॥

[3] ज्ञात्वा तस्यास्तु दौरात्म्यं राजा प्रणिधिभिस्तदा ।
स्तनौ नासां च तस्या द्राक् छित्वा दूरीचकार ताम् ॥

सा पुनः पुरुषैश्छिन्ननासा [4] पान्थैश्च सङ्गता ।
कृत्वा निषिद्धकर्माणि शतान्येषातिसाहसात् ॥

कदाचिदेको विन्नस्तां छिन्नहस्तेन ताडयत् ।
ममार तत्क्षणं सापि यमदूता यमान्तिकम् ॥

निन्युस्तां नरके घोरे पातयामासुराज्ञया ।
नरके पीड्यमानां तां शिवदूताः शिवाज्ञया ॥

समभ्येत्य महासत्वा विमानमधिकप्रभम् ।
आरोप्य द्रावयित्वा तान्यमदूतांश्च निष्ठुरान् ॥

निन्युः कैलासमचलं यत्र शंभुर्विराजते ।
तत्र देवाधिदेवस्य सन्निधौ न्यवसत्सुखम् ॥

सत्कृता साप्युमादेव्या [5] सखीवर्गैः समं द्विजाः ।
सखीभिः सा समं देव्याः संतोषेण [6] भृशं स्थिता ॥

तदेतदखिलं दूता यमस्य निकटं गताः ।
[7] प्रोचुः शिवगणैर्भीमैस्ताडिताः स्वायुधैर्भृशम् ॥

श्रुत्वैतद्धर्मराजोऽपि चित्रगुप्तं गणाग्रणीम् ।
किं पुण्यमस्या मतिमन्नालोच्य प्रोच्यतामिह ॥

इति तस्य वचः श्रुत्वा चित्रगुप्तोऽब्रवीद्वचः ।
न तस्याः पुण्यलेशोऽपि विद्यते पापशेमुषी ॥

---

[1] प्राप्य. [2] यदृच्छया. [3] ज्ञात्वाथ तस्याः. [4] पादैश्च संयुता. [5] सखीधर्मैः.
[6] भृशं सदा. [7] प्रोचुः शिवगणैः पीडां कल्पितामायुधैर्भृशम् .

एतमाह यदा वीक्ष्य धर्मराजं स धर्मवान् ।
तदानीमागतस्तत्र नारदस्तपतां वरः ॥
तं दृष्ट्वा सम्प्रणम्याशु पप्रच्छ मुनिपुङ्गवम् ।
कस्मादेशात्त्वया प्राप्तो देशोऽयं तपतां वर ॥
किं विचित्रं त्वया दृष्टं श्रुतं सर्वं [1] वदाद्य मे ।
इति कालस्य वचनं निशम्य स तु तापसः ॥
कैलासात्पर्वतश्रेष्ठादागतोऽस्मि शिवालयात् ।
तत्र कांचिद्वधूं दूतैस्त्वदीयैः पीडितां भृशम् ॥
मोचयित्वा [2] गता दूताः शिवस्य परमात्मनः ।
सन्निधौ [3] स्थापायित्वा तां मिथः प्रोचुश्च मण्डले ॥
कुर्वन्त्या अनिशं पापमप्यस्यां पुण्यगौरवात् ।
[4] जन्मान्तरार्जितद्येन पाषाणेन जघान तम् ॥
तद्गृहीत्वाश्म तत्रत्याः शंभोश्चक्रुर्वरालयम् ।
तेन पुण्येन सा प्राप शिवसन्निधिमुज्वलम् ॥
विधूय सर्वपापानि प्रीत्या परमया युता ।
इति तेषां वचः श्रुत्वा ह्यागतोऽस्मि तवान्तिकम् ॥
इत्थं निशम्य वचनं नारदस्य स [5] धर्मराट् ।
दुराचारापि साऽज्ञानात्कृतपुण्येयमीदृशीम् ।
गतिं प्राप ततः कृत्वा शिवपुण्यं शिवप्रियम् ॥
ज्ञात्वा चरन्ति ये मर्त्यास्तेषां पुण्यमनुत्तमम् ।
को वेत्ति तत्त्वतः शंभुं मुक्त्वा परमकारणम् ॥

(शं. स. उप. ४२)—

ततः प्राह कुमारीं तामङ्गिरा मुनिसत्तमः ।
वङ्गदेशोऽस्ति भूपालो महाशुद्धाह्वयो महान् ॥
स तु राजा वनं गत्वा मृगयामास वीर्यवान् ।
तं जघान महान् कश्चिद्व्याघ्रः सत्ववतां वरः ॥

---

[1] वदान्यतः. [2] गणाः सन्तः. [3] स्थापयित्वाथ. [4] विहत्यैषा तु विप्रेण.
[5] धर्मवित्.

ततोऽस्य मन्त्री चोरैस्तु युद्धं कृत्वा ममार सः ॥
राजपत्नी पूर्णगर्भा तदा पुत्रमजीजनत् ।

[1] ततः सा स्वपितृगेहाय गत्वा तत्रावसद्द्विजः ॥
पुनः कालेन पुत्रेण साकमेषा शिवालयम् ।

विनिर्माय शिवं चापि प्रतिष्ठाप्य स्वनामतः ॥
पूजान्ते देवदेवेशं प्रणम्य प्रीतिसंयुता ।

नित्यं स्वगृहमायाति भक्त्या परमया सह ॥
तां कदाचित्सुतस्तस्याः पप्रच्छ पितरं स्वकम् ॥

कुत्रेति सेवयित्वेशं महादेवपरायणः ।
तदानीमाययावत्र चतुरङ्गबलैः सह ॥

मरुत्वानस्य पितरमानयित्वा स्वयं मुदा ।
[2] (योजयित्वा सुतेनैनं पत्न्या च परया मुदा)
स्वदेशं कल्पयित्वास्य पूर्ववद्देवनायकः ॥

प्रेरयित्वा स्वकं धाम ययौ कन्ये शिवाज्ञया ।
राजा स्वदेशं संप्राप्य पत्न्या पुत्रेण संयुतः ॥

कृत्वा तु राज्यं स्ववशे चोरान् हत्वा बहूनयम् ।
घोरं चोरवरिष्ठं तं बध्वा कारागृहे नृपः ॥

स्थापयित्वा तद्भवनं लुण्ठयित्वा महाक्रुधा ।
नित्यं तं बाधयामास चोरैरेव भटैरयम् ॥

तत्रत्याः सकला गोरं हन्तुमूचुर्नृपान्तिकम् ।
गत्वा तेषां वचः श्रुत्वा तथेत्याह महीपतिः ॥

निकृत्तशिरसं दूताः शिवस्य परमात्मनः ।
दिव्यं विमानमारुह्य निन्युः कैलासपर्वतम् ॥

वीक्ष्यैतद्विस्मयाविष्टो राजा तस्थे तदोन्मुखः ।
तदानीमागतस्तत्र गर्गः पुण्यवतां वरः ॥

---

[1] ततः स्वपितृगेहे सा गतसत्त्वावसद्द्विजा. [2] पुराणपाठः.

तं प्रणम्य महीपालः सर्वमस्मै न्यवेदयत् ।
स तु ध्यात्वा क्षणं तस्य पुण्यमाह त्रिकालवित् ॥

एतत्करस्थितं दण्डं समादाय [1]पृथुः पुमान् ।
शिवालयं निर्ममाय ? दारुमध्ये विधाय तम् ॥

तेन पुण्येन महता पापं सर्वं विधूय सः ।
दिव्यं विमानमारुह्य प्राप्य कैलासमुत्तमम् ॥

अन्ते च शिवसायुज्यं [2] प्राप्तवान् धरणीपते ।
तदा प्रभृति राजासौ शिवपुण्यं शिवप्रियम् ॥

विधाय सद्गतिं प्राप शिवस्यैव प्रसादतः ।
शिवपुण्यं चकारायं यस्माद्भूमिपतिर्महान् ॥

तत्प्रभावात्समागत्य चतुरङ्गबलैः सह ।
शक्रो बलानि भूरीणि खड्गं रिपुबलापहम् ॥

दत्वास्य निर्ययौ स्वर्गं सहसा दैवतैः सह ।
पुनश्च राज्यं स्ववशे कृत्वा भूमिभृतां वरः ॥

महता च [3] प्रतापेन राज्यं कृत्वा शिवप्रियः[4] ।
शिवपुण्यानि सर्वाणि कृत्वान्ते मोक्षमाप्तवान् ॥

यस्माच्छिवालयायासीद्दण्डो घोरस्य पापिनः ।
तेन पुण्येन महता सोऽपि प्राप शिवालयम् ॥

एवं कुमार्यै स ऋषिः कथामेतामुवाच हि ।
तामाह तपतां वर्यो वसिष्ठोऽपि ऋषिर्महान् ॥

गुप्तापुरे द्विजः कश्चिच्चि[5]त्ररथ्याभिधो महान् ।
तस्यासीद्विबुधो नाम तनयः पापकर्मकृत् ॥

तं पुरान्नृपतिः कोपाद्बहिश्चक्रे दुराशयम् ।
निर्गत्य स वनं प्राप्य पथिकान् पापचेतनः ॥

---

[1] पृथुं भवान्. [2] गमिष्यति च भूपते. [3] प्रभावेन. [4] प्रियम्. [5] रथ्याह्वयो.

संताडय स [1] जहाराथ तेषां द्रव्याणि कन्यके ।
इत्थं चचार कतिचिद्दिनानि [2] स दुरात्मवान् ॥

तं कदाचिन्महीपालः प्रेषयित्वा भटान् स्वकान् ।
बध्वानीय गजस्याग्रे स्थापयामास वै रुषा ॥

प्रेरितोऽपि गजस्तस्य न चिक्षेप शिरः क्षितौ ।
किं तु प्रदक्षिणीकृत्य स्वस्कन्धे स्थापयच्च तम् ॥

राजा तदेतदालोक्य विस्मयाकुलितान्तरः ।
आरोपयद्गजः श्रीमान् स्कन्धे पापिनमप्यमुम् ॥

न जघान किमेतद्वा इति तस्थे तदोन्मुखः ।
तमाह वीक्ष्य स गजः क्षितीशं विस्मिताननम् ॥

बालोऽयं कारयामास भवनं परमेशितुः ।
इष्टकाभिर्विनिर्माय सवयोभिश्च संयुतः ॥

तेन पुण्येन महता महात्मायं दुरासदः ।
[3] न चैनं शक्यते हन्तुं मयापि ब्रह्मणापि वा ॥

इत्यादिशिवधर्माणां प्रभावस्तूपवर्णितः ।
पतिधर्मैकनिष्ठा ये वीरशैवा महौजसः ॥ २

ये ये शिवाश्रया धर्मास्तान् सर्वांश्चरलिङ्गके ।
कुर्यादेवाप्रमादेन कारयेद्वा समाहितः ॥ ३

सामान्यशैवधर्मा ये तत्र तत्र निरूपिताः ।
ते सर्वे वीरशैवानां शिवे जङ्गमरूपिणि ॥ ४

---

[1] जहारायं. [2] सुदुरात्मवान्.

[3] सर्वेषामपि पूज्योऽयं शिवपुण्यप्रभावतः । गजस्यैवं वचः श्रुत्वा पुनराश्चर्यसंयुतः ॥
मुमोच तं नृपश्रेष्ठो भक्त्या परमया युतः । स तु देशान्तरं गत्वा सञ्चरन् बहुकालतः ॥
समाययौ पुनरिमं देशं भागैवशात्किल । तं वीक्ष्य स नृपश्रेष्ठः संतोषेण समन्वितः ॥
दत्वा बहुधनं तस्मै शिवपुण्यस्य वैभवात् । प्रेषयामास मतिमान् स्वेच्छया कन्यके नृपः ॥
तदा प्रभृति मुक्तायं स्तेयं सर्वजुगुप्सितम् । मुक्त्वा यथेच्छया भोगानन्ते दिव्यं विमानकम् ।
आरुह्य परया प्रीत्या शिवलोकं जगाम ह ॥ इति कथाशेषः—

सामान्यशैवधर्माणां पालनं धर्म एव हि ।
द्रोहे सामान्यधर्माणां शिवद्रोहः समापतेत् ॥ ५

मनः स्वयं सावधानं भवेच्छाङ्करकर्मणि ।
क्षेत्रं वित्तं धनं धान्यं जङ्गमस्य हरेद्यदि ॥ ६

अधः पतेद्वीरशैवः सामान्यः शैव एव वा ।
उभयोरपि तुल्यः स्याद्धर्मः शैवः पुरोदितः ॥ ७

अविरुद्धानि कुर्वीत विरुद्धानि तु जङ्गमे ।
सामान्यशैवधर्माणां प्रमादाद्द्रोह आगते ॥ ८

आगमे वर्णिता दिव्ये निष्कृतिर्जङ्गमार्चनात् ।
वीरशैवीयधर्माणां द्रोहे नास्त्येव निष्कृतिः ॥ ९

सामान्यानां तथान्येषामेष धर्मः सनातनः ।
शास्त्राण्यत्र प्रमाणानि भूरिशः सन्ति विस्तरात् ॥ १०

ग्रन्थविस्तरभीत्यैव मया न लिखितं पुनः ।
प्रामाणिकस्य वै पुंसो दिङ्मात्रेऽपि प्रदर्शिते ॥ ११

विश्वासः स्यात्पूर्वपुण्यपरिपाके महात्मनः ।
बहुष्वपि प्रमाणेषु विस्तराल्लिखितेष्वपि ॥ १२

न विश्वसेद्वेदबाह्यस्तस्य पापफलोदयः ।
फलितेषु च वृक्षेषु काको निम्बफलोत्सुकः ॥ १३

चूतप वसन्तुष्टः कोऽप्यस्ति किल कोकिलः ।
माधुर्यगुणसम्पत्तिः पूर्वकर्मविपाकतः ॥ १४

काककोकिलयोरैकजात्येऽप्यन्या हि वैखरी ॥

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञ श्रीनीलकण्ठशिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारे शिवधर्मप्रभावो नाम त्रिंशोपदेशः

अथ एकत्रिंशोपदेशः

एकत्रिंशोपदेशेऽस्मिन् शिवद्रोहे समागते ।
निष्कृतिः प्रायशः शंभुप्रसादादिति वर्ण्यते ॥ १

प्रायश्चित्तं तु सर्वेषां दृश्यते च श्रुतौ स्मृतौ ।
शिवापराधे संप्राप्ते प्रायश्चित्तं तु वर्णितम् ॥ २

तथापि भक्तिवैशेष्यान्निष्कृतिः स्यान्महेश्वरात् ।
अस्मिन्नर्थे प्रमाणानि विलिख्यन्ते विशेषतः ॥ ३

ऋषयः—(शं—सं—उप—४९)

कथितानि त्वया सर्वाण्यस्माभिश्च श्रुतानि च ।
कृतार्थाः स्म वयं सूत त्वया वै नात्र संशयः ॥

शीवद्रोहस्तु संप्रोक्तः त्वया सूत प्रसङ्गतः ।
शिवद्रोहस्तु को वात्र वर्णयस्व यथातथम् ॥

यस्य नास्ति प्रतीकारः प्रायश्चित्तशतैरपि ।
पृष्टः को वा शिवद्रोह इति सूतो महर्षिभिः ॥

प्राह तान् सकलान्वीक्ष्य सर्वशास्त्रार्थकोविदः ।
शिवस्य च शिवायाश्च सुब्रह्मण्येभवक्रयोः ॥

गुरुभक्तगणानां च षण्णामेष द्विजोत्तमाः ।
द्रव्याण्युपेक्षया प्रज्ञाहीनभक्षणकादिना ॥

विनाशयेद्यो मूढात्मा शिवद्रोही स ईरितः ।
उपेक्षा नाम सा प्रोक्ता यैरेषां ह्रियते धनम् ॥

तद्विलोक्यावतिष्ठेद्यस्तस्य प्रोक्ता मनीषिभिः ।
प्रज्ञाहीनमिदं प्रोक्तं ह्रियमाणं परैरदः ॥

यो वै विचारयेन्मूढो न सम्यक्तस्य पापिनः ।
[1]एतेषां परिचर्यायामलसस्यापि तत्स्मृतम् ॥

---

[1] तेषां तु परिचर्यासु अनलं स्थापितं स्मृतम् .

एषामपहरेदेतत्स्वयं भक्षणमीरितम् ।
एवं धनं धान्यजातं वस्त्रमाभरणं तथा ॥

आलयं भवनं क्षेत्रं वृक्षानारामकानपि ।
वापीकूपतटाकांश्च पदार्थानेवमादिकान् ॥

स्वयं विनाशयेद्यो वै [2]विनाशकमथापि वा ।
विनाशकान्ते [3]वासश्च विनाशकनिरीक्षणम् ॥

श्रवणं च तथा तस्य स्पर्शनं पापिनस्तथा ।
तद्वाक्यपालनं तद्वच्छिवद्रोहाः प्रकीर्तिताः ॥

[4]एतान् षडपि शम्भ्वादीन् शिवस्थानान्यपि द्विजाः ।
वेदान् विभूतिं रुद्राक्षमागमानपि शाङ्करान् ॥

तथा शिवपुराणानि शिवसम्बन्धकान् परान् ।
विनिन्दयति मूढात्मा शिवद्रोही स ईरितः ॥

विनिन्दकस्य निकटे वर्तनं श्रवणं तथा ।
वीक्षणं स्पर्शनं तस्य तेन संभाषणं तथा ॥

तद्वाक्यश्रवणं [5]तद्वत् शिवद्रोहः समीरितः ।
एषां निवेशने [6]षण्णां तीर्थे पुष्पवनेऽपि च ॥

अन्येषु शिवसंबन्धस्थलेष्वघविरोधिषु ।
उच्छिष्टं यः करोत्यत्र शिवद्रोही स ईरितः ॥

कुर्वतस्तद्वदुच्छिष्टं वीक्षणं स्पर्शनं तथा ।
[7]तेन संभाषणं चैव शिवद्रोहः समीरितः ॥

एवमादिशिवद्रोहं ज्ञात्वा केचन पापिनः ।
[8]प्राप्येह भवदुःखानि बाध्यन्ते यमकिङ्करैः ॥

अद्यापि नरकेष्वेतान्वक्ष्ये कांश्चन भूसुराः ।
वङ्गदेशाधिपः कश्चित्कीलकाख्यो महीपतिः ॥

---

[1] एषामपि करे यत्तत्स्वयं. [2] विनाशक्तमतोऽथ वा. [3] निवसेद्विनाश. [4] येषाम् षडपि शंसादीन्. [5] तच्च शिव. [6] षुष्पे तीर्थे. [7] एवं सं. [8] इहानुभूय दुःखानि.

राजगिर्याह्वयं सोऽयं नगरं [1] शास्ति सत्यवाक् ।
तस्यासंस्तनयाः शूराः पार्पजित्प्रमुखा द्विजाः ॥

पापजिच्छूरजिच्चैव वीरजिद्धोरजित्तथा ।
चत्वारस्ते समुद्दिष्टाः [2]सर्वयुद्धविशारदाः ॥

तपसा तोषयित्वैते [3]श्रीरुद्रमरिमर्दनम् ।
बलं प्राप्य परं सर्वशत्रुसंहरणक्षमम् ॥

जित्वा दिशश्च सकला राजसूयं महाक्रतुम् ।
चक्रुर्विविधसंभारैश्चत्वारोऽपि महाबलाः ॥

पितृवाक्यमलङ्घ्यैव नित्यं तिष्ठन्ति पण्डिताः ।
कीलकोऽपि सदा तेषां पिता [4]गोकर्णकं ययौ ॥

शिवरात्रौ महादेवं सेवितुं परमेश्वरम् ।
शिवरात्रिव्रतं कृत्वा तत्रायमवसत्सुधीः ॥

षण्मासान्नियमेनैव ध्यात्वा साम्बं त्रियम्बकम् ।
ततः स्वदेशं संप्राप भटैरतिबलैरयम् ॥

चत्वारस्तनयास्तस्य पितुरग्रे प्रतस्थिरे ।
तैः प्राप भवनं रम्यं सर्वातोद्यरवैः सह ॥

तत्र सिंहासने स्थित्वा प्रेरयित्वा भटान् स्वकान् ।
स्वपुत्रान् प्रेषयित्वायं स्वस्ववेश्म स भूपतिः ॥

अन्तःपुरं स्वयं गन्तुमियेष मतिमानयम् ।
[5]तथा तत्पुरमध्यस्थं शिवं राजगिरीश्वरम् ॥

ये पूजयन्ति विप्रेन्द्राः शैवाः शिवविभाविताः ।
आययुस्ते नृपं द्रष्टुं शिवपूजापरायणम् ॥

तदा पप्रच्छ तान् राजा शिवविप्रान् समागतान् ।
स्वागतं वो महादेवपूजासंसक्तचेतसाम् ॥

पूजा चलति किं शंभोः पूर्ववन्नयूनवर्जितम् ।
एवं क्षितिभुजा पृष्टा जगदुस्ते शिवद्विजाः ॥

---

[1] शास्ति भूपतिः. [2] सर्वायुधवि. [3] हरिं सर्वारिमर्दनम्. [4] गोकर्णमाययौ.
[5] तदा.

त्वत्प्रभावाच्चलत्येव पूजा न्यूनविवर्जिता ।
प्रसन्नो नितरां शंभुः पूर्ववद्राजते नृप ॥

पुत्रैस्तव शिवद्रोहः कृतः खलु महीपते ।
इति तेषां वचः श्रुत्वा पुनः प्राह महीपतिः ॥

को वा द्रोहः कृतस्तैस्तु शिवस्य परमात्मनः ।
[1]त्यक्तशङ्का वदन्त्वद्य भवन्तः पारमेश्वराः ॥

इति राज्ञो वचः श्रुत्वा ते प्रोचुर्वचनं तदा ।
वीरजित्तव पुत्रोऽयमिष्टकानां शतद्वयम् ॥

गृहीत्वा [2]स्वगृहेशस्य चकारालयमद्भुतम् ।
निरुद्धश्च तदास्माभिः शिवद्रोहो भवेदिति ॥

तदुल्लङ्घ्य [3]वचोऽस्माकमधिकारी दुरात्मवान् ।
तथा विचिन्त्य प्रमुखास्तत्क्रियानिरता अपि ॥

राजद्रव्यमिदं सर्वं राजा चेद्धरति स्वयम् ।
तदा को वा भवेद्दोष इति प्रोचुर्दुराशयाः ॥

एवमुक्त्वैव ते पापा इष्टका अनयन्खलु ।
तदैनाननुसृत्यैव गताः स्मो धरणीपते ॥

अवोचामैतदखिलं वृत्तं [4]वीरजितस्तदा ।
सोऽयं चकार चोपेक्षां पुत्रस्ते प्रेरको यतः ॥

तदा दुःखेन संयुक्ता निर्गताः स्म यथायथम् ।
पापाद्विशुद्धिरस्माकमस्मात्केन भवेदिति ॥

द्रष्टृणामधुना चैवमिति चिन्ता बभूव हि ।
घोराजिच्छाङ्करं चूतद्रुममेकं समुन्नतम् ॥

छित्वा चकार दुर्बुद्धिर्यागशालां मनोहराम् ।
तदानीं तं प्रति प्रोक्तमस्माभिर्वचनं मुधा ॥

छेत्तव्योऽयं त्वया वृक्षो न शिवालयमध्यगः ।
भवेच्चूनं महान्दोषः संमतानामिहाधुना ॥

---

[1] त्यक्त्वा शङ्कां. [2] स्वगृहे तस्य. [3] वचोऽहार्षीदधि. [4] शूरजिते.

इत्थं निशम्य वचनमस्माकं घोरजित्पुनः ।
क्रियते यागशाला हि को दोषस्तेन वा भवेत् ॥

इत्युक्त्वा प्रेरयामास [1]ज्ञात्वाप्युल्लङ्घ्य मद्वचः ।
पूर्वेद्युः प्रेरितः शूरजिता कृष्णस्तु तावकः ॥

शिवारामप्रसूनानि निनायास्मै भटः स्वयम् ।
आदाय तानि पापात्मा बभार सह भार्यया ॥

तदा कृते निषेधेऽपि न शुश्राव च पापवान् ।
अस्मिन् दिने च पुष्पाणि चाहृत्य स ययौ गृहम् ॥

एवमेभिस्त्रिभिर्दोषैः शिवस्य परमात्मनः ।
कृतं समीक्ष्य पुण्यात्मा शिवकार्यविचारकः ॥

वीरव्रतो विरक्तोऽयं प्राणांस्तत्याज भूपते ।
पोषकः शिववृक्षाणां मार्ताण्डोऽपि ममार हि ॥

तथा पुष्पवनं यस्तु विचारयति केसरी ।
विक्रमाख्यो जहौ प्राणान् सदा शिवपरायणः ॥

एवं प्राणान् महात्मानस्त्रयस्तत्यजुरुज्वलाः ।
वयं प्राणान् परित्यक्तुं शिवद्रोहितया नृप ॥

अशक्नुवानास्तेऽभ्या[2]शमागत्वा वचनं बत ।
एतच्छ्रुत्वा वचो राजा चकार श्रोत्रयोः करौ ॥

पापजिन्नामतनयं समाहूय [3]महीपतिः ।
आनयामास तान् पुत्रांस्तेन त्रीनपि तान् भटान् ॥

परिचर्यारतान् पापाञ्छशास पुरतः स्वयम् ।
एवमाज्ञां विधायैषां राजा प्राप्येश्वरालयम् ॥

पूजागृहं यागशालां छित्वा वृक्षानपीष्टकाः ।
चकार शाङ्करं धाम परमं नूतनं महत् ॥

स्वस्य कोशगृहद्वारमुद्घाट्यात्र च यद्धनम् ।
तत्सर्वं सहसानीय मुण्डमालां मनोहराम् ॥

---

[1] चास्मानुल्लङ्घ्य–पा. [2] मागत्यैवावचं बत. [3] महामतिः ।

किरीटमन्याभरणं चकार स महीपतिः ।
अभिषेकं च नैवेद्यं कारयामास वै महत् ॥
तमलंकारयामास भूषणैस्तैर्महेश्वरम् ।
कृत्वैवं निष्कृतिं पश्चाच्छिवद्रोहस्य भूपतिः ॥
शिवकार्याय ये देहं तत्यजुर्वीतकिल्बिषाः ।
विनिष्कृतिर्भवेत्तेषां केन वेति विचिन्तयन् ॥
प्राणत्यागं विना नैव निष्कृतिश्च भवेदिति ।
विचार्य चैवं मनसा वह्निकुण्डे महानलम् ॥
प्रज्वाल्य निश्चयित्वायं करं पापजितस्तथा ।
भार्याया रत्नवल्याश्च गृहीत्वा करमात्मवान् ॥
पपात [1]भावयन्नन्तः शिवमेव परात्परम् ।
तदा शीतोऽभवद्वह्निर्जलवत्तस्य निर्णयात् ॥
ये तत्यजुः शिवद्रोहं दृष्ट्वा प्राणान्महाशयाः ।
वीरव्रतश्च मार्ताण्डस्तथा विक्रमकेसरी ॥
तान्ददर्शाशु पुरतः शङ्कराज्ञासमुत्थितान् ।
तदा पपात वृष्टिश्च पौष्पी देवकरच्युता ॥
देवदुन्दुभयो नेदुर्जिताम्बुधिमहारवाः ।
तदा प्रसेदिवाञ्छम्भुर्वृषं कैलाससन्निभम् ॥
आरुह्य चाद्रिजाकान्तो वृतो नानाविधैर्गणैः ।
प्राह गम्भीरया वाचा राजानं वीक्ष्य शङ्करः ॥
अहो तव मतिः पुण्या सर्वलोकातिशायिनी ।
त्वत्समो नास्ति लोकेऽस्मिन्मयि भक्तिश्च तेऽतुला ॥
तस्मान्निष्कण्टकं राज्यं कृत्वा कालमनेककम् ।
पुत्रान्विनीतानुत्पाद्य कृत्वा पुण्यं मदीयकम् ॥
भुक्त्वा भोगांश्च विपुलानन्ते [2]प्राप्नुहि मत्पदम् ।
इत्युक्त्वा तं महादेवस्तत्रैवान्तरधीयत ॥

---

[1] भावयन् पूतः. [2] प्राप्स्यसि.

प्रसेदिवांस्ततो विष्णुः प्रसन्ने च महेश्वरे ।
[1]ददौ विमानमेतस्मै सभार्याय महात्मने ॥

ततः प्रसन्नः शक्रोऽस्य पुत्रस्य गजमुत्तमम् ।
दत्वा पापजिदाख्यस्य कीर्तयन्वचनैरमुम् ॥

आशीर्भिर्योजयित्वा तु स्वर्लोकं प्राप्तवान्हरिः ।
एवं देवैर्बहुमतः संतोषेण गृहं गतः ॥

पुत्रेण भार्यया सार्कं भुक्त्वा भोगानखण्डितान् ।
पुनर्विनीतानुत्पाद्य पुत्राञ्छास्त्रार्थकोविदान् ॥

शिवपुण्यानि भूरीणि कृत्वान्ते मोक्षमाप्तवान् ।

(शं-सं-उप-५०)—

[2]शिवालयश्रीकार्यार्थमिष्टकाश्च तथा सुधाः ॥

संपादिता हरद्रोही प्रायश्चित्तविवर्जितः ।
शिवालयार्थमानीता इष्टकाश्च सुधा अपि ॥

समादिदेशानयेति वीरजिद्राजनन्दनः ।
[3]तासां यो हारको हारिर्नाम वीरजितो भटः ॥

आनीता यैश्च भृत्यैस्ता भटास्तेऽपीह भूतले ।
दण्डिताः सद्य एवैते परत्र च [4]कृतागसः ॥

नीता यमभटैः शीघ्रं महाघोरे निपातिताः ।
अद्याप्यनुभवन्त्येव घोरास्तास्ताश्च यातनाः ॥

शिवारामत[5]रुच्छेदशिवद्रोहस्य भूयसः ।
[6]छेदनार्थं कृतादेशो घोरजिद्राजनन्दनः ॥

अधिकारी [7]विक्रमाख्यश्छेत्तारः शशपूर्वकाः ।
तेऽपीह निगृहीताश्च नरके च निपातिताः ॥

यमदूतैर्महाघोरैरतिघोरे महत्तरे ।
अद्यापि यातनाभिस्ते पीड्यन्ते बहुधा भटैः ॥

---

[1] दत्वा. [2] शिवालयात्स्वकार्या. [3] ताः समाहरतो भक्तिहीना वीरजितो भटाः.
[4] हृता गतिः. [5] तरोश्छेत्ता. [6] करणार्थं. [7] चक्रकाख्यस्तद्दासाः शशपूर्वकाः.

उद्यानपुष्पहरणमहाद्रोहात्तु शूलिनः ।
शूरजिन्नृपतिस्तस्य भार्या च कुसुमान्यम् ॥
भटैरानीय पुष्पाणि [1] दधतुर्निशि तावुभौ ।
तौ तयोरधिकारी च तीक्ष्णाख्यस्तद्भटाश्च ते ॥
अद्यापि पीडिताः सम्यग्यमदूतैः परत्र च ।
बहुधा पीडितास्तीव्रे निरये च निपातिताः ॥
अद्यापि यातनास्तीव्रा भुञ्जते हातिकुत्सिते ।
एते सर्वे दुरात्मानः कल्पकोटिशतैरपि ॥
पारं न निरयाम्भोधेः प्राप्नुवन्ति कदाचन ।
सर्वेषामेव पापानां प्रायश्चित्तं श्रुतौ स्मृतौ ॥
निर्दिष्टं च पुराणज्ञैर्मुनिभिश्च महत्तरैः ।
शिवद्रोहस्य चैकस्य प्रायश्चित्तं मुनीश्वरैः ॥
प्रायश्चित्तं न निर्दिष्टं शास्त्रे वेदेऽपि वा क्वचित् ।
शिवद्रोहीह घोरेषु नरकेषु च यातनाः ॥
अनुभूयैव कल्पानामनन्तानि निरन्तरम् ।
[2] तत्रैव पच्यते कष्टं हाहा द्रोहस्य वैभवः ॥
ये हरन्तीह देवस्य फलानि कदलीतरोः ।
तेषां वच्मि कथां सर्वे शृणुध्वं सावधानतः ॥
अङ्गदेशे महीपालो विधाता नाम नामतः ।
सत्यसन्धो महाधीरः सर्वायुधविशारदः ॥
धर्मेण रक्षतस्तस्य पृथिवीं पृथिवीपतेः ।
कदाचिन्नारदः प्राप सभामैन्द्री[3]मिवाङ्गिराः ॥
तदागतं मुनिं दृष्ट्वा सहसोत्थाय भूपतिः ।
प्रणम्य परया भक्त्या ददावासनमुत्तमम् ॥
उपविष्टं मुनिं प्राह प्राञ्जलिर्विनयान्वितः ।
स्वागतं ब्रह्मपुत्राय महते भवतेऽधुना ॥

---

[1] दधतुर्निर्भयावुभौ. [2] तथैव. [3] मिव स्थिताम्.

वयं कृतार्था भगवन् दर्शनेन तव प्रभो ।
तथापि ते मुखाम्भोजाद्विरं शुश्रूषुरादरात् ॥

आज्ञापय महायोगिन् प्रसीद करवाणि किम् ।
[1] समागतं त्वयेदानीं कुतः कार्यमिहास्ति किम् ॥

इति ब्रुवन्तं राजानं नारदः प्रत्यभाषत ।
नान्यदस्ति महीपाल त्वया संभाषणादृते ॥

पितुस्तवाद्य सन्देशं वक्तुकामः समागतः ।
ऐन्द्रीं सभां सुधर्माख्यामध्यास्ते जनकस्तव ॥

भवन्तं मन्मुखेनाह [2]पुण्यकृत्वं कृती नृप ।
कुरु पुण्यान्यहोरात्रं पुण्यैस्तु स्वर्गतिर्नृणाम् ॥

उक्तेति नारदो भूपमथ तस्य पुरोहितम् ।
अन्तिकस्थं समालोक्य प्रोवाच प्रहसन्निव ॥

पुरोधास्त्वं महीभर्तुस्त्वत्पितुः श्रुणु भाषितम् ।
संयमिन्यां यमभटैर्बाध्यमानो वचोऽब्रवीत् ॥

मामालोक्य महीयांसं प्रणम्य [3]स कृताञ्जलिः ।
मुने राज्ञो विधातुस्त्वं गन्ताऽसि यदि तत्सदः ॥

तत्र मे तनयो ब्रह्मन् तस्य राज्ञः पुरोहितः ।
अजिताख्यो विनीतात्मा वर्तते तेन सत्कृतः ॥

तस्मै कथय सन्देशं मदुक्तं मुनिसत्तम ।
ब्रुवन्तमित्यहं वत्स तमब्रुवमनन्यधीः ॥

वदामि तव पुत्राय यद्वक्तव्यमशङ्कितः ।
अहं तत्र गमिष्यामि विधातुः पृथिवीपतेः ॥

सभां तत्रापि ते पुत्रं दृष्ट्वा ब्रूयां त्वयोदितम् ।
इति ब्रुवन्तं मामाह पिता तव सुदुःखितः ॥

[4] (मया प्रतिगृहीतानि धनधान्यानि सर्वदा ।)
मयोत्कोचस्वरूपेण धनानि प्रतिगृह्यता ॥

---

[1] समागते त्वयीदादीनां कुतः कार्यमितोऽस्ति किम्. [2] पुण्यं कृत्वा. [3] विहिताञ्जलिः. [4] पुराणे नास्ति.

गृहीतानि पुनर्लोभात्पुण्यलेशोऽपि नादृतः ।
पुत्रोऽपि हृदयं मे द्यत्यमुं नाचिन्तयं तदा ॥
धनानि तानि सर्वाणि बहून्यपि गृहान्तरे ।
स्थूणामूले विनिक्षिप्य नान्यस्मै प्रोक्तवानहम् ॥
इदं कृतमिदं कार्यमिति चिन्ताकुलं तु माम् ।
गृहीत्वा सहसा निन्युर्यमदूता यमान्तिकम् ॥
बाधन्ते मां दिवारात्रं यमदूता भयङ्कराः ।
तदद्यास्तु नमस्तुभ्यं तद्गृहीत्वा धनं बहु ॥
पुत्र पुण्यं कुरुष्वेति वद शीघ्रं तु मा चिरम् ।
भूदानं कन्यकादानं गोदानानि बहून्यपि ॥
तिलधान्यादिदानानि ददस्वेति वद प्रभो ।
पुनश्च गङ्गाप्रभृतिनदीतीरेषु पुत्रक ॥
सहस्रभोजनं कुर्याद्ब्राह्मणेभ्यो मुदान्वितः ।
सघृतं ससितापूपं सूपव्यञ्जनपूरितम् ॥
येन केनाप्यहं तीर्णयातनः स्वर्गमाप्नुयाम् ।
[1] तदद्य नारदमुने कथयस्व नमस्तव ॥
मयेति पित्रा ते प्रोक्तं तत्कुरुष्व यथा मनः ।
इति राजानमपि तं पुरोहितसुतं मुनिः ॥
उक्त्वा जगाम त्रिदिवं सद्यः स्वैरगतिस्तदा ।
विधाता राजशार्दूलः सोऽपि तस्य पुरोहितः ॥
जग्मतुर्विस्मयं भूयो भूयः स्मृत्वा मुनेर्वचः ।
चक्रतुस्तौ मतिं पुण्ये स्वपित्रोर्वाक्यगौरवात् ॥
अजितः स्वगृहस्थूणामूलादुद्धृत्य तद्धनम् ।
राज्ञापि च पुनर्दत्तं पुण्यार्थं भूरि तद्धनम् ॥
अजितः सर्वमेवैतद्गृहीत्वा त्वरयान्वितः ।
गङ्गाद्यानां नदीनां च तीरेषु च पुरेषु च ॥

---

[1] तथाच.

पुण्यक्षेत्रेषु सर्वेषु काशीकाञ्चीपुरादिषु ।
भोजयामास वै नित्यं ब्राह्मणानां सहस्रकम् ॥

दीनान्धकृपणानाथदरिद्राणां परश्शतम् ।
भूदानानि च गोदानान्ययुतानि ददौ मुदा ॥

कोटिकन्याप्रदानानि ब्राह्मणेभ्यो ददौ कृती ।
मार्गे मार्गे प्रपां कृत्वा जलदानमकारयत् ॥

पुष्पारामाणि भूरीणि रोपयामास तद्धनैः ।
समुद्रकल्पान्मार्गेषु तटाकानपि [1]भूरिशः ॥

खात्वा खात्वा च तत्रापि रोपयामास वै द्रुमान् ।
एकस्मिंस्तीर्थतीरेऽसावेकस्मिन्दिवसेऽजितः ॥

[2] यच्चकार सकृत्पुण्यं तेनैव सुकृतेन वै ।
तत्पिता तेन पुण्येन नरकान्निदिवं गतः ॥

दिव्यं विमानमारुह्य दिव्यस्त्रीशतसंकुलम् ।
[3] अनुभूय चिरं कालं स्वर्गभोगमनुत्तमम् ॥

अन्येषु दिवसेष्वेषु यानि पुण्यान्यकारयत् ।
तेनोत्तरोत्तरं स्वर्गे पिता लेभेऽधिकं सुखम् ॥

एवं नदीनां तीरेषु कृत्वा पुण्यान्यसौ चिरम् ।
कालेन नर्मदां प्राप्य विन्ध्यपादे महत्तराम् ॥

स्नात्वा संतर्प्य देवर्षीन् कृतसन्ध्याविधिर्द्विजाः ।
धान्यान्यपि च [4] दत्वात्र ब्राह्मणानां च भोजनम् ॥

एकस्मिन् दिवसे तत्र ब्राह्मणानां च भोजनम् ।
प्रयच्छत्यजिते तस्मिन् घृतसूपफलैः सह ॥

नालभासीद्द्विजाग्र्याणां केषांचित्कदलीफलम् ।
ततः सर्वेषु भुञ्जत्सु तूष्णीं तिष्ठत्सु वै तदा ॥

अजितो दुःखितो भूत्वा स्वमाहूय पुरोहितम् ।
शीघ्रं विप्रवरेदानीं कदलीफलमानय ॥

---

[1] भूसुराः. [2] चकार स कृती पुण्यं. [3] अन्वभूच्च. [4] सर्वत्र.

शतं नालमभूत्सद्यो यत्र कुत्रापि मा चिरम् ।
उक्तवन्तमुवाचेदमत्रेदानीं सुदुर्लभम् ॥

अन्यग्रामात्तदानीतं श्वः परश्वो भविष्यति ।
भोक्तव्यं ब्राह्मणैरद्य नियमोऽत्र कथं भवेत् ॥

विज्ञातव्यं विशेषेण येषां नालमभूत्फलम् ।
तेभ्यः प्रयच्छ द्विगुणं श्वः परश्वोऽविशङ्कया ॥

इति वादिनि चैतस्मिन्नजितस्य पुरोहिते ।
अजितस्तं पुनः प्राह कण्ठे निक्षिप्य वै करम् ॥

अवश्यं व्रतभङ्गोऽयं न भवेद्येन केन वा ।
[1]तथा कुरु ममाभीष्टं पुरोहित नमोऽस्तु ते ॥

इत्युक्ते तेन वै तस्मिंश्चिन्तामतिमहीयसीम् ।
[2](अवाप्तवन्तं परममाधिना च समन्वितम्)
अन्तिकस्थो द्विजः प्राह पुरोहितमिदं वचः ॥

पश्यात्र पश्चिमे भागे वृक्षषण्डसमाकुलम् ।
[3]भीमेश्वरमिदं स्थानं भीमेश्वरसमाह्वयम् ।

अनेककदलीषण्डैरलङ्कृतमिदं पुरम् ।
तत्र वै शतनिष्कस्याप्यस्त्येव कदलीफलम् ॥

सुतीर्थाख्ये वदत्येवं त्वरया स पुरोहितः ।
स्वभृत्यान् प्रेषयामास दत्वा बहुपणं मुदा ॥

गत्वा तत्रेश्वरस्थाने तदीयाः पुरुषास्तदा ।
पणार्थं पूजकानेते पप्रच्छुः कदलीफलम् ॥

[4]पूजका नोऽद्य नैवालं देव्याश्च परमेशितुः ।
[5]नैव दद्मः फलं यूयं गच्छतेत्यवदन् रुषा ॥

ततस्ते सहसाभ्येत्य फलार्थं ये समागताः ।
राजाधिकारिसविधे पणं दत्वा फलार्थिनः ॥

---

[1] भवान्. [2] पुराणपाठः. [3] भूमीश्वरमिदं स्थानं भीमेश्वरसमाश्रयम्.
[4] पूजाकालोऽद्य नैवालं देवस्यापि महेशितुः. [5] नैवेद्यार्थं फलं दातुं.

तेन साकं [1] समागत्य पुरुषानिदमब्रुवन् ।
विद्यन्ते वोत्र कदलीफलानि सुबहून्यहो ॥
इत्युक्तोपरि सन्त्यज्य पणान् राजोपसेवकाः ।
एकस्मिन् कदलीवृक्षे ते यानि फलितानि हि ॥
तान्यादाय महाप्रीत्या ब्राह्मणेभ्यः फलान्यदुः ।
[2] यावतां नालमभवद्ब्राह्मणानामशङ्कितम् ॥
पुरोहितोऽधिकारी च नृत्ताख्यस्त्वरयान्वितौ ।
यावदीशार्चका राज्ञे न वदेयुस्त्वरान्विताः ॥
तावद्गत्वाथ वै राज्ञे पूर्वमाचख्यतुर्भयात् ।
अजितस्य तु वृतान्तमन्नदानस्य वैभवम् ॥
अजितोऽयमतिप्रीत्या तीर्थे तीर्थे च सर्वदा ।
अन्नदान[3]परोऽत्यर्थं स्वर्णदानपरश्च वै ॥
मृष्टान्नं [4] ब्राह्मणेभ्यो हि प्रयच्छति कृती तराम् ।
तदर्थमद्य पूर्वेद्युर्भीमेश्वरशिवालये ॥
शतं दशपणान् दत्वा विक्रीतं कदलीफलम् ।
भुञ्जते स्म द्विजाः सम्यक् पूर्वेद्युर्नर्मदातटे ॥
तदुपश्रुत्य राजापि संतोषेण पुरोहितम् ।
अधिकारिणमप्याशु प्रेषयामास पूर्ववत् ॥
अजितायापि संप्रीतो ददौ प्रियमुपायनम् ।
तौ गृहीत्वा ततो जग्मू राज्ञा दत्तमुपायनम् ॥
गतयोस्तु तयोः पश्चाद्भीमेशालयपूजकाः ।
राजानमेत्य तत्कर्म समाचख्युः शुचाकुलाः ॥
राजन् कदाचिदपि वा शंभोस्तु कदलीफलम् ।
अभिषेकं च नैवेद्यमपविघ्नं भवेदिति ॥
अस्माभिर्नैव विक्रीतमभिषेकनिवेदने ।
[5] था भीमेशितुर्विघ्नो न भवेत्तत्तथा कुरु ॥

---

[1] समाहूय. [2] यावतां तृप्तिरभव. [3] परो नित्यं. [4] ब्राह्मणाहेंभ्यः. [5] चेरम्.

अवमत्याद्य नः सर्वानजितस्य पुरोहितः ।
सहाधिकारिणाभ्येत्य दत्वा शतपणान् बलात् ॥

छित्वा गुच्छं स्वहस्ताभ्यां जग्मतुः पृथिवीपते ।
इयतापि च कालेन न दृष्टं पुनरीदृशम् ॥

शिवद्रोहमजानानौ निन्यतुः कदलीफलम् ।
श्रुत्वापि राजा तद्वाक्यं तूष्णीमास्ते स्मयन्निव ॥

दत्ताः किल पणास्तेन देवाय क्रयतो धनम् ।
इतः परं नैवमिति प्रेषयामास तान्नृपः ॥

तमेवं वादिनं भूपं निन्दन्तो मनसार्चकाः ।
अयमेव शिवद्रोही न ताविति शुचान्विताः ॥

जग्मुर्भीमेश्वराभ्याशं राजापि भवनान्तरम् ।
राजापहारिणः सर्वान् मुमोच यदशङ्कितः ॥

तेन पापेन महता पितरं तस्य भूभुजः ।
नरके पातयामासुरिन्द्रलोकात्सुदारुणे ॥

सोऽपि राजा तदारभ्य पीडितो राजयक्ष्मणा ।
अन्तरेऽष्टदिनादेव ममार पृथिवीपतिः ॥

पातितः सोऽपि नरके यमदूतैर्भयङ्करैः ।
सामन्तेन हृतं तस्य राज्यं च नगरं च यत् ॥

पुरोहितं च सहसा नेत्रे उत्पाटय वै रुषा ।
देशान्निष्कासयामास सोऽपि बभ्राम भूतलम् ॥

नेत्रव्रणेन तेनैव ममार विजने क्वचित् ।
तं चापि नरके घोरे पातयामासुरञ्जसा ॥

यदा शिवालयान्नीतं शिवार्थकदलीफलम् ॥

तदानीमेव जनको निरये पातितः पुनः ।
क्रमेण मरणं प्राप्तमजितस्य पुरोहितम् ॥

तस्यापि पितरं घोरे नरकेऽपातयन् क्षणात् ।
येनेदं ब्राह्मणेनोक्तं तदानीं कदलीफलम् ॥

भीमेश्वरालयेऽस्तीति सोऽपि पञ्चत्वमागतः ।
सान्वयः पतितो घोरे रौरवेऽतिभयङ्करे ॥

राजाधिकारी [1]नृत्तोऽपि सर्पदष्टो ममार हि ।
[2]पातिताश्चापि निरये शासनेन यमस्य वै ॥

फलानि तानि यैर्यैर्यैर्भक्षितानि महात्मभिः ।
तेषां महोदरव्याधिरासीत्कष्टं द्विजन्मनाम् ॥

महागदेन तेनैते पञ्चत्वं च प्रपेदिरे ।
सान्वयाश्च महाघोरे नरके पातिताः क्षणात् ॥

कदलीफलगुच्छस्य छेत्ता हस्तेन केसरी ।
ब्राह्मणः सोऽपि हस्ताग्रनिगलाभिन्नदोर्हतः ॥

निरये सान्वयो घोरे यमदूतैर्निपातितः ।
इत्थं राजा पुरोधाश्च तदीयश्च पुरोहितः ॥

राज्ञोऽधिकारी भृत्याश्च वक्ता भोक्तार एव ते ।
[3]छेत्ता च सान्वयाः सर्वे नरके युगकोटिषु ॥

अद्याप्यनुभवन्त्येव यातनां न हि निष्कृतिः ।

(शं. सं. उप. ५१)—

श्रुणुध्वमृषयो भूयः शिवक्षेत्रापहारिणः ॥

दुर्गतिं यान्ति यामत्र वच्मि तामद्य मानवाः ।
विप्रास्तत्परिहाराय श्रुणुध्वं सावधानतः ॥

[4]शृङ्खलेऽस्ति महीभागे भूचक्राख्यं महत्पुरम् ।
तत्रास्ति सविता नाम ब्राह्मणो वेदपारगः ॥

शान्तोऽप्यत्र धनी विद्वांस्तस्य पुत्रास्त्रयोऽभवन् ।
तेषां ज्येष्ठो महाभागो धार्मिको विनयान्वितः ॥

हरीश्वराख्यं तत्रास्ति स्थानं शंभोरुमापतेः ।
तस्मै देवाय वै धीमान्भागमेकमदात्स्वकम् ॥

---

[1] भृत्योऽपि, कर्तापि. [2] पतिव्रतापि, [3] भेत्ता च, एवं ते सान्व. [4] मङ्गले.

नैवेद्यार्थं द्विजश्रेष्ठो विरक्तोऽष्टदिनान्तरे।
संत्यज्यात्मधनं भूरि ययौ बदरिकाश्रमम् ॥

तत्र चक्रे तपो [1] रम्यं ध्यायञ्छिवपदाम्बुजम् ।
तत्क्षेत्रमञ्जसाकर्षुः शिवक्षेत्रं दिदृक्षवः ॥

ततस्तस्य पिताभ्येत्य रुरोध विलपन् रुषा ।
[2] पुत्रो मे पित्तसंभ्रान्तमना यत्किंचिदाचरत् ॥

निर्गतश्च गृहाद्भूयो वनान्तरमयादयम् ।
[3] किं वास्यानुज्ञया दत्तमस्माकं वदताधुना ॥

[4] धर्मशासनपत्रं वा दत्तं भ्रान्तेन सूनुना ।
परिहास्यमिदं किं वा कर्षोद्योगस्तु कीदृशः ॥

भ्रान्तेन चास्वतन्त्रेण दत्तं नैतद्भवेत्स्मृतौ ।
नैतद्दृष्टं वृथा भ्रान्ता [5] गच्छतेत्यवदन् रुषा ॥

तेन दत्तमदत्तं तदित्येव बहुधारुणत् ।
तेषां तेन तदान्योन्यं कलहस्तु महानभूत् ॥

राज्ञे निवेदयामासुरन्योन्यमविशङ्किताः ।
धिक्कृत्य राजा तं विप्रं [6] दत्तं देवाय तत्पुनः ॥

न निवर्तेत विषवत्कन्यावच्च न संशयः ।
शिष्टमन्यद्धनं [7] भुङ्क्ष्व गच्छ [8] दुष्टेत्यभर्त्सयत् ॥

तदारभ्यैव तत्क्षेत्रं शिवक्षेत्रमभूत्पुनः ।
तस्मिन् राजनि वै नष्टे कलहे समुपस्थिते ॥

पुनस्तद्ब्राह्मणः क्षेत्रं जहार कलहान्तरे ।
सामन्तराजा तद्राष्ट्रं जहार बलवांस्तदा ॥

स तु नीतिपरो राजा धर्मेणापालयन्महीम् ।
पुनश्च देवाधिकृतस्तस्मै राज्ञे न्यवेदयत् ॥

---

[1] नित्यं. [2] पुत्रं मे पित्तसंभ्रान्तमानयन् किंचिदाचरन्. [3] नैवास्या. [4] धर्मसाधन.
[5] गच्छतेत्याशु वै रुषा. [6] ददौ. [7] भुक्त्वा. [8] दुष्टेत्यशासयत्.

सोऽपि राजा तमाहूय धान्यं भूयोऽप्यदापयत् ।
गतभोगसमुद्भूतधान्यान्यपि च दापयत् ॥

सर्वस्वमपि तस्मै तदपराधस्य दापयत् ।
पुनश्च तं स्वविषयान्निरकासयदञ्जसा ॥

दुःखितः सोऽथ विप्रोऽपि देशाद्देशान्तरं भ्रमन् ।
संप्राप्य मागधं देशमद्राक्षीत्तस्य भूपतिम् ॥

तस्मै निवेदयामास स्ववृत्तान्तमथान्यथा ।
स राजा तं द्विजं मा भैर्मा भैर्विप्रेति भाषयन् ॥

अद्यप्रभृति विप्रेन्द्र प्रत्यहं मत्सभान्तरम् ।
समभ्येत्य कृताशीस्त्वं मह्यं तिष्ठ पुरे सुखम ॥

तस्मिन्निति स्थिते तत्र तस्य राज्ञः पुरोहितः ।
[1] विशान्ताख्यस्तु तं प्राह शिवद्रोहितमो भवान् ॥

भवन्तं [2]किमुपादत्त राजा मुक्त्वोपपातकम् ।
शिवद्रोहिणमायान्तं हन्यादेवाविचारयन् ॥

अविचार्य शिवद्रोही वध्य इत्युच्यते बुधैः ।
त्वया कृतशिवद्रोहपातकस्य [3]द्विजाधम ॥

त्वां हन्मि नो चेदधुना त्वत्कृतस्य महैनसः ।
त्याज्या मयासवोऽद्येति कस्यचित्पृथिवीपतेः ॥

पुरुषस्य करात्खड्गमादायास्याच्छिनच्छिरः ।
तच्छ्रुत्वास्मै चुकोपाशु राजा मौर्ख्यात्पुरोधसे ॥

तस्यापि क्रोधताम्राक्षः पुरोधाः शिर अच्छिनत् ।
शिवद्रोही स विप्रश्च राजा च निहतौ क्षणात् ॥

पुरोहितेन किमिति सन्नद्धा नृपसेवकाः ।
छेत्तुं प्रहर्तुमुद्युक्तास्ताडितुं च रुषान्विताः ॥

अन्योन्यं चाच्छिदन् सर्वे प्रजह्रुश्च परस्परम् ।
ताडयामासुरन्योन्यं दैवेन हतबुद्धयः ॥

---

[1] विक्रान्ताख्योऽथ तं. [2] किमुताभासं राजा मुक्त्वा सपातकम्. [3] जनाधम.

एतत्सर्वं समालोक्य सुमित्रो राजनन्दनः।
पुरोहितं तमभ्येत्य प्रणम्य स कृताञ्जलिः॥
भो भो विशान्त भगवन् भवता किमिदं कृतम्।
किमर्थं संहृतो विप्रो देशान्तरसमागतः॥
राजा च संहृतः क्षिप्रं ब्राह्मणेन त्वयाधुना।
निमित्तमत्र किं ब्रह्मन्वद मह्यं हि पृच्छते॥
कथं ह्येते भटा ब्रह्मन्नन्योन्यं निधनं गताः।
त्वमेव साक्षादीशान इति मे निश्चिता मतिः॥
वद ब्रह्मन्यथातत्त्वं सत्यसारा हि साधवः।
विशान्तोऽथ पुनः शान्तः प्रोवाच नृपनन्दनम्॥
अयं देशान्तराद्विप्रः शिवक्षेत्रापहारकः।
असंभाष्यो जनैर्दुष्टो मानितः पृथिवीभुजा॥
संहृतस्तत्क्षणादेवमाततायीविशङ्कितम्।
तत्साहाय्यरतो राजा श्रेयसे संहृतो मया॥
ईशाभाववशादेते चान्योन्यं निहता भटाः।
श्रुत्वैतदखिलं [1] पुत्रो राज्ञः प्रोवाच तं पुनः॥
भीतभीतः प्रणम्यैनं कृताञ्जलिपुटः स्मयन्।
साधु साधु त्वया विद्वन् संहृतः परमेशितुः॥
क्षेत्रापहारी लोकेऽस्मिन् [2] आततायी न संशयः।
तत्साहाय्यरतो राजा तद्भटाश्च स्वयं हताः।
इदानीं मम विज्ञप्तिं कर्णे कृत्वा विधीयताम्॥
एते कृतैनसः क्षिप्रमस्मच्छ्रेयोऽभिवृद्धये।
निगृहीता न सन्देहः सत्यमुक्तं द्विजाधुना॥
छिन्धि मेऽद्य शिरो ब्रह्मन् सजीवाः सन्त्विमे भटाः।
अपराधं क्षमस्वाद्य प्रसीद द्विजपुङ्गव॥
पुनराह द्विजो राजकुमारं प्रहसन्निव।
त्वं राजपुत्र कुशलबुद्धिरेव न संशयः॥

[1] भद्रो राजा प्रो. [2] पातकोऽयं न.

पितुः कृतापराधस्य [1]ज्ञात्वोत्थानं न साम्प्रतम् ।
जनानां पुनरुत्थानं साधु प्रार्थितवानसि ॥

भटानिति पुनः सासूंश्चकार शिवतेजसा ।
अन्योन्यं प्रहरन्तोऽपि तत्क्षणेन निवारिताः ॥

दृष्ट्वैतदखिलं राजकुमारः स्वपुरोहितम् ।
सविस्मयस्तदा भूयः प्रणनाम पुनः पुनः ॥

तदैव सहसा तत्र पुष्पवृष्टिर्दिवश्च्युता ।
देवदुन्दुभयो नेदुर्दिवि संकुलनिस्स्वनाः ॥

आविरासन्नभोदेशाद्गणेन्द्राः शिवसंमताः ।
सविमानाः समभ्येत्य प्रोचुस्ते तं पुरोहितम् ॥

दृढव्रत महाबुद्धे कृतकृत्योऽसि भूसुर ।
[2]आरुह्येदं विमानाग्र्यमायाहि शिवमन्दिरम् ॥

नन्दीश्वरसमादेशाच्छ्रीमत्कैलासपर्वतम् ।
इति ते तं समारोप्य विमानं सर्वगामिनम् ॥

सपुत्रपौत्रवनितं सबन्धुसखिसंमितम् ।
भ्राजमानं स्ववपुषा निन्युः कैलासमुत्तमम् ॥

स्वपुत्रदत्तं सविता नाम विप्रो द्विजाधमः ।
अपहृत्य शिवक्षेत्रमिहैवासीच्च निर्धनः ॥

विनेशुस्तस्य पुत्राश्च भार्या दुहितरः स्नुषाः ।
स्वयं च निर्धनो भूत्वा देशादेशान्तरं गतः ॥

तत्रापि खड्गनिहतो ब्राह्मणेन विशेषतः ।
यमदूतैरतिक्रूरैर्निरयेषु निपातितः ॥

अनेककल्पपर्यन्तमद्यापि न निवर्तते ।
राजा च तस्य चाकस्मात्साहाय्यनिरतो हतः ॥

निरयेषु च हा तस्मात्पतितोऽसाधुसङ्गमः ।
सर्वेषामेव जन्तूनां हेतुरश्रेयसे ध्रुवम् ॥

अद्यापि राजा निस्तीर्णो निरयान्नैव भूसुराः ।

---

[1] त्वत्र दानं. [2] आरुह्य तं विमानाग्र्य.

सूतः—(शं. सं. उप. ५२)

अतः परं प्रवक्ष्यामि मुनयो द्विजसत्तमाः ॥
पशूञ्छिवस्य ये लोके हरन्ति मनुजाधमाः।
ते यान्ति यां गतिं मूढास्तदीयां वच्म्यहं कथाम् ॥

पाण्डुपुत्रो महाराजो युधिष्ठिरसमाह्वयः।
सत्यसन्धो महाभागो धर्मपुत्रः प्रतापवान् ॥

शत्रून् जित्वा भ्रातृभिः स्वैर्दुर्योधनपुरोगमान्।
अवतार्य भुवो भारमनन्तमहिमास्पदः ॥

अन्ते जगाम स दिवं सशरीरः प्रतापवान्।
मध्येमार्गं दिवः प्राप्य पितरं धर्ममात्मनः ॥

[1](प्रणम्य तस्थिवांस्तत्र धर्मराजेन पूजितः)।
चित्रगुप्तादयस्तत्र धर्माधर्मविचारकाः ॥

इदमूचुः सदोमध्ये यमं प्राञ्जलयो द्विजाः।
अजातशत्रुर्भगवन्नतीव सुकृती कृती ॥

दिवं प्रयातु सुकृतैर्दुरापमकृतात्मभिः।
पुरानेन नरेन्द्रेण शत्रून् संहरता रणे ॥

असत्यमुक्तमेकं हि निर्बन्धेन महीयसा।
तत्पापशान्तये देव नरकानेष पश्यतु ॥

तथेति तद्वचः श्रुत्वा यमोऽनेन महीभुजा।
सह पातालमभ्येत्य दर्शयामास वै क्रमात् ॥

नरकान् यातनाः सर्वास्तत्रत्यानां दुरात्मनाम्।
तत्रानलास्यनरके भुञ्जानान्यातनाशतान् ॥

विलोक्य सहसा भीतो धर्ममालोक्य धर्मराट्।
पप्रच्छ प्राञ्जलिस्तिष्ठन्नेभिरेनस्तु किं कृतम् ॥
[2] एतद् प्रब्रूहि भगवन् पृच्छते [3]मह्यमीश्वर।

---

[1] पुराणपाठः. [2] एनः. [3] स महीश्वरम्.

इति पृष्टो यमः प्राह पुत्रमालोक्य [1]निर्दिशन् ।
शिवद्रोहपरा ह्येते शृणु त्वं सावधानतः ॥

कुञ्जराख्ये महीभागे देशोऽस्ति वसुधापुरम् ।
तत्र कश्चिद्द्विजश्रेष्ठः पुण्यराशिरनिन्दितः ॥

[2]विप्रो मणिरिति ख्यातस्तमिन्द्रः स्वर्गमानयत् ।
एकं तस्मै ददौ दिव्यं भूषणं प्रीतमानसः ॥

इदमाभरणं [3]विद्वन्नित्यं नि कसहस्रकम् ।
प्रसूते तत्समादाय कुरु पुण्यमतन्द्रितः ॥

भूलोके त्वरयेत्याशु विससर्ज पुनश्च तम् ।
तथेति भूमिमासाद्य पुनः पुण्यं चकार सः ॥

कदाचित्सकलान् धर्मा[4]नन्वतिष्ठत् द्विजाग्रणीः ।
गोदानानि सहस्राणि ददौ प्रीतमना द्विजः ॥

तत्रैतेषां सहस्रेषु वसन्तेश्वरशूलिनः ।
एका गौः सङ्गता ताभिस्तामपि प्रददौ द्विजः ॥

एकोत्तरसहस्रं तदस्तु बुध्येति हृष्टधीः ।
अभ्येत्य चुक्रुशुस्तस्मै शिवालयसमर्चकाः ॥

मुञ्च गां देवदेवस्य वसन्तेश्वरशूलिनः ।
[5]आकुष्टोऽपि च रुद्धोऽपि तानेवमवदद्द्विजः ॥

महेन्द्रेण धनं दत्तं विभूषणसमुद्भवम् ।
वसन्तेशेन च पुनर्गौरियं दानहेतवे ॥

गच्छतेति च तानुक्त्वा न मुमोच [6]तदा च ताम् ।
अर्चकाः खिन्नमनसो राज्ञे सर्वं न्यवेदयन् ॥

न विचारितमेतेन राज्ञापि विमुखेन वै ।
तन्मन्त्री निकटे तिष्ठन्राजानं प्रत्यभाषत ॥

राजन् किमिति नोपेक्षा कार्या देवपशुं प्रति ।
असाववश्यं दण्डयो हि शिवद्रोह्यविचारतः ॥

---

[1] निर्देयम् . [2] विभ्रान्तिरिति विख्या. [3] ब्रह्मन्नित्यं, [4] ननुतिष्ठन् .
[5] पृष्टोऽपि चानुरु. [6] ददौ.

राजा तमाह देवेन्द्रप्रियोऽसौ द्विजसत्तमः ।
अस्माभिर्नैव दण्डयोऽसौ येन केन च गच्छतु ॥

(मन्त्री)—

[1]शिवद्रोहीष्टदे राज्ञि न स्थातव्यं मयाधुना ।
उक्त्वैवं निर्जगामाशु वनं प्रकृतिपुङ्गवः ॥

आलयाधिकृताः सर्वे विनिन्द्य पृथिवीपतिम् ।
शिवद्रोह्ययमेवेति [2]जग्मुः स्वं स्वं निकेतनम् ॥

एवं गते बहुतिथे विशालो राजपुङ्गवः ।
सुवीरमाह्वयामास वनं कोपेन संश्रितम् ॥

आहूतोऽपि विशालेन सुवीरो नागतो वनात् ।
सुवीरः स तु कालेन निर्धनः समपद्यत ॥

खिन्नश्चिन्तां परां प्राप कुटुम्बभरणाय वै ।
देवेन्द्रस्तु विदित्वैत[3]त्सुवीरस्य मनोगतम् ॥

प्रेषयामास सुरभिं [4]कामधेनुं सुरारिहा ।
सुवीरस्य कुटुम्बं त्वं रक्ष धेनो यशस्विनि ॥

वने वसति पुण्यात्मा वित्तहीनोऽद्य सर्वदे ।
तदाज्ञां शिरसा धृत्वा कामधेनुस्त्वरान्विता ॥

वनं शीघ्रमनुप्राप्य तत्कुटुम्बं बभार वै ।
अन्नाद्यैः प्रत्यहं धेनुर्वने कामधुगुत्तमा ॥

सुवीरे तिष्ठति सुखं कुटुम्बेन वनान्तरे ।
विशालः कुपितोऽत्यर्थं वनं प्राप ससैनिकः ॥

बलात्कारेण तं सद्यो ग्रहीतुं वनवासिनम् ।
मध्येमार्गं महीपालमपरे[5]द्युर्वने द्विपः ॥

त्वरयाभ्येत्य हन्ति स्म मदेन छिन्नशृङ्खलः ।
हाहेति विलपन्तस्तत्सैनिका नगरं प्रति ॥

---

[1] शिवद्रोह्येव त्वं राजन्न स्था. [2] जग्मू राजानमात्मनि. [3] सुवीर्यं तमनागतम्.
[4] सुरेशः प्राह तां प्रति. [5] द्युरनेकपः.

निवृत्तास्तत्क्षणादेव निहते तत्र राजनि ।
अभिषिक्तश्चित्रसेनो राज्ये तत्सूनुरञ्जसा ॥

सुवीरं मन्त्रिणं प्रह्वः समाह्वयदरण्यतः ।
सुवीरः पुनराहेदं राजानं दूतवक्कृतः ॥

स तु विप्रमणिर्द्रोही शिवस्य यदि दण्डितः ।
आगमिष्येऽह[1]मरिहन् इति स्वैरभ्यचोदयत् ॥

तदानीमेव भूपालकुमारः कुशलाय वै ।
आहूय तं विप्रमणिमतीव परुषाक्षरम् ॥

चोरोऽसि दुष्ट विप्र त्वं शिवधेनुमपाहरः ।
प्रादाद् द्विजन्मने यस्त्वं चोर एवासि भूसुर ॥

चोरो मुञ्चति वै [2]दोषं निगृहीतो न यद्यमुम् ।
इत्यसौ निगृहीतश्च कुमारेण महाधिया ॥

संतुष्टोऽथ महानिन्द्रः प्रादुर्भूय तदैव तु ।
गृहीत्वाभरणं तत्तु सुवीराय ददौ मुदा ॥

पुष्पवृष्टिः पपाताशु सुरेन्द्रपुरुषादृता ।
गते महेन्द्रे सहसा देवलोकं यथापुरा ॥

गोप्रतिग्रहकर्तारं कच्छदेशे कृतालयम् ।
वसुनामानमवनीपतिपुत्रः प्रतापवान् ॥

शिवालयपशुः सोऽयमिति ज्ञात्वापि दुष्टधीः ।
कृत्वा प्रतिग्रहं देशाद्देशान्तरसमागतम् ॥

तद्देशेशं चकारास्य पुरुषैर्विदितागसम् ।
स राजा तं च तां गां च सहसा निजसेवकैः ॥

[3] आनयामास सहसा स्वभटैः स्वात्मशुद्धये ।
गां देवाय पुनर्दत्वा तस्य नेत्रे द्विजन्मनः ॥

[4]उत्पाट्य विषयात्स्वस्मात्पुनस्तं प्रैषयत्क्षणात् ।
सोऽपि कालेन निधनं प्राप विप्रो विलोचनः ॥

---

[1] मधुना नान्यथेत्यन्वचोदयत्. [2] दोषान्निगृहीतो न यद्यमम्. चोरदोषं भवेद्राजा निगृह्णीतो. [3] प्रेषयामास. [4] उत्क्षिप्य.

दाता प्रतिगृहीता च राजा चोपेक्षकस्तयोः ।
नीता मम भटैर्भूमेरस्मिन्नेते निपातिताः ॥

अनलास्याभिधे घोरे नरके कालमक्षयम् ।
तेषां वंशोद्भवाश्चापि युधिष्ठिर निपातिताः ॥

श्रुत्वेति वाक्यं स्वपितुर्धर्मपुत्रोऽतिविस्मितः ।
अनुज्ञया पितुः प्राप त्रिदिवं व्योमयानतः ॥

सूतः—

उक्तं मयाद्य हरणात्पशोर्दैवस्य यां गतिम् ।
प्रापुर्दाता गृहीता च तटस्थस्तदुपेक्षकः ॥

तदीयाख्यानमधुना किं भूयः श्रोतुमिच्छथ ।

सूतः—(शं. सं. उप. ५३)

अतः परं प्रवक्ष्यामि दत्तामृषभमुद्रिताम् ॥

हरतां वृषभीं [1]नारीं हरस्य शृणुताधुना ।
पुरा चतुर्मुखो देवो दिदृक्षुरखिलं जगत् ॥

आरुह्य हंसं सुश्वेतं चचार परया मुदा ।
प्राप्य संयमिनीं कालान्नरकानवलोकयत् ॥

तन्मध्ये कतिचिद्दृष्टु[2]मनिच्छन् पद्मसंभवः ।
अतः परं न गन्तव्यमित्यवोचत्स्ववाहनम् ॥

इमे दुरात्मनिलया नावलोक्या मया इति ।
ततो हंसस्तमाहेत्थं किमेते नरकाः प्रभो ॥

नैवावलोकिता देव त्वया किंवात्र कारणम् ।
[3]ब्रह्माह तं शिवद्रोहनिरतावासभूमयः ॥

एते नैवावलोक्याः स्युर्निवृत्ताविदितौ तदा ।
नरकाणां च तेषां तु मध्ये ज्वलितपावके ॥

---

[1] नाम हरस्य शृणुतादरात्. [2] मनिच्छन्नात्मसंभवः. [3] ब्रह्मणोक्तं.

वज्रस्तम्भे निबद्धेन पुरुषेण कृतः स्वनः ।
अश्रावि हंसः पप्रच्छ किमेतेन कृतं त्विति ॥

ब्रह्मा शृण्वस्य वृत्तान्तमिति प्रोवाच तत्कथाम् ।
सौराष्ट्रदेशे नगरी सौराख्या विदिता शुभा ॥

वैश्यस्तत्र सुवृत्ताख्यो धार्मिको धनवान् कृती ।
अकृत्रिमेण वाणिज्यं करोति बहुधा सदा ॥

भद्रकालीपदाम्भोजसपर्यानिरतोऽन्वहम् ।
विख्यातः सर्वदेशेषु सर्वभूतदयापरः ॥

सांयात्रिकोऽसौ लाभाय प्लवेनार्णवमभ्यगात् ।
द्वीपान्तरात् [1] समादाय बहुकालमतन्द्रितः ॥

निवृत्तोऽर्णवमध्ये तु वायुना निहतप्लवः ।
दध्यौ सुवृत्तो मनसा भद्रकालीमनन्यधीः ॥

तदनीमेव तद्भक्तया भद्रकाली महार्णवात् ।
तं सा ससैन्यं सधनं प्रापयामास [2] तद्गृहम् ॥

दृष्ट्वैतदखिलं सर्वे [3] सुदत्तं तमपूजयन् ।
कदाचित्तस्य कल्याणे प्रवृत्ते नागरा जनाः ॥

तद्गृहं प्राप्य मुमुदुर्भुञ्जानाः सत्कृता धनैः ।
नटा विटाश्च गणिकाः शैलूषा वन्दिनस्तथा ॥

सौरेश्वरालयस्थाश्च नरा नार्यश्च सत्कृताः ।
सर्वेऽपि प्रेषितास्तेन ससत्कारमतोऽन्तरे ॥

सर्वेश्वरालये काचिद्रमणी वृषचिह्निता ।
तां दृष्ट्वा मोहितो वैश्यस्तस्या रूपेण कामुकः ॥

स्वगृहे [4] स्थाप्य तां तन्वीं तया रात्रौ च सङ्गतः ।
प्रातस्तां गन्तुमिच्छन्तीं शिवायतनकर्मणे ॥

संमार्जनकरीं [5] भूयश्चेटीमन्यामचोदयत् ।
स्वां चेटीं प्रेषयामास संमार्जनपटीयसीम् ॥

---

[1] बहुलाभमत. [2] वै गृहम्. [3] सुवृत्तं. [4] स्थापितां. [5] भूयो निवार्यान्या.

तां [1] दृष्ट्वाधिकृताः सर्वे वैश्यचेटीं [2]विना तया ।
अपृच्छन्वैश्यमाहूय मुञ्च त्वं वृषचिह्निताम् ॥
[3] किमत्र चानया चेट्या न चैषार्हा शिवालये ।
पृष्टवत्स्वपि तेष्वेवं नामुञ्चद्धनगर्वितः ।
ता ऊचुर्वृषभीं मुञ्च नार्हा चेटी तवालये ।
यथा स्वपत्नी त्वत्पार्श्वान्नान्यपार्श्वं गमिष्यति ॥
एवमेवेति चोक्तोऽपि सापि चेटी तथा न किम् ।
[4] तथापि नैच्छत् तां मोक्तुं राज्ञे प्रोचुः शिवाश्रिताः ॥
राजा मन्त्रिणमाहूय मोचयेति जगाद ताम् ।
मन्त्री वैश्यस्तु धनवान् भद्रकालीप्रियो ह्ययम् ॥
न निग्राह्यः कथं मोच्या वृषभी नृपसत्तम ॥
राजा कोपेन तं प्राह काली का स्याच्छिवद्रुहः ॥
गच्छेत्युक्तोऽपि सचिवो नैच्छद्भीत्या नृपस्तदा ।
स्वयं निर्गत्य भवनाद्वैश्यद्वारि ससैनिकः ॥
[5] मुञ्चेति निग्रहोद्युक्तो वैश्यस्तु सहसा रुषा ।
तदा सस्मार वै कालीं वैश्यः स्वाभीष्टदेवताम् ॥
सा सन्निधाय तं प्राह त्वं द्रोही परमेशितुः ।
उक्त्वा तमेवं राजानमपि प्रोवाच [6] काल्यसुम् ।
वैश्यो द्रोही महेशस्य पात्रं ते निग्रहस्य हि ।
यथेष्टं शिक्षयैनं त्वमित्यन्तर्द्धानमास्थिता ॥
ततो राजास्य सर्वस्वमादाय वृषभीं पुनः ।
प्रेषयामास सहसा शिवायतनकर्मणे ॥
सा स्नात्वा तु यथापूर्वं संमार्जनरताभवत् ।
[7] ततो वैश्यं पुना राजा मारयित्वास्य योषितः ॥
कृतवान् वृषभीमुद्रां चक्रे सौरेश्वरालये ।
संमार्जन[8]करीं शीघ्रं तां पापविनिवृत्तये ॥

---

[1] दृष्ट्वा धिक्कृताः. [2] विनिन्द्य ताम्. [3] किमर्थमनया चेटया न च ह्येषा शिवालये. [4] इति नैच्छत. [5] मुञ्च तां सहसेत्युक्तो. [6] कालिका. [7] ततो वैश्यपुराद्राज्ञा त्वानयित्वा. [8] करीः शीघ्रं तत्पाप.

मन्त्रिणं चापि साहाय्यकारिणं द्रोहिणोऽच्छिनत् ।
स तु वैश्योऽत्र वै वज्रस्तस्मे बद्धोऽनलान्तरे ॥

असहिष्णुर्यातनास्ता भृशं [1] रोदिति दुःखितः ।
तस्यायं शुश्रुवे घोरो रवोऽस्माभिर्महास्वनः ॥

अन्यत्रापि च शब्दोऽयं मन्त्रिणो नृपतेरयम् ।
साहाय्येनापि तस्यास्य निर्धूमाङ्गारमध्यगः ॥

[2]तदिमे नरका घोरा नास्माभिर्वीक्षिताः खग ।
कथयन्निति वै ब्रह्मा तेन स्वं लोकमाश्रयत् ॥

इति सूतवचः श्रुत्वा ऋषयो भीतमानसाः ।
शिवमेव तदा साम्बं शरणं मनसा ययुः ॥

सूतः—(शं. सं. उप. ५४)—

श्रुणुतातः परं विप्राः शंभोस्तैलापहारिणः ।
लिकुचस्य फलस्यापि कथां कथयतो द्विजाः ॥

शतानन्दो महायोगी शिवभक्तो मुनीश्वरः ।
प्रत्यहं स महायोगी पर्यटित्वा जगत्त्रयम् ॥

कैलासे देवमभ्येत्य [3] किंवदन्तीं वदत्ययम् ।
लोकानामपि वृत्तान्तमेवं काले [4] नयन्नसौ ॥

कदाचिद्यमलोकान्तां प्राप संयमिनीं पुरीम् ।
तत्र संभावितोऽत्यर्थं यमेन नरकान् पुनः ॥

तेन साकमनुप्राप्य ददर्श मुनिपुङ्गवः ।
तत्र तिष्ठत्सु निरयेष्वसौ तेषु निरन्तरम् ॥

पच्यमानानपृच्छन्किंमतैः पापं कृतं मुदा ।
तमुवाच यमो नाहं जानामि मुनिपुङ्गव ॥

पूर्वैरपि यमैरेते बाध्यन्ते स्म महैनसः ।
शिवद्रोहिण इत्येतन्मात्रमेव श्रुतं मया ॥

---

[1] क्रन्दति. [2] इमे ते नरकाः. [3] किङ्कराणां. [4] नयत्यसौ

[1] तमेवं वेति स पुनर्जगाम ब्रह्मणः सभाम्।
तत्र तं परिपप्रच्छ प्रणम्य कमलासनम्॥

पूर्वमेव निमग्नानां नरकेषु शिवद्रुहाम्।
सोऽपि तान् कांश्चिदुक्त्वान्यान्नाहं वेद्मि परान् मुने॥

[2] मत्पूर्ववेधसो नैतान् वेद्मि जानन्ति वा न वा।
स मुनिस्तं पुनः प्राह ब्रह्मणा विदितं न किम्॥

तमुवाच पुनर्ब्रह्मा मया सृष्टं तु यन्मुने।
[3] तत्सर्वं वेद्म्यहं किं तु पूर्वमेव स्थिता इमे।

अथवा मत्कृता सृष्टी रक्षा विष्णुकृतापि च।
नावाभ्यां [4] सा शिवेनैव परिपूर्णेन वस्तुना॥

किं त्वावामधिकारित्वे तन्नियुक्तौ [5] स्व आत्मजौ।
[6] तत्कृतात्ममहाभागौ भवाव ऋषिसत्तम॥

ततो जगाम वैकुण्ठं तत्र विष्णुमपृच्छत।
महर्षिं सोऽपि सत्कृत्य यावतो वेत्ति तान् ब्रुवन्॥

अन्यान्न वेद्मि मत्पूर्वकालमेव स्थितानिमान्।
एतत्सर्वमशेषेण वेत्ति सर्वज्ञ ईश्वरः॥

इत्युक्ते सति तेनापि कैलासमगमन्मुनिः।
तत्र सर्वेश्वरेशानं पप्रच्छ प्रणमन्मुनिः॥

भोः स्वामिन्निरये पूर्वं ब्रह्मविष्ण्वोश्च केचन।
पच्यन्त इति तैरुक्तं शिवद्रोहिण इत्यपि॥

कृतस्तु तैः शिवद्रोहः को वा वद महेश्वर।
ततो नन्दिनमाहूय भगवान् प्रमथेश्वरः॥

गच्छ नन्दिन्वदामुष्मै यत्पृष्टं मुनिनास्तु ते।
विदितं मत्प्रसादेनेत्युक्त्वा तौ विससर्ज वै॥

---

[1] तदेव वेत्तुं स. [2] मत्पूर्वं वेधसोऽप्येतान् परिजानन्ति वा न वा. [3] तत्सर्वं वेद्मि सन्देहः पूर्वमेव स्थितानिमान्. [4] स शिवेनैव पूर्णेन परवस्तुना. [5] सहात्मजौ. [6] तत्तत्कृतमहाभोगौ.

ततो [1]नन्दी स्वभवनमानीय मुनिमादरात् ।
यत्पृष्टं मुनिना ब्रह्मन् प्रष्टुमर्हसि तत्तु माम् ॥
अहं विदितवृत्तान्तं करोम्यद्य मुनीश्वर ।

शतानन्दः—

अहं नरकमद्राक्षमाश्चर्येण शिलादज ॥
यत्र कुत्र च वै घोरे पच्यमानान्दुरात्मनः ।
दृष्ट्वापृच्छं यमं विश्वसृजं [2]विष्णुं च तैः पुनः ॥
अज्ञातकालं [3]शैलादे पापाचाराञ्छिवद्रुहः ।
पच्यन्ते तान्वदेदानीं त्वं सर्वज्ञो जगत्प्रभुः ॥
अग्निमध्ये महाघोरे कटाहे तैलपूरिते ।
अधोमुखास्तु पच्यन्ते सर्वाङ्गेष्वपि कीलिताः ॥
अधस्ताम्रशलाकाभिरग्नितप्ताभिरक्षिणोः ।
श्रोत्रयोर्नासिकारन्ध्रे जिह्वायां मस्तके तथा ॥
रोमकूपेष्वयस्सूचीरग्नितप्ता निखाय ते ।
[4]बाध्यन्ते सततं घोरे तत्रैकस्य कथां वद ॥
वदतोरेवमन्योन्यमीश्वराराधनोत्सुकौ ।
ब्रह्मविष्णू च संप्राप्तौ तौ च तावप्यपश्यताम् ॥
शतानन्दोऽयमधुना नन्दीशं प्रष्टुमुद्यतः ।
नरके पच्यमानांस्तानावाभ्यामपि भो वद ॥
श्रोतव्यमद्भुतमिद[5]मिति तौ तं शिलादजम् ।
स्वाभीष्टमिति तं तस्मै विज्ञाप्यानुमतौ स्थितौ ॥
ततः प्रोवाच भगवान्नन्दी शङ्करवल्लभः ।

नन्दीशः—

विदर्भदेशे राजाऽभूद्विश्वसेनोऽतिनीतिमान् ॥
सर्वशास्त्रेषु कुशलो धनुर्वेदस्य पारगः ।
कदाचिन्मृगयासक्तः श्रान्तो विपिनमण्डले ॥

---

[1] नन्दीशभवन. [2] विश्वं च. [3] नीतास्ते पापात्मानः शिवद्रुहः. [4] बाध्यन्तेऽ-घोरे ततस्तस्य कथां वद. [5] मिति प्रोचुः शिलादजम्.

सिद्धेश्वरेश्वरस्थानमण्टपं प्राप्य सत्वरम् ।
शिष्येऽधिरूढशयनस्तत्रैव शिवसन्निधौ ॥

श्रान्तमुद्वीक्ष्य राजानं दक्षिणः परिचारकः ।
तस्याङ्गमर्दनरतः पादसंवाहकस्तदा ॥

तैलार्थं [1]पणमादाय पुरं बभ्राम सर्वतः ।
जम्बीरस्य फलं वापि नैव लब्धं पुरे तदा ॥

शिवालयं समभ्येत्य तैलं दीपार्थमागतम् ।
अभिषेकार्थकलशानि जम्बीरस्य फलान्यपि ॥

कुडुपद्वयतैलं च चत्वारि च फलानि च ।
बलादानीय दक्षोऽसावङ्गमर्दनमाचरत् ॥

स्नापयित्वा नृपं शान्तं दानधर्मानकारयत् ।
तदानीमेव संप्राप्य शिवालयदिदृक्षवः ॥

राजानं श्रुतवृत्तान्तमकुर्वन् भयवेपिताः ।
राजा श्रुताश्रुतप्रायो जगाम नगरं स्वकम् ॥

तूष्णीमेव च कालेन ममार पृथिवीपतिः ।
विनिन्द्य पृथिवीनाथं जग्मुरीशाधिकारिणः ॥

राजानमपि तं पापं तदानीन्तनधर्मराट् ।
[2]दूतैः स्वैः सहसानीय सर्वेषु निरयेष्वपि ॥

[3]सम्पीडयित्वातिमहत्कालमद्य महानले ।
निक्षिप्य तं तैलघटे यमोऽप्यद्यत्नोऽनिशम् ॥

संपीडयति हा कष्टमेकस्त्वेतादृशे परे ।
दक्षोऽप्यनलकुण्डेषु पच्यते हायनान् बहून् ॥

मध्ये त्वनेकेऽप्यनयो[4]ब्रह्माणो विष्णवो गताः ।
कुतोऽन्ये वज्रिनिवहा [5]ब्रह्मणोऽह्नि चतुर्दश ॥

---

[1] पात्रमादाय. [2] दूतैस्तैः. [3] पीडयित्वा तं महान्तं कालमद्य. [4] ब्रह्मविष्णवो-रुपागताः. [5] ब्रह्मणोऽपि चतुर्दश.

अनयोर्वंशसंभूताः पच्यन्तेऽत्रैव यातनाः ।
अभ्यागतः परं वापि कालो नेयोऽक्षयो महान् ॥
इति नन्दीश्वराच्छ्रुत्वा शतानन्दोऽतिहृष्टधीः ।
पुनः पप्रच्छ नन्दीशं शिवस्वर्णापहारिणः ॥
[1]यां गतिं प्राप्नुवन्त्येते तां कथां भगवन् वद ।

शतानन्दः—(शं. सं. उप. ५५)—

त्वत्तः श्रुता कथा ह्येषा शिवतैलापहारिणः ॥
येभ्योऽन्यत्रापि निरयेष्वन्ये पापास्तु भुञ्जते ।
यातनास्तैः कृतं किं वा कर्मभूमौ दुरात्मभिः ॥
एषां द्वारेषु नवसु द्रवं स्वर्णस्य पूर्यते ।
खण्डशश्च शरीराणि च्छिद्यन्ते [2]यमकिङ्करैः ॥

नन्दिकेश्वरः—

कलिङ्गदेशे राजाभूच्छन्दोगो नाम वीर्यवान् ।
वीरग्राहक[3]नामास्य जज्ञे पुत्रो महारथः ॥
तस्मिन्निधाय वै भारं राज्यस्य पृथिवीपतिः ।
[4]तोषयित्वाशु तपसा ब्रह्माणं परमेष्ठिनम् ॥
ब्रह्मलोकं जगामाशु पुनरावृत्तिदुर्लभम् ।
तस्मिञ्छासति तत्पुत्रे दानधर्मरतेऽवनिम् ॥
यज्ञेश्वराभिधः कश्चित्कदाचिद्ब्राह्मणः स्वयम् ।
गच्छन् सकाशं वै राज्ञो दानार्थी श्रुतिपारगः ॥
उपायनार्थं जग्राह मालामेकां शिवालयात् ।
सोमेश्वराभिधेशाननिलयात्कुसुमोज्वलाम् ॥
तां निर्माल्यस्रजं राज्ञः कण्ठे निक्षिप्य [5]साशिषम् ।
प्रतिगृह्य जगामास्माद्दानं यज्ञेश्वरो द्विजः ॥

---

[1] यां दिशं. [2] यमसैनिकैः. [3] नामास्य पुत्रो जज्ञमहारकः. [4] तोषयित्वा सुतपसा. [5] सादरम्.

तया स्रजास्य देवस्य स्वर्णयज्ञोपवीतकम् ।
[1](अज्ञात्वा पूजकैस्त्यक्तं गृहीतं तेन च स्रजा ॥
राज्ञः कण्ठे च निक्षिप्तं पश्चादन्वेषितं च तैः ।
यज्ञेश्वरोऽपि वै पृष्टः स्वर्णयज्ञोपवीतकम् ॥)
दृष्टं राज्ञो मया क्षिप्तं [2]स्रजा कण्ठे स पृच्छ्यताम् ।
ते त्वमेवेति तं प्राहुः स तु यूयमिति ब्रुवन् ।
जगाम भवनं तूष्णीं राज्ञः स्नेहबलेन सः ॥
शिवाधिकारिणोऽभ्येत्य [3]तमपृच्छन्नृपं स्रजा ।
यज्ञोपवीतमानीतं सौवर्णं ब्राह्मणेन ते ॥
[4]दीयतां नृपशार्दूल सोमेशस्य मनोहरम् ।
पृष्टोऽपि तूष्णीमास्तेऽसौ राजा मौर्ख्येन[5] चेतसा ॥
तदानीं तस्य च गुरुरामर्दनगिरेर्गुरोः ।
वंश्यः कारणनामासौ शिवद्विजकुलोद्भवः ॥
यज्ञोपवीतं देवस्य सौवर्णं दीयतां पुनः ।
महतोऽपि शिवद्रव्यं मूलं दोषस्य हि श्रुतम् ॥
कामरूपे पुरा देशे राज्ञः पुत्रो वसुः शिशुः ।
खेलन् शिवालये बाल्ये दृष्टवान् पणमेककम् ॥
ददौ हस्ते पितुस्तं च त्वरयेत्य गृहान्तरम् ।
उक्तवान् [6]पणमेकं च दृष्टं वै खेलता मया ॥
शिवालये क्वचित्तात पणं रक्ष मयार्जितम् ।
तदानीं तमनुप्राप्य पृष्टवन्तः शिवाश्रिताः ॥
शिवालयस्थितं वस्तु शिवस्यैव प्रदीयताम् ।
इति पृष्टोऽपि राजा तन्नैच्छद्दातुं सुतार्जितम् ॥
[7]परिपूर्णस्य देवस्य शिवस्य किमनेन वै ।
इति संप्रेष्य तान् सर्वान् पणं कोशे न्यवेशयत् ॥

---

[1] पुराणपाठः. [2] स्रजि कण्ठेन पृच्छता. [3] तमपृच्छन्नृपस्रजम् . [4] तदीयं.
[5] तेजसा. [6] पणलाभं च दृष्टोऽयं खेलता. [7] प्रपूर्वमस्तु नः श्रेयः.

तस्यामेव तु वै राज्यां दग्धं राज्ञो गृहं महत् ।
द्रव्यं च चोरितं चोरैरन्तरा नृपतिर्मृतः ॥

भयेन नृपपुत्रं तं सामन्तोऽभ्येत्य चाच्छिनत् ।
इहैव राजा पुत्रोऽपि शिवद्रव्यापहारतः ॥

निहतौ नरकेऽद्यापि पीड्येते इति शुश्रुम ।
पुराणश्रवणे काले पुराणज्ञेन भाषितम् ॥

तदीशस्योपवीतं तत्सौवर्णं देहि पार्थिव ।
उक्तोऽपि गुरुणा राजा तूष्णीमास्तेऽविशङ्कितः ॥

पुरोधसे मन्त्रिणे च प्रोचुः शम्भ्वधिकारिणः ।
उदासीनावभूतां तौ तस्मिन् काले विधेर्बलात् ॥

पुनः पुनस्ते पृच्छन्तःखिन्नास्तेऽधिकृतो रुषा ।
अन्यत्कृत्वोपवीतं च सौवर्णं परमेशितुः ॥

[1](आनर्चुरीश्वरं देवं यथापूर्वं शिवद्विजाः ।)

यज्ञेश्वराभिधो विप्रो यातो नष्टदरिद्रताम् ।
कालेन च मृतो मन्त्री पुरोधाश्च हतः क्षणात् ॥

[2] मृतोऽन्ते सोऽपि वै राजा दुश्चर्मा समजायत ।
तेनैव स दुरात्मासौ [3]राजा विट्क्रिमिणा हतः ॥

तानेतान्निरयेष्वेवं चतुरो यमकिङ्करान् ।
[4]सुपाच्य कालपाकेन निन्युरत्राद्य वै मुने ॥

तद्वंशसंभवाः सर्वे निरयेषु निपातिताः ।
निस्तीर्णनरका नैते कदाचिदपि वै मुने ॥

तस्य राज्ञः पिता पुण्यैर्ब्रह्मलोकं गतः पुरा ।
सोऽपि पापेन पुत्रस्य नरकेषु निपातितः ॥

श्रुत्वैतदखिलं योगी शतानन्दो महातपाः ।
भीतभीतस्तदा [5]तूष्णीमास्ते साम्बं स्मरन् हृदा ॥

---

[1] पुराणपाठः. [2] मृतास्ते. [3] राजा च क्रिमिणा. [4] सम्प्राप्य कालपाशेन.
[5] प्रष्टुमास्ते–पु. पा.

पुनश्च तमुवाचेदं नन्दी शङ्करवल्लभः ।
एतेषां नरकाभ्याशे ये पच्यन्तेऽतिपापिनः ॥
तेषां चरित्रं वक्ष्यामि शृणुष्वैकमना द्विज ।

सूतः—(शं. सं. उप–५६)

अतः परं प्रवक्ष्यामि गुरुद्रव्यापहारिणः ॥
यां गतिं प्राप्नुवन्त्येते तां कथां [1]शृणुतादरात् ।
नन्दीश्वरः पुनः प्राह शतानन्दं तदा मुनिम् ॥
शृण्वतोस्तत्र सविधे ब्रह्मविष्णवोः [2] शिलादजः ।
शतानन्द महाप्राज्ञ गुरुद्रव्यापहारिणः ॥
एतेषां नरकाभ्याशे पच्यन्ते कालमक्षयम् ।
गौडदेशे महीभागे पुरी गौडीति विश्रुता ॥
वज्रपालाभिधस्तत्र सार्थवाहो वणिक्पतिः ।
[3]पुण्यज्ञानेन संपन्नः सूर्यपूजापरायणः ॥
प्रत्यहं पूजनं कुर्वन् कृत्वा वेदिं मृदा शुभाम् ।
नमस्करोति देवाय सवित्रेऽभ्यर्च्य सूनकैः ॥
मृदा कृतां समुद्भृत्य वेदिं पूर्वस्थितां पुनः ।
इष्टकाभिः स निर्मातुमियेष वणिगादरात् ॥
[4]तत्पुरे निर्मितास्तेन कुत्रापि वणिजेष्टकाः ।
लेभिरे नैव सर्वत्र गताश्च तिथयोऽथ सः ॥
तत्र गौडेश्वरस्यैव पूजकस्य महात्मनः ।
तद्गृहे[5]गुरुसन्तानसमुद्भूतस्य वै तदा ॥
तत्पूरुषाख्यस्य गुरोर्मठे शैवद्विजस्य वै ।
देवपूजालयं कर्तुं तेन संपादितेष्टकाः ॥
श्रुत्वा प्रसङ्गतो वैश्यः पप्रच्छ पुरुषेण ताः ।
यदा नैच्छत्स वै दातुं प्रेषिताश्च पणाः पुनः ॥

---

[1] वच्मि सादरम्–पु.पा. [2] शिवादयः.–पु.पा. [3] पुण्यवानतिसम्पन्नः–पु.पा.
[4] तत्पुरेऽन्विष्यता तेन–पु. पा. [5] गिरि–पु. पा.

ततोऽपि नैच्छत्स गुरुर्वणिक्तं प्राप्य पृष्टवान् ।
प्रत्याख्यातः पुनः सोऽपि [1]शुचा स्वगृहमाययौ ॥

प्रत्याख्यातः स्वयं [2]प्राप्तोऽप्यहमप्यनुचिन्तयन् ।
[3]एकस्मिन् समये राज्ञो वैद्यः [4]सौहरिराख्यया ॥

वैश्यस्य निकटं [5]प्राप्य सीदत्तस्य क्रियापरः ।
पणार्थी तेन स वणिक् प्रोवाच बहुधा शुचन् ॥

इष्टकाः प्रार्थिता विद्वन् गुरोस्तत्पुरुषाभिधात् ।
न लब्धाश्च ततो मानो भग्नो मे भिषगुत्तम ॥

तेन खेदवशं प्राप्तः कुत्राप्येव[6]मभून्मम ।
स तु वैश्यस्तमाश्वास्य स्वयं यातोऽन्तिकं गुरोः ॥

तमिष्टकास्ताः पप्रच्छ वणिगर्थे भिषक्पतिः ।
प्रत्याख्यातः स तेनापि मत्सरग्रस्तमानसः ॥

आश्वास्य वणिजं वैद्यः श्वः प्रातः पश्य मे बलम् ।
सर्वास्ता नाशयाम्येव व्यर्थमेव गुरोर्गृहात् ॥

प्रतिज्ञाय गतो वैद्यः परश्वो राजवेश्मनि ।
गजस्य गद उत्पन्नो महाव्राजप्रियस्य वै ॥

[7]तदाहूय नृपो वैद्यं हस्ती रोगेण पीड्यते ।
विनश्यति न सन्देहश्चिकित्सा न कृता यदि ॥

[8](इत्यब्रवीत्तदाहूय भिषक् प्राह स्म हस्तिपम् ।)
वचसा मम सद्यस्त्वमिष्टकास्समुपानय ॥

चूर्णैस्तासां तथान्यैश्च मिश्रितैरोषधान्तरैः ।
कृतैस्तु [9] वटकैर्हस्ती मुक्तरोगो न चान्यथा ॥

इष्टकाश्च गुरोर्गेहे [10]तत्पुरुषाख्यस्य सन्ति वै ।
अद्यैवानय राज्यां त्वं सद्यो हस्ती सुखी भवेत् ॥

---

[1] शोचन्–पु. पा. [2] प्राप्तोऽप्यहमित्यन्व–पु. पा. [3] एतस्मिन्–पु. पा. [4] सौभरि–पु. पा. [5] प्राप सुदत्तस्य–पु. पा. [6] मभून्न मे – पु. पा. [7] आहूय हस्तिपं वैद्यो–पु.पा. [8] पुराणे नास्ति. [9] पोट्टलैर्हस्ती–पु.पा. [10] पुरुषा–पु.पा.

इति तस्य वचः श्रुत्वा हस्तिपो मनुजैस्तदा ।
गुरोर्गेहादिष्टकास्ता नीत्वा चूर्णान्यकारयत् ॥
वैद्योऽपि [1] चान्यैरैश्वर्यैस्तच्चूर्णैरपि तत्क्षणम् ।
अचिकित्सद्गजं राज्यां सद्य एव ममार सः ॥
प्रातःकाले गजं राज्ञे मृतं प्रोवाच हस्तिपः ।
[2] (चिकित्सितश्च बहुधा राज्यां सौभरिणा नृप ।)
श्रुत्वा राजा गजं नष्टं विषसादातिखिन्नधीः ॥
प्रातस्तत्पुरु[3]षोऽप्येत्य चुक्रोशास्मै हृतेष्टकः ।
[4] पृष्टवान्वैद्य इत्यस्मात्सोऽपि मां सौहरिर्भिषक् ॥
मया संपादिता देवगृहार्थं ता नृपोत्तम ।
न दत्ता मत्सरेणैव तेन सर्वा विनाशिताः ॥
श्रुतवृत्तान्त इत्येवं राजा सम्यग्विचार्य तत् ।
ज्ञातवान् स शिवद्रोहकारणेन हतो गजः ॥
ततो हस्तिपकं क्रुद्धः शिरश्छेदमकारयत् ।
तदीयांश्चापि पुरुषान्राजा तत्पापशान्तये ॥
वैश्यमाहूय सर्वस्वमादायास्य तदा रुषा ।
चिच्छेद च शिरस्तस्य स्वयमेव नृपोत्तमः ॥
पृष्टवान्वैद्यमाहूय किं कृतं भवतेत्ययम् ।
[5] सौहरिः प्राह महता प्रयत्नेन चिकित्सितः ॥
तथापि नैव शान्तोऽस्य गदः सद्यो गजो हतः ।
तमाह नृपशार्दूलस्त्वं गुरुद्रोहमाचरः ॥
इष्टकापहृता तेन पञ्चत्वमगमद्गजः ।
त्वां चाद्य सूदयिष्यामीत्येवं वदति भूभुजि ॥
मन्त्री तमाह नृपतिं भवान् पूर्वं गदार्दितः ।
[6] तदानीमश्विनावेत्य चिकित्सां चक्रतुस्तव ॥

---

[1] चान्यैर्यैः कैश्चित्तच्चूर्णैरपि–पु. पा. [2] पुराण पाठः. [3] षोऽभ्येत्य–पु. पा.
[4] पूर्वेद्युः पृष्टवान्वैद्यः सोऽपि मां सौभरिर्भिषक्–पु. पा. [5] सौभरिः–पु. पा.
[6] तदाश्विनौ समभ्येत्य–पु. पा.

ताभ्यां पुनश्चाभिहितं [1] जिगीषुभ्यां दिवं प्रति।
इमं च सौहरिं प्रेक्ष्य विषये तव भूपते॥

येषां व्याधिसमुत्पत्तिस्तेषामावामिमं द्विजम्।
अधिष्ठाय [2] चिकित्सावेत्येवमुक्त्वा दिवं गतौ॥

अनेन कारणेनैव [3] सौहरिस्तु भिषग्वरः।
अनेन च कृता यत्र चिकित्सा व्याधिते जने॥

तत्र कोऽपि मृतो नैव गजमेकं विना नृप।
निगृहीतो यदप्येष तदा को वा चिकित्सकः॥

इति मन्त्रिवचः [4] शृण्वन्पुनः प्राह नृपश्च तम्।
[5] यद्ययं निगृहीतः स्यादीश्वरोऽस्ति चिकित्सकः॥

स एव प्रथमो [6]दैवो भिषगित्येव विश्रुतः।
त्वमेवैनं दुरात्मानं मन्त्रिञ्छिक्षय मा चिरम्॥

अविचार्य शिवद्रोही मन्त्रिणा शिक्षितो भिषक्।
इष्टकाभिस्ततो राजा सौवर्णाभिर्गुरोः पदे॥

संभाव्य प्रार्थयामास क्षमस्वागो ममाधुना।
प्रणनाम गुरुं भक्त्या राजा प्रीतस्तदा गुरुः॥

राजन्नुत्तिष्ठ चोत्तिष्ठेत्येवं वदति वै गुरौ।
पुष्पवृष्टिरभूत्तत्र देवदुन्दुभिनिस्वनैः॥

तदैत्य ब्रह्मविष्णू तमूचतुर्नृपसत्तमम्।
भवान्नीतिपरो राजन्नावाभ्यामिष्टमर्थय॥

[7]ततः संप्रार्थयद्राजा नेष्टो मेऽन्यो वरः प्रभू।
मम देशे गदो मास्तु जनेष्वपि कदाचन॥

अयमेव वरो मह्यमस्त्वेवमिति चोचतुः।
अन्तर्हितौ च तौ देवौ राजानुज्ञाप्य वै गुरुम्॥

---

[1] जिगंसुभ्यां–पु. पा. [2] चिकित्साव एवमुक्त्वा–पु. पा. [3] नैव शास्त्रो भिषग्वरः–पु. पा. [4] श्रुत्वा पुनः–पु. पा. [5] यद्यसौ–पु. पा. [6] दैव्यो भिषगित्येव हि श्रुतिः–पु. पा. [7] ततस्तौ प्रार्थ–पु. पा.

चकार राज्यं धर्मेण बहुकालमतन्द्रितः ।
[1](सराज्यस्यापि तस्यैव सुभिक्षो विषयोऽभवत् ।)
यैरिष्टका हृताः पापैस्ते सर्वे निरयं गताः ॥

[2] बाध्यन्तेऽत्रैव चाद्यापि तेषां नैव तु निष्कृतिः ।
[3] सुराजा यत्र तत्रैव सुभिक्षो विषयो भवेत् ॥

पूर्वोक्तनिरयाणां च निकटे श्रूयते रवः ।
तदेतेषामिति प्राह शतानन्दं शिलादजः ॥

श्रुत्वा [4]शिलादजः सर्वं शतानन्दो भयार्दितः ।
तदानीमभवत्तूष्णीं पुनः शंभुमचिन्तयत् ॥

सूतः—(शं. सं. उप-५७)

शिवभक्तधनं हृत्वा दूषयित्वा च तान् पुनः ।
तदेषां नरके घोरे पतितानां दुरात्मनाम् ॥

कथां प्रवक्ष्ये विप्रेन्द्राः शृणुध्वमवधानतः ।
सिन्धुदेशाधिपः कश्चित्करनामा महीपतिः ॥

सालानन्दपुरं शास्ति सर्वरत्नविचित्रितम् ।
उपास्य स महाराजा शक्रं वृत्रासुरान्तकम् ॥

लब्धवान् वज्रमतुलं सर्वशत्रु[5]निबर्हकम् ।
जित्वारातींस्ततः सर्वान्राज्यं चक्रे भयं विना ॥

तदा जितेषु रिपुषु मधुनामा महीपतिः ।
असुरेन्द्रं महासत्वमुपास्य चिरकालतः ॥

मेलयित्वासुरान् कांश्चिन्महाबलपराक्रमान् ।
रुरोध चास्य नगरं महासालं महाधनम् ॥

[6]तदानन्तमवापायं विचारं करभूपतिः ।
विजयाख्यो वसत्यस्य निकटे भटपुङ्गवः ॥

---

[1] पुराणपाठः. [2] बाध्यन्तेऽद्यापि ते सर्वे तेषां–पु. पा. [3] पुराणे नास्ति.
[4] शिलादजात्सर्वं–पु. पा. [5] निबर्हणम्–पु. पा. [6] तदात्यन्त–पु. पा.

स तु प्राप्य करं भूपमब्रवीद्वचनं तदा ।
मास्तु भीतिर्महाराज विजये मयि तिष्ठति ॥
उपास्यते मया नित्यं नृसिंहः सर्वशत्रुहा ।
तत्प्रसादान्ममाग्रे कः स्थातुं शक्नोति मानवः ॥
इत्युक्त्वा निर्ययौ शीघ्रं योद्धुमेनं [1]मधुं बली ।
सस्मार नारसिंहं च सर्वशत्रुनिबर्हणम् ॥
आविरासीत्स भगवानारावेण समन्वितः ।
क्षणात्तानसुरान् सर्वान् [2]जघान घननिस्वनः ॥
मधुं च तं महासत्वं बुभुजे स हरिस्तदा ।
एवं हत्वा रिपून् सर्वान् क्षणादन्तरधीयत ॥
दृष्ट्वैतदद्भुतं राजा विजयं स्वभटं करः ।
पूजयामास नितरां देवबुध्या तदादितः ॥
तस्यात्मजः शूरनामा चक्रे दौष्ट्यं तदा भृशम् ।
सोऽयं कस्मिन् दिने वेश्यागमने लालसस्तराम् ॥
[3]तद्ग्रामे तु हि धर्माख्यः शूद्रो वेश्यारतः सदा ।
भस्मरुद्राक्षसंपन्नस्तस्यां सक्तोऽय[4]मप्रभः ॥
धर्मस्य वस्त्रं वेश्यायां ज्ञात्वा [5]वेश्यास्वमप्ययम् ।
स्वयं धृत्वा ययौ तूष्णीं दुष्टः शूरो यतस्तराम् ॥
न ददौ प्रार्थितस्तेन बहुधापि दुरात्मवान् ।
प्राहैतद्द्विजयस्यायं शूरचेष्टां च तत्पितुः ॥
सोऽप्युपेक्षां चकारायं विजयो मूढचेतनः ।
तदा कोपाकुलो धर्मो भूतिरुद्राक्षधारकः ॥
राजानं करनामानं प्राप्यैतच्च जगाद ह ।
ध्रियते च मया नित्यं भस्म सर्वाघनाशनम् ॥
रुद्राक्षाणि च भूरीणि ध्रियन्तेऽहर्निशं मया ।
तन्मदीयं भवान् भूप वस्त्रं शूरहृतं कृतिन् ॥

---

[1] महाबलं–पु. पा. [2] चखाद–पु. पा. [3] तद्ग्रामवासी धर्माख्य. शूद्रो यस्त्र प. पा. [4] मप्यहो–पु. पा. [5] वेश्यास्तमप्ययम्–पु. पा.

आदाय दातुं पुण्यात्मञ्छिवभक्तो [1]यथार्हति ।
शिवभक्तधनं केन वापहर्तुं च शक्यते ॥

तस्य तद्वचनं श्रुत्वा तथेत्युक्त्वा महीपतिः ।
विजयं तं तदाहूय राजा प्राह वचः कटु ॥

शिवभक्तस्य वसनं पुत्रेण हृतमात्मनः ।
दापयैनं महामूढ नोपेक्षां कर्तुमर्हसि ॥

इति राज्ञो वचः श्रुत्वा [2]पुनश्च विजयोऽब्रवीत् ।
शिवभक्तो न चैवायं दासीगन्ता निरन्तरम् ॥

[3] का वास्य भक्तिर्देवेशे शङ्करे [4]स्यात्खलात्मनः ।
कथं वा भस्मरुद्राक्षधारणेन शिवप्रियः ॥

[5] (इति तस्य वचः श्रुत्वा नृपः प्राह पुनर्वचः ।
न पूज्यते शिला किं वा लिङ्गभावेन कल्पिता ॥

न नमस्क्रियते सर्वैर्विद्वद्भिर्दैवतैरपि ।
तद्वद्विभूतिरुद्राक्षधारणेनैव केवलम् ॥

पूज्यते मनुजैः सर्वैः कायवाङ्मनसैरपि ।
यो वा को वा नरस्तस्मान्मुक्त्वा जल्पनमीदृशम् ॥

प्रयच्छ वस्त्रमादाय पुत्रहस्तात्त्वाधुना) ।
इति कोपाकुलो राजा तमाह वचनं कटु ।
पुनश्च प्राह वचनं धिक्कृत्यैनं दुराशयम् ॥

त्वमेव त्वत्सुतं दुष्टं भर्त्सयन् कटुवाङ्मयैः ।
[6]तद्वा पयसि मूढात्मा ज्ञातवानहमप्यतः ॥

न दापयसि तस्मात्त्वं गच्छ गच्छ ममान्तिकात् ।
इत्युक्त्वा प्रेषयित्वैनं भर्त्सयन्वचनैर्नृपः ॥

तत्सुतं शूरना[7]मानमाह तत्क्रोधविह्वलः ।
त्वया दुरात्मन्वसनं शिवभक्तस्

---

[1] यतोऽर्हति–पु. पा. [2] नृपं प्राहपुनर्वचः–पु. पा. [3] क वास्य–पु. [4] सकलात्मनाम्–पु. पा. [5] पुराणपाठः. [6] न दापयसि–पु. पा. [7] म क्रोध–पु. पा.

शिवद्रोही ततस्त्वं तु वध्य एवाविचारतः ।
अविचार्य शिवद्रोही वध्य इत्युच्यते बुधैः ॥

इत्युक्ता[1] तस्य पुरतः शशापैनं महीपतिः ।
अन्यथा तु शिवद्रोहो मम चेति विचारयन् ॥

तद्दृष्ट्वा तत्पिता दुःखाद्विजयः[2] कोपिनां वरः ।
धर्मं नृपान्तिकासीनमवमत्य दुरात्मवान् ॥

निर्ययौ स्वगृहं वाक्यैर्दूषयन् परुषैरमुम् ।
तच्छ्रुत्वा स महीपालः कोपाकुलितमानसः ॥

पुत्रं मुक्त्वा शिवद्रोहनिरतं दुष्टचेतसम् ।
वाग्दूषणं करोत्येष [3]महापापादुराशयः ॥

पुरतः शिवभक्तस्य ममेदानीं भयं विना ।
तस्मादयं च पापिष्ठो वध्य एवाविचारतः ॥

विचार्य मनसा चैवमानयामास [4]तद्गृहात् ।
अवरुध्य गृहं तस्य महाधनमनुत्तमम् ॥

ततः समागतः सोऽयं कोपेन महता युतः ।
राज्ञो निकटमागत्य नृसिंहं मनसा स्मरन् ॥

तदाविरासीत्सहसा नृसिंहः कोपविह्वलः ।
महाक्ष्वेलारवैरुग्रैर्बधिरीकृतदिङ्मुखः ॥

तमेव [5]हतवान् पापं विजयं दुष्टमानसम् ।
निन्द्या[6]मास च यतः शिवभक्तं शिवप्रियम् ॥

तस्मात्त्वामधुना [7]पापिन् हरिष्यामि न संशयः ।
इत्युक्त्वा तं गृहीत्वाशु पाणिभ्यां स हरिस्तदा ॥

नृपस्य पुरतः स्थाप्य [8]चोत्पाट्यैनममारयत् ।
ततः प्राह नृपं वीक्ष्य नारसिंहो महाबलः ॥

---

[1] स्वस्य पुरतः शशासैनं-पु. पा. [2] कोपितान्तरः-पु. पा. [3] महापापी दुराशयः-पु.पा. [4] तं गृहम्-पु.पा. [5] भर्त्सयन्-पु.पा. [6] मासिथ यतः-पु. पा. [7] पापिन् हनिष्यामि-पु. पा. [8] चोत्पाट्यैन-पु. पा.

शिवद्रोहं विना राज्यं निष्कण्टकमरिन्दम।
शाधि न्यायेन मार्गेण [1]शासयद्रोहिणस्तथा॥

यदा मां स्मरसि [2]क्षिप्रं तदागत्य तवान्तिकम्।
संहरिष्यामि शत्रूंस्ते दास्यामि च तवेप्सितम्॥

निहतः शङ्करद्रोही मया भक्तोऽपि मामकः।
पालयञ्छिवभक्तांश्च सुखेन वस भूपते॥

इत्युक्त्वान्तर्दधे शीघ्रं नृसिंहस्तत्र भूसुराः।
ततः स्वभवनं प्राप्य राजा तुष्ट्या समन्वितः॥

धर्मं तं बहुभिर्वस्त्रैः प्रीणयित्वा धनैरपि।
प्रेषयामास पुण्यात्मा दत्वा वस्त्रं तदीयकम्॥

तेन दोषेण विजयं शूरं तत्सुतमप्यहो।
नरकेऽस्मिन्महाघोरे पीडयन्त्यधुना भटाः॥

श्रुत्वास्य चरितं घोरं शतानन्दो महामुनिः।
पुनरस्मिन्महाघोरे पीडितान्पापकर्मिणः॥

पप्रच्छ नन्दिनं साक्षात्सर्वज्ञं करुणाकरम्।

(शं. सं. उप. ५८)—

अतः परं प्रवक्ष्यामि शिवनिन्दापरात्मनाम्॥
भस्मनिन्दापराणां च गुरुनिन्दापरात्मनाम्।

रुद्राक्षनिन्दकानां च [3]रुद्रभक्तावमानिनाम्।
तेषां वक्ष्याम्यहं [4]घोरां नरकेष्वपि यातनाम्॥

श्रुण्वन्तु परिहाराय मुनयः शंसितव्रताः।
ज्योनकाख्ये महादेशे पुरमस्ति तदाख्यया॥

ज्योनकाख्यं पुरं तत्र राजा परमधार्मिकः।
कलाधर इति ख्यातः कलाधर इवापरः॥

---

[1] शासयन्द्रोहि–पु. पा. [2] क्षिप्रात्–पु. पा. [3] रुद्रभक्तापहारिणाम्–पुं. पा. रुद्रभक्तापकारिणाम्. [4] घोरं–पु. पा.

विद्वद्भिर्ब्राह्मणश्रेष्ठैः सह कालं नयन्नसौ ।
धर्मेण पालयामास पृथिवीं पृथिवीपतिः ॥
तस्मिन् कदाचिदास्थानमण्टपस्थैर्महात्मभिः ।
कविभिः पण्डितैः सिद्धैर्योगिभिर्यतिभिश्च वै ॥
कथाप्रसङ्गे संवृत्ते चान्योन्यस्य द्विजन्मनाम् ।
कदाचित्तत्पाशुपत(ति)भारत्याख्यो यतीश्वरः ॥
राजानं वीक्ष्य हृष्टात्मा कलाधर[1]मसौ यतिः ।
श्रुणु राजन् परं श्रेयः श्रेयसां सकलात्मनाम् ॥
शिव एव सदोपास्यो ज्ञेयो ध्येयश्च मुक्तये ।
स एव हि परं ब्रह्म [2]परतत्त्वं परं नृप ॥
परं ज्योतिः परं धाम शिव एव परायणम् ।
कारणं कारणानां च दैवतानां च दैवतम् ॥
प्रणमन्तीह ये देवं ते कृतार्था न चेतरे ।
तेषामेव परा मुक्तिर्भोगस्तेषां महात्मनाम् ॥
अष्टैश्वर्यप्रसिद्धिश्च सार्वभौमत्वमद्भुतम् ।
स्वर्गाधिपत्यं ब्रह्मत्वं [3] वैष्णवं चापि भूपते ॥
तदानीमपरो वासुदेवभारतिराख्यया ।
असहिष्णुः शिवा[4]धिक्यमाह राजानमाह्वयत् ॥
शिवोऽसौ तामसो रुद्रश्चर्मास्थिशवभस्मभृत् ।
श्मशाननिलयोऽत्यर्थं भूतप्रमथसंवृतः ॥
सदा भोगरतो लोके स तु किं ब्रह्म भूपते ।
भुजङ्गाभरणोऽत्यर्थं भोगमोक्षप्रदः स किम् ॥
इति निन्दापरे वासुदेवभारतिमुण्डिनि ।
कर्णौ पिधाय वै पाशुपतभारतियोगिराट् ॥
अज्ञात्वा शिवमाहात्म्यमुक्तमेतेन भिक्षुणा ।
तत्तत्संहारनष्टानां विष्णूनां ब्रह्मणामपि ॥

---

[1] मभाषत–पु. पा. [2] तत्त्वं च परमं नृप.–पु. पा. [3] विष्णुत्वं चापि–पु. पा.
[4] धिक्यं महाराजान–पु. पा.

तेषामस्थीनि भस्मानि कपालानि महेश्वरः ।
भविष्यद्वर्तमानानां स्वाक्षयत्वं प्रबोधयन् ॥

अनित्यत्वं च वै तेषां धत्ते मुग्धेन्दुशेखरः ।
शवानां शयनं प्रोक्तं श्मशानमिति सूरिभिः ॥

सर्वं च सर्वसंहारे श्मशानमिति कीर्तितम् ।
तत्रैक एव वै रुद्रो नृत्यत्यम्बिकया सह ॥

अतः श्मशाननिलयः प्रोक्तः संहारकृद्विभुः ।
अज्ञत्वा शिवमाहात्म्यं लोको याति भवाभवम् ॥

इत्युक्त्वा पुनराहैनं शिवभक्तो यतीश्वरः ।
[1] यस्य भक्तिः शिवे स्यात्स ब्राह्मणो नात्र संशयः ॥

एकदण्डास्त्रिदण्डाश्च ये च भक्ता हरे तव ।
ते वै पाषण्डिनः सन्तु [2] भाषणान्नरकप्रदाः ॥

तस्य त्वं प्रथमं पात्रं शापस्य परिमोहितः ।
[3] कथने नार्ह एव त्वं भस्मरुद्राक्षवर्जितः ॥

त्वया संभाषणाद्दोषो महानस्ति न संशयः ।
पुरा दक्षेण संभाष्य देवाश्च ऋषयोऽमलाः ॥

जाताः शिवद्रुहः सद्यो दण्डिताश्च महैनसः ।
यस्य फाले न भस्माङ्गे नास्ति रुद्राक्षमालिका ॥

तं [4] ब्राह्मणो मतिप्राज्ञो वर्जयेच्छ्वपचं यथा ।
तस्मात्त्वद्दर्शने दोषो महान् संभाषणेऽपि च ॥

तदानीं तत्र सदसि ब्राह्मणो ब्रह्मकेसरी ।
संवीक्ष्य तं पाशुपतभारतं प्राह मोहितः ॥

किं भस्मना [5] धृतेनास्य रुद्राक्षतरुसंभवैः ।
बीजैर्धृतैर्विमुक्तिः स्याद्विना ज्ञानं वृथेरितम् ॥

---

[1] भवाञ्छापहतः पूर्वं ब्राह्मणो नात्र संशयः. [2] दर्शनान्नरक–**पु. पा.** [3] कत्थसे त्वथ एव त्वं. [4] ब्राह्मणमपि प्राज्ञो. [5] धृतेन स्यात–**पु. पा.**

लिप्तेन भस्मना किं स्याद्धृतैर्बीजैस्तरूद्भवैः ।
एतादृशानि वाक्यानि [1] राजास्थाने [2] ब्रवीषि किम् ॥

[3] तमब्रवीत्पाशुपतभारतियतिसत्तमः ।
वेदागमपुराणानि श्रुतानि ब्रह्मबन्धुना ॥

नैव तेनैवमुक्तानि ज्ञानिनोऽज्ञानिनोऽपि वा ।
पापिष्ठस्यापि वै मुक्तिर्भस्मरुद्राक्षधारिणः ॥

इति सर्वत्र वेदेषु पुराणेष्वागमेषु च ।
बहुधाभ्यस्यते लोके सर्वैरपि महात्मभिः ॥

तापसैश्च धृतं भस्म तथा रुद्राक्षमालिकाः ।
शिवेन सदृशा लोके भस्मरुद्राक्षधारिणः ॥

पापिष्ठा अपि ते पूतास्तदन्ये पापिनः स्मृताः ।
[4] एवमुक्तः स वै ब्रह्मकेसरी ब्राह्मणाधमः ॥

पुनरेव कुतर्कोक्तिं प्रोवाच सदसीदृशीम् ।
ततो दृष्ट्वा पाशुपतभारतिर्भूपतिं तदा ॥

प्राहास्माभिः कृते शास्त्रप्रसङ्गे पृथिवीपते ।
एताभ्यां तु कुतर्कोक्तिरुच्यते सन्निधौ तव ॥

तमाह तस्य वै शिष्यः स सन्न्यासी गुरोऽधुना ।
किं फलं [5] लभते नात्र गच्छावावामितोऽधुना ॥

[6] उक्त्वा पुनः पाशुपतभारतिः शिष्यमब्रवीत् ।
शिवद्रोहितमावेतौ द्वेषेणाभ्यां च नः किमु ॥

हानिः केति [7] ततश्चाह शिष्यः किं वात्र नः फलम् ।
गच्छतां नरकं स्वर्गं गच्छावावां प्रभोऽधुना ॥

वदन्तमेवं सन्न्यासी [8]सिद्धोऽपि शिवसंमतः ।
अधुनैवं च कथिते ह्यवमाभ्यां नृपाङ्गणे ॥

---

[1] राजस्थाने. [2] वदेश्च किम्. [3] तं चाह योगी पाशुपतभारतिः. [4] एवमुक्तेऽपि वै. [5] कल्पेनात्र. [6] उक्ते. [7] तदा प्राप. [8] सोऽन्धोऽपि.

उचितं नैव गमनमुत्तरादुत्तरं ब्रुवे ।
इत्युक्ते सति वै शिष्यो दुरात्मातीव कोपनः ॥
भगवन्नत्र तिष्ठ त्वं गच्छमीति विनिर्गतः ।
तं ब्रह्मकेसरी प्राह शिष्येणैव तवोत्तरम् ॥
दत्तं विनिर्गतं चैव तवैको मार्गदर्शकः ।
नेत्रे गते मतिश्चापि गता तव यतीश्वर ॥
तदानीं तत्र परमशान्ताख्यो ब्राह्मणोत्तमः ।
शिष्योऽहमस्य तिष्ठामि दर्शयिष्यामि पद्धतिम् ॥
दुरात्मा गच्छतु शिवद्रोही शिष्यो न चास्य सः ।
अहं शिष्योऽस्मि ते ब्रह्मन् त्वं वै साक्षाच्छिवः स्मृतः ॥
शुश्रूषां ते करिष्यामि प्रत्यहं ज्ञानचक्षुषः ।
अधीतवेदशास्त्रोऽहं भस्मरुद्राक्षधार्यहम् ॥
योग्योऽस्मि तव शिष्यत्वे परिगृह्णातु मां भवान् ।
इत्यन्तिकस्थं पाशुपतभारतिर्ब्राह्मणं तदा ॥
कराभ्यां च स्पृशन्नङ्गं जग्राह च करं तदा ।
शिवभक्तस्य पुत्रस्त्वं शिवभक्तो विशेषतः ॥
इति शंसति तं तत्र [1]यतीशे नृपतेः पुरः ।
[2] भद्राख्यो ब्राह्मणः प्राह न जानासि यतिन्नमुम् ॥
वेश्यापतिरसौ विप्रो बालकोऽसि यतीश्वर ।
त्वमित्युक्ते पुनश्चाह भूतिरुद्राक्षधारिणः ॥
शुद्धाः सर्वत्र पूतास्ते तेषां दोषो न विद्यते ।
शिवभक्तस्य वै निन्दा [3]त्वयाद्य क्रियते द्विज ॥
राजानं प्रेक्ष्य पाशुपतभारतिः प्राह तं तदा ।
[4] शिवनिन्दारतं वासुदेवभारतिमद्य वै ॥
ब्रह्मकेसरिणं भस्मरुद्राक्षाणां च निन्दकम् ।
शिष्यं मम गुरुद्रोहरतं वसुसमाह्वयम् ॥

---

[1] यतीशेऽत्रान्तरे द्विजा. [2] भद्राख्यः प्राह सन्न्यासी न त्वं जानास्यमुं शृणु.
[3] त्वयात्र. [4] शिवनिन्दापरं.

निन्दकं शिवभक्तस्य भद्राख्यं नृपसत्तम ।
शिक्षयाशु महीपाल चतुरस्त्वं न चेदहम् ॥

शिक्षामि किं वदेदानीमिति वादिनि योगिनि ।
अब्रवीत्तं महीपालः प्रज्ञाचक्षुष[1]मञ्जवत् ॥

स्वमहिम्नाद्य वै स्वामिन् लब्धचक्षुः क्षणेन वै ।
शिक्षयैतानिति क्षिप्रं सर्वे पश्यामहे वयम् ॥

उक्तक्षणे पाशुपतभारतिः शिववल्लभः ।
स्वमहिम्ना लब्धचक्षुः क्रोधेन महतावृतः ॥

अद्यैतेषां चतुर्णां तु मूर्धस्वशनयः क्षणात् ।
पतन्तु पश्यतो राज्ञः पुरस्ता[2]दवदद्यतिः ॥

हतास्तेऽशनिपातेन चत्वारोऽपि क्षणेन वै ।
पुनश्चाह स सन्नद्धासी राजानं भीतमास्थितम् ॥

भवताङ्गीकृता राजञ्छिवद्रोहपरा जनाः ।
यतस्ते मद्विरा नैव शिक्षिताश्च महैनसः ॥

ततो मम तु शापेन खरो भव नृपाधुना ।
भीतभीतोऽथ नृपतिः प्रणम्य यतिसत्तमम् ॥

कृताञ्जलिपुटो मूर्ध्नि व्यजिज्ञपदमुं यतिम् ।
आज्ञा नानुष्ठितं स्वामिन् [3]तितिक्षा नो ममेदृशी ॥

प्रणिपातावधिः कोपो महतामिति हि [4]श्रुतम् ।
तमाह क्रोधताम्राक्षः पुनः सन्नद्धासिपुङ्गवः ॥

प्रायश्चित्तं श्रुतौ दृष्टं स्मृतावपि महैनसाम् ।
शिवद्रोहप्रसङ्गस्य न कुत्रापि च निष्कृतिः ॥

मया किमिह कर्तव्यमदृष्टं त्वीदृशं तव ।
भवतो मोचनं नास्ति नृप जन्मनि जन्मनि ॥

---

[1] माह तु, मानमन्. [2] दशपद्यतिः—पा. [3] तितिक्ष्वागो ममेदृशम्, क्षमस्वागो ममेदृशम्. [4] श्रुतिः.

इत्युक्त्वा निर्जगामाशु तदा पाशुपतो यतिः।
तथैव तस्य शापेन राजा पापेन तेन वै॥

गार्दभीं योनिमापन्नश्चत्वारोऽशनिना हताः।
[1]महात्मनां कृतं ह्येनो नैव [2]नश्यति कुत्रचित्॥

यमदूतैश्च ते भूयश्चत्वारोऽशनिना हताः।
अष्टाविंशतिकोटीषु नरकेषु च पातिताः॥

अधोमुखोर्ध्वपादास्ते बाध्यन्ते दण्डपाणिभिः।
श्रोत्राक्षिनासिकास्येषु चरद्भिः क्रिमिणां कुलैः॥

सन्ततं तुद्यमानाश्च निरुच्छ्वासा निरन्तरम्।
पारं न दृश्यते तेषां कल्पकोटिशतैरपि॥

सूतः—(शं. सं. उप. ५९)

अतः परं प्रवक्ष्यामि पुनरन्यां कथां द्विजाः।
श्रुणुध्वं श्रद्धया यूयं मन्मुखान्मुनिपुङ्गवाः॥

कलिङ्गाख्ये महीभागे कटकाख्यं पुरं महत्।
तत्र राज्ञः कुमारोऽभूद्विरागो [3]वीर्यनामवान्॥

[4]स्वतन्त्रो मन्त्रिपुत्रस्तु सुनन्दाख्यः पुरोधसः।
सुकुन्दो द्वारपालस्य चत्वारोऽन्योन्यरक्तयः॥

सर्वेऽपि समकालं ते सर्वविद्यासु शिक्षिताः।
स्वकर्मनिरता नित्यं दानधर्मकृतोद्यमाः॥

तीर्थयात्रामतिस्तेषां कदाचिदुदभूद्द्विजाः।
पितृभिश्च कृतानुज्ञाः संगृह्य च धनं बहु॥

कटकादन्तिके ग्रामं प्रापुस्ते सुपुराभिधम्।
तत्रेश्वरालये शंभोः सुरेश्वरमहेशितुः॥

तां रात्रिं वस्तुकामास्ते समालोच्य परस्परम्।
तां रात्रिं न्यवसद्राजकुमारो मन्त्रिनन्दनः॥

---

[1] महात्मसु. [2] जीर्यति. [3] नाम वीर्यवान्. [4] सुतन्त्रो.

[1] शिक्षागिरेर्मठे वासं चकार शिवयोगिनः ।
पुरोहितसुतश्चापि सुनन्दोऽपि मुदान्वितः ॥
विबुधाख्यस्य भक्तस्य शैवस्य न्यवसद्गृहे ।
द्वार्स्थपुत्रस्तदारामे निवासमकरोत्स्वयम् ॥
भुक्त्वा ब्राह्मणगेहेषु तीर्त्वा तां च निशां पुनः ।
अन्येद्युरपरं ग्रामं प्रस्थिताः काल्य एव ते ॥
मध्येमार्गं मुनिश्रेष्ठं गौतमं ददृशुश्च ते ।
चत्वारोऽपि च तं दृष्ट्वा प्रणम्य विनयान्विताः ॥
आचख्युर्निजवृत्तान्तं तीर्थयात्राकृतं तदा ।
तानालोक्य मुनिः प्राह न युष्माकं प्रसिध्यति ॥
तीर्थयात्रा यतो यूयमद्य क्षीणायुषो भृशम् ।
अज्ञात्वापि शिवद्रोहो युष्माभिर्गर्वितैः कृतः ॥
सायंकालेऽत्र युष्माकं चतुर्णां पञ्चता ध्रुवम् ।
श्रुत्वाऽपृच्छन्मुनेऽस्माभिः शिवद्रोहोऽत्र कः कृतः ॥
वद येन क्षयं यातमायुर्गौतम देशिक ।

गौतमः—

शृणु राजकुमारात्र पूर्वेद्युर्देवमन्दिरे ॥
त्वया निस्सारिताः केशा दूषिता संनिधिश्च तैः ।
मन्त्रिपुत्रेण च मठे ताम्बूलष्ठीवनं कृतम् ॥
पुरोहितसुतेनापि शिवभक्तगृहे कृतम् ।
गण्डूषं तत्समाक्रान्तं पादेन शिवयोगिना ॥
[2] सङ्गः कृतः शिवारामे द्वार्स्थपुत्रेण मोहतः ।
उद्यानं दूषितं तेन श्लेश्मणा ष्ठीवनेन च ॥
[3] स्मृतिपूर्वं कृतं सर्वैः पूर्वेद्युर्मुनिनेरितम् ।
किमनेनेति जग्मुस्ते नमस्कृत्य मुनीश्वरम् ॥

---

[1] भिक्षा. [2] अन्धं कृतं. [3] स्मरन्तोऽपि कृतं

तस्मिन्नेव क्षणे राजपुत्रस्याभूच्छिरोव्यथा ।
मन्त्रिपुत्रो गले रुद्धो मृत्युनेव गदेन वै ॥
पुरोहितसुतस्यापि रसना गलिता बहिः ।
द्वास्थपुत्रस्य नासाग्रात्पपात रुधिरं बहु ॥
मृताः सर्वे क्षणेनैव नरके च निपातिताः ।
राजपुत्रस्य शिरसि सीसद्रवमवाकिरन् ॥
खण्डशश्च शिरश्छित्वा [1] निचघ्नुश्चासिधारया ।
एवमादिभिरन्यैश्च पीडयन्ते यमकिङ्करैः ॥
ताम्रद्रवं च जिह्वायां तप्तमापूरितं पुनः ।
गण्डूषणं कृतं येन तस्य दन्ताः समुद्धृताः ॥
नासिकायां च नाराचाश्चान्यस्यापि निखातिताः ।
एवमादिभिरन्यैश्च यथार्हं यातनाशतैः ॥
पीडयन्ते स्म सदाकालमहो कष्टं हि दुष्कृतम् ।
एतेषां पूर्वजाश्चापि पितृमातृपितामहाः ॥
इदानीमपि नैतेषां निष्कृतिर्नरकालयात् ।
एवमेवमनेकेऽपि सन्ति तेऽपीदृशीं दशाम् ॥
प्रापुरेव न सन्देहः प्रसङ्गेनात्र पापिनः ।
श्रुत्वैतन्नन्दिनस्तस्माच्छतानन्दो मुनीश्वरः ॥
प्रणम्योवाच [2] भो नन्दिन्छ्रुत्वैतच्चरितं मम ।
शरीरं कम्पतेऽत्यर्थं मनश्चापि द्रवत्यथ ॥
देवाश्च विष्णुप्रमुखा एवमेव [3] तदोचिरे ।
तानुवाच ततो नन्दी ममाप्येवं तु वः किमु ॥
एतादृशानां पापानां प्रायश्चित्तं हि दर्शनम् ।
शिवस्येति तदा प्राप सर्वैरेतैः शिवान्तिकम् ॥
[4] तत्र देवादिदेवं च प्रणम्य परया मुदा ।
[5] स्तुतिं प्रचक्रुरित्येव ब्रह्मविष्ण्वादयोऽपि च ॥

---

[1] सिषिचुश्चाग्निधारया. [2] नन्दीन्द्र श्रुत्वै. [3] तथोचिरे. [4] तत्र देवं च देवीं च प्रणम्य. [5] स्तुतिं चकार सोऽप्येवं.

शतानन्दोऽपि स मुनिः प्रणनाम शिवं शिवाम् ।
शतानन्दमथालोक्य शिवः शीतांशुभूषणः ॥

भवता मुनिशार्दूल यद्यच्छ्रोतव्यमस्ति तत् ।
श्रुतं किल मुखादेव नन्दिनः प्रमथेश्वरात् ॥

इति ब्रुवन्तमीशानं शतानन्दो मुनीश्वरः ।
श्रुतमेव मया सर्वं त्वन्मुखादिव नन्दिनः ॥

ब्रुवन्नेवं कृतानुज्ञो निर्जगाम शिवान्तिकात् ।
ब्रह्मविष्ण्वादयो देवा विसृष्टाश्च पिनाकिना ॥

नन्दी चापि कृतानुज्ञो द्वारदेशं जगाम वै ।
तत्र तेनाभ्यनुज्ञाता ब्रह्मविष्ण्वादयः सुराः ॥

शतानन्दोऽपि भगवान् स्वं स्वं प्रापुरथालयम् ।
इति सूतान्मुनिवराच्छ्रुत्वाद्भुतकथामिमाम् ॥

प्रशशंसुस्तदा सूतं पुनः पुनरनर्गलम् ।

ऋषयः—(शं. सं. उप. ६०)

अज्ञानतः कृतं राजकुमाराद्यैः किलाधुना ॥

मदान्धैस्तत्फलं भुक्तं विचित्रनरकेषु किम् ।
महात्मभिश्च विद्वद्भिः शिवभक्तैः कृतं यदि ॥

अज्ञानात्कर्म यत्किंचिदपचारात्मकं मनाक् ।
तस्याप्यनुभवो दृष्टः श्रुतो वा भवता वद ॥

नरकेषु क्वचिद्वापि सूत सर्वज्ञ सुव्रत ।

सूतः—

अज्ञानाज्ज्ञानतो वापि भक्तैरपि महात्मभिः ॥

अपचारात्मकं कर्म यत्समाचरितं शिवे ।
तस्यैवानुभवो दृष्टो नान्यस्य पशुकर्मणः ॥

सोमशर्मा पुरा विप्रः शिवशर्मा च भूसुरः ।
तावुभौ सुमहात्मानौ सर्वज्ञौ च दृढव्रतौ ॥

एकदा देवसेवार्थं गतौ देवालयं प्रति ।
तत्र दृष्ट्वा लिङ्गमूर्तिं शिवं त्रिदशनायकम् ॥

प्रदक्षिणं तदा शंभोश्चक्रतुर्ब्राह्मणावुभौ ।
तदानीं [1]पुनरेकस्य दीपः शान्तोऽङ्गवायुना ॥

न दृष्टस्तेन सोऽन्येन दृष्टो नोक्तश्च तं प्रति ।
स्वयं वा न [2]चकारायं पुनर्दीपसमुद्भवम् ॥

निर्गतौ च यथापूर्वं कालेन विलयं गतौ ।
ताभ्यां या यातनाः प्राप्ता शक्यास्ता वर्णितुं न च ॥

पुनश्च पुण्यशर्मान्यः शिवभक्तः शिवालये ।
नाशोन्मुखं पुनर्दीपं यथापूर्वं चकार सः ॥

अङ्गुल्या तन्नखाग्रे तु तैलं किंचित्ससञ्ज वै ।
तेनापि नरके घोरे यातनां सेहिरे चिरम् ॥

अनन्तरं सारमेयः संजातो बहुधा चिरम् ।
तथा सुमतिसंज्ञोऽपि शिवयोगी जितेन्द्रियः ।
शिवार्थं प्रतिगृह्णाति भिक्षामन्यद्धनं बहु ॥

ददाति तद्धनं सर्वं शिवपूजादिकर्मसु ।
नारिकेलान् गृहीत्वायं तज्जलैः परमेशितुः ॥

कारयित्वाभिषेकं तदपिबत्सारमान्तरम् ।
तेनास्य नरके घोरे यातना समजायत ॥

स्कन्दालये घृतेनान्यो वैश्यो भक्तया दिने दिने ।
दीपानुद्दीप्य बहुधा कुर्वन् देवं प्रदक्षिणम् ॥

तत्राम्ल[3]शाकं सुबहु [4]विचित्य प्रत्यहं स्वयम् ।
तेनापि नरके [5]तीव्रे यातनां सेहिरे भृशम् ॥

[6](वज्रदन्ताभिधः कश्चिद्बधिरो योगिपुङ्गवः ।
देवालयं महत्पुण्यं निन्दितं पापिनान्तिके ॥

---

[1] पुनरेकेन. [2] चकारास्य. [3] शाखां. [4] विच्छिद्य. [5] तीव्रयातनां.
[6] णपाठः.

तत्र स्थितं यदेतेन बधिरेणापि सुव्रताः ।
अनुभूता पुराऽसह्या वज्रदन्तेन यातनाः ॥

नेत्रहीनोऽस्ति सन्न्यासी भारत्याख्यो मुनीश्वराः ।
निद्रापरं शिवाभ्याशे पादेनास्खलितो यतिः ॥

विलङ्घ्य दर्शयित्वा तं पापिनं परमेश्वरम् ।
जगाम तेन पापेन तीव्राः पीडाश्च सेहिरे ॥

तस्माज्जितेन्द्रियैश्चापि योगिभिश्च महात्मभिः ।
ज्ञानिभिश्च शिवद्रोहो नानुष्ठेयः कदाचन ॥

शिवालये तदा शंभोरपचारः कृतो यदि ।
अनुभूय फलं पश्चादन्तं मुक्तिश्च तादृशाम् ॥)

शिवद्रोहस्तु वै तस्मान्न श्रोतव्यो [1]विजानता ।
शिवद्रोहपराणां तु समीपेऽपि न संवसेत् ॥

इति सूतात्समाकर्ण्य मुनयः शंसितव्रताः ।
विस्मयं परमं गत्वा भयेन च चकम्पिरे ॥

परिहृत्य शिवद्रोहं तपांसि सफलानि नः ।
कथाः श्रुता यदेतेषां पापिनां श्रवणेन नः ॥

प्रायश्चित्तं तदेतस्य शिवपञ्चा[2]क्षरश्रुतिः ।
दध्युश्च हृदयाम्भोजे देव्या सह पिनाकिनम् ॥

सूतोऽपि वक्ता चैतेषां तत्पापविनिवृत्तये ।
दध्यौ शिवमुमाकान्तं वदन् पञ्चाक्षरीं मुदा ॥

आस्तेऽतिहृष्टहृदयस्तेषामेव तु सन्निधौ ।
पुनश्च पूजामाहात्म्यमपृच्छन् तं मुनीश्वराः ॥

इत्यादिबहुषु प्रोक्तं शिवद्रोहे समागते ।
शिव एव समुद्धर्ता नान्यस्त्राता महेश्वरात् ॥

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे शिवो न हि ।
तस्माद्गुरुमनुव्रज्य पूजनाद्यैः सुतोषयेत् ॥

---

[1] द्विजा यतः. [2] क्षरस्मृतिः.

गुरुवाक्योल्लङ्घनं तु न कदापि च कारयेत् ।
यद्यद्गुरोर्हितं कार्यं तत्तत्कृत्वा तु तोषयेत् ॥

कायेन मनसा वाचा गुरोर्हितमथाचरेत् ।
अहितं खलु यत्कार्यं नाचरेत्तत्कदापि वा ॥

निषिद्धमपि यत्कृत्यं भवेद्गुरुहिताय तत् ।
आचरेदेव धर्मोऽसाविति वेदान्तनिश्चयः ॥

पञ्चाक्षरजपे सङ्ख्या सङ्कल्पे कुण्ठिते सति ।
कालान्तरे पुनः सङ्ख्यासंकल्पं पूरयेद्बुधः ॥

संकल्पकुण्ठनं नैव कुर्याद्विद्वान् प्रयत्नतः ।
विभूतिधारणे यस्य वैकल्यं सहसापतेत् ॥

प्रयत्नेन पुनः कृत्वा नित्यं तन्वीत मानवः ।
भूतिधारणवैकल्ये भूतिरेव पुनः स्फुटम् ॥

अधिकारप्रदात्री स्यान्नाधिकारोऽन्यथा भवेत् ।
रुद्राक्षधारणे विद्वान्वैकल्यं यदि चाप्नवान् ॥

कालान्तरे पुनर्धृत्वा यजेत परमं शिवम् ।
वैकल्ये शिवधर्माणां तदनुष्ठानमेव हि ॥
पुनः पूरणमित्युक्तं मुनिभिस्तत्त्वदर्शिभिः ।

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठ-
शिवाचार्यकृते निगमागमसारसङ्ग्रहे क्रियासारे
एकत्रिंशोपदेशः

क्रियासारः संपूर्णोऽभूत् ॥ श्रीसाम्बशिवार्पणमस्तु ॥

अनुबन्धः

(प्रथमसम्पुटीयः)

अस्य ग्रन्थस्य प्रथमसम्पुटमुद्रणानन्तरमासादिताभिः
मातृकाभिः सह संयोज्य विवेचनेनोपलब्धानि पाठान्तराणि

अनुबन्धः

पृ.	प.	वाक्यानि
2	3	मैत्रीमासादयन्तीं
2	14	अनङ्गीकृतानङ्गदृक्
2	15	भुजङ्गभूषणवरो
2	18	निर्गतं शैवसिद्धान्तं
2	19	पूर्वाचारैरखिलनिगमैरागमैरुक्तमार्गाः
2	20	क्षुण्णास्तीक्ष्णैः
2	21	संक्षिप्योक्तैरकृतक
2	23	शैवानागमचोदितान्
2	23	रटन्तो वदन्
2	24	सूत्रचोदितमत
3	2	तान्निरस्य प्रदर्शये
4	10	शैवशब्दस्य सङ्कोचात्
4	21	द्वात्रिंशदुपदेशास्तु
10	17	तन्त्रवैषयकं
11	4	वीशब्देनोच्यते
11	6	वीशब्दो वा विकल्पार्थो
11	12	एकोत्तरशतं स्थलम्
12	8	वीरशैवसमाख्याताः
13	7	विस्तारितान्यपि
14	8	पञ्चब्रह्मस्वरूपकम्।
15	6	लिङ्गं च काष्ठं जनितं वृतं ब्रह्मेडितं परम्।
15	7	नीप्यं वार्धकं
15	14	कथ्यतेऽत्र यथायथम्।
15	12	तस्मान्माङ्गलिकावुभौ।
16	13	पूर्वकाण्डाविरुद्धोऽर्थः
17	10	दक्षेन्द्रियादि विहितो
21	17	देव अध्यास्ते परमेश्वरः।

पृ.	प.	वाक्यानि
21	18	सृष्ट्वादौ चन्द्रशेखरः
22	18	समन्वयात्तु तद्ब्रह्म धार्यं
23	6	वीरः शम्भुः समाख्यातः
23	7	प्रयान्ति ते
23	8	ये वीरशैवा लोकानां
23	23	वेदान्तप्रत्ययन्याय अंशांशि
24	6	अक्रियात्वाच्छिवस्य तत् ।
24	8	समन्वयनिरूपणात् ।
24	16	सच्छब्देन च किं ब्रह्म
24	20	सच्छब्देन परं ब्रह्म
24	22	तद्वाचकः स्मृतः
25	24	अतः सच्छब्दवाच्यं हि
27	2	अकारवाच्यविष्णोस्तद्योनित्वात्कारणात्मकम् ।
27	21	अप्ययो गतिसामान्यात् ब्रह्मण्येवेति निश्चितः ।
28	2	परमात्मेति निश्चितः ।
28	3	अभ्यासात्पक्षरूपकम् ।
28	5	आनन्दवल्लथां तत्प्राये भृगुदार्ढ्याय
29	22	तथाकाशस्तल्लिङ्गाच्च
30	1	चेदित्यादिसूत्रेण
30	22	वाथवा शिवम् ।
32	8	मुदा धृत्वा हृदयाब्ज
32	10	किं च स्वात्मानन्द
32	14	शान्तोपास्यः परात्परः ।
33	8	उपदेशादेतमितः
33	9	शारीरपरयोर्भेदः
34	8	संयद्वामत्वयोगतः (इति स्यात्)
34	13	सूत्रेण परमेश्वरः ।
34	16	ग्रन्थोऽप्युपनिषत्स्मृतः ।
34	21	तत्रानवस्थितेर्ब्रह्म
35	3	न च स्मार्तं प्रधानं तदतद्धर्माभिलापतः ।

पृ.	प.	वाक्यानि
37	5	ह्यक्षरं परिगीयते।
37	11	उपास्यं शुद्धमानसैः।
37	20	सर्वदा तत्स्वरूपाः
37	24	अवाप्य शुद्धः
39	6	ह्यपेक्षया
39	12	च ह्यधिकारोऽत्र
40	2	चेतने न सुनिश्चितम्।
40	7	सूच्यते तेषु नादरः।
41	15	यत्तद्येन तदाज्ञातं
41	20	लिङ्गवेदिर्महादेवी
41	21	सा च समर्चितौ
42	2	तत्राकारः श्रितो भागे
42	5	प्रणवे परमाक्षरे
42	10	समासात्स्वार्थमात्मनः।
42	15	बौद्धं यदणिमादिषु।
42	19	विद्यां तत्त्वेषु च त्रिषु।
43	17	तत्त्वेष्वपि तथा बिन्दोर्नादाच्छक्तेस्ततः परम्।
43	22	देवाच्छक्तित्रय
43	23	भुजात् साक्षात्सकल
43	24	पराद्विन्दोरर्धेन्दोश्च
44	1	ततः परान्निरोधीशान्नादा
44	8	ऐश्वर्याच्चापि मायेयात्
44	9	पराद्याद्यादपि शुद्धाध्व
44	21	तुरीयातीतमेव च।
46	5	स्वयं तत्त्वसमुत्थितम्।
46	8	उत्पत्तिं विलयं चैव
47	2	आशंक्य शब्दवत्त्वं हि
47	20	दप्रधानमिहोच्यते।
48	3	श्रुतिमात्रमिहोच्यते।
48	12	जगद्वाचित्वाच्च

पृ.	प.	वाक्यानि
50	10	अब्भक्षा वायुभक्षाश्च
50	16	अरुद्रो वाथ रुद्रो वा
51	14	वैदिकत्वं दर्शयता
51	16	व्याससूत्रैकरूप्यताम्।
51	25	दगङ्गे शिवलिङ्गं
52	15	भेदाभेद इति प्रोक्तः
52	17	कैश्चिस्वसूत्रितोऽध्यासः
53	21	यथा मन्त्रार्थवादादौ तर्को
54	1	विद्याद्यदैवं संमतं तव।
54	5	चौदनादयः
55	4	सिद्धो भेदप्रपञ्चकः।
55	8	विकृत्तिर्बाधिता सती
55	9	लक्षणाकृता
55	20	वक्तुं न शक्यते।
55	22	नेति श्रुत्या प्रपञ्चस्य
56	2	तस्माज्ज्ञानेन सूत्रेण
56	4	तथान्यत्रापि दृश्यते।
56	6	दोषप्रसक्तिरित्याद्यैः
56	9	स चेज्जीवः स्वस्य हितं
56	12	सृजत्येवेत्युदीर्यते।
56	19	सामान्यादश्माभेदे समाहिते।
56	20	व्यक्तिभेदाधीनरूप
56	22	जीवपरयोरभिव्यक्तिभिदा कृता।
56	24	सामान्यमभिन्नं व्यक्तयः
57	1	भेदाभेदावुभे इमे।
57	18	विषयस्तत्स्वरूपैक्यं
57	19	स्याद्यत्तत्कार्ये च कारणे।
58	14	मिथ्याभिदा इति
59	3	शरीरमेवात्राव्यक्तशब्देन

पृ.	प.	वाक्यानि
59	7	अविद्याया उपादानात्तया सर्वप्रकारतः।
59	16	स्वतन्त्रमीश्वराधीनाविद्यालक्षणमीरितम्।
59	18	कारेण भावतः।
59	19	वैलक्षण्यस्य चासिद्धेः।
59	25	अनारब्धव्यमेव स्यात् अजामन्त्रेऽपि तद्ग्रहे।
60	5	(1) उपात्तत्वेन तन्मन्त्रे।
		(2) शाखान्तरानुसारेण . . . . . ।
		(3) परामर्शस्य
60	20	अस्ति प्रमाणाभावेन
61	16	नैव स्मृत्या श्रुतेर्बाधो
62	12	कथमत्रोपपाद्यते।
62	21	विधिमात्रप्रमाणताम्।
62	25	प्रभृतीनां यथा पुनः।
63	10	चेदित्येवं नापलप्यताम्।
63	24	सावकाशा श्रुतिः स्मृता।
64	16	तदेकमेव बहुधा
64	22	बृहत्त्वाद्बृंहणत्वाच्च
65	5	तत्त्वं परमित्यमि
65	6	तत्रयं शाङ्करं
65	20	तदित्थमनुवर्तनात्।
65	21	तयोः कारणबाधेन
66	2	तदाज्ञापरिपालिताः।
66	7	कालः कार्यप्रपञ्चस्य
66	11	दाता भोक्ता महेश्वरः।
68	5	संस्कारैः कर्मणामपि।
68	13	नास्ति यद्यदकल्याणं तत्तदस्य
68	26	सौम्यो घोरस्तथा मिश्रः
69	1	स पुंविशेषः परमः
69	2	चेतनाचेतनान्मुक्तः

पृ.	प.	वाक्यानि
69	10	ज्ञानमप्रतिघं नित्यं
70	21	ब्रह्म द्वे विद्ये च परापरे ।
71	23	ध्याननिष्ठा उदाहृता ।
71	24	अङ्गं जीवः परं लिङ्गं
71	25	योग इत्युच्यते सद्भिः
73	13	आपोऽब्रुवन्नतो वाक्यात्
74	14	केचित्तर्का अप्रतिष्ठाप्याः
75	11	अधिकं भेदनिर्देशाद्ब्रह्मसृष्टं तु नेतरत् ।
75	14	ब्रह्मणः परिणामता ।
76	6	न तर्केण श्रुतौ यत्र
76	8	आत्मनि चैवं सूत्रेण
76	15	विकरणत्वान्नेति चेत्
77	6	श्रुतिस्मृत्युपबृंहणैः ।
77	7	आस्माकीनात्र सिद्धान्त
77	15	यद्घटाद्या मृदन्विताः ।
78	2	न जगत्कारणं ब्रह्म
78	3	न प्रधानं जगत्कर्तृ
78	6	स्थानं बाह्यं च विग्रहः ।
78	9	तथा तु क्वाप्यदर्शनात् ।
78	15	तदनैकान्तिकं सत्त्वा
78	23	व्यपेक्षायाः सत्त्वात् श्रुत्यापि
80	11	न पूरुषेऽस्ति व्यापारः
80	15	पुरुषाश्मादिवदिति
80	23	यथा कार्योपपत्तिकः
82	6	न त्वेकस्मात्संयुतं स्यात्तन्तूनां
82	15	द्व्यणुकस्थाः पुनर्गुणाः
83	19	कर्म तत्त्वनिमित्तकम् ।
83	24	न कर्मोत्पादनं स्वतः ।
84	3	तथाऽदृष्टवदाम्भ्रा

पृ.	प.	वाक्यानि
84	21	संयोगस्यान्यथा तु स्यात्
85	16	विपर्येत तथा लोके
86	4	रूपस्पर्शगुणं सूक्ष्मतरं तेजः
86	5	स्पर्शसूक्ष्मतमो वायुः
86	12	मुक्तेरुपचयश्चापचयश्चापि
87	11	मश्नुवन्तः स्थानात्तं तु
88	9	सविकल्पप्रत्ययस्तु
88	19	स्वतः सङ्घातविरहो
88	22	सर्वस्य क्षणिकत्वस्य
89	8	अन्योन्यहेतुकास्तेषां
89	19	वेदना सुखदुःखादिर्मेया
89	23	यदसाध्यानुभवः स्मृतः
90	22	सङ्घाता उत्पद्यन्ते
91	8	इदानीं नेति वक्ष्यामः
92	11	त्रयादन्यत्तु संस्कृतम् (इति स्यात्)
92	13	प्रतिसंख्यातन्निरोधा
92	14	अवस्त्वभावमात्रं तत्
92	19	प्रतिसंख्यातन्निरोध
92	21	नैव सन्तानगोचरौ।
92	22	सन्तानिनां पुनः।
93	17	मात्रमाकाशमिच्छतः।
93	22	वस्तुभूतं स्यात्
93	24	अनुस्मृतेश्च युक्तं न वैना
95	9	अनुस्यूतांशकाः पुनः
95	10	तस्मादनुपपन्नोऽय
95	16, 19	समृद्धा सस्यसम्पत्तिर्न समीहेत कश्चन। स्वर्गापवर्गयोस्तस्मान्न युक्तं तावकं मतम्॥
96	6	व्यवहारस्य संभवादिति ?
96	13	अन्यतानन्यताभ्यां च

पृ.	प.	वाक्यानि
96	15	विषये विषये च यः।
96	21	अपार्थिकावरुद्धत्वात्
97	11	चानुभवन् जनः।
97	13	र्लब्धबाह्यस्तु पूरुषः।
97	14	नोपलभेऽथ वा।
97	21	विषयत्वेनैव लब्धेर्ल
98	12	पुरस्कृत्वैव तावुभौ।
98	13	न संभवासंभवौ च
98	24	स्वाप्नप्रत्ययवज्जाग्र
99	1	स्वाप्नप्रत्ययवज्जाग्र
99	6	एवं यथायथं बाधो
99	9	मिथ्या बाधित इत्यसौ।
99	12	न स्वप्नप्रत्ययो मिथ्या ततः स्वप्नवदित्यसौ।
99	19	तत्पक्षेऽनुपलब्धितः।
99	21	नामरूपा वासनाख्याः
99	22	किं निमित्तास्तु तद्वद।
100	4	यद्यप्यालयविज्ञानं
100	9	निमित्तादिसापेक्षा
100	12	हानिरापतति ध्रुवम्।
100	16	पूर्वक्षणनिरोधादीत्येव
101	5	तत्पुद्गलास्ति।
101		अथाधर्मास्तिकायश्च तथाऽऽकाशास्तिकायकः।
101	6	तत्रावान्तरभेदेन बहुधा परिकल्पितान्।
102	1	श्रेयोविरोधि यस्मात्तत्
102	5	अव्याकृतं ततोत्पाद्यं
102	8	अघातिकर्माणि शुक्ल
102	14	जीव एवास्ति कायकः।
102	18	पुद्गलं वस्तु पचितं
103	1	सप्तभङ्गीनं न्यायर्थं

पु.	प.	वाक्यानि
103	17	अन्त्यमोक्षा . . . . . । आद्यस्य मध्यमस्यापि परिणामस्य नित्यजा।
103	18	शरीर . . . . . ।
104	20	निमित्तं त्वीश्वरस्त्विति
105	6	स्वार्थवत्त्वादनीशत्वं
105	10	अधिष्ठानासङ्गतेश्च चैवं
105	15	पाञ्चरात्रं मतम
106	7	कारणस्य तु
106	21	तावदस्थिरमेव स्यादिति न्यायात्स्वकं मतम्।
107	3	समानोऽयं विरोधादन
108	1	मृज्ज्ञानेन घटज्ञानं
108	10	वियतः प्रागभावस्याभावात्तत्र सङ्गतम्।
108	15	तस्य, श्रुतेर्गौणत्व
109	13	लिङ्गतश्च चेत् (इति स्यात्)
109	14	उक्तरीतिर्नाविशेषात्
109	17	न चोत्पत्तिः स्वरूपेण
109	21	चराचरोत्पत्तिव्यपाश्रयः (इति स्यात्)
110	11	ज्ञाता किं वेति संशयः।
110	13	ज्ञातैव ह्यथ यो वेदेदं जिघ्राणीति वाक्यतः।
110	21	लोकान्तरायगमनं
110	23	न भूतैः करणैर्वृतः।
111	2	स वा एष महान्वाक्यात्
111	9	सर्वदेहगतां कथम्।
111	12	चैतन्यगुणयोगतः।
111	18	मणिप्रदीपादिकानां प्रभाव्यासथा यथाखिलम्।
111	22	प्रभा दीपगुणो नेयं
112	9	मिति गन्धो मयेति न।
112	10	तथाभावाद्यथाज्ञानं
112	17	पृथक्त्वोपदेशश्च
112	23	शब्दात्तद्बोध्यक्ति

पृ.	प.	वाक्यानि
113	7	सम्यगेवाथ साधितम्।
113	18	मिति प्राप्ते तथोच्यते।
114	1	अनाधेयातिशयवत्त्वस्यासि
114	11	क्रियाया व्यपदेशतः।
114	21	त्यजेत्कारणशक्तिताम्।
115	10	न हन्तव्य इत्येवं समुपात्तयोः।
115	14	यथा वह्नेर्विस्फुलिङ्गाः
116	3	परः प्रकाशादिवच्च स्वस्वरूपविशेषवत्।
116	5	मुत्तरेण स्फुटार्थतः।
116	17	सर्वदेहयोगाद्विशेषतः।
117	20	तत्प्राक्श्रुतेश्च गौण्येव
118	1	स्थितेऽतो नैव मन्तव्यं
118	4	शरीरात्ते बिलादहिरिव
118	5	तच्छ्रेष्ठः पञ्चवृत्तिश्च
119	20	भूमेर्वीह्यादिरूपायाः मांसाद्यध्यात्मकार्यकम्।
119	21	तथैवास्थ्यादि तेजसः
121	8	संसारस्य प्रकारश्च
121	9	तथा विद्याभेदाभेदौ
121	13	मुक्तिरुपफलस्याप्यनियमः (इति स्यात्)
121	16	गतिभेदश्च संसृतेः
122	3	प्रश्नाद्वेत्यादिवाक्योत्थात्
123	3	इति चेन्नेष्टापूर्तादि
123	20	सुकृतदुष्कृते।
124	3	इष्टादिकारिणां चैव
124	5	दुःखमप्यनुभूय तु
124	12	दुष्कृत्यभोगभूत्वेन
124	21	वेत्थ यथासौ लोको
125	17	भूतजाते (इति स्यात्)
125	20	यमः (नियम इत्यर्थः)

पृ.	प.	वाक्यानि
126	18	यथा कर्मसंकीर्तन
127	6	तत्तद्भावाद्यमानान्नानुशयी प्रतिपद्यते ।
		(तद्भावमद्यमानान्नानु (गतो) नुशयी प्रतिपद्यते इत्यर्थः)
127	16	उपक्रम्य स यत्र प्रस्वपिती
128	13	सूचकश्च हि वेदोक्तेः
128	20	सुषुप्तिरिति कथ्यते ।
128	21	सृप्तो नाडीष्वितीरितम् ।
129	2	सता सोम्येति सम्पत्तिस्तदेति समुदीरितम् ।
129	5	सुप्तं समुचितेषु स्यात्
129	7	इतिवच्छेतेऽसौ तु पुरीततौ ।
129	10	यतः समुचितं स्थानं
129	19	चतस्रश्चाप्यवस्थकाः
130	16	पृथ्व्याद्योपाधियोगतः ।
131	21	मूर्तं च दृश्यते तत्र
132	1	न विप्रकृष्टदेशाश्च
132	7	जलवृद्धौ प्रवर्धते ।
132	12	तद्धर्मान्वजतीहापि
132	19	श्रुतिर्ब्रवीति हि ब्रह्म
132	21	श्रुतिरव्यक्तमाह न चक्षुषेति स्मरन्ति च ।
133	9	नाभेदे तस्य मुख्यत्वात्
133	10	स्यामिति बाधतः ।
133	12	भवेदभिधायामतः खलु ।
134	1	अविरुद्धं न चैवेदं
134	8	ब्रह्म ज्ञानगुणं स्मृतम् ।
135	8	उन्मानव्यपदेशादि
135	11	तस्य भेदोऽपि व्यपदिश्यते ।
135	18	अनेन सर्वगतताऽऽयामशब्दादिकश्रुतेः ।
136	8	स चापूर्वाख्यव्यापारद्वारा कर्मफलप्रदः ।
136	9	ईश्वरस्य त्वैकरूप्याद्वैषम्यं निर्घृणा भवेत् ।
		कर्मवैचित्र्यस्तत्र

पृ.	प.	वाक्यानि
136	20	विज्ञेयमित्यादिवाक्यं तृतीयपादादौ योजनीयम्।
137	15	समाचारे तथाश्रुतेः।
137	18	वेद्यैकत्वोपदेशतः।
138	14	अस्तिकाठकसंज्ञैक्य
138	15	ह्युद्गीथस्तद्विशेषणम्।
139	18	श्रुतिर्दर्शयति स्वयम्।
140	5	धर्मास्ते इतरत्र ये।
140	13	अस्त्यश्व इव रोमाणि रूपेयं
141	2	तच्छेषत्वाद्धानवाक्य
141	5	छन्दस्तुत्युपगानादि
141	10	विदुषां छन्दतश्चोभयाविरोधात्तथैव च।
141	14	अनर्थिका गतिस्तर्हि सा कल्प्या
141	21	विज्ञानानां च सर्वेषां देवयानाङ्गता मता।
142	2	शुक्लकृष्णे गती ह्येते
142	9	अध्वर्योर्योग उच्यते (इति स्यात्)
142	14	सुपर्णा इत्यादिमन्त्रतः।
142	22	भेदासङ्गतिरत्र चेत्।
142	24	हीतरे तु गुणा इति।
143	7	अलोप आदराज्ज्ञेयो
143	8	उपस्थितेऽतस्तद्वचनात्
144	12	तस्मात्ते देहधर्माः स्युः
144	15	व्यतिरेकस्तु तद्भावाभावा
144	22	समस्तस्यैव भूम्नश्चो
145	3	विकल्पो न्याय्य एव हि।
145	16	वेदान्तजन्येत्यादिवाक्यं चतुर्थपदादौ योजनीयम्।
146	20	तुल्यं तु दर्शनं विद्याङ्गत्वेनापि च कर्मणः।
146	21	कर्माङ्गत्वं न तावता।
147	14	सत्यं कर्मावबोधस्तु ?
147	19	न काम्यमविशेषतः।

पृ.	प.	वाक्यानि
148	7	धर्मस्कन्धास्त्रयो यज्ञो (इति स्यात्)
148	9	तृतीयोऽत्यन्तमात्मानं
148	11	ब्रह्मसंस्थोऽमृतत्वं च
148	18	गार्हस्थ्यं समनुष्ठेयं
150	14	पारिप्लवार्था नैवेति सम्यगेव सुनिश्चितम्।
151	12	विद्याङ्गं वोत स्तुत्यर्थं
151	18	सामान्यविशेषोद्भाव
152	11	जीवितात्ययमापन्नो योऽन्नं
152	14	शब्दश्रातोऽकाम
152	22	तेषां विद्याङ्गता त एवोभयलिङ्गत्वात् सर्वथापीति निश्चय:
152	23	ब्रह्मचर्यादिसम्पन्ने क्लेशानभिभवश्रुतेः।
153	4	विद्याया संभवेत्पुनः।
153	15	उपपूर्वमपि त्वेके
153	16	संस्कार अभावस्तद्वदुच्यते।
153	21	एवं वृष्टौ पञ्चविधं
154	7	पक्षेण तु तृतीयं तद्वतो विध्यादिवत्पुनः
154	15	प्रस्तुताप्रतिबन्धे
155	1	श्रुत्या चाथ सम्पत्स्य इत्यपि।
155	16	(मुक्तमोक्षयोः स्वरूपम्) प्रकृत्याद्यष्टबन्धेन बद्धो जीव: स उच्यते।
155	17	प्रकृत्याद्यष्टबन्धेन
155	22	पञ्चतन्मात्रमित्येते प्रकृत्याद्यष्टकं विदुः।
156	4	स्थूलं व्यापारदं प्रोक्तं
156	5	जीवकर्मानुसारत:।
156	21	षण्मानसैश्वर्यमवैति वेदः।
157	5	पूजया तु महेशा हि प्रकृतौ परम: शिव:।
157	8	कर्मारभ्य प्रकृत्यन्तं
157	21	तत्सार्ष्टिरिति कथ्यते
157	24	शिवस्य मानसैश्वर्यं

पृ.	प.	वाक्यानि
158	22	पौरुषप्रकृतीभूतलिङ्गानि सुबहूनि च।
159	12	सुवर्णे च तटाकादौ पृथिव्यां स्थण्डिलेऽपि वा।
160	3	महद्भिः शैवशास्त्रज्ञैः
160	12	अणिमाद्यष्टसिद्धिदम्।
160	13	सूत्रीधनादिविजयं
160	14	यावद्विश्वस्यते (इदमर्धमधिकम्)
160	16	रसलिङ्गं ब्राह्मणानाम्
160	18	महाधनपतिप्रदम्।
160	19	शिलालिङ्गं तु शूद्राणां
161	6	विभूत्याभ्यर्चनं कुर्यात्
161	9	लोकाग्निजमथो भस्म
161	10	धान्यानन्यांस्तथैव च ?
162	2	जग्ध्वा सारं भजन्ति वै
162	6	प्रपञ्चस्य दग्ध्वा सारं
162	15	भवृध्या सर्वमेतद्धि
162	16	प्रपञ्चसारसर्वस्व
163	25	जातः पुत्रो मन्त्रपुत्रः
164	18	कर्तव्यं शिवमिच्छता।
165	4	मत्स्वरूपोऽर्पितो
165	5	नानासस्यदहन्तेति
165	6	न मोहं हि स्वदेहेन मो महान् त्वमसि प्रभो।
165	17	जननं मननं द्वन्द्वं माया
166	3	शिवस्यातिप्रियं विद्यात्
166	4	प्रदक्षिणनमस्कारः
166	5	कृतपूजाफलप्रदा।
166	7	सर्वपापं विनाशयेत्।
166	9	सत्यादिगुणसंयुतः।
166	19	जीवहिंसादिरहित
166	21	भिक्षान्नं ज्ञानदं भवेत्।

पृ.	प.	वाक्यानि
167	7	स्थाणुलिङ्गाश्रयेणैव स्थाणुर्भवति भासुरः।
167	8	यच्छ्रुतं तु मया पुरा।
168	6	तत्र साधनशेषकम्।
168	8	तत्र ब्रह्मविदा श्रुतिः।
168	10	प्रत्ययः किं सकृत्कार्यो असकृद्वा
168	17	श्रुतिभिर्बहुभिः पुनः।
169	3	विद्युपास्त्योश्च वेदान्त
169	6	चोपास्तिना क्रमः।
170	6	सम्पूज्य मुमुक्षुभिः
171	1	लिङ्गावृत्तिस्तदुच्यते।
171	5	असतो लिङ्गरूपिणः।
172	9	बध्नीयान्नात्मबुद्धिताम्।
172	12	ब्रह्मभेदप्रतीकानां
172	14	ब्रह्माभेदेऽप्यत्र परस्परम्।
172	22	आसीने संभवात् कर्मा
174	18	अतश्च दर्शनाद्वाचि
175	4	स च प्राणेन सम्प्रोक्तो
175	14	तथोपलब्धेर्निर्गच्छन्
176	3	सम्यग्भूतानि पश्यतः।
176	4	देवा अपि मार्गे मुह्यन्ति अपदस्य पदैषिणः।
176	14	स एता इति वाक्यतः।
177	8	असुसूत्रदयं व्यासः
177	19	विप्र वेदान्तवित्तम।
177	21	इमे पङ्क्ती अधिके
177	22	
178	3	मनुष्याः पापकर्मिणः।
178	5	मनुष्याः पापकर्मिणः।
178	7	मनुष्याः पापकर्मिणः।
178	9	मनुष्याः पापकर्मिणः।

पृ.	प.	वाक्यानि
178	11	मनुष्याः पापकर्मिणः ।
178	13	मनुष्याः पापकर्मिणः ।
178	15	मनुष्याः पापकर्मिणः ।
178	17	मनुष्याः पापकर्मिणः ।
178	19	मनुष्याः पापकर्मिणः ।
178	21	मनुष्याः पापकर्मिणः ।
178	23	मनुष्याः पापकर्मिणः ।
178	25	मनुष्याः पापकर्मिणः ।
179	1	मनुष्याः पापकर्मिणः ।
179	4	वेदमर्यादाभेदनं तथा ।
179	5	मनुष्याः पापकर्मिणः ।
179	12	तत्प्रतीतिः श्रुतौ दृष्टा
179	19	श्रूयमाणा अर्चिराद्या मार्गचिह्नानि वै पुनः ।
180	6	व्यपदेशोऽत्र तत्र हि
180	14	हि क्वादिके तथा ।
180	21	तथैव भवतीत्यादि
181	4	एवमेवैष वाक्येन
182	6	देहव्यापारकेऽपि च
182	13	मुक्तस्यानेकवर्त्मसु ।
183	10	न तज्जगद्व्यापारे तु
183	21	एवं च व्याससूत्राणा
184	6	वासनाभाव (इदं वाक्यं नास्ति)
184	12	स पुनस्तत्प्रधानेन
185	10	विजाताः ज्ञानशक्तयः
185	11	स्वकारणैक्यमायाख्याविद्यया
185	14	विजाताः कृतिशक्तयः
185	19	तथा शब्दादिरूपस्थाः
185	23	प्राणापानादिभेदेन
186	1	साम्बश्च (मातृकायां न दृश्यते)

पृ.	प.	वाक्यानि
186	2	रुद्रेण च (मातृकायां न दृश्यते)
186	9	तस्य देवस्य साम्बस्य ब्रह्मणा विष्णुनापि च। रुद्रेण च स्मृतिः सर्वैः क्रियते तन्निरन्तरम्
186	22	ज्ञेयत्वेनैव चोच्यन्ते
186	23	तच्च तद्रूपतस्तासां
188	24	तथा स्मृतिपुराणानि
189	9	मूर्त्या तस्य परं पदम्।
191	23	अश्रौतधर्म (इदमधिकम्)
192	23	धारयेद्भस्मनैव तु
193	14	द्वेषः शर्वे वा जगतां पतौ।
195	10	वर्त्मना मुदा।
196	8	परमात्मोपदेशतः।
196	24	नहीत्यादि 197=1 पतिः। इत्यन्तमधिकम्
197	6	मिथ्याभेद एव तत्राभिहितः।
197	17	स्वविषयादन्यत्राप्रतिष्ठितः।
197	18	अत इदमयुक्तं, यत्पुनः
197	19	बाधनं श्रुतेः। कः पुनः प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इति, अत्रोच्यते।
198	2	प्रसज्येत
198	7	दीनामितरेतरभाव उपलभ्यते
199	23	स्वरूपवैचित्र्यं कार्यवैचित्र्यं च
200	3	प्रतियोगिकभेदाभाव
200	3	वैडूर्यावच्छिन्नप्रतियोगिक
200	7	जीवाभेददृष्टिः सूत्रिता
200	22	इति भेदनिषेधस्य चेतन
200	23	विरुद्धधर्मवत्त्वस्य
201	9	इति मन्त्रे रथत्वेन
201	11	कथमव्यक्तत्वमित्या
201	17	पूर्वसूत्रेऽव्यक्तशब्देन

पृ.	प.	वाक्यानि
201	23	इत्यर्थानां परत्वमेवमात्मप्रवृत्तेः
202	4	देवात्मशक्तिं
202	5	चेश्वराधीनताया एव प्रवृत्तेः
202	13	मधुत्वकल्पनमेवमनजायाः
202	15	संभवदुक्तिकत्वात् । तस्मात्तेजोऽबन्नलक्षणप्रकृतिव्यक्ति
203	3	एवंविधतर्कस्यावकाशः । श्रुत्येकसमधिगम्ये तु
203	6	परिणमतेऽथ न स्वरूपं
203	14	गत्यादिरिव (रेव)?
203	22	कार्यान्वयिनः (इति भवितव्यम्)
206	13	तेन रूपेण प्रतिपाद्यता परं निषिद्ध्यते न स्वरूपेणेत्ति वाच्यम् । एवं हीश्वरत्वस्यौपाधिकत्वात्
206	19	प्रतिपाद्यते अन्तस्तद्धर्मोपदेशात्
207	1	इत्यादिना
207	2	स्वरूपैक्यं शास्त्रतात्पर्यविषयः । नापीदं प्रयोजनम् ; जगद्व्यापार
207	12	सूक्ष्मचिदचित्प्रपञ्च उपादानमिति
207	20	तत्तन्मात्रत्वनिषेधेन
208	7	इति चेन्नाविशेषात्
208	11	स्तुत्यादिद्वारा, एवं "अथ याज्ञवल्क्यस्य
209	8	निषेधः । न हि यत्र यस्य त्रैकालिकनिषेधस्तत्रैव
209	19	ब्रह्मणः संभवति, ब्रह्मणि मानान्तराप्रवृत्तेः ।
209	23	इति मनसो वेद्यत्वमुच्यते
210	1	एष श्लोको भवति
210	4	इति मनसोऽगम्यत्वेन
210	19	सर्वसम्प्रतिपन्ना, 'इति प्राचीन
210	22	इयं पठ्येत, न च पठ्यते । तस्मादु
211	7	तदनृतमुच्यते । तथाहि एकं
211	20	स असच्चपुरुषार्थभाग्भवति
212	1	दात्तश्राधीयते

पृ.	प.	वाक्यानि
212	8	वस्तु अन्तवदित्युच्यते ।
212	12	सर्वात्मत्वेन ब्रह्म विद्यादिति ।
212	19	कारणाभिन्नत्वं सूत्रितम् ।
212	20	कार्यस्यासत्त्वं मिथ्या
213	1	असत्वे पुनः कार्यस्य कथं कारणविज्ञाने
213	19	मृदात्मतां विनान्यत्र
213	22	विनान्यत्र सत्वाभावः अत्यन्तासत्वेनाप्युपपद्यते
214	6	तमिमं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्त्रादिकं
214	17	न चाभेदसत्यत्वाद्भेदस्यासत्यत्वापत्तिः ।
214	20	अत्यन्ततदभिन्नत्वेनाभेदासत्व
214	22	न तु भेदासत्त्वम् ।
214	23	घटस्यासत्त्वं तदा
215	1	अथ तद्व्यतिरिक्ता किं तन्मृदि विद्यते न वा। न चेत् कथं घट इति प्रत्यक्षा प्रतीतिः। प्रत्यक्षे—
215	13	त्येतदपि नानिष्टम् ।
215	15	एतावता मिथ्यात्वमुच्यते चेत् तत्काममुच्यताम् ।
216	8	प्रत्युपाध्यभेदस्यैव
216	18	नापि नेति नेतिवाक्येन
217	1	तस्यायमर्थः—नेत्यादिष्टादेतस्मात्
217	4	निराकरणेन भेद एव प्रतिपाद्यत
217	12	असूत्रितं चेति सिद्धम् ।
217	13	कार्याभावोऽनन्यत्वशब्दार्थः ।
217	20	उपपद्यते। स हि .....तत्समूहा वा।
217	21	तेषु स्थूलादिवत्प्रतिभासापत्तेः। परमाण्वाभासज्ञानानुपपत्तेश्च ।
218	1	मित्यादि, नासौ ज्ञानगतं
218	5	ग्राह्यग्राहकाकारा भवन्ति, एवं जागरितगोचरा अपि स्तम्भादिप्रत्यया: भवितुमर्हन्ति।
218	9	बाह्यार्थस्याभ्युपगन्तुं युक्तम् ।
218	12	स्वयमनुभूयमानायां ब्रूयात् नाहं भुञ्जे न तृप्यामीति

पृ.	प.	वाक्यानि
218	15	स्यात । ननु नाहमेवं
218	17	निरङ्कुशत्वात्ते तुण्डस्य
218	18	उपलब्धिव्यतिरेकोऽपि बलादर्थस्याभ्युपगन्तव्यः
218	19	स्तम्भे कुड्यं वेत्युपलभते
218	20	उक्तः, (नायं साधुः, यतः) प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वको।
219	8	बाधौ। बाध्यते हि
219	9	महाजनसमागम इति
219	11	भवति यथायथं बाधः
219	17	उभयोरन्तरं स्वयमनुभवता
220	1	व्यावहारिकसत्यत्वमेवोक्त
220	6	त्वादपारमार्थिकत्वं, किं वा
220	12	न हीदं वाक्यं विद्यादशायां
220	23	मात्राभिः भूतमात्राभिः प्रज्ञामात्राभिश्च सविषयै
220	24	ब्रह्मणा संसर्गो
221	1	देवतायाम् । एवमेते प्राणा अभिसमायन्ति
221	3	यत्रैष चाक्षुषः
221	4	पराङ्पर्यावर्तते
221	6	वचनात् '' इत्यन्तेन ग्राहकेन्द्रिय
221	8	त्वगेकायतनम् । ता वा एता दशैव
221	9	यदि भूतमात्रा न स्युः
221	10	यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युः।
222	2	ज्ञानाभावनिमित्तत्व
222	6	द्वैतमेव भवति । इव शब्दः
222	10	मात्मैवाभूत । पूर्वोक्तेन मार्गेण सर्वोपादानतया सर्वा-भिन्नेन
223	11	किमवस्था..... .....भिन्नाः, ...मभिन्नाः, ...भिन्नाभिन्नाः।
224	18	जीवस्य ज्ञानगुणकत्वेन ज्ञाना
224	20	मिदं प्रवृत्तमिति।

पु.	प.	वाक्यानि
225	12	व्यापिकार्यकरत्वमिति।
227	13	प्रबोधादावभिव्यक्तिरिति।
229	6	स्वप्न एव गृह्यते।
229	7	स्त्रीपुत्रादिभिः
229	7	संचरणं कृत्वा
229	8	येनैव मार्गेण यस्माद्देहान्निर्गतस्तेनैव मार्गेण मनुष्यादि-देहभावमागच्छति स्वप्नायैव। स यत्तत्र पूर्वस्मिन्स्वप्ने पुण्यं पापं वा कर्म पश्यति,
229	15	प्रतिन्यायं प्रतियोन्याद्रवति
229	18	तदा सासङ्गेन कृतं कर्म
229	22	नास्त्येव स्वप्ने कामः
229	23	असिद्धो हेतुरिति?
230	1	न न सिद्धोऽयमुच्यते।
230	6	भानं रथादिभानवत् जाग्रत्कालीनकामनाविषयं मन्तव्यम्
230	9	भानात् " यानि ह्येव जाग्रत्पश्यति तानि सुप्त
230	12	रत्वा चरित्वा
230	12	प्रतियोन्याद्रवति
230	14	न चान्तःकरणगत एव जागरित इति शंक्यम्
230	21	तदप्युक्तं तैरेव
231	23	कामादीतरत्र तत्र च
232	4	हृदयायतनत्वसेतुत्व
233	8	इत्यादिना ज्ञानादिकं ब्रह्मणः
233	16	स्वरूपत्वेऽपि चैतन्यस्य विषयो
233	17	सृष्टिकारणीभूतेक्षणकाले
234	2	पदं स्यात्, संज्ञानं विज्ञानं प्रज्ञानमित्यादिवत्, अन्तोदात्तं चाधीयते
234	7	तस्माद्ब्रह्मणो निर्गुणत्वाभावात्
234	8	विभागकल्पनमयुक्तमेव।
234	13	कारणोपकारकत्वस्य सिद्धये

पृ.	प.	वाक्यानि
234	23	मुच्यते तमेतं वेदानुवचनेनेत्यादि । अत्र वेदानुवचन
234	25	न तु वेदाध्ययनं, वेदाध्ययनस्य अप्रमाणत्वेन प्रमाणाकाङ्क्षाऽनि
235	5	केचित्तु एतं प्राप्तं
238	10	क्षीयत इत्यनात्मविदा
238	14	कथमक्षय्यत्वप्रतिपादन
238	14	क्रियासूक्ष्मावस्था
238	21	प्राप्तिरुच्येत । तथा 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इति कस्य वा ज्ञानेन विनाशः अश्लेषश्चोच्येत। क्रियायास्तत्क्षण एव नष्टत्वात् । कस्य वा 'सुहृदः साधुकृत्याम्' इत्यादिना उपायनमुच्येत । नन्वमूर्त—
238	24	शास्त्रेणैवावगन्तव्यः । न तर्केण
239	8	'तद्यथेह कर्मचित' इत्यादि
239	13	दहराधिकरणे दहर
239	14	तस्मात्कर्मसाध्यत्वेऽपि मोक्षस्य कर्मणोऽक्षय्यत्व
239	21	प्रतिपाद्यते—'तद्यथानः सुसमाहितमुत्सर्जेद्यायात् एवमेवायं शारीर आत्मा
240	5	षष्ठाध्याये 'एवमेवेह
240	16	'तदापीतेः संसार
240	18	स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः
240	19	मुक्त्वाभिधानेन
240	25	उष्णस्पर्शस्य लिङ्गशरीरा
241	6	प्राणानां शरीरात् , किं तु शारीरादात्मनः
241	9	प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही गृह्यते न देहः।
241	21	तस्या विद्याफलत्वाभिधानात् ।
242	4	न च तस्य शरीरादु
244	9	जीवस्यामृतत्वे मृतिव्यवहारो
245	3	अणुः पन्था देवयानः
245	17	शरीरापादानक एव

पृ.	प.	वाक्यानि
245	24	देवा अपि मार्गे मुह्यन्ति
246	2	परमपदप्रेप्सो
246	5	प्रतिषेधस्य जीवापादानकोत्क्रान्तिविरहाभिधानं सूत्र
246	9	मार्गाभावाभिधानं
246	14	इति परमात्ममहितस्वविशेष
247	2	निषेधप्रसङ्गादन्यविशेषणमपि
247	8	कष्टजुगुप्सितव्यंतृतीय
247	13	भवति तथेत: प्रेत्य भवति
248	17	सत्यसंकल्पत्वाच्च शब्दोक्ताया: 'स स्वराड्भवति"
248	24	मुक्तस्य शरीराभावप्रतीते: शरीरं नास्तीति बादरायण-मतमुक्त्वा 'भावं जैमिनि
249	6	'यस्य त्वशरीरत्वसंकल्पस्तस्याशरीरत्वमिति
249	8	विद्याभेदेन पक्षद्वयस्यापि
249	19	तैरस्यैवाध्यायत्रयस्याप्येक
250	7	यावता 'तत्केन किं विजानीयात्
250	8	नीयात्, 'सलिल एको द्रष्टा
250	9	इत्येवंजातीयका श्रुतिर्विशेषवि
250	11	विशेषविज्ञानाभाववचनं
250	24	संस्कारश्च साधननिवेशी न व्रीहीणामिव
251	7	सर्वग्रहसंमार्गवत्
251	11	पुरुषार्थद्वारत्वोपपत्ते:
251	14	यत्र त्वदृष्टद्वारासंभवस्तत्र
251	15	चाध्ययनविधेरर्थावबोध
251	18	तत्र कर्मकाण्डस्य
252	6	विद्या विदिता
252	15	तेषामपि मते क्रतु
252	23	युक्त एव। अपि चो

पृ.	प.	वाक्यानि
253	14	पूर्वतन्त्रे विचारितत्वा
253	15	वेदार्थस्य विचारितत्वासिद्धिः
254	6	जीवब्रह्मशब्देन शब्दितम्
254	18	व्याचष्टौ विमला ?
254	24	समध्याप्य यः

WD 3501—GBPM—1,000—31-10-1957